Samskrit for Specific Purpose Series - 3

गीतायाः भाषा

संस्कृतं पठ्यताम्

चतुर्थः भागः - ३



Learn Samskrit

THE LANGUAGE OF GITA

Part - 4.3

संस्कृतसंवर्धनप्रतिष्ठानम्

Samskrit for Specific Purpose Series - 3

गीतायाः भाषा

संस्कृतं पठ्यताम्

चतुर्थः भागः - ३

Learn Samskrit

THE LANGUAGE OF GITA

PART - 4.3

ONGC-CSR Supported Project of
Samskrit Promotion Foundation

संस्कृतसंवर्धनप्रतिष्ठानम्
देहली

प्रकाशनम्
संस्कृतसंवर्धनप्रतिष्ठानम्
११२०४/५, वेदभवनम्, गौशालामार्गः
देहली - ११०००६

© प्रकाशकस्य एव

प्रथममुद्रणम् - २०१७
द्वितीयमुद्रणम् - २०२१

मुद्रणम्
प्रिन्टैक इन्टरनेशनल
ए-६/डी, झिलमिल इंडस्ट्रियल एरिया,
दिल्ली - ११००९५

परामर्शसमितिः

डॉ. चान्दकिरणसलूजा
चमूकृष्णशास्त्री (पद्मश्रीः)
डॉ. विश्वासः

लेखकाः

आचार्य अनूप शर्मा
अश्विनी राजेश लङ्के
सौ. श्रद्धा उपाध्ये
श्रीदेव झा

ISBN -978-81-944709-5-3

Learn Samskrit - THE LANGUAGE OF GITA (PART - 4.3)
Fourth level text book to learn Samskrit through Gita.

Publisher - Samskrit Promotion Foundation
11204/5, Vedabhavanam, Gaushala Marg, Delhi-110006
Email: info@samskritpromotion.in
Pages - 6+338
Second Print - 2021
Printed at : Printech International
A-6/D, Jhilmil Industrial Area, Delhi-110095

Preface

The richness and vibrance of the Samskrit language is a fact acknowledged by scholars and intellectuals across the world. Over millennia, Samskrit has been the principal vehicle of the knowledge traditions and practices of Bharat, or India. This continuum of the language not only helped create innumerable branches of knowledge, but also resulted in an unmatched corpus of classical texts in every conceivable domain of human endeavor, thus laying the very foundations for the development and spectacular rise of the Bharatiya civilization.

However, in recent centuries, Samskrit became tagged as just a 'religious language', an impression that remains in the minds of many people throughout the world even to this day. This situation is due to several reasons: (१) while our day-to-day affairs were in our individual 'mother tongue', Samskrit remained restricted to the conduct of our religious ceremonies and programs; (२) over the last two centuries or so, there were concerted efforts to alienate Samskrit from our mainstream education; and (३) for a long time, there has been a deliberate campaign of disinformation regarding Samskrit, either because of ignorance or because of ulterior motives.

The truth is simple: Samskrit is the unparalled medium, the original language that has articulated all knowledge and wisdom in our region since eternity. The language of science and medicine has been Samskrit. The language of literature has been Samskrit. The language of philosophy and religion has been Samskrit. The language of the arts and music has been Samskrit. It is no wonder that mankind's first astronomical observations were recorded in Samskrit. Again, Samskrit is the only language that truly reveals the secrets of Yoga or Ayurveda.

Yet, we are confronted today with a peculiar situation. While there are countless works in Samskrit on a wide range of subjects, innumerable original works still remain unpublished. To make matters worse, even the published Samskrit literature is seen and studied only through the lens of religion. In order to bridge the disconnect between Samskrit and modern times, the need of the hour is the editing and publishing of ancient Samskrit texts, knowledge retrieval and dissemination, and research and re-interpretation. All this in Samskrit itself --- not in translation, as the essence can easily be lost. The challenges for Bharat are major, but shouldering the responsibilites would not only be life-fulfilling, but also offer our younger generation bright career opportunities and a great future in Samskrit studies.

Today, adult beginners of Samskrit are learning the language for specific purposes: e.g., to access the original texts on Yoga, Ayurveda, Vedanta, as well as the eternal repositories of wisdom such as the Arthashastra, the Vedas, the Upanishads, the Bhagavad-Gita. The vocabulary, verbal repertoire, syntax, semantics, etc., of every discipline differ from one to the other.

With such specific requirements, many modern-day learners find that the conventional language-centered approach is a roundabout route to accessing their information needs. This new Samskrit for Specific Purpose (SSP) series is uniquely tailored for them, offering a more focused methodology. Unlike the traditionally available Samskrit learning materials or courses, this SSP series is uniquely designed to facilitate the study of the target language through the target subject, and the study of the target subject through the target language.

The SSP series can be useful for all irrespective of age groups and occupations for both self-learning and classroom teaching. The SSP series course books herald a new era in Samskrit learning/education, and are supplemented with audio, video and e-learning modules. The approach of 'Samskrit through Samskrit' is extremely crucial. You can, and will, easily learn Samskrit directly, without the crutch of, say, English. Thus, in the broader context, Samskrit through Samskrit (STS) and Samskrit for Specific Purpose (SSP) will together provide a highly effective learning platform for even first-time learners.

In conclusion, a brief word of advice: although learners may feel, at the outset, that their intention to learn Samskrit is only to read and understand the target subject, they must keep in mind that sound/speech (listening and speaking) is the primary medium of a language. The practice of listening and speaking should precede the practice of the reading and writing.

The SSP series is designed to introduce Samskrit through simple conversations, to make learning both interesting and meaningful, followed with graded lessons. The series will not only make learners function adequately in Samskrit, but will also enable them eventually to read, comprehend and undertake studies in Samskrit in their specific interest area at a higher level.

SPF acknowledges and thanks Dr. H R Vishwasa, Mangalore for his guidance and advice in preparation of books of Bhagavad Gita Series.

अनुक्रमणिका

क्र०	अध्यायः	अध्यायनाम	पृष्ठसंख्या
१.	अथ नवमोऽध्यायः	राजविद्याराजगुह्ययोगः	१
२.	अथ दशमोऽध्यायः	विभूतियोगः	६१
३.	अथ एकादशोऽध्यायः	विश्वरूपदर्शनयोगः	१२८
४.	अथ द्वादशोऽध्यायः	भक्तियोगः	२३२
५.	अथ त्रयोदशोऽध्यायः	क्षेत्रक्षेत्रज्ञविभागयोगः	२६६
६.	सम्पूर्ण-श्रीमद्भगवद्गीतायाः अकारादिक्रमेण पादानुक्रमणिका		३१७

सङ्केताक्षरसूची

अ.	अकारान्तः	र.	रकारान्तः (रेफान्तः)
आ.	आकारान्तः	म.	मकारान्तः
इ.	इकारान्तः	न.	नकारान्तः
ई.	ईकारान्तः	ध.	धकारान्तः
उ.	उकारान्तः	ज.	जकारान्तः
ऊ.	ऊकारान्तः	द.	दकारान्तः
ऋ.	ऋकारान्तः	चका.	चकारान्तः
ओ.	ओकारान्तः	त.	तकारान्तः
पुं.	पुंलिङ्गः	प.	पकारान्तः
नपुं.	नपुंसकलिङ्गः	श.	शकारान्तः
स्त्री.	स्त्रीलिङ्गः	सका.	सकारान्तः
प्र.	प्रथमा विभक्तिः	आत्म.	आत्मनेपदम्
द्वि.	द्वितीया विभक्तिः	पर.	परस्मैपदम्

तृ.	तृतीया विभक्तिः	लट्.	लट् लकारः
च.	चतुर्थी विभक्तिः	लिट्.	लिट् लकारः
पं.	पञ्चमी विभक्तिः	लोट्.	लोट् लकारः
ष.	षष्ठी विभक्तिः	लङ्.	लङ् लकारः
स.	सप्तमी विभक्तिः	विधिलिङ्.	विधिलिङ् लकारः
सम्बो.	सम्बोधनम्	लुङ्.	लुङ् लकारः
एक.	एकवचनम्	लृङ्.	लृङ् लकारः
द्विव.	द्विवचनम्	प्रपु.	प्रथमपुरुषः
बहु.	बहुवचनम्	मपु.	मध्यमपुरुषः
सर्व.	सर्वनामपदम्	उपु.	उत्तमपुरुषः
ह.	हकारान्तः	क्रियावि.	क्रियाविशेषणम्
व.	वकारान्तः		
ऽ	एतस्य नाम अवग्रहचिह्नम्, अकारं दर्शयितुम् एतत् चिह्नं स्थापितम् अस्ति ।		

उपसर्गाः

प्र	परा	अप	सम्	अनु	अव
निस्	निर्	दुस्	दुर्	वि	आङ्
नि	अधि	अपि	अति	सु	उद्
अभि	प्रति	परि	उप		

एते उपसर्गाः सन्ति । एतेषां प्रयोगः सर्वदा धातोः आदौ भवति ।
पदपरिचये व्याकरणांशे वा 'प्र' इत्यादयः ये शब्दाः लिखिताः सन्ति ते उपसर्गाः इति ज्ञातव्यम् ।

अस्मिन् ग्रन्थे क्रियापदं यस्मिन् पदे प्रयुक्तम् अस्ति तस्मिन् एव पदिनि धातोः निर्देशः कृतः अस्ति । अर्थात् प्रयोगं दृष्ट्वा पदनिर्देशः अस्ति ।

अथ नवमोऽध्यायः

९

राजविद्याराजगुह्ययोगः

श्रीभगवानुवाच - इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥९.१॥

पदच्छेदः -

श्रीभगवान्, उवाच - इदम्, तु, ते, गुह्यतमम्, प्रवक्ष्यामि, अनसूयवे।
ज्ञानम्, विज्ञानसहितम्, यत्, ज्ञात्वा, मोक्ष्यसे, अशुभात्॥

अन्वयः - अनसूयवे ते इदं तु गुह्यतमं विज्ञानसहितं ज्ञानं प्रवक्ष्यामि यत् ज्ञात्वा अशुभात् मोक्ष्यसे।

पदार्थः - अनसूयवे = ईर्ष्यारहिताय, ते = तुभ्यम्, इदं तु = एतत्, गुह्यतमम् = गोप्यतमम्, विज्ञानसहितम् = उपासनयुक्तम्, ज्ञानम् = ज्ञानम्, प्रवक्ष्यामि = वदिष्यामि, यत् = यत् ज्ञानम्, ज्ञात्वा = विज्ञाय, अशुभात् = अनर्थात्, मोक्ष्यसे = परित्यक्ष्यसे।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनसूयवे	उ. पुं. च. एक. (विशेषणम्)	ते	युष्मद् - द. सर्व. पुं. च. एक. (विशेष्यम्)
इदम्	इदम् - म. सर्व. नपुं. द्वि. एक. (विशेषणम्)	तु	अव्ययम्
गुह्यतमम्	अ. नपुं. द्वि. एक. (विशेषणम्)	विज्ञानसहितम्	अ. नपुं. द्वि. एक. (विशेषणम्)
ज्ञानम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	प्रवक्ष्यामि	प्र + वच् (वच परिभाषणे) पर. कर्तरि लृट्. उपु. एक.
यत्	यद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	ज्ञात्वा	क्त्वान्तम् अव्ययम्
अशुभात्	अ. पुं. पं. एक.	मोक्ष्यसे	मुच् (मुच्लृ मोक्षणे) पर. कर्मणि लृट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः

प्रवक्ष्याम्यनसूयवे	प्रवक्ष्यामि + अनसूयवे	यण्सन्धिः।
यज्ज्ञात्वा	यत् + ज्ञात्वा	जश्त्वसन्धिः।
मोक्ष्यसेऽशुभात्	मोक्ष्यसे + अशुभात्	पूर्वरूपसन्धिः।

(ख) समासः

अनसूयवे	न विद्यते असूया यस्य सः अनसूयः, तस्मै - नञ्बहुव्रीहिः।
विज्ञानसहितम्	विज्ञानेन सहितं विज्ञानसहितम् - तृतीयातत्पुरुषः।
अशुभात्	न शुभम् अशुभम्, तस्मात् - नञ्तत्पुरुषः।

(ग) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट् ।
	ज्ञात्वा	ज्ञा (ज्ञा अवबोधने) + क्त्वा ।
(घ) तद्धितान्तः	गुह्यतमम्	अतिशयेन गुह्यं गुह्यतमम् (बहुषु अन्यतमस्मिन् अतिशये तमप्) ।

भावस्पष्टीकरणम् -

प्रवक्ष्यामि ।	
किं प्रवक्ष्यामि ?	**ज्ञानं** प्रवक्ष्यामि ।
कीदृशं ज्ञानं प्रवक्ष्यामि ?	**गुह्यतमं** ज्ञानं प्रवक्ष्यामि ।
किं गुह्यतमं ज्ञानं प्रवक्ष्यामि ?	**इदं तु** गुह्यतमं ज्ञानं प्रवक्ष्यामि ।
इदं तु गुह्यतमं **केन सहितं** ज्ञानं प्रवक्ष्यामि ?	इदं तु गुह्यतमं **विज्ञानसहितं** ज्ञानं प्रवक्ष्यामि ।
कस्मै इदं तु गुह्यतमं विज्ञानसहितं ज्ञानं प्रवक्ष्यामि ?	**ते** इदं तु गुह्यतमं विज्ञानसहितं ज्ञानं प्रवक्ष्यामि ।
कीदृशाय ते इदं तु गुह्यतमं विज्ञानसहितं ज्ञानं प्रवक्ष्यामि ?	**अनसूयवे** ते इदं तु गुह्यतमं विज्ञानसहितं ज्ञानं प्रवक्ष्यामि ।
अनसूयवे ते इदं तु गुह्यतमं विज्ञानसहितं ज्ञानं प्रवक्ष्यामि **यत् ज्ञात्वा किं भविष्यति** ?	अनसूयवे ते इदं तु गुह्यतमं विज्ञानसहितं ज्ञानं प्रवक्ष्यामि **यत् ज्ञात्वा मोक्ष्यसे** ।
अनसूयवे ते इदं तु गुह्यतमं विज्ञानसहितं ज्ञानं प्रवक्ष्यामि यत् ज्ञात्वा **कस्मात्** मोक्ष्यसे ?	अनसूयवे ते इदं तु गुह्यतमं विज्ञानसहितं ज्ञानं प्रवक्ष्यामि यत् ज्ञात्वा **अशुभात्** मोक्ष्यसे ।

तात्पर्यम् - अर्जुन ! यत् इदम् आत्मज्ञानं तस्य च यद् उपासनं तद् उभयमपि तुभ्यं कथयामि यत् ज्ञात्वा अनिष्टात् अस्मात् संसारात् मुक्तिं प्राप्नोषि ।

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥९.२॥

पदच्छेदः - राजविद्या, राजगुह्यम्, पवित्रम्, इदम्, उत्तमम् ।
प्रत्यक्षावगमम्, धर्म्यम्, सुसुखम्, कर्तुम्, अव्ययम् ॥

अन्वयः - इदं राजविद्या राजगुह्यं पवित्रम् उत्तमं प्रत्यक्षावगमं धर्म्यं कर्तुं सुसुखम् अव्ययम् ।

पदार्थः - इदम् = एतत् ज्ञानम्, राजविद्या = उत्तमविद्या, राजगुह्यम् = अतीव गोप्यम्, पवित्रम् = पावनम्, उत्तमम् = श्रेष्ठम्, प्रत्यक्षावगमम् = स्फुटबोधम्, धर्म्यम् = धर्मोपेतम्, कर्तुम् = आचरितुम्, सुसुखम् = अक्लिष्टम्, अव्ययम् = अविनाशि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
इदम्	इदम् - म. सर्व. नपुं. प्र. एक. (विशेषणम्)	राजविद्या	आ. स्त्री. प्र. एक.
राजगुह्यम्	अ. नपुं. प्र. एक. (विशेषणम्)	पवित्रम्	अ. नपुं. प्र. एक. (विशेषणम्)
उत्तमम्	अ. नपुं. प्र. एक. (विशेषणम्)	प्रत्यक्षावगमम्	अ. नपुं. प्र. एक. (विशेषणम्)
धर्म्यम्	अ. नपुं. प्र. एक. (विशेषणम्)	कर्तुम्	तुमुन्नन्तम् अव्ययम्
सुसुखम्	अ. नपुं. प्र. एक. (विशेषणम्)	अव्ययम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) समासः राजविद्या — विद्यानां राजा राजविद्या - षष्ठीतत्पुरुषः ।
राजगुह्यम् — गुह्यानां राजा राजगुह्यम् - षष्ठीतत्पुरुषः ।
प्रत्यक्षावगमम् — प्रत्यक्षः अवगमः यस्य तत् प्रत्यक्षावगमम् - बहुव्रीहिः ।
सुसुखम् — शोभनं सुखं सुसुखम् - प्रादितत्पुरुषः ।
अव्ययम् — न व्ययम् अव्ययम् - नञ्तत्पुरुषः ।

(ख) कृदन्तः पवित्रम् — पू (पूञ् पवने) + इत्र ।
कर्तुम् — कृ (डुकृञ् करणे) + तुमुन् ।

(ग) तद्धितान्तः उत्तमम् — उद् + तमप् (अतिशयेन) उत्तमः (बहुषु अन्यतमस्मिन् अतिशये तमप्) ।
धर्म्यम् — धर्मः + यत् (धर्मात् अनपेतम् इत्यर्थः) ।

भावस्पष्टीकरणम् -

(अस्ति) ।	
किम् (अस्ति) ?	**इदं** (ज्ञानम् अस्ति) ।
इदं **कीदृशं** (ज्ञानम् अस्ति) ?	इदं **राजविद्या, राजगुह्यं, पवित्रम्, उत्तमं, प्रत्यक्षावगमं, धर्म्यं, कर्तुं सुसुखम्, अव्ययम्** (ज्ञानम् अस्ति) ।

तात्पर्यम् - उपासनसहितं यद् इदं ज्ञानम् अस्ति तत् विद्यासु श्रेष्ठम्, गोपनीयेषु अपि श्रेष्ठं पावनं च । किञ्च अस्य प्रतीतिरपि स्फुटा भवति । तादृशमिदं सुखेन आचरणयोग्यम् अनश्वरं च वर्तते ।

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥९.३॥

पदच्छेदः - अश्रद्दधानाः, पुरुषाः, धर्मस्य, अस्य, परन्तप ।
अप्राप्य, माम्, निवर्तन्ते, मृत्युसंसारवर्त्मनि॥

अन्वयः - परन्तप ! अस्य धर्मस्य अश्रद्दधानाः पुरुषाः माम् अप्राप्य मृत्युसंसारवर्त्मनि निवर्तन्ते ।

पदार्थः - परन्तप = शत्रुतापन, अस्य = एतस्य, धर्मस्य = आत्मज्ञानरूपस्य धर्मस्य, अश्रद्दधानाः = विश्वासरहिताः, पुरुषाः = मानवाः, माम् अप्राप्य = माम् अलब्ध्वा, मृत्युसंसारवर्त्मनि = मरणसहितसंसारमार्गे, निवर्तन्ते = प्रत्यागच्छन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
परन्तप	अ. पुं. सम्बो. एक.	अस्य	इदम् - म. सर्व. पुं. ष. एक. (विशेषणम्)
धर्मस्य	अ. पुं. ष. एक. (विशेष्यम्)	अश्रद्दधानाः	अ. पुं. प्र. बहु. (विशेषणम्)
पुरुषाः	अ. पुं. प्र. बहु. (विशेष्यम्)	माम्	अस्मद् - द. सर्व. द्वि. एक.
अप्राप्य	ल्यबन्तम् अव्ययम्	मृत्युसंसारवर्त्मनि	मृत्युसंसारवर्त्मन् - न. नपुं. स. एक.
निवर्तन्ते	नि + वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः
- पुरुषा धर्मस्य — पुरुषाः + धर्मस्य — विसर्गसन्धिः (लोपः) ।
- धर्मस्यास्य — धर्मस्य + अस्य — सवर्णदीर्घसन्धिः ।

(ख) समासः
- अश्रद्दधानाः — न श्रद्दधानाः अश्रद्दधानाः - नञ्तत्पुरुषः ।
- परन्तप — परान् शत्रून् तापयति इति परन्तपः, सम्बुद्धौ - उपपदसमासः ।
- अप्राप्य — न प्राप्य अप्राप्य - नञ्तत्पुरुषः ।
- मृत्युसंसारवर्त्मनि — मृत्युश्च संसारश्च मृत्युसंसारौ - द्वन्द्वः ।
  मृत्युसंसारयोः वर्त्म मृत्युसंसारवर्त्म, तस्मिन् - सप्तमीतत्पुरुषः ।

(ग) कृदन्तः
- प्राप्य — प्र + आप् (आप्लृ व्याप्तौ) + ल्यप् ।

भावस्पष्टीकरणम् -

निवर्तन्ते ।	
के निवर्तन्ते ?	**पुरुषाः** निवर्तन्ते ।
कीदृशाः पुरुषाः निवर्तन्ते ?	**अश्रद्दधानाः** पुरुषाः निवर्तन्ते ।
कस्य अश्रद्दधानाः पुरुषाः निवर्तन्ते ?	**धर्मस्य** अश्रद्दधानाः पुरुषाः निवर्तन्ते ।
कस्य धर्मस्य अश्रद्दधानाः पुरुषाः निवर्तन्ते ?	**अस्य** धर्मस्य अश्रद्दधानाः पुरुषाः निवर्तन्ते ।
अस्य धर्मस्य अश्रद्दधानाः पुरुषाः **कुत्र** निवर्तन्ते ?	अस्य धर्मस्य अश्रद्दधानाः पुरुषाः **मृत्युसंसारवर्त्मनि** निवर्तन्ते ।

अस्य धर्मस्य अश्रद्दधानाः पुरुषाः **किं कृत्वा** मृत्युसंसारवर्त्मनि निवर्तन्ते ?	अस्य धर्मस्य अश्रद्दधानाः पुरुषाः **अप्राप्य** मृत्युसंसारवर्त्मनि निवर्तन्ते ।
अस्य धर्मस्य अश्रद्दधानाः पुरुषाः **कम्** अप्राप्य मृत्युसंसारवर्त्मनि निवर्तन्ते ?	अस्य धर्मस्य अश्रद्दधानाः पुरुषाः **माम्** अप्राप्य मृत्युसंसारवर्त्मनि निवर्तन्ते ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**परन्तप !**

तात्पर्यम् - येषाम् अस्मिन् उपासनसहिते आत्मज्ञाने धर्मसम्मते श्रद्धा नास्ति ते मां न प्राप्नुवन्ति, प्रत्युत जरामरणादियुक्तम् इमं संसारमार्गम् एव प्रत्यायान्ति ।

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥९.४॥

पदच्छेदः - मया, ततम्, इदम्, सर्वम्, जगत्, अव्यक्तमूर्तिना ।
मत्स्थानि, सर्वभूतानि, न, च, अहम्, तेषु, अवस्थितः ॥

अन्वयः - अव्यक्तमूर्तिना च मया इदं सर्वं जगत् ततम् । सर्वभूतानि मत्स्थानि । अहं तेषु न अवस्थितः ।

पदार्थः - अव्यक्तमूर्तिना च मया = अतीन्द्रियेण च मया, इदम् = एतत्, सर्वम् = अखिलम्, जगत् = भुवनम्, ततम् = व्याप्तम्, सर्वभूतानि = स्थावराणि जङ्गमानि च भूतानि, मत्स्थानि = मयि वर्तमानानि, अहं तेषु = अहं तेषु भूतेषु, न अवस्थितः = न स्थितः अस्मि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अव्यक्तमूर्तिना	इ. पुं. तृ. एक. (विशेषणम्)	च	अव्ययम्
मया	अस्मद् - द. सर्व. तृ. एक. (विशेष्यम्)	इदम्	इदम् - म. सर्व. नपुं. प्र. एक. (विशेषणम्)
सर्वम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)	जगत्	जगत् - त. नपुं. प्र. एक. (विशेष्यम्)
ततम्	अ. नपुं. प्र. एक. (विशेषणम्)	सर्वभूतानि	अ. नपुं. प्र. बहु. (विशेष्यम्)
मत्स्थानि	अ. नपुं. प्र. बहु. (विशेषणम्)	अहम्	अस्मद् - द. सर्व. प्र. एक.
तेषु	तद् - द. सर्व. नपुं. स. बहु. (विशेषणम्)	न	अव्ययम्
अवस्थितः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	चाहम्	च + अहम्	सवर्णदीर्घसन्धिः ।
	तेष्ववस्थितः	तेषु + अवस्थितः	यण्सन्धिः ।
(ख) समासः	अव्यक्तमूर्तिना	अव्यक्ता मूर्तिः यस्य सः, तेन - बहुव्रीहिः ।	
	मत्स्थानि	मयि तिष्ठन्ति इति मत्स्थानि - कर्तरि अच् उपपदसमासश्च ।	
	सर्वभूतानि	सर्वाणि भूतानि सर्वभूतानि - कर्मधारयः ।	
(ग) कृदन्तः	ततम्	तन् (तनु विस्तारे) + क्त (कर्मणि) ।	
	भूतानि	भू (भू सत्तायाम्) + क्त (कर्तरि) ।	
	व्यक्तः	वि + अञ्ज् (अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु) + क्त (कर्तरि) ।	
	अवस्थितः	अव + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) ।	

भावस्पष्टीकरणम् -

(अस्ति) ।	
किम् (अस्ति) ?	**ततम्** (अस्ति) ।
किं ततम् (अस्ति) ?	**जगत्** ततम् (अस्ति) ।
किं जगत् ततम् (अस्ति) ?	**सर्वं** जगत् ततम् (अस्ति) ।
किं सर्वं जगत् ततम् (अस्ति) ?	**इदं** सर्वं जगत् ततम् (अस्ति) ।
केन इदं सर्वं जगत् ततम् (अस्ति) ?	**मया** इदं सर्वं जगत् ततम् (अस्ति) ।
कीदृशेन मया इदं सर्वं जगत् ततम् (अस्ति) ?	**अव्यक्तमूर्तिना** च मया इदं सर्वं जगत् ततम् ।
अव्यक्तमूर्तिना च मया इदं सर्वं जगत् ततं, **पुनः किम्** (अस्ति) ?	अव्यक्तमूर्तिना च मया इदं सर्वं जगत् ततं, **मत्स्थानि** (सन्ति) ।
अव्यक्तमूर्तिना च मया इदं सर्वं जगत् ततं, **कानि** मत्स्थानि (सन्ति) ?	अव्यक्तमूर्तिना च मया इदं सर्वं जगत् ततं, **सर्वभूतानि** मत्स्थानि (सन्ति) ।
अव्यक्तमूर्तिना च मया इदं सर्वं जगत् ततं, सर्वभूतानि मत्स्थानि (सन्ति) **तेषु किम्** ?	अव्यक्तमूर्तिना च मया इदं सर्वं जगत् ततं, सर्वभूतानि मत्स्थानि (सन्ति) **तेषु न अवस्थितः** ।
अव्यक्तमूर्तिना च मया इदं सर्वं जगत् ततं, सर्वभूतानि मत्स्थानि (सन्ति) **कः** तेषु न अवस्थितः ?	अव्यक्तमूर्तिना च मया इदं सर्वं जगत् ततं, सर्वभूतानि मत्स्थानि (सन्ति) **अहं** तेषु न अवस्थितः ।

तात्पर्यम् - मम स्वरूपं केषामपि इन्द्रियाणां गोचरः न भवति । तादृशः अहं सृष्ट्वा समग्रं जगत् इदं व्याप्तवान् अस्मि । तस्मात् सर्वाणि अपि स्थावरजङ्गमानि भूतानि मम अधीनानि सन्ति । अहं न तेषाम् अधीनः अस्मि ।

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।

भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥९.५॥

पदच्छेदः - न, च, मत्स्थानि, भूतानि, पश्य, मे, योगम्, ऐश्वरम् ।
भूतभृत्, न, च, भूतस्थः, मम, आत्मा, भूतभावनः॥

अन्वयः - (वस्तुतः) भूतानि मत्स्थानि न, भूतभृत् च भूतभावनः च मम आत्मा भूतस्थः न। ऐश्वरं मे योगं पश्य।

पदार्थः - भूतानि = सकलवस्तूनि, मत्स्थानि न = मयि स्थितानि न, भूतभृत् च = लोकपोषकः अपि, भूतभावनः च = भूतोद्भवकरः, मम = मे, आत्मा = स्वरूपम्, भूतस्थः न = भूतस्थितः न, ऐश्वरम् = असाधारणम्, मे = मम, योगम् = अघटितघटनाचातुर्यम्, पश्य = अवलोकय।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भूतानि	अ. नपुं. प्र. बहु. (विशेष्यम्)	मत्स्थानि	अ. नपुं. प्र. बहु. (विशेषणम्)
न	अव्ययम्	भूतभृत्	भूतभृत् - त. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	भूतभावनः	अ. पुं. प्र. एक. (विशेषणम्)
मम	अस्मद् - द. सर्व. ष. एक.	आत्मा	आत्मन् - न. पुं. प्र. एक. (विशेष्यम्)
भूतस्थः	अ. पुं. प्र. एक. (विशेषणम्)	ऐश्वरम्	अ. पुं. द्वि. एक. (विशेषणम्)
मे	अस्मद् - द. सर्व. ष. एक.	योगम्	अ. पुं. द्वि. एक. (विशेष्यम्)
पश्य	दृश् (दृशिर् प्रेक्षणे) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः भूतभृन्न — भूतभृत् + न — अनुनासिकसन्धिः।
ममात्मा — मम + आत्मा — सवर्णदीर्घसन्धिः।

(ख) समासः मत्स्थानि — मयि तिष्ठन्ति इति मत्स्थानि - कर्तरि अच् उपपदसमासश्च।
भूतभृत् — भूतं बिभर्ति भूतभृत् - कर्तरि क्विप् उपपदसमासश्च।
भूतस्थः — भूतेषु तिष्ठति भूतस्थः - कर्तरि अच् उपपदसमासश्च।
भूतभावनः — भूतानां भावनः भूतभावनः - षष्ठीतत्पुरुषः।

(ग) कृदन्तः भूतानि — भू (भू सत्तायाम्) + क्त (कर्तरि)।
भावनः — भू (भू सत्तायाम्) + णिच् + ल्युट्।
योगम् — युज् (युजिर् योगे) + घञ् (भावे), तम्।

(घ) तद्धितान्तः ऐश्वरम् — ईश्वर + अण् (ईश्वरस्य इदम् ऐश्वरम्)।

भावस्पष्टीकरणम् -

न ।	
कानि न ?	**मत्स्थानि** न ।
कानि मत्स्थानि न ?	**भूतानि** मत्स्थानि न ।
भूतानि मत्स्थानि न, **पुनः कः न** ?	भूतानि मत्स्थानि न, **पुनः भूतस्थः न** ।
भूतानि मत्स्थानि न, **कः** भूतस्थः न ?	भूतानि मत्स्थानि न, **आत्मा** भूतस्थः न ।
भूतानि मत्स्थानि न, **कीदृशः** आत्मा भूतस्थः न ?	भूतानि मत्स्थानि न, **भूतभावनः** आत्मा भूतस्थः न ।
भूतानि मत्स्थानि न, **पुनः कीदृशः** भूतभावनः आत्मा भूतस्थः न ?	भूतानि मत्स्थानि न, **भूतभृत् च** भूतभावनः च मम आत्मा भूतस्थः न ।
भूतानि मत्स्थानि न, भूतभृत् च भूतभावनः च मम आत्मा भूतस्थः न, **पुनः किं कुरु** ?	भूतानि मत्स्थानि न, भूतभृत् च भूतभावनः च मम आत्मा भूतस्थः न, **पश्य** ।
भूतानि मत्स्थानि न, भूतभृत् च भूतभावनः च मम आत्मा भूतस्थः न, **कं** पश्य ?	भूतानि मत्स्थानि न, भूतभृत् च भूतभावनः च मम आत्मा भूतस्थः न, **योगं** पश्य ।
भूतानि मत्स्थानि न, भूतभृत् च भूतभावनः च मम आत्मा भूतस्थः न, **कीदृशं** योगं पश्य ?	भूतानि मत्स्थानि न, भूतभृत् च भूतभावनः च मम आत्मा भूतस्थः न, **ऐश्वरं** योगं पश्य ?
भूतानि मत्स्थानि न, भूतभृत् च भूतभावनः च मम आत्मा भूतस्थः न, ऐश्वरं **कस्य** योगं पश्य ?	भूतानि मत्स्थानि न, भूतभृत् च भूतभावनः च मम आत्मा भूतस्थः न, ऐश्वरं **मे** योगं पश्य ।

तात्पर्यम् - यद्यपि अहं भूतानि सृजामि, तानि धारयामि तथा पालयामि इति तानि भूतानि मयि सन्ति इति सर्वे निर्णयन्ति, तथापि सङ्गरहितत्वात् भूतानि मयि न सन्ति इति वस्तुस्थितिः । इदमेव मम अघटितघटनाचातुर्यरूपम् ऐश्वर्यम् । तदेव मम मायावैभवम् ।

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥९.६॥

पदच्छेदः - यथा, आकाशस्थितः, नित्यम्, वायुः, सर्वत्रगः, महान् ।
तथा, सर्वाणि, भूतानि, मत्स्थानि, इति, उपधारय॥

अन्वयः - यथा नित्यं सर्वत्रगः महान् आकाशस्थितः वायुः तथा मत्स्थानि सर्वाणि भूतानि इति उपधारय ।

पदार्थः - यथा = येन प्रकारेण, नित्यम् = सदा, सर्वत्रगः = सर्वत्र गन्ता, महान् = महापरिमाणः, आकाशस्थितः = नभसि वर्तमानः, वायुः = अनिलः, तथा = तेन प्रकारेण, मत्स्थानि = मयि स्थितानि, सर्वाणि = सकलानि, भूतानि इति = भूतानि इति, उपधारय = जानीहि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यथा	अव्ययम्	नित्यम्	अ. नपुं. द्वि. एक. क्रियावि.
सर्वत्रगः	अ. पुं. प्र. एक. (विशेषणम्)	महान्	महत् - त. पुं. प्र. एक. (विशेषणम्)
आकाशस्थितः	अ. पुं. प्र. एक. (विशेषणम्)	वायुः	उ. पुं. प्र. एक. (विशेष्यम्)
तथा	अव्ययम्	मत्स्थानि	अ. नपुं. प्र. बहु. (विशेषणम्)
सर्वाणि	अ. सर्व. नपुं. प्र. बहु. (विशेषणम्)	भूतानि	अ. नपुं. प्र. बहु. (विशेष्यम्)
इति	अव्ययम्	उपधारय	उप + धृ (धृञ् धरणे) णिच्. पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	आकाशस्थितो नित्यम्	आकाशस्थितः + नित्यम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	सर्वत्रगो महान्	सर्वत्रगः + महान्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	मत्स्थानीति	मत्स्थानि + इति	सवर्णदीर्घसन्धिः ।
	इत्युपधारय	इति + उपधारय	यण्सन्धिः ।
(ख) समासः	आकाशस्थितः	आकाशे स्थितः - सप्तमीतत्पुरुषः ।	
	सर्वत्रगः	सर्वत्र गच्छतीति सर्वत्रगः - कर्तरि डप्रत्ययः उपपदसमासश्च ।	
	मत्स्थानि	मयि तिष्ठन्ति इति मत्स्थानि - कर्तरि अच् उपपदसमासश्च ।	
(ग) कृदन्तः	स्थितः	स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) ।	
	भूतानि	भू (भू सत्तायाम्) + क्त (कर्तरि) ।	

भावस्पष्टीकरणम् -

(अस्ति) ।	
कः (अस्ति) ?	**वायुः** (अस्ति) ।
कीदृशः वायुः (अस्ति) ?	**आकाशस्थितः** वायुः (अस्ति) ।
पुनः कीदृशः आकाशस्थितः वायुः (अस्ति) ?	**महान्** आकाशस्थितः वायुः (अस्ति) ।
पुनः कीदृशः महान् आकाशस्थितः वायुः (अस्ति) ?	**सर्वत्रगः** महान् आकाशस्थितः वायुः (अस्ति) ।

कथं सर्वत्रगः महान् आकाशस्थितः वायुः (अस्ति) ?	**नित्यं** सर्वत्रगः महान् आकाशस्थितः वायुः (अस्ति) ।
कथं नित्यं सर्वत्रगः महान् आकाशस्थितः वायुः (अस्ति) ?	**यथा** नित्यं सर्वत्रगः महान् आकाशस्थितः वायुः (अस्ति) ।
यथा नित्यं सर्वत्रगः महान् आकाशस्थितः वायुः (अस्ति) **तथा किम्** ?	यथा नित्यं सर्वत्रगः महान् आकाशस्थितः वायुः (अस्ति) **तथा उपधारय** ।
यथा नित्यं सर्वत्रगः महान् आकाशस्थितः वायुः तथा **कानि** उपधारय ?	यथा नित्यं सर्वत्रगः महान् आकाशस्थितः वायुः तथा **भूतानि इति** उपधारय ।
यथा नित्यं सर्वत्रगः महान् आकाशस्थितः वायुः तथा **कानि** भूतानि इति उपधारय ?	यथा नित्यं सर्वत्रगः महान् आकाशस्थितः वायुः तथा **सर्वाणि** भूतानि इति उपधारय ।
यथा नित्यं सर्वत्रगः महान् आकाशस्थितः वायुः तथा **कीदृशानि** सर्वाणि भूतानि इति उपधारय ?	यथा नित्यं सर्वत्रगः महान् आकाशस्थितः वायुः तथा **मत्स्थानि** सर्वाणि भूतानि इति उपधारय ।

तात्पर्यम् - यथा सदा सर्वत्र सञ्चरन् महान् वायुः आकाशे वर्तमानः अपि न तेन सम्बध्यते तथा सर्वाणि भूतानि मयि वर्तमानानि अपि निस्सङ्गत्वात् न मया सम्बध्यन्ते इति विजानीहि ।

सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥९.७॥

पदच्छेदः - सर्वभूतानि, कौन्तेय, प्रकृतिम्, यान्ति, मामिकाम् ।
कल्पक्षये, पुनः, तानि, कल्पादौ, विसृजामि, अहम्॥

अन्वयः - कौन्तेय ! कल्पक्षये सर्वभूतानि मामिकां प्रकृतिं यान्ति । पुनः कल्पादौ तानि अहं विसृजामि ।

पदार्थः - कौन्तेय = कुन्तीपुत्र, कल्पक्षये = प्रलयकाले, सर्वभूतानि = समस्तभूतानि, मामिकाम् = मदीयाम्, प्रकृतिम् = त्रिगुणात्मिकां प्रकृतिम्, यान्ति = प्राप्नुवन्ति, पुनः = भूयः, कल्पादौ = सृष्टिकाले, तानि = तानि भूतानि, अहम् = अहम्, विसृजामि = उत्पादयामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	कल्पक्षये	अ. पुं. स. एक.
सर्वभूतानि	अ. नपुं. प्र. बहु. (विशेषणम्)	मामिकाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)

प्रकृतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	यान्ति	या (या प्रापणे) पर. कर्तरि लट्. प्रपु. बहु.
पुनः	अव्ययम्	कल्पादौ	इ. पुं. स. एक.
तानि	तद् - द. सर्व. नपुं. द्वि. बहु. (विशेषणम्)	अहम्	अस्मद् - द. सर्व. प्र. एक.
विसृजामि	वि + सृज् (सृज विसर्गे) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः	पुनस्तानि	पुनः + तानि	विसर्गसन्धिः (सकारः) ।
	विसृजाम्यहम्	विसृजामि + अहम्	यण्सन्धिः ।
(ख) समासः	सर्वभूतानि	सर्वाणि भूतानि सर्वभूतानि - कर्मधारयः ।	
	कल्पक्षये	कल्पस्य क्षयः कल्पक्षयः, तस्मिन् - षष्ठीतत्पुरुषः ।	
	कल्पादौ	कल्पस्य आदिः कल्पादिः, तस्मिन् - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	भूतानि	भू (भू सत्तायाम्) + क्त (कर्तरि) ।	
	प्रकृतिम्	प्र + कृ (डुकृञ् करणे) + क्तिन्, तम् ।	
(घ) तद्धितान्तः	कौन्तेय	कुन्ती + ढक् (कुन्त्याः अपत्यं पुमान्) ।	
	मामिकाम्	अस्मद् + अण् (मम इदम् मामकम्) (इदमर्थे अण्, स्त्रियां टाप्) ।	

भावस्पष्टीकरणम् -

यान्ति ।	
कुत्र यान्ति ?	**प्रकृतिं** यान्ति ।
कां प्रकृतिं यान्ति ?	**मामिकां** प्रकृतिं यान्ति ।
कानि मामिकां प्रकृतिं यान्ति ?	**सर्वभूतानि** मामिकां प्रकृतिं यान्ति ।
कदा सर्वभूतानि मामिकां प्रकृतिं यान्ति ?	**कल्पक्षये** सर्वभूतानि मामिकां प्रकृतिं यान्ति ।
कल्पक्षये सर्वभूतानि मामिकां प्रकृतिं यान्ति, **पुनः किं भवति ?**	कल्पक्षये सर्वभूतानि मामिकां प्रकृतिं यान्ति, **पुनः विसृजामि ।**
कल्पक्षये सर्वभूतानि मामिकां प्रकृतिं यान्ति, पुनः **कः** विसृजाति ?	कल्पक्षये सर्वभूतानि मामिकां प्रकृतिं यान्ति, पुनः **अहं** विसृजामि ।

कल्पक्षये सर्वभूतानि मामिकां प्रकृतिं यान्ति, पुनः **कानि** अहं विसृजामि ?	कल्पक्षये सर्वभूतानि मामिकां प्रकृतिं यान्ति, पुनः **तानि** अहं विसृजामि ।
कल्पक्षये सर्वभूतानि मामिकां प्रकृतिं यान्ति, पुनः **कदा** तानि अहं विसृजामि ?	कल्पक्षये सर्वभूतानि मामिकां प्रकृतिं यान्ति, पुनः **कल्पादौ** तानि अहं विसृजामि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय !**

तात्पर्यम् - हे अर्जुन ! यदा कल्पस्य क्षयः भवति तदा सर्वाण्यपि भूतानि मायारूपां मम शक्तिं प्रविशन्ति, अर्थात् तत्रैव लीयन्ते । यदा पुनः कल्पस्य आरम्भः तदा निलीनानि तानि सर्वाणि अपि भूतानि पुनः अहं सृजामि ।

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥९.८॥

पदच्छेदः - प्रकृतिम्, स्वाम्, अवष्टभ्य, विसृजामि, पुनः, पुनः ।
भूतग्रामम्, इमम्, कृत्स्नम्, अवशम्, प्रकृतेः, वशात्॥

अन्वयः - स्वां प्रकृतिम् अवष्टभ्य प्रकृतेः वशात् अवशम् इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ।

पदार्थः - स्वाम् = स्वकीयाम्, प्रकृतिम् = शक्तिम्, अवष्टभ्य = अवलम्ब्य, प्रकृतेः वशात् = स्वभाववशात्, अवशम् = कर्मपरतन्त्रम्, इमम् = अमुम्, कृत्स्नम् = सर्वम्, भूतग्रामम् = भूतसमुदायम्, पुनः पुनः = भूयः भूयः, विसृजामि = उत्पादयामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
स्वाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	प्रकृतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
अवष्टभ्य	ल्यबन्तम् अव्ययम्	प्रकृतेः	इ. स्त्री. ष. एक.
वशात्	अ. पुं. पं. एक.	अवशम्	अ. पुं. द्वि. एक. (विशेषणम्)
इमम्	इदम् - म. सर्व. पुं. द्वि. एक. (विशेषणम्)	कृत्स्नम्	अव्ययम्
भूतग्रामम्	अ. पुं. द्वि. एक. (विशेष्यम्)	पुनः	अव्ययम्
विसृजामि	वि + सृज् (सृज विसर्गे) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः प्रकृतेर्वशात् प्रकृतेः + वशात् विसर्गसन्धिः (रेफः) ।

(ख) समासः भूतग्रामम् — भूतानां ग्रामः भूतग्रामः, तम् - षष्ठीतत्पुरुषः ।
अवशम् — न वशम् अवशम् - नञ्तत्पुरुषः ।

(ग) कृदन्तः प्रकृतिम् — प्र + कृ (डुकृञ् करणे) + क्तिन्, तम् ।
अवष्टभ्य — अव + स्तभ् (ष्टभि प्रतिबन्धे) + ल्यप् ।
वशात् — वश् (वश कान्तौ) + अच्, तस्मात् ।

भावस्पष्टीकरणम् -

विसृजामि ।	
कथं विसृजामि ?	**पुनः पुनः** विसृजामि ।
कं पुनः पुनः विसृजामि ?	**भूतग्रामं** पुनः पुनः विसृजामि ।
कीदृशं भूतग्रामं पुनः पुनः विसृजामि ?	**कृत्स्नं** भूतग्रामं पुनः पुनः विसृजामि ।
कं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ?	**इमं** कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ।
कीदृशम् इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ?	**अवशम्** इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ।
कस्मात् अवशम् इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ?	**वशात्** अवशम् इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ।
कस्याः वशात् अवशम् इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ?	**प्रकृतेः** वशात् अवशम् इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ।
किं कृत्वा प्रकृतेः वशात् अवशम् इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ?	**अवष्टभ्य** प्रकृतेः वशात् अवशम् इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ।
काम् अवष्टभ्य प्रकृतेः वशात् अवशम् इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ?	**प्रकृतिम्** अवष्टभ्य प्रकृतेः वशात् अवशम् इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ।
कां प्रकृतिम् अवष्टभ्य प्रकृतेः वशात् अवशम् इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ?	**स्वां** प्रकृतिम् अवष्टभ्य प्रकृतेः वशात् अवशम् इमं कृत्स्नं भूतग्रामं पुनः पुनः विसृजामि ।

तात्पर्यम् - यावन्ति भूतानि कल्पक्षये प्रकृतौ लीनानि सन्ति कल्पादौ तु तामेव प्रकृतिम् अधिष्ठाय तानि एव सर्वाणि भूतानि पुनः अहं सृजामि ।

न च मां तानि कर्माणि निबध्नन्ति धनञ्जय।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥९.९॥

पदच्छेदः - न, च, माम्, तानि, कर्माणि, निबध्नन्ति, धनञ्जय।
उदासीनवत्, आसीनम्, असक्तम्, तेषु, कर्मसु॥

अन्वयः - धनञ्जय ! तेषु कर्मसु असक्तं च उदासीनवत् आसीनं मां तानि कर्माणि न निबध्नन्ति।

पदार्थः - धनञ्जय = अर्जुन !, तेषु कर्मसु = तेषु कर्मविशेषेषु, असक्तं च = असङ्गम् अपि, उदासीनवत् = उपेक्षकवत्, आसीनम् = तिष्ठन्तम्, माम् = मा, तानि कर्माणि = कर्मविशेषाः, न निबध्नन्ति = न संयच्छन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
धनञ्जय	अ. पुं. सम्बो. एक.	तेषु	तद् - द. सर्व. नपुं. स. बहु. (विशेषणम्)
कर्मसु	कर्मन् - न. नपुं. स. बहु. (विशेष्यम्)	असक्तम्	अ. पुं. द्वि. एक. (विशेषणम्)
च	अव्ययम्	उदासीनवत्	अव्ययम्
आसीनम्	अ. पुं. द्वि. एक. (विशेषणम्)	माम्	अस्मद् - द. सर्व. द्वि. एक. (विशेष्यम्)
तानि	तद् - द. सर्व. नपुं. प्र. बहु. (विशेषणम्)	कर्माणि	कर्मन् - न. नपुं. प्र. बहु. (विशेष्यम्)
न	अव्ययम्	निबध्नन्ति	नि + बन्ध् (बन्ध बन्धने) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः उदासीनवदासीनम् — उदासीनवत् + आसीनम् — जश्त्वसन्धिः।

(ख) समासः धनञ्जय — धनं जयति इति धनञ्जयः, तत्सम्बुद्धौ - कर्तरि खश् उपपदसमासश्च।
असक्तम् — न सक्तम् असक्तम् - नञ्तत्पुरुषः।

(ग) कृदन्तः उदासीनवत् — उत् + अस् (अस भुवि) + शानच् + वति।
आसीनम् — आस् (आस उपवेशने) + शानच्।
सक्तम् — सञ्ज् (षञ्ज सङ्गे) + क्त (कर्तरि)।

भावस्पष्टीकरणम् -

न निबध्नन्ति।	
कानि न निबध्नन्ति ?	**कर्माणि न निबध्नन्ति।**

कानि कर्माणि न निबध्नन्ति ?	**तानि** कर्माणि न निबध्नन्ति ।
कं तानि कर्माणि न निबध्नन्ति ?	**मां** तानि कर्माणि न निबध्नन्ति ।
कीदृशं मां तानि कर्माणि न निबध्नन्ति ?	**आसीनं** मां तानि कर्माणि न निबध्नन्ति ।
पुनः कीदृशम् आसीनं मां तानि कर्माणि न निबध्नन्ति ?	**उदासीनवत्** आसीनं मां तानि कर्माणि न निबध्नन्ति ।
पुनः कीदृशं च उदासीनवत् आसीनं मां तानि कर्माणि न निबध्नन्ति ?	**असक्तं च** उदासीनवत् आसीनं मां तानि कर्माणि न निबध्नन्ति ।
कुत्र असक्तं च उदासीनवत् आसीनं मां तानि कर्माणि न निबध्नन्ति ?	**कर्मसु** असक्तं च उदासीनवत् आसीनं मां तानि कर्माणि न निबध्नन्ति ।
केषु कर्मसु असक्तं च उदासीनवत् आसीनं मां तानि कर्माणि न निबध्नन्ति ?	**तेषु** कर्मसु असक्तं च उदासीनवत् आसीनं मां तानि कर्माणि न निबध्नन्ति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**धनञ्जय !**

तात्पर्यम् - यद्यपि अहं प्रकृतिम् अवलम्ब्य सृष्ट्यादीनि कार्याणि करोमि तथापि मम तत्र निरपेक्षतया स्थितिः अस्ति इति हेतोः तानि कर्माणि मां न बध्नन्ति ।

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥९.१०॥

पदच्छेदः - मया, अध्यक्षेण, प्रकृतिः, सूयते, सचराचरम् ।
हेतुना, अनेन, कौन्तेय, जगत्, विपरिवर्तते॥

अन्वयः - कौन्तेय ! अध्यक्षेण मया प्रकृतिः सचराचरं सूयते । अनेन हेतुना जगत् विपरिवर्तते ।

पदार्थः - कौन्तेय = कुन्तीपुत्र !, अध्यक्षेण मया = साक्षिभूतस्य मम सन्निधिमात्रेण, प्रकृतिः = माया, सचराचरम् = सजङ्गमस्थावरं जगत्, सूयते = उत्पादयति, अनेन = एतेन, हेतुना = कारणेन, जगत् = प्रपञ्चः, विपरिवर्तते = विपरिणमते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	अध्यक्षेण	अ. पुं. तृ. एक. (विशेषणम्)
मया	अस्मद् - द. सर्व. तृ. एक. (विशेष्यम्)	प्रकृतिः	इ. स्त्री. प्र. एक.

सचराचरम्	अव्ययम्	सूयते	सू (षूङ् प्राणिप्रसवे) आत्म. कर्तरि लट्. प्रपु. एक.
अनेन	इदम् - म. सर्व. पुं. तृ. एक. (विशेषणम्)	हेतुना	उ. पुं. तृ. एक. (विशेष्यम्)
जगत्	जगत् - त. नपुं. प्र. एक.	विपरिवर्तते	वि + परि + वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	मयाध्यक्षेण	मया + अध्यक्षेण	सवर्णदीर्घसन्धिः ।
	हेतुनानेन	हेतुना + अनेन	सवर्णदीर्घसन्धिः ।
	जगद्विपरिवर्तते	जगत् + विपरिवर्तते	जश्त्वसन्धिः ।
(ख) समासः	सचराचरम्	चराचरेण सह इति सचराचरम् - अव्ययीभावः ।	
(ग) कृदन्तः	प्रकृतिः	प्र + कृ (डुकृञ् करणे) + क्तिन् ।	
(घ) तद्धितान्तः	कौन्तेय	कुन्ती + ढक् (अपत्यार्थे) कुन्त्याः अपत्यं पुमान्, तत्सम्बुद्धौ ।	

भावस्पष्टीकरणम् -

सूयते ।	
किं सूयते ?	**सचराचरं** सूयते ।
का सचराचरं सूयते ?	**प्रकृतिः** सचराचरं सूयते ।
केन प्रकृतिः सचराचरं सूयते ?	**मया** प्रकृतिः सचराचरं सूयते ।
कीदृशेन मया प्रकृतिः सचराचरं सूयते ?	**अध्यक्षेण** मया प्रकृतिः सचराचरं सूयते ।
अध्यक्षेण मया प्रकृतिः सचराचरं सूयते, **अनेन किं भवति ?**	अध्यक्षेण मया प्रकृतिः सचराचरं सूयते, **अनेन विपरिवर्तते ।**
अध्यक्षेण मया प्रकृतिः सचराचरं सूयते, अनेन **किं** विपरिवर्तते ?	अध्यक्षेण मया प्रकृतिः सचराचरं सूयते, अनेन **जगत्** विपरिवर्तते ।
अध्यक्षेण मया प्रकृतिः सचराचरं सूयते, अनेन **केन** जगत् विपरिवर्तते ?	अध्यक्षेण मया प्रकृतिः सचराचरं सूयते, अनेन **हेतुना** जगत् विपरिवर्तते ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय !**

तात्पर्यम् - साक्षिभूतस्य मम सन्निधिमात्रेण प्रकृतिः इयं स्थावरजङ्गमात्मकम् इमं प्रपञ्चम् उत्पादयति । उत्पन्नश्च सः मत्सन्निधिवशादेव नानाकारः प्रतिभासते ।

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम्।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥९.११॥

पदच्छेदः - अवजानन्ति, माम्, मूढाः, मानुषीम्, तनुम्, आश्रितम् ।
परम्, भावम्, अजानन्तः, मम, भूतमहेश्वरम्॥

अन्वयः - मम परं भावम् अजानन्तः मूढाः मानुषीं तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ।

पदार्थः - मम = मम, परं भावम् = श्रेष्ठं तत्त्वम्, अजानन्तः = अनवगच्छन्तः, मूढाः = अविवेकिनः, मानुषीं = मानवीम्, तनुम् = मूर्तिम्, आश्रितम् = प्राप्तम्, माम् = मा, भूतमहेश्वरम् = भूतानाम् अधिपतिम्, अवजानन्ति = परिभवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मम	अस्मद् - द. सर्व. ष. एक.	परम्	अ. सर्व. पुं. द्वि. एक. (विशेषणम्)
भावम्	अ. पुं. द्वि. एक. (विशेष्यम्)	अजानन्तः	अजानत् - त. पुं. प्र. बहु. (विशेषणम्)
मूढाः	अ. पुं. प्र. बहु. (विशेषणम्)	मानुषीम्	ई. स्त्री. द्वि. एक. (विशेषणम्)
तनुम्	उ. स्त्री. द्वि. एक. (विशेष्यम्)	आश्रितम्	अ. पुं. द्वि. एक. (विशेषणम्)
माम्	अस्मद् - द. सर्व. द्वि. एक. (विशेष्यम्)	भूतमहेश्वरम्	अ. पुं. द्वि. एक. (विशेषणम्)
अवजानन्ति	अव + ज्ञा (ज्ञा अवबोधने) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः मूढा मानुषीं — मूढाः + मानुषीं — विसर्गसन्धिः (लोपः) ।
अजानन्तो मम — अजानन्तः + मम — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः भूतमहेश्वरम् — महान् च असौ ईश्वरः महेश्वरः - कर्मधारयः ।
भूतानां महेश्वरः भूतमहेश्वरः, तम् - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः मूढाः — मुह् (मुह वैचित्ये) + क्त (कर्तरि) ।
आश्रितम् — आ + श्रि (श्रिञ् सेवायाम्) + क्त (कर्तरि), तम् ।
भावम् — भू (भू सत्तायाम्) + णिच् + अच् (पचाद्यच्), तम् ।

(घ) तद्धितान्तः मानुषीम् — मनु + षुक् + अञ् + ङीप् (स्त्रीत्वे) (मानुषाणाम् इयं मानुषी, ताम् ।)

भावस्पष्टीकरणम् -

अवजानन्ति ।	
कम् अवजानन्ति ?	**माम्** अवजानन्ति ।
मां **कथम्** अवजानन्ति ?	मां **भूतमहेश्वरम्** अवजानन्ति ।
कीदृशं मां भूतमहेश्वरम् अवजानन्ति ?	**आश्रितं** मां भूतमहेश्वरम् अवजानन्ति ।
काम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ?	**तनुम्** आश्रितं मां भूतमहेश्वरम् अवजानन्ति ।
कां तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ?	**मानुषीं** तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ।
के मानुषीं तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ?	**मूढाः** मानुषीं तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ।
कीदृशाः मूढाः मानुषीं तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ?	**अजानन्तः** मूढाः मानुषीं तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ।
कम् अजानन्तः मूढाः मानुषीं तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ?	**भावम्** अजानन्तः मूढाः मानुषीं तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ।
कीदृशं भावम् अजानन्तः मूढाः मानुषीं तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ?	**परं** भावम् अजानन्तः मूढाः मानुषीं तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ।
कस्य परं भावम् अजानन्तः मूढाः मानुषीं तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ?	**मम** परं भावम् अजानन्तः मूढाः मानुषीं तनुम् आश्रितं मां भूतमहेश्वरम् अवजानन्ति ।

तात्पर्यम् - सर्वेषां भूतानाम् ईश्वरः अहं भक्तेच्छावशात् मनुष्यरूपेण भूमौ अवतीर्णः अस्मि । मम इमं मनुष्याकारं दृष्ट्वा अविवेकिनः अयं साधारणः इति भावयन्तः तिरस्कुर्वन्ति ।

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥९.१२॥

पदच्छेदः - मोघाशाः, मोघकर्माणः, मोघज्ञानाः, विचेतसः ।
राक्षसीम्, आसुरीम्, च, एव, प्रकृतिम्, मोहिनीम्, श्रिताः॥

अन्वयः - मोघाशाः मोघकर्माणः मोघज्ञानाः विचेतसः राक्षसीम् आसुरीं च मोहिनीं प्रकृतिम् एव श्रिताः ।

पदार्थः - मोघाशाः = व्यर्थतृष्णाः, मोघकर्माणः = व्यर्थयज्ञाः, मोघज्ञानाः = निष्फलज्ञानाः, विचेतसः = विगतविवेकाः, राक्षसीम् = राक्षससम्बन्धिनीम्, आसुरीं च = असुर-सम्बन्धिनीम्, मोहिनीम् = व्यामोहकारिणीम्, प्रकृतिम् एव = स्वभावम् एव, श्रिताः = आस्थिताः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मोघाशाः	अ. पुं. प्र. बहु. (विशेषणम्)	मोघकर्माणः	मोघकर्मन् - न. पुं. प्र. बहु. (विशेषणम्)
मोघज्ञानाः	अ. पुं. प्र. बहु. (विशेषणम्)	विचेतसः	विचेतस् - सका. पुं. प्र. बहु. (विशेषणम्)
राक्षसीम्	ई. स्त्री. द्वि. एक. (विशेषणम्)	आसुरीम्	ई. स्त्री. द्वि. एक. (विशेषणम्)
च	अव्ययम्	मोहिनीम्	ई. स्त्री. द्वि. एक. (विशेषणम्)
प्रकृतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	एव	अव्ययम्
श्रिताः	अ. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	मोघाशा मोघकर्माणः	मोघाशाः + मोघकर्माणः	विसर्गसन्धिः (लोपः)।
	मोघकर्माणो मोघज्ञानाः	मोघकर्माणः + मोघज्ञानाः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	मोघज्ञाना विचेतसः	मोघज्ञानाः + विचेतसः	विसर्गसन्धिः (लोपः)।
	चैव	च + एव	वृद्धिसन्धिः।

(ख) समासः	मोघाशाः	मोघा आशा येषां ते मोघाशाः - बहुव्रीहिः।
	मोघकर्माणः	मोघानि कर्माणि येषां ते मोघकर्माणः - बहुव्रीहिः।
	मोघज्ञानाः	मोघं ज्ञानं येषां ते मोघज्ञानाः - बहुव्रीहिः।
	विचेतसः	विगतं चेतः येभ्यः ते विचेतसः - बहुव्रीहिः।
(ग) कृदन्तः	प्रकृतिम्	प्र + कृ (डुकृञ् करणे) + क्तिन्, ताम्।
	मोहिनीम्	मुह् (मुह वैचित्ये) + क्तिन्, ताम्।
	श्रिताः	श्रि (श्रिञ् सेवायाम्) + क्त (कर्तरि)।
(घ) तद्धितान्तः	राक्षसीम्	रक्षस् + अण् (राक्षसम्) + ङीप्, ताम् (राक्षसानाम् इयम् राक्षसी) (इदमर्थे अण् स्त्रीत्वे च ङीप्)।
	आसुरीम्	असुर + अण् (आसुरम्) + ङीप्, ताम् (असुराणाम् इयम् आसुरी) (इदमर्थे अण् स्त्रीत्वे च ङीप्)।

भावस्पष्टीकरणम् -

(भवन्ति)।	
कथं (भवन्ति) ?	**श्रिताः** (भवन्ति)।
कां श्रिताः (भवन्ति) ?	**प्रकृतिम् एव** श्रिताः (भवन्ति)।

कीदृशीं प्रकृतिम् एव श्रिताः (भवन्ति) ?	**मोहिनीं** प्रकृतिम् एव श्रिताः (भवन्ति) ।
पुनः कीदृशीं मोहिनीं प्रकृतिम् एव श्रिताः (भवन्ति) ?	**आसुरीं च** मोहिनीं प्रकृतिम् एव श्रिताः (भवन्ति) ।
पुनः कीदृशीम् आसुरीं च मोहिनीं प्रकृतिम् एव श्रिताः (भवन्ति) ?	**राक्षसीम्** आसुरीं च मोहिनीं प्रकृतिम् एव श्रिताः (भवन्ति) ।
के राक्षसीम् आसुरीं च मोहिनीं प्रकृतिम् एव श्रिताः (भवन्ति) ?	**मोघाशाः** राक्षसीम् आसुरीं च मोहिनीं प्रकृतिम् एव श्रिताः (भवन्ति) ।
मोघाशाः **पुनः के** राक्षसीम् आसुरीं च मोहिनीं प्रकृतिम् एव श्रिताः (भवन्ति) ?	मोघाशाः **मोघकर्माणः** राक्षसीम् आसुरीं च मोहिनीं प्रकृतिम् एव श्रिताः (भवन्ति) ।
मोघाशाः मोघकर्माणः **पुनः के** राक्षसीम् आसुरीं च मोहिनीं प्रकृतिम् एव श्रिताः (भवन्ति) ?	मोघाशाः मोघकर्माणः **मोघज्ञानाः** राक्षसीम् आसुरीं च मोहिनीं प्रकृतिम् एव श्रिताः (भवन्ति) ।
मोघाशाः मोघकर्माणः मोघज्ञानाः **पुनः के** राक्षसीम् आसुरीं च मोहिनीं प्रकृतिम् एव श्रिताः (भवन्ति) ?	मोघाशाः मोघकर्माणः मोघज्ञानाः **विचेतसः** राक्षसीम् आसुरीं च मोहिनीं प्रकृतिम् एव श्रिताः (भवन्ति) ।

तात्पर्यम् - येषां मनोरथः व्यर्थः, कर्म व्यर्थम्, ज्ञानं च व्यर्थं तादृशाः बुद्धिहीनाः, तमोगुणप्रधानाः, राक्षसानां प्रकृतिम् आश्रिताः जनाः मनुष्याकारं माम् अवलोक्य अयं साधारणः इति भावयन्तः अवमानयन्ति ।

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥९.१३॥

पदच्छेदः - महात्मानः, तु, माम्, पार्थ, दैवीम्, प्रकृतिम्, आश्रिताः ।
भजन्ति, अनन्यमनसः, ज्ञात्वा, भूतादिम्, अव्ययम्॥

अन्वयः - पार्थ ! दैवीं प्रकृतिम् आश्रिताः महात्मानः तु मां भूतादिम् अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ।

पदार्थः - पार्थ = अर्जुन !, दैवीम् = देवसम्बन्धिनम्, प्रकृतिम् = स्वभावम्, आश्रिताः = प्राप्ताः, महात्मानः तु = महानुभावाः तु, माम् = माम् (भगवन्तम्), भूतादिम् = सर्वभूतकारणम्, अव्ययम् = अविनाशिनम्, ज्ञात्वा = विदित्वा, अनन्यमनसः = एकाग्रचित्ताः, भजन्ति = सेवन्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	दैवीम्	ई. स्त्री. द्वि. एक. (विशेषणम्)
प्रकृतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	आश्रिताः	अ. पुं. प्र. बहु. (विशेषणम्)

महात्मानः	महात्मन् - न. पुं. प्र. बहु. (विशेष्यम्)	तु	अव्ययम्
माम्	अस्मद् - द. सर्व. द्वि. एक. (विशेष्यम्)	भूतादिम्	इ. पुं. द्वि. एक. (विशेषणम्)
अव्ययम्	अ. पुं. द्वि. एक. (विशेषणम्)	ज्ञात्वा	क्त्वान्तम् अव्ययम्
अनन्यमनसः	अनन्यमनस् - सका. पुं. प्र. बहु. (विशेषणम्)	भजन्ति	भज् (भज सेवायाम्) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	महात्मानस्तु	महात्मानः + तु	विसर्गसन्धिः (सकारः) ।
	भजन्त्यनन्यमनसः	भजन्ति + अनन्यमनसः	यण्सन्धिः ।
	अनन्यमनसो ज्ञात्वा	अनन्यमनसः + ज्ञात्वा	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः	महात्मानः	महान् आत्मा येषां ते - बहुव्रीहिः ।
	अनन्यमनसः	अन्यस्मिन् मनः येषां ते अनन्यमनसः - बहुव्रीहिः ।
		न अन्यमनसः अनन्यमनसः - नञ्तत्पुरुषः ।
	भूतादिम्	भूतानाम् आदिः भूतादिः, तम् - षष्ठीतत्पुरुषः ।
	अव्ययम्	न व्ययः अव्ययः, तम् - नञ्तत्पुरुषः ।
(ग) कृदन्तः	प्रकृतिम्	प्र + कृ (डुकृञ् करणे) + क्तिन्, ताम् ।
	आश्रिताः	आ + श्रि (श्रिञ् सेवायाम्) + क्त (कर्तरि) ।
	ज्ञात्वा	ज्ञा (ज्ञा अवबोधने) + क्त्वा ।
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अपत्यार्थे) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ ।
	दैवीम्	देव + अण् (दैवम्) + ङीप्, ताम् (देवानाम् इयं दैवी) (इदमर्थे अण् स्त्रीत्वे च ङीप्) ।

भावस्पष्टीकरणम् -

भजन्ति ।	
कथं भजन्ति ?	**अनन्यमनसः** भजन्ति ।
किं कृत्वा अनन्यमनसः भजन्ति ?	**ज्ञात्वा** अनन्यमनसः भजन्ति ।
कं ज्ञात्वा अनन्यमनसः भजन्ति ?	**अव्ययं** ज्ञात्वा अनन्यमनसः भजन्ति ।
कीदृशम् अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ?	**भूतादिम्** अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ।
कं भूतादिम् अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ?	**मां** भूतादिम् अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ।

के मां भूतादिम् अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ?	**महात्मानः तु** मां भूतादिम् अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ।
कीदृशाः महात्मानः तु मां भूतादिम् अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ?	**आश्रिताः** महात्मानः तु मां भूतादिम् अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ।
काम् आश्रिताः महात्मानः तु मां भूतादिम् अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ?	**प्रकृतिम्** आश्रिताः महात्मानः तु मां भूतादिम् अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ।
कीदृशीं प्रकृतिम् आश्रिताः महात्मानः तु मां भूतादिम् अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ?	**दैवीं** प्रकृतिम् आश्रिताः महात्मानः तु मां भूतादिम् अव्ययं ज्ञात्वा अनन्यमनसः भजन्ति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ !**

तात्पर्यम् - सत्त्वगुणप्रधानाः महात्मानस्तु देवानां प्रकृतिम् आश्रिताः मां सर्वेषां भूतानां कारणम् अविनाशिनं च मत्वा एकाग्रचित्ताः सन्तः मां ध्यायन्ति ।

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥९.१४॥

पदच्छेदः - सततम्, कीर्तयन्तः, माम्, यतन्तः, च, दृढव्रताः ।
नमस्यन्तः, च, माम्, भक्त्या, नित्ययुक्ताः, उपासते॥

अन्वयः - दृढव्रताः सततं कीर्तयन्तः यतन्तः च मां नमस्यन्तः च नित्ययुक्ताः भक्त्या माम् उपासते ।

पदार्थः - दृढव्रताः = कठोरनियमाः, सततम् = सदा, कीर्तयन्तः = गायन्तः, यतन्तः च = पूजादिषु प्रयत्नं कुर्वन्तः, मां नमस्यन्तः च = मां नमस्कुर्वन्तः च, नित्ययुक्ताः = सततयोगाः, भक्त्या = प्रीत्या, माम् उपासते = मां भजन्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
दृढव्रताः	अ. पुं. प्र. बहु. (विशेषणम्)	सततम्	अव्ययम्
कीर्तयन्तः	कीर्तयत् - त. पुं. प्र. बहु. (विशेषणम्)	यतन्तः (यतमानः)	यतत् - त. पुं. प्र. बहु. (विशेषणम्)
च	अव्ययम्	माम्	अस्मद् - द. सर्व. द्वि. एक.
नमस्यन्तः	नमस्यत् - त. पुं. प्र. बहु. (विशेषणम्)	नित्ययुक्ताः	अ. पुं. प्र. बहु. (विशेषणम्)

भक्त्या	इ. स्त्री. तृ. एक.	उपासते	उप + आस् (आस उपवेशने) आत्म. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	कीर्तयन्तो माम्	कीर्तयन्तः + माम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	यतन्तश्च	यतन्तः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	नमस्यन्तश्च	नमस्यन्तः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	नित्ययुक्ता उपासते	नित्ययुक्ताः + उपासते	विसर्गसन्धिः (लोपः)।
(ख) समासः	दृढव्रताः	दृढं व्रतं येषां ते दृढव्रताः - बहुव्रीहिः।	
	नित्ययुक्ताः	नित्यं युक्ताः नित्ययुक्ताः - सुप्सुपासमासः।	
(ग) कृदन्तः	कीर्तयन्तः	कृत् (कृत संशब्दने) + शतृ।	
	यतन्तः	यत् (यती प्रयत्ने) + शतृ [1]।	
	नमस्यन्तः	नम् (णम प्रह्वत्वे शब्दे च) + लृट् + शतृ।	
	भक्त्या	भज् (भज सेवायाम्) + क्तिन्, तया।	
	युक्तः	युज् (युजिर् योगे) + क्त (कर्मणि)।	

भावस्पष्टीकरणम् -

उपासते।	
कम् उपासते ?	**माम्** उपासते।
कया माम् उपासते ?	**भक्त्या** माम् उपासते।
के भक्त्या माम् उपासते ?	**दृढव्रताः** भक्त्या माम् उपासते।
दृढव्रताः **किं कुर्वन्तः** भक्त्या माम् उपासते ?	दृढव्रताः **कीर्तयन्तः** भक्त्या माम् उपासते।
दृढव्रताः **कथं** कीर्तयन्तः भक्त्या माम् उपासते ?	दृढव्रताः **सततं** कीर्तयन्तः भक्त्या माम् उपासते।
दृढव्रताः सततं कीर्तयन्तः **पुनः किं कुर्वन्तः** भक्त्या माम् उपासते ?	दृढव्रताः सततं कीर्तयन्तः **यतन्तः च** भक्त्या माम् उपासते।
दृढव्रताः सततं कीर्तयन्तः यतन्तः च **पुनः किं कुर्वन्तः** भक्त्या माम् उपासते ?	दृढव्रताः सततं कीर्तयन्तः यतन्तः च **नमस्यन्तः च** भक्त्या माम् उपासते।
दृढव्रताः सततं कीर्तयन्तः यतन्तः च **कं** नमस्यन्तः च भक्त्या माम् उपासते ?	दृढव्रताः सततं कीर्तयन्तः यतन्तः च **मां** नमस्यन्तः च भक्त्या माम् उपासते।

1. अत्र 'यतन्तः' इति आर्षप्रयोगः।

दृढव्रताः सततं कीर्तयन्तः यतन्तः च मां नमस्यन्तः च के भक्त्या माम् उपासते ?	दृढव्रताः सततं कीर्तयन्तः यतन्तः च मां नमस्यन्तः च नित्ययुक्ताः भक्त्या माम् उपासते ।

तात्पर्यम् - केचित् कठोरं नियमम् अनुसरन्तः पुरुषाः मां सर्वदा स्तुवन्तः, पूजादिषु प्रयत्नं कुर्वन्तः, भक्त्या नमस्कुर्वन्तश्च मां सर्वदा समाहितमनस्काः सेवन्ते ।

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ।।९.१५।।

पदच्छेदः - ज्ञानयज्ञेन, च, अपि, अन्ये, यजन्तः, माम्, उपासते ।
एकत्वेन, पृथक्त्वेन, बहुधा, विश्वतोमुखम् ।।

अन्वयः - अन्ये च विश्वतोमुखं मां ज्ञानयज्ञेन एकत्वेन पृथक्त्वेन बहुधा यजन्तः अपि उपासते ।

पदार्थः - अन्ये च = इतरे तु, विश्वतोमुखं माम् = सर्वतोमुखं माम्, ज्ञानयज्ञेन = तत्त्वज्ञानरूपयज्ञेन, एकत्वेन = एकतया, पृथक्त्वेन = पृथक्तया, बहुधा = बहुप्रकारेण, यजन्तः अपि = आराधयन्तः अपि, उपासते = सेवन्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अन्ये	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	च	अव्ययम्
विश्वतोमुखम्	अ. पुं. द्वि. एक. (विशेषणम्)	माम्	अस्मद् - द. सर्व. द्वि. एक. (विशेष्यम्)
ज्ञानयज्ञेन	अ. पुं. तृ. एक.	एकत्वेन	अ. नपुं. तृ. एक.
पृथक्त्वेन	अ. नपुं. तृ. एक.	बहुधा	अव्ययम्
यजन्तः	यजत् - त. पुं. प्र. बहु. (विशेषणम्)	अपि	अव्ययम्
उपासते	उप + आस् (आस उपवेशने) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	चापि	च + अपि	सवर्णदीर्घसन्धिः ।
	अप्यन्ये	अपि + अन्ये	यण्सन्धिः ।
	यजन्तो माम्	यजन्तः + माम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः ज्ञानयज्ञेन ज्ञानम् एव यज्ञः ज्ञानयज्ञः, तेन - कर्मधारयः ।
विश्वतोमुखम् विश्वतः मुखानि यस्य सः विश्वतोमुखः, तम् - बहुव्रीहिः ।

(ग) कृदन्तः ज्ञानम् ज्ञा (ज्ञा अवबोधने) + ल्युट् ।
यजन्तः यज् (यज देवपूजासङ्गतिकरणदानेषु) + शतृ ।

(घ) तद्धितान्तः एकत्वेन एक + त्व, तेन ।
पृथक्त्वेन पृथक् + त्व, तेन ।

भावस्पष्टीकरणम् -

उपासते ।	
के उपासते ?	**अन्ये** उपासते ।
अन्ये **किं कुर्वन्तः** उपासते ?	अन्ये **यजन्तः अपि** उपासते ।
अन्ये **केन** यजन्तः अपि उपासते ?	अन्ये **ज्ञानयज्ञेन** यजन्तः अपि उपासते ।
अन्ये **कं** ज्ञानयज्ञेन यजन्तः अपि उपासते ?	अन्ये **मां** ज्ञानयज्ञेन यजन्तः अपि उपासते ।
अन्ये **कीदृशं** मां ज्ञानयज्ञेन यजन्तः अपि उपासते ?	अन्ये च **विश्वतोमुखं** मां ज्ञानयज्ञेन यजन्तः अपि उपासते ।
अन्ये च विश्वतोमुखं मां ज्ञानयज्ञेन **कतिधा** यजन्तः अपि उपासते ?	अन्ये च विश्वतोमुखं मां ज्ञानयज्ञेन **बहुधा** यजन्तः अपि उपासते ।
अन्ये च विश्वतोमुखं मां ज्ञानयज्ञेन **पुनः कथं** बहुधा यजन्तः अपि उपासते ?	अन्ये च विश्वतोमुखं मां ज्ञानयज्ञेन **एकत्वेन** बहुधा यजन्तः अपि उपासते ।
अन्ये च विश्वतोमुखं मां ज्ञानयज्ञेन एकत्वेन **पुनः कथं** बहुधा यजन्तः अपि उपासते ?	अन्ये च विश्वतोमुखं मां ज्ञानयज्ञेन एकत्वेन **पृथक्त्वेन** बहुधा यजन्तः अपि उपासते ।

तात्पर्यम् - अन्ये एतत्सर्वं वासुदेव इति ज्ञानरूपेण यज्ञेन मां पूजयन्ति । तत्रापि केचन सर्वत्र वर्तमानं माम् एकमेव परं ब्रह्मेति बुद्ध्या पूजयन्ति, अन्ये तु तादृशस्य ब्रह्मणः दासोऽहम् इति भेदबुद्ध्या इति विशेषः ।

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥९.१६॥

पदच्छेदः - अहम्, क्रतुः, अहम्, यज्ञः, स्वधा, अहम्, अहम्, औषधम् ।
मन्त्रः, अहम्, अहम्, एव, आज्यम्, अहम्, अग्निः, अहम्, हुतम्॥

अन्वयः - अहं क्रतुः, अहं यज्ञः, अहं स्वधा, अहम् औषधम्, अहं मन्त्रः, अहम् आज्यम्, अहम् अग्निः, अहम् एव हुतम् ।

पदार्थः - अहं क्रतुः = अहं वेदोक्तः यज्ञः, अहं यज्ञः = अहं स्मार्तः यज्ञः, अहं स्वधा = अहं पितृभ्यः प्रदेयमन्नम्, अहम् औषधम् = अहं भेषजम्, अहं मन्त्रः = अहं वेदमन्त्रः, अहम् आज्यम् = अहं घृतम्, अहम् अग्निः = अहम् अनलः, अहम् एव हुतम् = हवनकर्म अहमेव ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद् - द. सर्व. प्र. एक. (विशेष्यम्)	क्रतुः	उ. पुं. प्र. एक. (विशेषणम्)
यज्ञः	अ. पुं. प्र. एक. (विशेषणम्)	स्वधा	अव्ययम्
औषधम्	अ. नपुं. प्र. एक. (विशेषणम्)	मन्त्रः	अ. पुं. प्र. एक. (विशेषणम्)
आज्यम्	अ. नपुं. प्र. एक. (विशेषणम्)	अग्निः	इ. पुं. प्र. एक. (विशेषणम्)
एव	अव्ययम्	हुतम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	क्रतुरहम्	क्रतुः + अहम्	विसर्गसन्धिः (रेफः) ।
	स्वधाहम्	स्वधा + अहम्	सवर्णदीर्घसन्धिः ।
	मन्त्रोऽहम्	मन्त्रः + अहम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
	एवाज्यम्	एव + आज्यम्	सवर्णदीर्घसन्धिः ।
	अग्निरहम्	अग्निः + अहम्	विसर्गसन्धिः (रेफः) ।
(ख) कृदन्तः	मन्त्रः	मन्त् (मत्रि गुप्तपरिभाषणे) + अच् ।	
	आज्यम्	आ + अञ्ज् (अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु) + क्यप् ।	
	हुतम्	हु (हु दानादनयोः) + क्त (कर्मणि) ।	
(ग) तद्धितान्तः	औषधम्	ओषधिः + अण् (ओषधेः इदम् औषधम्) ।	

भावस्पष्टीकरणम् -

(अस्मि) ।	
कः (अस्मि) ?	**अहं क्रतुः (अस्मि) ।**
अहं क्रतुः पुनः कः (अस्मि) ?	**अहं क्रतुः, अहं यज्ञः (अस्मि) ।**

अहं क्रतुः, अहं यज्ञः, **पुनः कः** (अस्मि) ?	अहं क्रतुः, अहं यज्ञः, **अहं स्वधा** (अस्मि) ।
अहं क्रतुः, अहं यज्ञः, अहं स्वधा, **पुनः कः** (अस्मि) ?	अहं क्रतुः, अहं यज्ञः, अहं स्वधा, **अहम् औषधम्** (अस्मि) ।
अहं क्रतुः, अहं यज्ञः, अहं स्वधा, अहम् औषधम्, **पुनः कः** (अस्मि) ?	अहं क्रतुः, अहं यज्ञः, अहं स्वधा, अहम् औषधम्, **अहं मन्त्रः** (अस्मि) ।
अहं क्रतुः, अहं यज्ञः, अहं स्वधा, अहम् औषधम्, अहं मन्त्रः, **पुनः कः** (अस्मि) ?	अहं क्रतुः, अहं यज्ञः, अहं स्वधा, अहम् औषधम्, अहं मन्त्रः, **अहम् आज्यम्** (अस्मि) ।
अहं क्रतुः, अहं यज्ञः, अहं स्वधा, अहम् औषधम्, अहं मन्त्रः, अहम् आज्यम्, **पुनः कः** (अस्मि) ?	अहं क्रतुः, अहं यज्ञः, अहं स्वधा, अहम् औषधम्, अहं मन्त्रः, अहम् आज्यम्, **अहम् अग्निः** (अस्मि) ।
अहं क्रतुः, अहं यज्ञः, अहं स्वधा, अहम् औषधम्, अहं मन्त्रः, अहम् आज्यम्, अहम् अग्निः, **पुनः कः** (अस्मि) ?	अहं क्रतुः, अहं यज्ञः, अहं स्वधा, अहम् औषधम्, अहं मन्त्रः, अहम् आज्यम्, अहम् अग्निः, **अहम् एव हुतम्** (अस्मि) ।

तात्पर्यम् - अहं श्रौतयज्ञः, स्मार्तयज्ञः, पितृभ्यो देयं हविः, औषधं, मन्त्रः, आज्यम् अग्निः च हविः अपि अहमेव अस्मि हविश्चेति सर्वमपि अस्मि ।

पिताहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोङ्कार ऋक्साम यजुरेव च ॥९.१७॥

पदच्छेदः - पिता, अहम्, अस्य, जगतः, माता, धाता, पितामहः ।
वेद्यम्, पवित्रम्, ओङ्कारः, ऋक्, साम, यजुः, एव, च॥

अन्वयः - अस्य जगतः पिता माता धाता पितामहः वेद्यं पवित्रम् ओङ्कारः ऋक् साम यजुः च अहम् एव ।

पदार्थः - अस्य = एतस्य, जगतः = प्रपञ्चस्य, पिता = जनकः, माता = जननी, धाता = पोषयिता, पितामहः=पितुः पिता, वेद्यम्=वेदितव्यं वस्तु, पवित्रम्=पावनं वस्तु, ओङ्कारः=प्रणवः, ऋक्=ऋग्वेदः, साम = सामवेदः, यजुः च = यजुर्वेदः च, अहम् एव = अहमेव ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अस्य	इदम् - म. सर्व. नपुं. ष. एक. (विशेषणम्)	जगतः	जगत् - त. नपुं. ष. एक. (विशेष्यम्)
पिता	ऋ. पुं. प्र. एक. (विशेषणम्)	माता	ऋ. स्त्री. प्र. एक. (विशेषणम्)

धाता	ऋ. पुं. प्र. एक. (विशेषणम्)	पितामहः	अ. पुं. प्र. एक. (विशेषणम्)
वेद्यम्	अ. नपुं. प्र. एक. (विशेषणम्)	पवित्रम्	अ. नपुं. प्र. एक. (विशेष्यम्)
ओङ्कारः	अ. पुं. प्र. एक. (विशेषणम्)	ऋक्	ऋच् - चका. स्त्री. प्र. एक. (विशेषणम्)
साम	सामन् - न. नपुं. प्र. एक. (विशेषणम्)	यजुः	यजुस् - सका. नपुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	अहम्	अस्मद् - द. सर्व. प्र. एक. (विशेष्यम्)
एव	अव्ययम्		

व्याकरणम् -

(क) सन्धिः	पिताहम्	पिता + अहम्	सवर्णदीर्घसन्धिः ।
	जगतो माता	जगतः + माता	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	ओङ्कार ऋक्	ओङ्कारः + ऋक्	विसर्गसन्धिः (लोपः) ।
	यजुरेव	यजुः + एव - विसर्गसन्धिः, रेफः ।	
(ख) कृदन्तः	पिता	पा (पा रक्षणे) + तृच् ।	
	धाता	धा (डुधाञ् धारणपोषणयोः) + तृच् ।	
	वेद्यम्	विद् (विद ज्ञाने) + ण्यत् (कर्मणि) ।	
	पवित्रम्	पू (पूञ् पवने) + इत्र ।	
(ग) तद्धितान्तः	पितामहः	पितृ + डामहच् ।	

भावस्पष्टीकरणम् -

अहम् एव (अस्मि) ।	
कः अहम् एव (अस्मि) ?	**पिता माता धाता पितामहः वेद्यं पवित्रम् ओङ्कारः ऋक् साम यजुः च** अहम् एव (अस्मि) ।
कस्य पिता माता धाता पितामहः वेद्यं पवित्रम् ओङ्कारः ऋक् साम यजुः च अहम् एव (अस्मि) ?	**जगतः** पिता माता धाता पितामहः वेद्यं पवित्रम् ओङ्कारः ऋक् साम यजुः च अहम् एव (अस्मि) ।
कस्य जगतः पिता माता धाता पितामहः वेद्यं पवित्रम् ओङ्कारः ऋक् साम यजुः च अहम् एव (अस्मि) ?	**अस्य** जगतः पिता माता धाता पितामहः वेद्यं पवित्रम् ओङ्कारः ऋक् साम यजुः च अहम् एव (अस्मि) ।

तात्पर्यम् - अहम् एव अस्य जगतः पिता, माता, पोषयिता, पितामहः, ज्ञेयं वस्तु, पावयिता, ओङ्कारः सर्वे वेदाः च अस्मि ।

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्।
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम्॥९.१८॥

पदच्छेदः - गतिः, भर्ता, प्रभुः, साक्षी, निवासः, शरणम्, सुहृत्।
प्रभवः, प्रलयः, स्थानम्, निधानम्, बीजम्, अव्ययम्॥

अन्वयः - (अहमेव) गतिः भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानम् अव्ययं बीजम्।

पदार्थः - गतिः = अहमेव कर्मफलम्, भर्ता = पोषणकर्ता, प्रभुः = स्वामी, साक्षी = शुभाशुभयोः द्रष्टा, निवासः = गृहम्, शरणम् = रक्षकः, सुहृत् = सखा, प्रभवः = उत्पत्तिहेतुः, प्रलयः = प्रलयहेतुः, स्थानम् = आधारः, निधानम् = लयस्थानम्, अव्ययम् = नाशरहितम्, बीजम् = प्ररोहनिमित्तम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
गतिः	इ. स्त्री. प्र. एक. (विशेषणम्)	भर्ता	ऋ. पुं. प्र. एक. (विशेषणम्)
प्रभुः	उ. पुं. प्र. एक. (विशेषणम्)	साक्षी	साक्षिन् - न. पुं. प्र. एक. (विशेषणम्)
निवासः	अ. पुं. प्र. एक. (विशेषणम्)	शरणम्	अ. नपुं. प्र. एक. (विशेषणम्)
सुहृत्	सुहृद् - द. पुं. प्र. एक. (विशेषणम्)	प्रभवः	अ. पुं. प्र. एक. (विशेषणम्)
प्रलयः	अ. पुं. प्र. एक. (विशेषणम्)	स्थानम्	अ. नपुं. प्र. एक. (विशेषणम्)
निधानम्	अ. नपुं. प्र. एक. (विशेषणम्)	अव्ययम्	अ. नपुं. प्र. एक. (विशेषणम्)
बीजम्	अ. नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः गतिर्भर्ता — गतिः + भर्ता — विसर्गसन्धिः (रेफः)।

(ख) समासः अव्ययम् — न व्ययम् अव्ययम् - नञ्तत्पुरुषः।

(ग) कृदन्तः
गतिः — गम् (गम्लृ गतौ) + क्तिन्।
भर्ता — भृ (भृञ् भरणे) + तृच्।
निवासः — नि + वस् (वस निवासे) + घञ्।
शरणम् — श्रि (श्रिञ् सेवायाम्) + ल्युट्।
प्रभवः — प्र + भू (भू सत्तायाम्) + अप्।
प्रलयः — प्र + ली (ली श्लेषणे) + अच्।
स्थानम् — स्था (ष्ठा गतिनिवृत्तौ) + ल्युट्।
निधानम् — नि + धा (डुधाञ् धारणपोषणयोः) + ल्युट्।

भावस्पष्टीकरणम् -

(अस्मि)।	
कः (अस्मि) ?	**गतिः भर्ता प्रभुः साक्षी निवासः शरणं सुहृत् प्रभवः प्रलयः स्थानं निधानम् अव्ययं बीजम्**
(अस्मि)।	

तात्पर्यम् - अहमेव कर्मणां फलं, पोषकः, स्वामी, शुभाशुभयोः द्रष्टा, वासस्थानं, रक्षकः, हितकारी, उत्पत्तिस्थानं, प्रलयकर्ता, आधारः, लयस्थानं, नाशरहितं बीजं च अस्मि।

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन॥९.१९॥

पदच्छेदः - तपामि, अहम्, अहम्, वर्षम्, निगृह्णामि, उत्सृजामि, च।
अमृतम्, च, एव, मृत्युः, च, सत्, असत्, च, अहम्, अर्जुन॥

अन्वयः - अर्जुन ! अहं तपामि, अहं वर्षं निगृह्णामि उत्सृजामि च। अहम् एव अमृतं मृत्युः च सत् असत् च।

पदार्थः - अर्जुन = अर्जुन !, अहं तपामि = अहं तापयामि, अहं वर्षं निगृह्णामि = अहं वृष्टिं रुणध्मि, उत्सृजामि च = त्यजामि अपि, अहम् एव अमृतम् = अहम् एव अमृतम्, मृत्युः च = मरणं च, सत् = स्थूलं दृश्यम्, असत् च = सूक्ष्मं च।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	अहम्	अस्मद् - द. सर्व. प्र. एक. (विशेष्यम्)
तपामि	तप् (तप सन्तापे) पर. कर्तरि लट्. उपु. एक.	वर्षम्	अ. नपुं. द्वि. एक.
निगृह्णामि	नि + ग्रह् (ग्रह उपादाने) पर. कर्तरि लट्. उपु. एक.	उत्सृजामि	उद् + सृज् (सृज विसर्गे) पर. कर्तरि लट्. उपु. एक.
च	अव्ययम्	एव	अव्ययम्
अमृतम्	अ. नपुं. प्र. एक. (विशेषणम्)	मृत्युः	उ. पुं. प्र. एक. (विशेषणम्)
सत्	सत् - त. नपुं. प्र. एक. (विशेषणम्)	असत्	असत् - त. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	तपाम्यहम्	तपामि + अहम्	यण्सन्धिः ।
	निगृह्णाम्युत्सृजामि	निगृह्णामि + उत्सृजामि	यण्सन्धिः ।
	चैव	च + एव	वृद्धिसन्धिः ।
	मृत्युश्च	मृत्युः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	असच्च	असत् + च	श्चुत्वसन्धिः ।
(ख) समासः	अमृतम्	न मृतम् अमृतम् - नञ्तत्पुरुषः ।	
	असत्	न सत् असत् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	मृतम्	मृ (मृङ् प्राणत्यागे) + क्त (भावे) ।	

भावस्पष्टीकरणम् -

अहं कः ?	**अहम् एव अमृतं मृत्युः च सत् असत् च ।**
अहं **किं करोमि** ?	अहं **तपामि** ।
अहं तपामि **पुनः किं करोमि** ?	अहं तपामि, **अहं निगृह्णामि** ।
अहं तपामि, अहं **किं** निगृह्णामि ?	अहं तपामि, अहं **वर्षं** निगृह्णामि ।
अहं तपामि, अहं वर्षं निगृह्णामि **पुनः किं करोमि** ?	अहं तपामि, अहं वर्षं निगृह्णामि, **उत्सृजामि च** ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन** !

तात्पर्यम् - अहमेव ग्रीष्मकाले आदित्यरूपः सन् जगदिदं तापयामि । वृष्टिकाले चतुरः मासान् जलं मुञ्चामि, अन्यान् अष्ट मासान् निगृह्णामि । अहमेव सर्वेषां जीवनं मृत्युश्च । अहमेव स्थूलं दृश्यं सूक्ष्मं च ।

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥९.२०॥

पदच्छेदः - त्रैविद्याः, माम्, सोमपाः, पूतपापाः, यज्ञैः, इष्ट्वा, स्वर्गतिम्, प्रार्थयन्ते ।
ते, पुण्यम्, आसाद्य, सुरेन्द्रलोकम्, अश्नन्ति, दिव्यान्, दिवि, देवभोगान्॥

अन्वयः - त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते । ते पुण्यं सुरेन्द्रलोकम् आसाद्य दिवि दिव्यान् देवभोगान् अश्नन्ति ।

पदार्थः - त्रैविद्याः = वेदत्रयज्ञातारः, सोमपाः = सोमपायिनः, पूतपापाः = अपगतकिल्बिषाः, माम् = मा, यज्ञैः = क्रतुभिः, इष्ट्वा = पूजयित्वा, स्वर्गतिम् = स्वर्गगमनम्, प्रार्थयन्ते = याचन्ते, ते = ते जनाः, पुण्यम् =

पवित्रम्, सुरेन्द्रलोकम् = इन्द्रलोकम्, आसाद्य = प्राप्य, दिवि = स्वर्गे, दिव्यान् = स्वर्गस्थितान्, देवभोगान् = सुरभोगान्, अश्नन्ति = अनुभवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
त्रैविद्याः	अ. पुं. प्र. बहु. (विशेषणम्)	सोमपाः	अ. पुं. प्र. बहु. (विशेषणम्)
पूतपापाः	अ. पुं. प्र. बहु. (विशेषणम्)	माम्	अस्मद् - द. सर्व. द्वि. एक.
यज्ञैः	अ. पुं. तृ. बहु.	इष्ट्वा	क्त्वान्तम् अव्ययम्
स्वर्गतिम्	इ. स्त्री. द्वि. एक.	प्रार्थयन्ते	प्र + अर्थ् (अर्थ उपयाच्ञायाम्) आत्म. कर्तरि लट्. प्रपु. बहु.
ते	तद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)	पुण्यम्	अ. पुं. द्वि. एक. (विशेषणम्)
सुरेन्द्रलोकम्	अ. पुं. द्वि. एक. (विशेष्यम्)	आसाद्य	ल्यबन्तम् अव्ययम्
दिवि	दिव् - व. पुं. स. एक.	दिव्यान्	अ. पुं. द्वि. बहु. (विशेषणम्)
देवभोगान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	अश्नन्ति	अश् (अश भोजने) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः त्रैविद्या माम् — त्रैविद्याः + माम् — विसर्गसन्धिः (लोपः)।

पूतपापा यज्ञैः — पूतपापाः + यज्ञैः — विसर्गसन्धिः (लोपः)।

यज्ञैरिष्ट्वा — यज्ञैः + इष्ट्वा — विसर्गसन्धिः (रेफः)।

(ख) समासः त्रैविद्याः — त्रिसङ्ख्याका विद्या त्रिविद्या - मध्यमपदलोपी कर्मधारयः । त्रिविद्याम् अधीयते विदन्ति वा इत्यर्थे अण् त्रैविद्याः (वेदत्रयम् अधीयानाः विदन्तः वा इत्यर्थः)।

सोमपाः — सोमं पिबन्ति इति सोमपाः - कर्तरि कप्रत्ययः उपपदसमासश्च ।

पूतपापाः — पूतं पापं येषां ते पूतपापाः - बहुव्रीहिः ।

सुरेन्द्रलोकम् — सुराणाम् इन्द्रः सुरेन्द्रः - षष्ठीतत्पुरुषः । सुरेन्द्रस्य लोकः सुरेन्द्रलोकः, तम् - षष्ठीतत्पुरुषः ।

देवभोगान् — देवानां भोगाः देवभोगाः, तान् - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः इष्ट्वा — यज् (यज देवपूजासङ्गतिकरणदानेषु) + क्त्वा ।

स्वर्गतिम् — स्वर् + गम् (गम्लृ गतौ) + क्तिन्, ताम्।

	आसाद्य	आ + सद् (षद्लृ विशरणगत्यवसादनेषु) + णिच् + ल्यप्।
	लोकम्	लोक् (लोकृ दर्शने) + घञ् (भावे), तम्।
	भोगान्	भुज् (भुज पालनाभ्यवहारयोः) + घञ्, तान्।
(घ) तद्धितान्तः	दिव्यान्	दिव् + यत्, दिवि भवः दिव्यः, तान्।

भावस्पष्टीकरणम् -

प्रार्थयन्ते।	
कां प्रार्थयन्ते ?	**स्वर्गतिं** प्रार्थयन्ते।
किं कृत्वा स्वर्गतिं प्रार्थयन्ते ?	**इष्ट्वा** स्वर्गतिं प्रार्थयन्ते।
कैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते ?	**यज्ञैः** इष्ट्वा स्वर्गतिं प्रार्थयन्ते।
कं यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते ?	**मां** यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते।
के मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते ?	**त्रैविद्याः** मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते।
त्रैविद्याः **पुनः के** मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते ?	त्रैविद्याः **सोमपाः** मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते।
त्रैविद्याः सोमपाः **पुनः के** मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते ?	त्रैविद्याः सोमपाः **पूतपापाः** मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते।
त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते **(पुनः) ते किं कुर्वन्ति** ?	त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते **(पुनः) ते अश्नन्ति**।
त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते (पुनः) ते **कान्** अश्नन्ति ?	त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते (पुनः) ते **देवभोगान्** अश्नन्ति।
त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते (पुनः) ते **कीदृशान्** देवभोगान् अश्नन्ति ?	त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते (पुनः) ते **दिव्यान्** देवभोगान् अश्नन्ति।
त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते (पुनः) ते **कुत्र** दिव्यान् देवभोगान् अश्नन्ति ?	त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते (पुनः) ते **दिवि** दिव्यान् देवभोगान् अश्नन्ति।
त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते (पुनः) ते **किं कृत्वा** दिवि दिव्यान् देवभोगान् अश्नन्ति ?	त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते (पुनः) ते **आसाद्य** दिवि दिव्यान् देवभोगान् अश्नन्ति।

त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते (पुनः) ते **कम्** आसाद्य दिवि दिव्यान् देवभोगान् अश्नन्ति ?	त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते (पुनः) ते **सुरेन्द्रलोकम्** आसाद्य दिवि दिव्यान् देवभोगान् अश्नन्ति ।
त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते (पुनः) ते **कीदृशं** सुरेन्द्रलोकम् आसाद्य दिवि दिव्यान् देवभोगान् अश्नन्ति ?	त्रैविद्याः सोमपाः पूतपापाः मां यज्ञैः इष्ट्वा स्वर्गतिं प्रार्थयन्ते (पुनः) ते **पुण्यं** सुरेन्द्रलोकम् आसाद्य दिवि दिव्यान् देवभोगान् अश्नन्ति ।

तात्पर्यम् - वेदत्रयविदः केचित् सोमयागेन इन्द्रादीन् सन्तोषयन्ति । यागशेषं सोमं च पीत्वा स्वर्गं प्राप्नुवन्ति । तत्र कञ्चित् कालं वसन्तः दिव्यान् भोगान् अनुभवन्ति ।

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥९.२१॥

पदच्छेदः - ते, तम्, भुक्त्वा, स्वर्गलोकम्, विशालम्, क्षीणे, पुण्ये, मर्त्यलोकम्, विशन्ति । एवम्, त्रयीधर्मम्, अनुप्रपन्नाः, गतागतम्, कामकामाः, लभन्ते॥

अन्वयः - ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति । एवं त्रयीधर्मम् अनुप्रपन्नाः कामकामाः गतागतं लभन्ते ।

पदार्थः - ते = ते मानवाः, तम् = प्रसिद्धम्, विशालम् = विपुलम्, स्वर्गलोकम् = स्वर्गभुवनम्, भुक्त्वा = अनुभूय, पुण्ये = सत्कर्मजन्यफलविशेषे, क्षीणे = विनष्टे, मर्त्यलोकम् = मानवलोकम्, विशन्ति = प्रविशन्ति, एवम् = इत्थम्, त्रयीधर्मम् = वेदत्रयधर्मम्, अनुप्रपन्नाः = प्राप्ताः, कामकामाः = भोगवस्तूनि इच्छन्तः, गतागतम् = यातायातम्, लभन्ते = प्राप्नुवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ते	तद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)	तम्	तद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)
विशालम्	अ. पुं. द्वि. एक. (विशेषणम्)	स्वर्गलोकम्	अ. पुं. द्वि. एक. (विशेष्यम्)
भुक्त्वा	क्त्वान्तम् अव्ययम्	पुण्ये	अ. नपुं. स. एक. (विशेष्यम्)
क्षीणे	अ. नपुं. स. एक. (विशेषणम्)	मर्त्यलोकम्	अ. पुं. द्वि. एक.

विशन्ति	विश् (विश प्रवेशने) पर. कर्तरि लट्. प्र. पु. बहु.	एवम्	अव्ययम्
त्रयीधर्मम्	अ. पुं. प्र. एक.	अनुप्रपन्नाः	अ. पुं. प्र. बहु. (विशेषणम्)
कामकामाः	अ. पुं. प्र. बहु. (विशेषणम्)	गतागतम्	अ. नपुं. द्वि. एक.
लभन्ते	लभ् (डुलभष् प्राप्तौ) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) समासः स्वर्गलोकम् — स्वर्गः इति लोकः स्वर्गलोकः, तम् - कर्मधारयः ।

मर्त्यलोकम् — मर्त्यानां लोकः मर्त्यलोकः, तम् - षष्ठीतत्पुरुषः ।

त्रयीधर्मम् — त्रय्याः धर्मः त्रयीधर्मः, तम् - षष्ठीतत्पुरुषः ।

गतागतम् — गतं च आगतं च अनयोः समाहारः गतागतम् - द्वन्द्वः ।

(ख) कृदन्तः भुक्त्वा — भुज् (भुज पालनाभ्यवहारयोः) + क्त्वा ।

क्षीणे — क्षि (क्षि क्षये) + क्त (कर्तरि), तस्मिन् ।

लोकम् — लोक् (लोकृ दर्शने) + घञ् (भावे), तम् ।

अनुप्रपन्नाः — अनु + प्र + पद् (पद गतौ) + क्त (कर्तरि), ते ।

कामकामाः — कामान् (सुखकरपदार्थान्) कामयन्ते इति कामकामाः (कर्तरि अण्प्रत्ययः) ।

भावस्पष्टीकरणम् -

विशन्ति ।	
कं विशन्ति ?	**मर्त्यलोकं** विशन्ति ।
कदा मर्त्यलोकं विशन्ति ?	**पुण्ये क्षीणे (सति)** मर्त्यलोकं विशन्ति ।
किं कृत्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति ?	**भुक्त्वा** पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति ।
कं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति ?	**स्वर्गलोकं** भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति ।
कीदृशं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति ?	**विशालं** स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति ।
कं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति ?	**तं** विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति ।

के तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति ?	**ते** तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति।
ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति। **एवं किं कुर्वन्ति** ?	ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति। **एवं लभन्ते**।
ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति। एवं **किं** लभन्ते ?	ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति। एवं **गतागतं** लभन्ते।
ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति। एवं **के** गतागतं लभन्ते ?	ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति। एवं **कामकामाः** गतागतं लभन्ते।
ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति। एवं **कीदृशाः** कामकामाः गतागतं लभन्ते ?	ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति। एवम् **अनुप्रपन्नाः** कामकामाः गतागतं लभन्ते।
ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति। एवं **कम्** अनुप्रपन्नाः कामकामाः गतागतं लभन्ते ?	ते तं विशालं स्वर्गलोकं भुक्त्वा पुण्ये क्षीणे (सति) मर्त्यलोकं विशन्ति। एवं **त्रयीधर्मम्** अनुप्रपन्नाः कामकामाः गतागतं लभन्ते।

तात्पर्यम् - ते च वेदत्रयज्ञातारः विशाले तस्मिन् स्वर्गलोके कञ्चित् कालं सुखम् अनुभूय पुण्ये क्षीणे सति इमं लोकम् आगच्छन्ति। पुनरपि वैदिकमार्गम् अनुसरन्तः भोगान् अपेक्षमाणाः स्वर्गं गच्छन्ति। पुण्ये क्षीणे सति पुनः ततः प्रत्यागच्छन्ति।

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥९.२२॥

पदच्छेदः - अनन्याः, चिन्तयन्तः, माम्, ये, जनाः, पर्युपासते।
तेषाम्, नित्याभियुक्तानाम्, योगक्षेमम्, वहामि, अहम्॥

अन्वयः - अनन्याः ये जनाः मां चिन्तयन्तः पर्युपासते नित्याभियुक्तानां तेषां योगक्षेमम् अहं वहामि।

पदार्थः - अनन्याः = मामेव आश्रिताः, ये जनाः = ये मानवाः, मां चिन्तयन्तः = मां ध्यायन्तः, पर्युपासते = सेवन्ते, नित्याभियुक्तानाम् = सततयोगिनाम्, तेषाम् = तादृशानाम्, योगक्षेमम् = अप्राप्तस्य लाभं प्राप्तस्य च परिपालनम्, वहामि अहम् = अहं धारयामि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनन्याः	अ. पुं. प्र. बहु. (विशेषणम्)	ये	यद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)
जनाः	अ. पुं. प्र. बहु. (विशेष्यम्)	माम्	अस्मद् - द. सर्व. द्वि. एक.
चिन्तयन्तः	चिन्तयत् - त. पुं. प्र. बहु. (विशेषणम्)	पर्युपासते	परि + उप + आस् (आस उपवेशने) आत्म. कर्तरि लट्. प्रपु. बहु.
नित्याभियुक्तानाम्	अ. पुं. ष. बहु. (विशेषणम्)	तेषाम्	तद् - द. सर्व. पुं. ष. बहु. (विशेषणम्)
योगक्षेमम्	अ. नपुं. द्वि. एक.	वहामि	वह् (वह प्रापणे) पर. कर्तरि लट्. उपु. एक.
अहम्	अस्मद् - द. सर्व. प्र. एक.		

व्याकरणम् -

(क) सन्धिः	अनन्याश्चिन्तयन्तः	अनन्याः + चिन्तयन्तः	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	चिन्तयन्तो माम्	चिन्तयन्तः + माम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	वहाम्यहम्	वहामि + अहम्	यण्सन्धिः।
(ख) समासः	अनन्याः	न विद्यते अन्यः येषां ते अनन्याः - नञ्बहुव्रीहिः।	
	नित्याभियुक्तानाम्	नित्यम् अभियुक्ताः नित्याभियुक्ताः, तेषाम् - सुप्सुपासमासः।	
	योगक्षेमम्	योगश्च क्षेमं च अनयोः समाहारः योगक्षेमम् - द्वन्द्वः।	
(ग) कृदन्तः	चिन्तयन्तः	चिन्त् (चिति स्मृत्याम्) + शतृ, ते।	
	युक्तः	युज् (युजिर् योगे) + क्त (कर्मणि)।	

भावस्पष्टीकरणम् -

पर्युपासते।	
के पर्युपासते ?	**जनाः** पर्युपासते।
के जनाः पर्युपासते ?	**ये** जनाः पर्युपासते।
कीदृशाः ये जनाः पर्युपासते ?	**अनन्याः** ये जनाः पर्युपासते।
अनन्याः ये जनाः **किं कुर्वन्तः** पर्युपासते ?	अनन्याः ये जनाः **चिन्तयन्तः** पर्युपासते।
अनन्याः ये जनाः **कं** चिन्तयन्तः पर्युपासते ?	अनन्याः ये जनाः **मां** चिन्तयन्तः पर्युपासते।

अनन्याः ये जनाः मां चिन्तयन्तः पर्युपासते **तेषाम् अहं किं करोमि ?**	अनन्याः ये जनाः मां चिन्तयन्तः पर्युपासते **तेषाम् अहं वहामि ।**
अनन्याः ये जनाः मां चिन्तयन्तः पर्युपासते तेषां **किम्** अहं वहामि ?	अनन्याः ये जनाः मां चिन्तयन्तः पर्युपासते तेषां **योगक्षेमम्** अहं वहामि ।
अनन्याः ये जनाः मां चिन्तयन्तः पर्युपासते **कीदृशानां** तेषां योगक्षेमम् अहं वहामि ?	अनन्याः ये जनाः मां चिन्तयन्तः पर्युपासते **नित्याभियुक्तानां** तेषां योगक्षेमं वहामि अहम् ।

तात्पर्यम् - ये जनाः इन्द्रादीन् विहाय मामेव शरणम् आपन्नाः सेवन्ते तेषाम् अप्राप्तस्य प्राप्तिं स्थितस्य च परिरक्षणम् अहं करोमि ।

येऽप्यन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥९.२३॥

पदच्छेदः - ये, अपि, अन्यदेवताः, भक्ताः, यजन्ते, श्रद्धया, अन्विताः ।
ते, अपि, माम्, एव, कौन्तेय, यजन्ति, अविधिपूर्वकम्॥

अन्वयः - कौन्तेय ! ये भक्ताः अपि श्रद्धया अन्विताः अन्यदेवताः यजन्ते ते अपि अविधिपूर्वकं माम् एव यजन्ति ।

पदार्थः - कौन्तेय = कुन्तीपुत्र !, ये भक्ताः अपि = ये च भक्ताः, श्रद्धया = आसक्त्या, अन्विताः = संयुक्ताः, अन्यदेवताः = इतरदेवान्, यजन्ते = उपासते, ते अपि = ते अपि मानवाः, अविधिपूर्वकम् = अज्ञानपूर्वकम्, माम् एव यजन्ति = माम् एव अर्चन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	ये	यद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)
भक्ताः	अ. पुं. प्र. बहु. (विशेष्यम्)	अपि	अव्ययम्
श्रद्धया	आ. स्त्री. तृ. एक.	अन्विताः	अ. पुं. प्र. बहु. (विशेषणम्)
अन्यदेवताः	आ. स्त्री. प्र. बहु.	यजन्ते	यज् (यज देवपूजासङ्गतिकरण-दानेषु) आत्म. कर्तरि लट्. प्रपु. बहु.
ते	तद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	अविधिपूर्वकम्	अ. नपुं. द्वि. एक.

माम्	अस्मद्- द. सर्व. द्वि. एक.	एव	अव्ययम्
यजन्ति	यज् (यज देवपूजासङ्गतिकरण-दानेषु) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	येऽपि	ये + अपि	पूर्वरूपसन्धिः ।
	अप्यन्यदेवताः	अपि + अन्यदेवताः	यण्सन्धिः ।
	अन्यदेवता भक्ताः	अन्यदेवताः + भक्ताः	विसर्गसन्धिः (लोपः) ।
	भक्ता यजन्ते	भक्ताः + यजन्ते	विसर्गसन्धिः (लोपः) ।
	श्रद्धयान्विताः	श्रद्धया + अन्विताः	सवर्णदीर्घसन्धिः ।
	तेऽपि	ते + अपि	पूर्वरूपसन्धिः ।
	यजन्त्यविधिपूर्वकम्	यजन्ति + अविधिपूर्वकम्	यण्सन्धिः ।
(ख) समासः	अन्यदेवताः	अन्याः देवताः अन्यदेवताः - कर्मधारयः ।	
	अविधिपूर्वकम्	विधिः पूर्वं यस्य तत् - बहुव्रीहिः ।	
		न विधिपूर्वकम् अविधिपूर्वकम् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	भक्ताः	भज् (भज सेवायाम्) + क्त (कर्तरि) ।	
	अन्विताः	अनु + इ (इण् गतौ) + क्त (कर्तरि) ।	
(घ) तद्धितान्तः	कौन्तेय	कुन्ती + ढक् (अपत्यार्थे) कुन्त्याः अपत्यं पुमान्, तत्सम्बुद्धौ ।	

भावस्पष्टीकरणम् -

यजन्ति ।	
कं यजन्ति ?	**माम् एव** यजन्ति ।
कथं माम् एव यजन्ति ?	**अविधिपूर्वकं** माम् एव यजन्ति ।
के अविधिपूर्वकं माम् एव यजन्ति ?	**ते अपि** अविधिपूर्वकं माम् एव यजन्ति ।
के ते अपि अविधिपूर्वकं माम् एव यजन्ति ?	**ये यजन्ते** ते अपि अविधिपूर्वकं माम् एव यजन्ति ।
ये **काः** यजन्ते ते अपि अविधिपूर्वकं माम् एव यजन्ति ?	ये **अन्यदेवताः** यजन्ते ते अपि अविधिपूर्वकं माम् एव यजन्ति ।
ये **कथम्भूताः** अन्यदेवताः यजन्ते ते अपि अविधिपूर्वकं माम् एव यजन्ति ?	ये **अन्विताः** अन्यदेवताः यजन्ते ते अपि अविधिपूर्वकं माम् एव यजन्ति ।

ये **कया** अन्विताः अन्यदेवताः यजन्ते ते अपि अविधिपूर्वकं माम् एव यजन्ति ?	ये **श्रद्धया** अन्विताः अन्यदेवताः यजन्ते ते अपि अविधिपूर्वकं माम् एव यजन्ति ।
ये **के** श्रद्धया अन्विताः अन्यदेवताः यजन्ते ते अपि अविधिपूर्वकं माम् एव यजन्ति ?	ये **भक्ताः अपि** श्रद्धया अन्विताः अन्यदेवताः यजन्ते ते अपि अविधिपूर्वकं माम् एव यजन्ति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय !**

तात्पर्यम् - येऽपि इन्द्रादीन् अन्यान् देवान् श्रद्धायुक्ताः पूजयन्ति ते अजानन्तः माम् एव पूजयन्ति इति तेषामपि अभ्युदयः अवश्यं भवति, किन्तु सः न शाश्वतः इति विशेषः ।

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥९.२४॥

पदच्छेदः - अहम्, हि, सर्वयज्ञानाम्, भोक्ता, च, प्रभुः, एव, च ।
न, तु, माम्, अभिजानन्ति, तत्त्वेन, अतः, च्यवन्ति, ते॥

अन्वयः - अहम् एव हि सर्वयज्ञानां भोक्ता च प्रभुः च ते मां तत्त्वेन न तु अभिजानन्ति अतः च्यवन्ति ।

पदार्थः - अहम् एव हि सर्वयज्ञानाम् = अहम् एव हि सकलक्रतूनाम्, भोक्ता च = अनुभविता च, प्रभुः च = स्वामी च, ते मां तत्त्वेन = ते मां यथावत्, न तु अभिजानन्ति = न तु सम्यक् विदन्ति, अतः = तस्मात्, च्यवन्ति = फलात् भ्रष्टाः भवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद् - द. सर्व. प्र. एक. (विशेष्यम्)	एव	अव्ययम्
हि	अव्ययम्	सर्वयज्ञानाम्	अ. पुं. ष. बहु.
भोक्ता	ऋ. पुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
प्रभुः	उ. पुं. प्र. एक. (विशेषणम्)	ते	तद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)
माम्	अस्मद् - द. सर्व. द्वि. एक.	तत्त्वेन	अ. पुं. तृ. एक.
न	अव्ययम्	तु	अव्ययम्
अभिजानन्ति	अभि + ज्ञा (ज्ञा अवबोधने) पर. कर्तरि लट्. प्रपु. बहु.	अतः	अव्ययम्

च्यवन्ति (च्यवन्ते)	च्यु (च्युङ् गतौ) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	प्रभुरेव	प्रभुः + एव	विसर्गसन्धिः (सकारः) रेफः ।
	तत्त्वेनातः	तत्त्वेन + अतः	सवर्णदीर्घसन्धिः ।
	अतश्च्यवन्ति	अतः + च्यवन्ति	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
(ख) समासः	सर्वयज्ञानाम्	सर्वे यज्ञाः सर्वयज्ञाः, तेषाम् - कर्मधारयः ।	
(ग) कृदन्तः	भोक्ता	भुज् (भुज पालनाभ्यवहारयोः) + तृच् ।	

भावस्पष्टीकरणम् -

न तु अभिजानन्ति ।	
के न तु अभिजानन्ति ?	**ते** न तु अभिजानन्ति ।
ते **कं** न तु अभिजानन्ति ?	ते **मां** न तु अभिजानन्ति ।
ते मां **केन** न तु अभिजानन्ति ?	ते मां **तत्त्वेन** न तु अभिजानन्ति ।
ते **कीदृशं** मां तत्त्वेन न तु अभिजानन्ति ?	ते **'अहम् एव हि सर्वयज्ञानां भोक्ता च प्रभुः च' (एवं)** मां तत्त्वेन न तु अभिजानन्ति ।
ते 'अहम् एव हि सर्वयज्ञानां भोक्ता च प्रभुः च' (एवं) मां तत्त्वेन न तु अभिजानन्ति, **अतः किं कुर्वन्ति** ?	ते 'अहम् एव हि सर्वयज्ञानां भोक्ता च प्रभुः च' (एवं) मां तत्त्वेन न तु अभिजानन्ति, **अतः च्यवन्ति** ।

तात्पर्यम् - अहमेव सर्वेषां यज्ञानां भोक्ता फलस्य प्रदाता च । एवं ये न जानन्ति ते कर्मफलं भुक्त्वा अन्ते तस्मात् भ्रष्टाः भवन्ति ।

यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥९.२५॥

पदच्छेदः - यान्ति, देवव्रताः, देवान्, पितॄन्, यान्ति, पितृव्रताः ।
भूतानि, यान्ति, भूतेज्याः, यान्ति, मद्याजिनः, अपि, माम्॥

अन्वयः - देवव्रताः देवान् यान्ति पितृव्रताः पितॄन् यान्ति भूतेज्याः भूतानि यान्ति मद्याजिनः अपि मां यान्ति ।

पदार्थः - देवव्रताः = देवपरायणाः, देवान् = तत्तद्देवविशेषान्, यान्ति = प्राप्नुवन्ति, पितृव्रताः = पितृपरायणाः,

पितॄन् = पितृदेवान्, यान्ति = प्राप्नुवन्ति, भूतेज्याः = भूतपूजकाः, भूतानि = विविधभूतगणान्, यान्ति = प्राप्नुवन्ति, मद्याजिनः अपि = मदाराधकाः च, मां यान्ति मां प्राप्नुवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
देवव्रताः	अ. पुं. प्र. बहु. (विशेषणम्)	देवान्	अ. पुं. द्वि. बहु.
यान्ति	या (या प्रापणे) पर. कर्तरि लट्. प्रपु. बहु.	पितृव्रताः	अ. पुं. प्र. बहु. (विशेषणम्)
पितॄन्	ऋ. पुं. द्वि. बहु.	भूतेज्याः	अ. पुं. प्र. बहु. (विशेषणम्)
भूतानि	अ. नपुं. द्वि. बहु.	मद्याजिनः	मद्याजिन् - न. पुं. प्र. बहु. (विशेषणम्)
अपि	अव्ययम्	माम्	अस्मद् - द. सर्व. द्वि. एक.

व्याकरणम् -

(क) सन्धिः

देवव्रता देवान्	देवव्रताः + देवान्	विसर्गसन्धिः (लोपः) ।
भूतेज्या यान्ति	भूतेज्याः + यान्ति	विसर्गसन्धिः (लोपः) ।
मद्याजिनोऽपि	मद्याजिनः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः

देवव्रताः	देवेषु व्रतं येषां ते देवव्रताः - बहुव्रीहिः ।
पितृव्रताः	पितृषु व्रतं येषां ते पितृव्रताः - बहुव्रीहिः ।
भूतेज्याः	भूतेषु इज्या येषां ते भूतेज्याः - बहुव्रीहिः ।
मद्याजिनः	मां यजन्ति इति मद्याजिनः - ताच्छीलिके कर्तरि णिनिः उपपदसमासश्च ।

(ग) कृदन्तः

देवान्	दिव् (दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु) + घञ् (भावे), तान् ।
पितॄन्	पा (पा रक्षणे) + तृच्, तान् ।
भूतानि	भू (भू सत्तायाम्) + क्त (कर्तरि) ।

भावस्पष्टीकरणम् -

यान्ति ।	
के यान्ति ?	**देवव्रताः** यान्ति ।
देवव्रताः **कान्** यान्ति ?	देवव्रताः **देवान्** यान्ति ।
देवव्रताः देवान् यान्ति, **पुनः के यान्ति ?**	देवव्रताः देवान् यान्ति, **पितृव्रताः यान्ति ।**

देवव्रताः देवान् यान्ति, पितृव्रताः **कान्** यान्ति ?	देवव्रताः देवान् यान्ति, पितृव्रताः **पितॄन्** यान्ति ।
देवव्रताः देवान् यान्ति, पितृव्रताः पितॄन् यान्ति, **पुनः के यान्ति** ?	देवव्रताः देवान् यान्ति, पितृव्रताः पितॄन् यान्ति, **भूतेज्याः यान्ति** ।
देवव्रताः देवान् यान्ति, पितृव्रताः पितॄन् यान्ति, भूतेज्याः **कानि** यान्ति ?	देवव्रताः देवान् यान्ति, पितृव्रताः पितॄन् यान्ति, भूतेज्याः **भूतानि** यान्ति ।
देवव्रताः देवान् यान्ति, पितृव्रताः पितॄन् यान्ति, भूतेज्याः भूतानि यान्ति, **पुनः के यान्ति** ?	देवव्रताः देवान् यान्ति, पितृव्रताः पितॄन् यान्ति, भूतेज्याः भूतानि यान्ति, **मद्याजिनः यान्ति** ।
देवव्रताः देवान् यान्ति, पितृव्रताः पितॄन् यान्ति, भूतेज्याः भूतानि यान्ति, मद्याजिनः **कं** यान्ति ?	देवव्रताः देवान् यान्ति, पितृव्रताः पितॄन् यान्ति, भूतेज्याः भूतानि यान्ति, मद्याजिनः **अपि मां** यान्ति ।

तात्पर्यम् - ये देवान् पूजयन्ति ते देवलोकं गच्छन्ति । ये पितॄन् ते पितृलोकम् । ये पुनः भूतानि पूजयन्ति ते भूतलोकं गच्छन्ति । किन्तु एषां सर्वेषामपि प्रत्यागमनम् अस्ति । मां तु ये पूजयन्ति ते मामेव यान्ति, न प्रत्यागच्छन्ति ।

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥९.२६॥

पदच्छेदः - पत्रम्, पुष्पम्, फलम्, तोयम्, यः, मे, भक्त्या, प्रयच्छति ।
तत्, अहम्, भक्त्युपहृतम्, अश्नामि, प्रयतात्मनः॥

अन्वयः - यः पत्रं पुष्पं फलं तोयं मे भक्त्या प्रयच्छति प्रयतात्मनः भक्त्युपहृतं तत् अहम् अश्नामि ।

पदार्थः - यः = यः मानवः, पत्रम् = पर्णम्, पुष्पम् = कुसुमम्, फलम् = फलम्, तोयम् = उदकम्, मे = मह्यम्, भक्त्या = प्रीत्या, प्रयच्छति = ददाति, प्रयतात्मनः = निगृहीतमनस्कस्य, भक्त्युपहृतम् = भक्त्या समर्पितम्, तत् = तद्वस्तु, अहम् अश्नामि = अहं परिगृह्णामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	पत्रम्	अ. नपुं. द्वि. एक.
पुष्पम्	अ. नपुं. द्वि. एक.	फलम्	अ. नपुं. द्वि. एक.
तोयम्	अ. नपुं. द्वि. एक.	मे	अस्मद् - द. सर्व. च. एक.

भक्त्या	इ. स्त्री. तृ. एक.	प्रयच्छति	प्र + दा (दाण् दाने) पर. कर्तरि लट्. प्रपु. एक.
प्रयतात्मनः	प्रयतात्मन्- न. पुं. ष. एक. (विशेषणम्)	भक्त्युपहृतम्	अ. नपुं. द्वि. एक. (विशेषणम्)
तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	अहम्	अस्मद्- द. सर्व. प्र. एक.
अश्नामि	अश् (अश भोजने) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः	योमे	यः + मे	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	तदहम्	तत् + अहम्	जश्त्वसन्धिः।
(ख) समासः	भक्त्युपहृतम्	भक्त्या उपहृतं भक्त्युपहृतम् - तृतीयातत्पुरुषः।	
	प्रयतात्मनः	प्रयतः आत्मा यस्य सः प्रयतात्मा, तस्य - बहुव्रीहिः।	
(ग) कृदन्तः	पत्रम्	पत् (पत्लृ गतौ) + ष्ट्रन्।	
	पुष्पम्	पुष्प् (पुष्प विकासे) + अच्।	
	फलम्	फल् (फल निष्पत्तौ) + अच्।	
	भक्त्या	भज् (भज सेवायाम्) + क्तिन्, तया।	

भावस्पष्टीकरणम् -

प्रयच्छति।	
कः प्रयच्छति ?	**यः** प्रयच्छति।
यः **कस्मै** प्रयच्छति ?	यः **मे** प्रयच्छति।
यः मे **कया** प्रयच्छति ?	यः मे **भक्त्या** प्रयच्छति।
यः **किं किं** मे भक्त्या प्रयच्छति ?	यः **पत्रं पुष्पं फलं तोयं** मे भक्त्या प्रयच्छति।
यः पत्रं पुष्पं फलं तोयं मे भक्त्या प्रयच्छति **तत् अहं किं करोमि** ?	यः पत्रं पुष्पं फलं तोयं मे भक्त्या प्रयच्छति **तत् अहम् अश्नामि**।
यः पत्रं पुष्पं फलं तोयं मे भक्त्या प्रयच्छति **कस्य** तत् अहम् अश्नामि ?	यः पत्रं पुष्पं फलं तोयं मे भक्त्या प्रयच्छति **प्रयतात्मनः** तत् अहम् अश्नामि।
यः पत्रं पुष्पं फलं तोयं मे भक्त्या प्रयच्छति प्रयतात्मनः **किं** तत् अहम् अश्नामि ?	यः पत्रं पुष्पं फलं तोयं मे भक्त्या प्रयच्छति प्रयतात्मनः **भक्त्युपहृतं** तत् अहम् अश्नामि।

तात्पर्यम् - यस्तु मनः निगृह्य पत्रं पुष्पं फलं तोयं च भक्त्या प्रयच्छति भक्त्या प्रदत्तं तत्सर्वम् अहम् अवश्यं परिगृह्णामि ।

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥९.२७॥

पदच्छेदः - यत्, करोषि, यत्, अश्नासि, यत्, जुहोषि, ददासि, यत् ।
यत्, तपस्यसि, कौन्तेय, तत्, कुरुष्व, मदर्पणम्॥

अन्वयः - कौन्तेय ! यत् करोषि, यत् अश्नासि, यत् जुहोषि, यत् ददासि, यत् तपस्यसि तत् मदर्पणं कुरुष्व ।

पदार्थः - कौन्तेय = अर्जुन, यत् करोषि = यत् कर्म आचरसि, यत् अश्नासि = यद्वस्तु खादसि, यत् जुहोषि = यत् हुतं करोषि, यत् ददासि = यद् दानं यच्छसि, यत् तपस्यसि = यत् तपः चरसि, तत् = तत् सर्वम्, मदर्पणम् = मदर्पितम्, कुरुष्व = विधेहि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	यत्	यद् - द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
करोषि	कृ (डुकृञ् करणे) पर. कर्तरि लट्. मपु. एक.	अश्नासि	अश् (अश भोजने) पर. कर्तरि लट्. मपु. एक.
जुहोषि	हु (हु दानादनयोः) पर. कर्तरि लट्. मपु. एक.	ददासि	दा (डुदाञ् दाने) पर. कर्तरि लट्. मपु. एक.
तपस्यसि	तप् (तप सन्तापे) पर. कर्तरि लृट्. मपु. एक.	तत्	तद् - द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
मदर्पणम्	अ. नपुं. द्वि. एक.	कुरुष्व	कृ (डुकृञ् करणे) आत्म. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः यदश्नासि — यत् + अश्नासि — जश्त्वसन्धिः ।
यज्जुहोषि — यत् + जुहोषि — श्चुत्वसन्धिः ।

(ख) समासः मदर्पणम् — मयि (मह्यम्) अर्पणं मदर्पणम् - सप्तमीतत्पुरुषः ।

(ग) कृदन्तः अर्पणम् — ऋ (ऋ गतिप्रापणयोः) + णिच् + ल्युट् (करणे) ।

(घ) तद्धितान्तः कौन्तेय — कुन्ती + ढक्, (अपत्यार्थे) कुन्त्याः अपत्यं पुमान्, तत्सम्बुद्धौ ।

भावस्पष्टीकरणम् -

कुरुष्व ।	
किं कुरुष्व ?	**मदर्पणं** कुरुष्व ।
किं मदर्पणं कुरुष्व ?	**तत्** मदर्पणं कुरुष्व ।
किं तत् मदर्पणं कुरुष्व ?	**यत् करोषि** तत् मदर्पणं कुरुष्व ।
यत् करोषि **पुनः किं** तत् मदर्पणं कुरुष्व ?	यत् करोषि, **यत् अश्नासि** तत् मदर्पणं कुरुष्व ।
यत् करोषि, यत् अश्नासि **पुनः किं** तत् मदर्पणं कुरुष्व ?	यत् करोषि, यत् अश्नासि, **यत् जुहोषि** तत् मदर्पणं कुरुष्व ।
यत् करोषि, यत् अश्नासि, यत् जुहोषि **पुनः किं** तत् मदर्पणं कुरुष्व ?	यत् करोषि, यत् अश्नासि, यत् जुहोषि, **यत् ददासि** तत् मदर्पणं कुरुष्व ।
यत् करोषि, यत् अश्नासि, यत् जुहोषि, यत् ददासि **पुनः किं** तत् मदर्पणं कुरुष्व ?	यत् करोषि, यत् अश्नासि, यत् जुहोषि, यत् ददासि तत्, **यत् तपस्यसि** मदर्पणं कुरुष्व ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय !**

तात्पर्यम् - अर्जुन ! त्वं यत् करोषि, यत् खादसि, अग्नौ यद् अर्पयसि, यत् प्रयच्छसि, यच्च तपः चरसि तत्सर्वं वासुदेवाय इति बुद्ध्या मह्यं समर्पय । एतेन ते श्रेयो भविष्यति ।

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥९.२८॥

पदच्छेदः - शुभाशुभफलैः, एवम्, मोक्ष्यसे, कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा, विमुक्तः, माम्, उपैष्यसि॥

अन्वयः - एवं शुभाशुभफलैः कर्मबन्धनैः मोक्ष्यसे । संन्यासयोगयुक्तात्मा विमुक्तः माम् उपैष्यसि ।

पदार्थः - एवम् = इत्थम्, शुभाशुभफलैः = इष्टानिष्टफलैः, कर्मबन्धनैः = कर्मजन्यैः पापैः पुण्यैः च, मोक्ष्यसे = मुक्तिं प्राप्स्यसि, संन्यासयोगयुक्तात्मा = समर्पणरूपयोगसहितः, विमुक्तः = कर्मरूपबन्धविमुक्तः, माम् उपैष्यसि = मां लप्स्यसे ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
एवम्	अव्ययम्	शुभाशुभफलैः	अ. नपुं. तृ. बहु. (विशेषणम्)
कर्मबन्धनैः	अ. नपुं. तृ. बहु. (विशेष्यम्)	मोक्ष्यसे	मुच् (मुच्लृ मोक्षणे) आत्म. कर्मणि लृट्. मपु. एक.
संन्यासयोगयुक्तात्मा	संन्यासयोगयुक्तात्मन् - न. पुं. प्र. एक. (विशेषणम्)	विमुक्तः	अ. पुं. प्र. एक. (विशेषणम्)
माम्	अस्मद् - द. सर्व. द्वि. एक.	उपैष्यसि	उप + इ (इण् गतौ) पर. कर्तरि लृट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	शुभाशुभफलैरेवम्	शुभाशुभफलैः + एवम्	विसर्गसन्धिः (रेफः)।
	विमुक्तो माम्	विमुक्तः + माम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	शुभाशुभफलैः	शुभानि च अशुभानि च शुभाशुभानि - द्वन्द्वः।	
		शुभाशुभानां फलानि, तैः - षष्ठीतत्पुरुषः।	
	कर्मबन्धनैः	कर्मणां बन्धनानि कर्मबन्धनानि, तैः - षष्ठीतत्पुरुषः।	
	संन्यासयोगयुक्तात्मा	संन्यासः एव योगः संन्यासयोगः - कर्मधारयः।	
		संन्यासयोगेन युक्तः संन्यासयोगयुक्तः - तृतीयातत्पुरुषः।	
		संन्यासयोगयुक्तः आत्मा यस्य सः संन्यासयोगयुक्तात्मा - बहुव्रीहिः।	
(ग) कृदन्तः	बन्धनम्	बन्ध् (बन्ध बन्धने) + ल्युट्।	
	युक्तः	युज् (युजिर् योगे) + क्त (कर्मणि)।	
	विमुक्तः	वि + मुच् (मुच्लृ मोक्षणे) + क्त (कर्मणि)।	

भावस्पष्टीकरणम् -

मोक्ष्यसे।	
कैः मोक्ष्यसे ?	**कर्मबन्धनैः** मोक्ष्यसे।
कीदृशैः कर्मबन्धनैः मोक्ष्यसे ?	**शुभाशुभफलैः** कर्मबन्धनैः मोक्ष्यसे।
कथं शुभाशुभफलैः कर्मबन्धनैः मोक्ष्यसे ?	**एवं** शुभाशुभफलैः कर्मबन्धनैः मोक्ष्यसे।
उपैष्यसि।	

कः उपैष्यसि ?	**विमुक्तः** उपैष्यसि ।
कीदृशः विमुक्तः उपैष्यसि ?	**संन्यासयोगयुक्तात्मा** विमुक्तः उपैष्यसि ।
संन्यासयोगयुक्तात्मा विमुक्तः **कम्** उपैष्यसि ?	संन्यासयोगयुक्तात्मा विमुक्तः **माम्** उपैष्यसि ।

तात्पर्यम् - एवं सर्वस्यापि कर्मणः मयि अर्पणेन त्वं तत्फलीभूतैः शुभाशुभैः पुण्यपापैः मुक्तः भविष्यसि। एवं कर्मसंन्याससरूपेण सहितः बन्धनात् विमुक्तश्च अन्ते मां प्राप्नोषि ।

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥९.२९॥

पदच्छेदः - समः, अहम्, सर्वभूतेषु, न, मे, द्वेष्यः, अस्ति, न, प्रियः ।
ये, भजन्ति, तु, माम्, भक्त्या, मयि, ते, तेषु, च, अपि, अहम् ॥

अन्वयः - अहं सर्वभूतेषु समः । द्वेष्यः मे न अस्ति प्रियः न । ये तु मां भक्त्या भजन्ति ते मयि अहं तेषु च अपि ।

पदार्थः - अहम् = अहम्, सर्वभूतेषु = सकलभूतेषु, समः = तुल्यः, द्वेष्यः = वैरी, मे = मम, न अस्ति = न वर्तते, प्रियः न = न प्रीतिविषयः, ये तु = ये च, मां भक्त्या = मां प्रीत्या, भजन्ति = सेवन्ते, ते मयि = ते मयि वर्तन्ते, अहं तेषु च अपि = अहं तेषु अपि वर्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद् - द. सर्व. प्र. एक. (विशेष्यम्)	सर्वभूतेषु	अ. नपुं. स. बहु.
समः	अ. पुं. प्र. एक. (विशेषणम्)	द्वेष्यः	अ. पुं. प्र. एक. (विशेषणम्)
मे	अस्मद् - द. सर्व. ष. एक.	न	अव्ययम्
अस्ति	अस् (अस भुवि) पर. कर्तरि लट्. प्रपु. एक.	प्रियः	अ. पुं. प्र. एक. (विशेषणम्)
ये	यद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)	तु	अव्ययम्
माम्	अस्मद् - द. सर्व. द्वि. एक.	भक्त्या	इ. स्त्री. तृ. एक.
भजन्ति	भज् (भज सेवायाम्) पर. कर्तरि लट्. प्रपु. बहु.	ते	तद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)

मयि	अस्मद् - द. सर्व. स. एक.	तेषु	तद् - द. सर्व. पुं. स. बहु. (विशेषणम्)
च	अव्ययम्	अपि	अव्ययम्

व्याकरणम् -

(क) सन्धिः	समोऽहम्	समः + अहम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	द्वेष्योऽस्ति	द्वेष्यः + अस्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	चापि	च + अपि	सवर्णदीर्घसन्धिः।
	अप्यहम्	अपि + अहम्	यण्सन्धिः।
(ख) समासः	सर्वभूतेषु	सर्वाणि भूतानि सर्वभूतानि, तेषु - कर्मधारयः।	
(ग) कृदन्तः	द्वेष्यः	द्विष् (द्विष अप्रीतौ) + यत्।	
	भक्त्या	भज् (भज सेवायाम्) + क्तिन्, तया।	

भावस्पष्टीकरणम् -

न अस्ति।	
कः न अस्ति ?	**द्वेष्यः** न अस्ति।
कस्य द्वेष्यः न अस्ति ?	**मे** द्वेष्यः न अस्ति।
मे द्वेष्यः **पुनः कः** न अस्ति ?	मे द्वेष्यः **प्रियः (अपि)** न अस्ति।
कीदृशस्य मे द्वेष्यः प्रियः (अपि) न अस्ति ?	**'अहं सर्वभूतेषु समः' (तादृशस्य)** मे द्वेष्यः प्रियः (अपि) न अस्ति।
भजन्ति।	
के भजन्ति ?	**ये** भजन्ति।
ये **कं** भजन्ति ?	ये **तु मां** भजन्ति।
ये तु मां **कया** भजन्ति ?	ये तु मां **भक्त्या** भजन्ति।
ये तु मां भक्त्या भजन्ति **ते कुत्र (तिष्ठन्ति)** ?	ये तु मां भक्त्या भजन्ति **ते मयि (तिष्ठन्ति)**।
ये तु मां भक्त्या भजन्ति ते मयि (तिष्ठन्ति) **पुनः किम्** ?	ये तु मां भक्त्या भजन्ति ते मयि (तिष्ठन्ति) **अहं तेषु च अपि**।

तात्पर्यम् - अहं सर्वेषु अपि प्राणिषु समानः । न मे कुत्रचित् द्वेषः वर्तते नापि कुत्रचित् प्रीतिः । किन्तु ये मां भजन्ति तेषाम् अहं शैत्यपीडितानाम् अग्निरिव उपकारको भवामि । तेऽपि मया उपकृताः भवन्ति ।

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥९.३०॥

पदच्छेदः - अपि, चेत्, सुदुराचारः, भजते, माम्, अनन्यभाक् ।
साधुः, एव, सः, मन्तव्यः, सम्यक्, व्यवसितः, हि, सः ॥

अन्वयः - अपि चेत् सुदुराचारः अनन्यभाक् मां भजते सः साधुः एव मन्तव्यः । सः हि सम्यक् व्यवसितः ।

पदार्थः - अपि चेत् सुदुराचारः = दुराचारः अपि स्यात् तथापि, अनन्यभाक् = अनन्यभक्तिः, मां भजते = मां सेवते, सः = सः मानवः, साधुः एव = सद्वृत्तः एव, मन्तव्यः = ज्ञातव्यः, सः = सः मानवः, हि = यतः, सम्यक् = यथावत्, व्यवसितः = निश्चितवान् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अपि	अव्ययम्	चेत्	अव्ययम्
सुदुराचारः	अ. पुं. प्र. एक. (विशेषणम्)	अनन्यभाक्	अनन्यभाज् - ज. पुं. प्र. एक. (विशेषणम्)
माम्	अस्मद् - द. सर्व. द्वि. एक.	भजते	भज् (भज सेवायाम्) आत्म. कर्तरि लट्. प्रपु. एक.
सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	साधुः	उ. पुं. प्र. एक. (विशेष्यम्)
एव	अव्ययम्	मन्तव्यः	अ. पुं. प्र. एक. (विशेषणम्)
हि	अव्ययम्	सम्यक्	अव्ययम्
व्यवसितः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	सुदुराचारो भजते	सुदुराचारः + भजते	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	साधुरेव	साधुः + एव	विसर्गसन्धिः (रेफः) ।
	सम्यग्व्यवसितः	सम्यक् + व्यवसितः	जश्त्वसन्धिः ।
	व्यवसितो हि	व्यवसितः + हि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः सुदुराचारः — दुष्टः आचारः यस्य सः दुराचारः - बहुव्रीहिः।
शोभनः दुराचारः सुदुराचारः - प्रादितत्पुरुषः।

अनन्यभाक् — अन्यं भजति इति अन्यभाक् - कर्तरि ण्विः उपपदसमासश्च।
न अन्यभाक् अनन्यभाक् - नञ्तत्पुरुषः।

(ग) कृदन्तः दुराचारः — दुर् + आ + चर् (चर गतिभक्षणयोः) + घञ्।
मन्तव्यः — मन् (मन ज्ञाने) + तव्यत् (कर्मणि)।
व्यवसितः — वि + अव + अस् (असु क्षेपणे) + क्त (कर्तरि)।

भावस्पष्टीकरणम् -

भजते।	
कः भजते ?	**अनन्यभाक्** भजते।
कीदृशः अनन्यभाक् भजते ?	**अपि चेत् सुदुराचारः** अनन्यभाक् भजते।
अपि चेत् सुदुराचारः अनन्यभाक् **कं** भजते ?	अपि चेत् सुदुराचारः अनन्यभाक् **मां** भजते।
अपि चेत् सुदुराचारः अनन्यभाक् मां भजते **सः कः** ?	अपि चेत् सुदुराचारः अनन्यभाक् मां भजते **सः मन्तव्यः**।
अपि चेत् सुदुराचारः अनन्यभाक् मां भजते सः **कः** मन्तव्यः ?	अपि चेत् सुदुराचारः अनन्यभाक् मां भजते सः **साधुः एव** मन्तव्यः।
अपि चेत् सुदुराचारः अनन्यभाक् मां भजते सः साधुः एव मन्तव्यः पुनः **सः कः** ?	अपि चेत् सुदुराचारः अनन्यभाक् मां भजते सः साधुः एव मन्तव्यः, **सः व्यवसितः**।
अपि चेत् सुदुराचारः अनन्यभाक् मां भजते सः साधुः एव मन्तव्यः, सः **कथं** व्यवसितः ?	अपि चेत् सुदुराचारः अनन्यभाक् मां भजते सः साधुः एव मन्तव्यः, सः **हि सम्यक्** व्यवसितः।

तात्पर्यम् - यदि कश्चित् दुराचारः अपि एकाग्रचित्तः मां भजति तर्हि सः साधुः इत्येव मे मतिः। यतः सः सम्यक् एव निश्चयं कृतवान्।

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति॥९.३१॥

पदच्छेदः - क्षिप्रम्, भवति, धर्मात्मा, शश्वत्, शान्तिम्, निगच्छति।
कौन्तेय, प्रतिजानीहि, न, मे, भक्तः, प्रणश्यति॥

अन्वयः - क्षिप्रं धर्मात्मा भवति। शश्वत् शान्तिं निगच्छति। कौन्तेय! प्रतिजानीहि, मे भक्तः न प्रणश्यति।

पदार्थः - क्षिप्रम् = शीघ्रम्, धर्मात्मा = धर्मबुद्धिः, भवति = सम्पद्यते, शश्वत् = नित्यम्, शान्तिम् = उपशमम्, निगच्छति = प्राप्नोति, कौन्तेय = अर्जुन !, प्रतिजानीहि = प्रतिज्ञां कुरु, मे भक्तः = मम भक्तः, न प्रणश्यति = नाशं न गच्छति इति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
क्षिप्रम्	अव्ययम्	धर्मात्मा	धर्मात्मन् - न. पुं. प्र. एक. (विशेषणम्)
भवति	भू (भू सत्तायाम्) - पर. कर्तरि लट्. प्रपु. एक.	शश्वत्	अव्ययम्
शान्तिम्	इ. स्त्री. द्वि. एक.	निगच्छति	नि + गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. एक.
कौन्तेय	अ. पुं. सम्बो. एक.	प्रतिजानीहि	प्रति + ज्ञा (ज्ञा अवबोधने) पर. कर्तरि लोट्. मपु. एक.
मे	अस्मद् - द. सर्व. ष. एक.	भक्तः	अ. पुं. प्र. एक.
न	अव्ययम्	प्रणश्यति	प्र + नश् (णश अदर्शने) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः शश्वच्छान्तिम् — शश्वत् + शान्तिम् — श्चुत्वसन्धिः छत्वसन्धिः च।

(ख) समासः धर्मात्मा — धर्मे आत्मा (मनः) यस्य सः धर्मात्मा - बहुव्रीहिः।

(ग) कृदन्तः शान्तिम् — शम् (शमु उपशमने) + क्तिन्, ताम्।

भक्तः — भज् (भज सेवायाम्) + क्त (कर्तरि)।

(घ) तद्धितान्तः कौन्तेय — कुन्ती + ढक् (अपत्यार्थे) कुन्त्याः अपत्यं पुमान्, तत्सम्बुद्धौ।

भावस्पष्टीकरणम् -

प्रतिजानीहि।	
किं प्रतिजानीहि ?	**क्षिप्रं धर्मात्मा भवति इति** प्रतिजानीहि।
क्षिप्रं धर्मात्मा भवति इति, **पुनः किं** प्रतिजानीहि ?	क्षिप्रं धर्मात्मा भवति इति, **शश्वत् शान्तिं निगच्छति इति** प्रतिजानीहि।

क्षिप्रं धर्मात्मा भवति इति, शश्वत् शान्तिं निगच्छति इति पुनः किं प्रतिजानीहि ?	क्षिप्रं धर्मात्मा भवति इति, शश्वत् शान्तिं निगच्छति इति, **मे भक्तः न प्रणश्यति इति** प्रतिजानीहि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय !**

तात्पर्यम् - अर्जुन ! दुराचारः अपि पुरुषः अनन्यचित्तः मां यदि भजते तर्हि सः शीघ्रं पुण्यात्मा भवति, शाश्वतीं शान्तिं च प्राप्नोति । पार्थ ! सभासु दृढम् इदम् उद्घोषय यत् 'मम भक्तः न प्रणश्यति' इति ।

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥९.३२॥

पदच्छेदः - माम्, हि, पार्थ, व्यपाश्रित्य, ये, अपि, स्युः, पापयोनयः ।
स्त्रियः, वैश्याः, तथा, शूद्राः, ते, अपि, यान्ति, पराम्, गतिम्॥

अन्वयः - पार्थ ! पापयोनयः ये अपि स्त्रियः वैश्याः तथा शूद्राः स्युः ते अपि मां व्यपाश्रित्य परां गतिं यान्ति हि ।

पदार्थः - पार्थ = अर्जुन ! पापयोनयः = पापात्मानः, ये अपि = ये केचन अपि, स्त्रियः = नार्यः, वैश्याः = वैश्यकुलजाः, तथा = एवम्, शूद्राः = शूद्रकुलजाः, स्युः = भवेयुः, ते अपि = ते मानवाः अपि, मां व्यपाश्रित्य = माम् आश्रित्य, पराम् = उत्तमाम्, गतिम् = स्थानम्, यान्ति हि = निश्चयेन लभन्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	पापयोनयः	इ. स्त्री. प्र. बहु. (विशेषणम्)
ये	यद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)	अपि	अव्ययम्
स्त्रियः	ई. स्त्री. प्र. बहु.	वैश्याः	अ. पुं. प्र. बहु.
तथा	अव्ययम्	शूद्राः	अ. पुं. प्र. बहु.
स्युः	अस् (अस भुवि) - पर. कर्तरि विधिलिङ्. प्रपु. बहु.	ते	तद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)
माम्	अस्मद् - द. सर्व. द्वि. एक.	व्यपाश्रित्य	ल्यबन्तम् अव्ययम्
पराम्	आ. सर्व. स्त्री. द्वि. एक. (विशेषणम्)	गतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
यान्ति	या (या प्रापणे) - पर. कर्तरि लट्. प्रपु. बहु.	हि	अव्ययम्

व्याकरणम् -

(क) सन्धिः	येऽपि	ये + अपि	पूर्वरूपसन्धिः।
	स्त्रियो वैश्याः	स्त्रियः + वैश्याः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	वैश्यास्तथा	वैश्याः + तथा	विसर्गसन्धिः (सकारः)।
	शूद्रास्ते	शूद्राः + ते	विसर्गसन्धिः (सकारः)।
	तेऽपि	ते + अपि	पूर्वरूपसन्धिः।
(ख) समासः	पापयोनयः	पापं योनिः (कारणम्) येषां ते पापयोनयः - बहुव्रीहिः।	
(ग) कृदन्तः	व्यपाश्रित्य	वि + अप + आङ् + श्रि (श्रिञ् सेवायाम्) + ल्यप्।	
	गतिम्	गम् (गम्लृ गतौ) + क्तिन्, ताम्।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अपत्यार्थे) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ।	

भावस्पष्टीकरणम् -

स्युः।	
के स्युः ?	**ये** स्युः।
ये **के** स्युः ?	ये **वैश्याः** स्युः।
ये वैश्याः **पुनः के** स्युः ?	ये वैश्याः **तथा शूद्राः** स्युः।
ये वैश्याः तथा शूद्राः **पुनः काः** स्युः ?	ये वैश्याः तथा शूद्राः **स्त्रियः अपि** स्युः।
कीदृशाः ये वैश्याः तथा शूद्राः स्त्रियः अपि स्युः ?	**पापयोनयः** ये वैश्याः तथा शूद्राः स्त्रियः अपि स्युः।
पापयोनयः ये वैश्याः तथा शूद्राः स्त्रियः अपि स्युः **ते अपि किं कुर्वन्ति** ?	पापयोनयः ये वैश्याः तथा शूद्राः स्त्रियः अपि स्युः **ते अपि यान्ति हि**।
पापयोनयः ये वैश्याः तथा शूद्राः स्त्रियः अपि स्युः ते अपि **कां** यान्ति हि ?	पापयोनयः ये वैश्याः तथा शूद्राः स्त्रियः अपि स्युः ते अपि **गतिं** यान्ति हि।
पापयोनयः ये वैश्याः तथा शूद्राः स्त्रियः अपि स्युः ते अपि **कीदृशीं** गतिं यान्ति हि ?	पापयोनयः ये वैश्याः तथा शूद्राः स्त्रियः अपि स्युः ते अपि **परां** गतिं यान्ति हि।
पापयोनयः ये वैश्याः तथा शूद्राः स्त्रियः अपि स्युः ते अपि **किं कृत्वा** परां गतिं यान्ति हि ?	पापयोनयः ये वैश्याः तथा शूद्राः स्त्रियः अपि स्युः ते अपि **व्यपाश्रित्य** परां गतिं यान्ति हि।
पापयोनयः ये वैश्याः तथा शूद्राः स्त्रियः अपि स्युः ते अपि **कं** व्यपाश्रित्य परां गतिं यान्ति हि ?	पापयोनयः ये वैश्याः तथा शूद्राः स्त्रियः अपि स्युः ते अपि **मां** व्यपाश्रित्य परां गतिं यान्ति हि।

तात्पर्यम् - ये पापाधिक्यवशात् जाताः ते स्त्रियः स्युः, वैश्याः स्युः, शूद्राः वा स्युः ते सर्वे अपि मां सेवमानाः परमां शान्तिम् अवाप्नुवन्ति इति निश्चितम्।

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥९.३३॥

पदच्छेदः - किम्, पुनः, ब्राह्मणाः, पुण्याः, भक्ताः, राजर्षयः, तथा ।
अनित्यम्, असुखम्, लोकम्, इमम्, प्राप्य, भजस्व, माम् ॥

अन्वयः - पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः पुनः किम् ? (तस्मात्) इमम् अनित्यम् असुखं लोकं प्राप्य मां भजस्व ।

पदार्थः - पुण्याः = पुण्याधिक्यविशिष्टाः, भक्ताः = अनुरक्ताः, ब्राह्मणाः = ब्राह्मणकुलजाः, तथा = तथा, राजर्षयः = राजर्षयः, पुनः किम् = तान् अधिकृत्य किं वक्तव्यम्, इमम् = एतम्, अनित्यम् = नश्वरम्, असुखम् = सुखरहितम्, लोकम् = देहम्, प्राप्य = लब्ध्वा, मां भजस्व = मां सेवस्व ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पुण्याः	अ. पुं. प्र. बहु. (विशेषणम्)	भक्ताः	अ. पुं. प्र. बहु. (विशेष्यम्)
ब्राह्मणाः	अ. पुं. प्र. बहु.	तथा	अव्ययम्
राजर्षयः	इ. पुं. प्र. बहु.	पुनः	अव्ययम्
किम्	किम् - म. सर्व. नपुं. प्र. एक.	इमम्	इदम् - म. सर्व. पुं. द्वि. एक. (विशेषणम्)
अनित्यम्	अ. पुं. द्वि. एक. (विशेषणम्)	असुखम्	अ. पुं. द्वि. एक. (विशेषणम्)
लोकम्	अ. पुं. द्वि. एक. (विशेष्यम्)	प्राप्य	ल्यबन्तम् अव्ययम्
माम्	अस्मद् - द. सर्व. द्वि. एक.	भजस्व	भज् (भज सेवायाम्) आत्म. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः

पुनर्ब्राह्मणाः	पुनः + ब्राह्मणाः	विसर्गसन्धिः (रेफः) ।
पुण्या भक्ताः	पुण्याः + भक्ताः	विसर्गसन्धिः (लोपः) ।
भक्ता राजर्षयः	भक्ताः + राजर्षयः	विसर्गसन्धिः (लोपः) ।
राजर्षयस्तथा	राजर्षयः + तथा	विसर्गसन्धिः (सकारः) ।

(ख) समासः

राजर्षयः	राजानः ऋषयः इव - कर्मधारयः ।
अनित्यम्	न नित्यम् अनित्यम् - नञ्तत्पुरुषः ।
असुखम्	न विद्यते सुखं यस्मिन् सः असुखः,तम् - बहुव्रीहिः ।

(ग) कृदन्तः	भक्ताः	भज् (भज सेवायाम्) + क्त (कर्तरि) ।
	लोकम्	लोक् (लोकृ दर्शने) + घञ् (भावे), तम् ।
	प्राप्य	प्र + आप् (आप्लृ व्याप्तौ) + ल्यप् ।
(घ) तद्धितान्तः	ब्राह्मणाः	ब्रह्म + अण् (ब्रह्मणः अधीते इत्यर्थे) ।
	पुण्याः	पुण्य + अच् (मतुबर्थे) पुण्यम् एषाम् एषु वा अस्ति इति ।

भावस्पष्टीकरणम् -

पुनः किम् ?	
केषां पुनः किम् ?	**पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां)** पुनः किम् ?
पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? **(तस्मात्) किं कुरु** ?	पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? **(तस्मात्) भजस्व** ।
पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? (तस्मात्) **कं** भजस्व ?	पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? (तस्मात्) **मां** भजस्व ।
पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? (तस्मात्) **किं कृत्वा** मां भजस्व ?	पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? (तस्मात्) **प्राप्य** मां भजस्व ।
पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? (तस्मात्) **कं** प्राप्य मां भजस्व ?	पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? (तस्मात्) **लोकं** प्राप्य मां भजस्व ।
पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? (तस्मात्) **कं** लोकं प्राप्य मां भजस्व ?	पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? (तस्मात्) **इमं** लोकं प्राप्य मां भजस्व ।
पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? (तस्मात्) इमं **कीदृशं** लोकं प्राप्य मां भजस्व ?	पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? (तस्मात्) इमम् **अनित्यं** लोकं प्राप्य मां भजस्व ।
पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? (तस्मात्) इमम् अनित्यं **पुनः कीदृशं** लोकं प्राप्य मां भजस्व ?	पुण्याः भक्ताः ब्राह्मणाः तथा राजर्षयः (एतेषां) पुनः किम् ? (तस्मात्) इमम् अनित्यम् **असुखं** लोकं प्राप्य मां भजस्व ।

तात्पर्यम् - एवं पापयोनयः स्त्रीवैश्यादयः एव मां भजमानाः परमां शान्तिम् अवाप्नुवन्ति इति स्थिते पुण्यवन्तः भक्ताः च ये ब्राह्मणाः राजानश्च ते तादृशीं शान्तिं प्राप्नुवन्ति इति पुनः वक्तव्यं किम् ? तस्मात् यावत् अयं देहः भविष्यति तावदेव शीघ्रं मम सेवने प्रवर्तस्व ।

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥९.३४॥

पदच्छेदः - मन्मनाः, भव, मद्भक्तः, मद्याजी, माम्, नमस्कुरु ।
माम्, एव, एष्यसि, युक्त्वा, एवम्, आत्मानम्, मत्परायणः॥

अन्वयः - मन्मनाः मद्याजी मद्भक्तः भव । मां नमस्कुरु । एवम् आत्मानं युक्त्वा मत्परायणः माम् एव एष्यसि ।

पदार्थः - मन्मनाः = मच्चित्तः, मद्याजी = मत्पूजकः, मद्भक्तः = मदनुरक्तः, भव = वर्तस्व, मां नमस्कुरु = मां प्रणम, एवम् = इत्थम्, आत्मानम् = स्वम्, युक्त्वा = समाधाय, मत्परायणः = मदासक्तः, माम् एव एष्यसि = माम् एव अधिगमिष्यसि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मन्मनाः	मन्मनस् - सका. पुं. प्र. एक. (विशेषणम्)	मद्याजी	मद्याजिन् - न. पुं. प्र. एक. (विशेषणम्)
मद्भक्तः	अ. पुं. प्र. एक. (विशेषणम्)	भव	भू (भू सत्तायाम्) पर. कर्तरि लोट्. मपु. एक.
माम्	अस्मद् - द. सर्व. द्वि. एक.	नमस्कुरु	नमस् + कृ (डुकृञ् करणे) पर. कर्तरि लोट्. मपु. एक.
एवम्	अव्ययम्	आत्मानम्	आत्मन् - न. पुं. द्वि. एक.
युक्त्वा	क्त्वान्तम् अव्ययम्	मत्परायणः	अ. पुं. प्र. एक. (विशेषणम्)
एव	अव्ययम्	एष्यसि	इ (इण् गतौ) पर. कर्तरि लृट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	मन्मना भव	मन्मनाः + भव	विसर्गसन्धिः (लोपः) ।
	मद्भक्तो मद्याजी	मद्भक्तः + मद्याजी	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	एवैष्यसि	एव + एष्यसि	वृद्धिसन्धिः ।
	युक्त्वैवम्	युक्त्वा + एवम्	वृद्धिसन्धिः ।

(ख) समासः	मन्मनाः	मयि मनः यस्य सः मन्मनाः - बहुव्रीहिः ।
	मद्भक्तः	मम भक्तः मद्भक्तः - षष्ठीतत्पुरुषः ।
	मद्याजी	मां यजते इति मद्याजी - ताच्छीलिके कर्तरि णिनि उपपदसमासश्च ।
	मत्परायणः	अहमेव परायणं यस्य सः मत्परायणः - बहुव्रीहिः ।
(ग) कृदन्तः	भक्तः	भज् (भज सेवायाम्) + क्त (कर्तरि) ।
	युक्त्वा	युज् (युजिर् योगे) + क्त्वा ।

भावस्पष्टीकरणम् -

भव।	
कीदृशः भव ?	**मन्मनाः** भव।
मन्मनाः **पुनः कीदृशः** भव ?	मन्मनाः **मद्याजी** भव।
मन्मनाः मद्याजी **पुनः कीदृशः** भव ?	मन्मनाः मद्याजी **मद्भक्तः** भव।
मन्मनाः मद्याजी मद्भक्तः भव **पुनः किं कुरु** ?	मन्मनाः मद्याजी मद्भक्तः भव, **नमस्कुरु**।
मन्मनाः मद्याजी मद्भक्तः भव, **कं** नमस्कुरु ?	मन्मनाः मद्याजी मद्भक्तः भव, **मां** नमस्कुरु।
मन्मनाः मद्याजी मद्भक्तः भव, मां नमस्कुरु, **एवं किं भवति** ?	मन्मनाः मद्याजी मद्भक्तः भव, मां नमस्कुरु, **एवम् एष्यसि**।
मन्मनाः मद्याजी मद्भक्तः भव, मां नमस्कुरु, एवं **कम्** एष्यसि ?	मन्मनाः मद्याजी मद्भक्तः भव, मां नमस्कुरु, एवं **माम् एव** एष्यसि।
मन्मनाः मद्याजी मद्भक्तः भव, मां नमस्कुरु, एवं **कीदृशः** माम् एव एष्यसि ?	मन्मनाः मद्याजी मद्भक्तः भव, मां नमस्कुरु, एवं **मत्परायणः** माम् एव एष्यसि ?
मन्मनाः मद्याजी मद्भक्तः भव, मां नमस्कुरु, एवं **किं कृत्वा** मत्परायणः माम् एव एष्यसि ?	मन्मनाः मद्याजी मद्भक्तः भव, मां नमस्कुरु, एवं **युक्त्वा** मत्परायणः माम् एव एष्यसि।
मन्मनाः मद्याजी मद्भक्तः भव, मां नमस्कुरु, एवं **कं** युक्त्वा मत्परायणः माम् एव एष्यसि ?	मन्मनाः मद्याजी मद्भक्तः भव, मां नमस्कुरु, एवम् **आत्मानं** युक्त्वा मत्परायणः माम् एव एष्यसि।

तात्पर्यम् - तस्मात् मय्येव मनः निवेश्य, मद्भक्तश्च भूत्वा मामेव पूजय येन मदेकमनस्को भवान् समाहितः सन् अन्ते माम् एव प्राप्नोति।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगो नाम नवमोऽध्यायः ॥९॥

नवमाध्यायस्य सारः

अस्य अध्यायस्य नाम 'राजविद्याराजगुह्ययोगः' इति। राजविद्या अर्थात् अध्यात्मविद्या अस्मिन् अध्याये वर्णिता अस्ति भगवता। इयं सर्वविद्यानां विद्या गुह्यतमा च। इयं नितरां पवित्रा, सर्वोत्कृष्टा, मोक्षदा च। तादृशमिदं ज्ञानं सुखेन आचरणयोग्यम् अनश्वरं च। अत्र येषां श्रद्धा नास्ति ते देवम् अप्राप्य जरामरणादिसहिते संसारमार्गे भ्रमन्ति।

अव्यक्तः भगवान् समग्रं जगत् सृष्ट्वा तत् व्याप्नोति। यथा आकाशे विद्यमानस्यापि महावायोः सम्बन्धः आकाशेन सह कदापि न भवति तथा भगवतः निस्सङ्गत्वात् सर्वाणि भूतानि तस्मिन् भवन्ति चेदपि तेन न सम्बध्यन्ते। यदा कल्पस्य क्षयः भवति तदा सर्वाण्यपि भूतानि मायारूपां तस्य शक्तिं प्रविशन्ति, अर्थात् तत्रैव लीयन्ते। कल्पस्य आरम्भे प्रकृतिम् अवलम्ब्य तानि भूतानि सः पुनः सृजति। साक्षिभूतस्य तस्य सन्निधिमात्रेण प्रकृतिः स्थावरजङ्गमात्मकम् इमं प्रपञ्चम् उत्पादयति। उत्पन्नश्च सः तत्सन्निधिवशादेव नानाकारः प्रतिभासते। एवम् अध्यात्मविद्यायाः स्वरूपं संक्षेपेण अध्यायस्य आरम्भे प्रतिपाद्य श्रीकृष्णः ततः अग्रे भगवदुपासकानां स्वरूपम्, भगवतः गुणविशेषाः, भक्ताः, तेषाम् उपासनाः, तत्फलानि चेति कांश्चन विषयान् स्पष्टीकरोति।

भगवतः उपासकानां स्वरूपम् -

सर्वेषां भूतानाम् ईश्वरस्य अपि भगवतः मनुष्याकारं दृष्ट्वा अविवेकिनः 'अयं साधारणः' इति भावयन्तः तं तिरस्कुर्वन्ति। बुद्धिहीनाः, तमोगुणप्रधानाः राक्षसप्रकृतिम् आश्रिताः ते जनाः भगवतः वास्तविकं स्वरूपम् अज्ञात्वा तम् अवमानयन्ति। तद्विपरीततया सत्त्वगुणप्रधानाः महात्मानस्तु तं सर्वेषां भूतानां कारणम् अविनाशिनं च मत्वा एकाग्रचित्ताः सन्तः ध्यायन्ति। केचित् कठोरं नियमम् अनुसरन्तः तं सर्वदा स्तुवन्तः, पूजादिषु प्रयत्नं कुर्वन्तः, भक्त्या नमस्कुर्वन्तश्च सर्वदा समाहितमनस्काः भवन्ति। अन्ये एतत्सर्वं **वासुदेवः** इति ज्ञानरूपेण यज्ञेन तं पूजयन्ति। तत्रापि केचन सर्वत्र वर्तमानं तम् एकमेव परं ब्रह्मेति बुद्ध्या पूजयन्ति, अन्ये तु तादृशस्य ब्रह्मणः 'दासोऽहम्' इति भेदबुद्ध्या इति विशेषः। तमोगुणप्रधानाः सत्त्वगुणप्रधानाः रजोगुणप्राधानाः इति भक्तानां भेदाः अत्र दर्शिताः।

भगवतः गुणविशेषाः -

ततः भगवान् वदति - "अहं श्रौतयज्ञः, स्मार्तयज्ञः, पितृभ्यो देयं हविः, औषधं, मन्त्रः, आज्यं हविश्चेति सर्वमपि अस्मि। अहमेव अस्य जगतः पिता, माता, पोषयिता, पितामहः, ज्ञेयं वस्तु, पावयिता, ओङ्कारः, वेदाः च अस्मि। अहमेव कर्मणां फलं, पोषकः, स्वामी, शुभाशुभयोः द्रष्टा, वासस्थानं, रक्षकः, हितकारी, उत्पत्तिस्थानं, प्रलयकर्ता, आधारः, लयस्थानं, नाशरहितं बीजं च। अहमेव ग्रीष्मकाले आदित्यरूपः सन् जगदिदं तापयामि। वृष्टिकाले जलं मुञ्चामि, अन्यस्मिन् काले तत् निगृह्णामि। अहमेव सर्वेषां जीवनं मृत्युश्च। अहमेव स्थूलं दृश्यं सूक्ष्मं च" इति।

भक्ताः, तेषाम् उपासनाः तत्फलं च -

तदनन्तरं भगवान् भिन्नरुचिमतां भक्तानाम् उपासनायाः कीदृशं फलं भवतीति कथयति- "वेदत्रयज्ञातारः विशाले तस्मिन् स्वर्गलोके कञ्चित् कालं सुखम् अनुभूय पुण्ये क्षीणे सति इमं लोकम् आगच्छन्ति। ये जनाः इन्द्रादीन् विहाय मामेव शरणम् आपन्नाः तेषां योगक्षेमम् अहमेव वहामि। येऽपि इन्द्रादीन् अन्यान् देवान् पूजयन्ति तेऽपि अजानन्तः मामेव पूजयन्ति इत्यतः तेषामपि अभ्युदयः अवश्यं भवति, किन्तु सः न शाश्वतः। अहमेव सर्वेषां यज्ञानां भोक्ता फलस्य

प्रदाता च। एवं ये न जानन्ति ते कर्मफलं भुक्त्वा अन्ते तस्मात् भ्रष्टाः भवन्ति।

ये देवान् पूजयन्ति ते देवलोकं गच्छन्ति। ये पितॄन् ते पितृलोकम्। ये पुनः भूतानि पूजयन्ति ते भूतलोकं गच्छन्ति। किन्तु एषां सर्वेषामपि प्रत्यागमनम् अस्ति। मां ये पूजयन्ति ते मामेव यान्ति, न प्रत्यागच्छन्ति। भक्तः पत्रं पुष्पं फलं तोयं वा यदि मह्यं भक्त्या प्रयच्छति तत्सर्वम् अहम् अवश्यं परिगृह्णामि। त्वं यत् करोषि, यत् खादसि, अग्नौ यद् अर्पयसि, यत् प्रयच्छसि, यच्च तपः चरसि तत्सर्वं वासुदेवाय इति बुद्ध्या मह्यं समर्पय। एतेन ते श्रेयो भविष्यति। एवं सर्वस्यापि कर्मणः मयि अर्पणेन त्वं तत्फलीभूतैः शुभाशुभैः पुण्यपापैः मुक्तः भविष्यसि। कर्मसंन्यासरूपेण सहितः बन्धनात् विमुक्तश्च अन्ते मां प्राप्नोषि। अहं सर्वेषु अपि प्राणिषु समानः। न मे कुत्रचित् द्वेषः वर्तते, नापि प्रीतिः। किन्तु ये मां भजन्ति तेषाम् अहं शैत्यपीडितानाम् अग्निरिव उपकारको भवामि। तेऽपि मया उपकृताः भवन्ति। यदि कश्चित् दुराचारः अपि एकाग्रचित्तः मां भजति तर्हि सः साधुः इत्येव मे मतिः। सः शीघ्रं पुण्यात्मा भवति। शाश्वतीं शान्तिं च प्राप्नोति। सभासु दृढम् इदम् उद्घोषय यत् 'मम भक्तः न प्रणश्यति'। ये पापाधिक्यवशात् जाताः ते अपि मां सेवमानाः परमां शान्तिम् अवाप्नुवन्ति इति निश्चितम्। एवं स्थिते पुण्यवन्तः भक्ताः च प्राप्नुवन्ति इति पुनः वक्तव्यं किम्? तस्मात् यावत् अयं देहः भविष्यति तावदेव शीघ्रं मम सेवने प्रवर्तस्व। तस्मात् मय्येव मनः निवेश्य, मद्भक्तश्च भूत्वा मामेव पूजय येन मदेकमनस्को समाहितः सन् अन्ते माम् एव प्राप्नोषि" इति।

आहत्य अस्मिन् अध्याये अध्यात्मविद्या तत्फलं चेति सर्वेऽपि विषयाः सम्यक् प्रतिपादिताः सन्ति। अतः गीतायाम् अस्य अध्यायस्य महत्त्वम् अनितरसाधारणं मन्यते।

****

अथ दशमोऽध्यायः

१०

विभूतियोगः

भूय एव महाबाहो शृणु मे परमं वचः।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥१०.१॥

पदच्छेदः - भूयः, एव, महाबाहो, शृणु, मे, परमम्, वचः।
यत्, ते, अहम्, प्रीयमाणाय, वक्ष्यामि, हितकाम्यया ॥

अन्वयः - महाबाहो ! भूयः एव मे परमं वचः शृणु यत् अहं प्रीयमाणाय ते हितकाम्यया वक्ष्यामि।

पदार्थः - महाबाहो = अर्जुन ! भूयः एव = पुनः अपि, मे = मम, परमम् = उत्कृष्टम्, वचः = वचनम्, शृणु = आकर्ण्य, यत् = यद्वचनम्, अहम् = एषोऽहम्, प्रीयमाणाय = सन्तुष्यते, ते = तुभ्यम्, हितकाम्यया = हितेच्छया, वक्ष्यामि = वदिष्यामि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाबाहो	उ. पुं. सम्बो. एक.	भूयः	अव्ययम्
मे	अस्मद्- द. सर्व. ष. एक.	परमम्	अ. नपुं. द्वि. एक. (विशेषणम्)
वचः	वचस्- सका. नपुं. द्वि. एक. (विशेष्यम्)	शृणु	श्रु (श्रु - श्रवणे) पर. कर्तरि लोट्. मपु. एक.
यत्	यद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	अहम्	अस्मद्- द. सर्व. प्र. एक.
प्रीयमाणाय	अ. पुं. च. एक.	ते	युष्मद्- द. सर्व. च. एक.
हितकाम्यया	आ. स्त्री. तृ. एक.	वक्ष्यामि	वच् (वच - परिभाषणे) पर. कर्तरि लृट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः तेऽहम् ते + अहम् पूर्वरूपसन्धिः।

(ख) समासः महाबाहो महान्तौ बाहू यस्य सः महाबाहुः, तत्सम्बुद्धौ - बहुव्रीहिः।
हितकाम्यया हितस्य काम्या हितकाम्या - तृतीयातत्पुरुषः, तया।

(ग) कृदन्तः प्रीयमाणाय प्री (प्रीङ् - प्रीतौ) + शानच् (कर्तरि), तस्मै।

भावस्पष्टीकरणम् -

शृणु।	
किं शृणु ?	**वचः शृणु।**

कीदृशं वचः शृणु ?	**परमं** वचः शृणु ।
कस्य परमं वचः शृणु ?	**मे** परमं वचः शृणु ।
कथं मे परमं वचः शृणु ?	**भूयः** एव मे परमं वचः शृणु ।
भूयः एव मे परमं वचः शृणु । **तत् (वचः) किम्** ?	भूयः एव मे परमं वचः शृणु । **यत् अहं वक्ष्यामि** ।
भूयः एव मे परमं वचः शृणु । यत् अहं **कया** वक्ष्यामि ?	भूयः एव मे परमं वचः शृणु । यत् अहं **हितकाम्यया** वक्ष्यामि ।
भूयः एव मे परमं वचः शृणु । यत् अहं **कस्मै** हितकाम्यया वक्ष्यामि ?	भूयः एव मे परमं वचः शृणु । यत् अहं **ते** हितकाम्यया वक्ष्यामि ।
भूयः एव मे परमं वचः शृणु । यत् अहं **कीदृशाय** ते हितकाम्यया वक्ष्यामि ?	भूयः एव मे परमं वचः शृणु । यत् अहं **प्रीयमाणाय** ते हितकाम्यया वक्ष्यामि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**महाबाहो** !

तात्पर्यम् - महाबाहो ! पुनः अपि मम उत्कृष्टं वचनम् आकर्णय यत् अहं मम वचनेन सन्तुष्यते ते हितेच्छया वदिष्यामि ।

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥१०.२॥

पदच्छेदः - न, मे, विदुः, सुरगणाः, प्रभवम्, न, महर्षयः ।
अहम्, आदिः, हि, देवानाम्, महर्षीणाम्, च सर्वशः ॥

अन्वयः - सुरगणाः मे प्रभवं न विदुः, महर्षयः न । अहं हि सर्वशः देवानां महर्षीणां च आदिः ।

पदार्थः - सुरगणाः = देवसङ्घाः, मे = मम, प्रभवम् = उत्पत्तिस्थानम्, न विदुः = न जानन्ति, महर्षयः न = महामुनयः न जानन्ति, हि = यस्मात्, अहम् = अहम् एव, सर्वशः = सर्वेण प्रकारेण, देवानाम् = सुराणाम्, महर्षीणां च = महामुनीनां च, आदिः = मूलकारणम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सुरगणाः	अ. पुं. प्र. बहु.	मे	अस्मद्- द. सर्व. ष. एक.
प्रभवम्	अ. पुं. द्वि. एक.	न	अव्ययम्

विदुः	विद् (विद - ज्ञाने) पर. कर्तरि लट्. प्रपु. बहु.	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
हि	अव्ययम्	सर्वशः	अव्ययम्
देवानाम्	अ. पुं. ष. बहु.	महर्षीणाम्	इ. पुं. ष. बहु.
च	अव्ययम्	आदिः	इ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः आदिर्हि — आदिः + हि — विसर्गसन्धिः (रेफः) ।

(ख) समासः सुरगणाः — सुराणां गणाः सुरगणाः - षष्ठीतत्पुरुषः ।

महर्षयः — महान्तः चामी ऋषयः महर्षयः - कर्मधारयः ।

(ग) कृदन्तः प्रभवम् — प्र + भू (भू - सत्तायाम्) + अप् ।

(घ) तद्धितान्तः सर्वशः — सर्व + शस् (प्रकारार्थे) ।

भावस्पष्टीकरणम् -

न विदुः ।	
के न विदुः ?	**सुरगणाः** न विदुः ।
सुरगणाः **कं** न विदुः ?	सुरगणाः **प्रभवं** न विदुः
सुरगणाः **कस्य** प्रभवं न विदुः	सुरगणाः **मे** प्रभवं न विदुः ।
सुरगणाः मे प्रभवं न विदुः । **अन्ये च के न** ?	सुरगणाः मे प्रभवं न विदुः, **महर्षयः न** ।
सुरगणाः मे प्रभवं न विदुः, महर्षयः न । **किमर्थम्** ?	सुरगणाः मे प्रभवं न विदुः, महर्षयः न । **(यतः) अहम् आदिः** ।
सुरगणाः मे प्रभवं न विदुः, महर्षयः न। यतः अहं **केषाम्** आदिः ?	सुरगणाः मे प्रभवं न विदुः, महर्षयः न। यतः अहं **देवानाम्** आदिः ।
सुरगणाः मे प्रभवं न विदुः, महर्षयः न । यतः अहं देवानां **पुनश्च केषाम्** आदिः ?	सुरगणाः मे प्रभवं न विदुः, महर्षयः न । यतः अहं देवानां **महर्षीणां च** आदिः ।
सुरगणाः मे प्रभवं न विदुः, महर्षयः न । यतः अहं **कथं** देवानां महर्षीणां च आदिः ?	सुरगणाः मे प्रभवं न विदुः, महर्षयः न । यतः अहं **हि सर्वशः** देवानां महर्षीणां च आदिः ।

तात्पर्यम् - मम उत्पत्तिस्थानं देवसङ्घाः न जानन्ति। महामुनयः न जानन्ति। यतः अहं सर्वेण प्रकारेण देवानां महामुनीनां च आदिमः ।

यो मामजमनादिं च वेत्ति लोकमहेश्वरम्।
असम्मूढः स मर्त्येषु सर्वपापैः प्रमुच्यते॥१०.३॥

पदच्छेदः - यः, माम्, अजम्, अनादिम्, च, वेत्ति, लोकमहेश्वरम्।
असम्मूढः, सः, मर्त्येषु, सर्वपापैः, प्रमुच्यते॥

अन्वयः - यः असम्मूढः माम् अजम् अनादिं लोकमहेश्वरं च वेत्ति सः मर्त्येषु सर्वपापैः प्रमुच्यते।

पदार्थः - यः = यः मानवः, असम्मूढः = मोहरहितः, माम् = माम्, अजम् = जन्मरहितम्, अनादिम् = आदिरहितम्, लोकमहेश्वरं च = लोकाधिपतिं च, वेत्ति = जानाति, सः मर्त्येषु = सः मानवेषु, सर्वपापैः = सकलपापैः, प्रमुच्यते = विमुक्तो भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	असम्मूढः	अ. पुं. प्र. एक. (विशेषणम्)
माम्	अस्मद् - द. सर्व. द्वि. एक. (विशेष्यम्)	अजम्	अ. पुं. द्वि. एक. (विशेषणम्)
अनादिम्	इ. पुं. द्वि. एक. (विशेषणम्)	लोकमहेश्वरम्	अ. पुं. द्वि. एक. (विशेषणम्)
च	अव्ययम्	वेत्ति	विद् (विद - ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	मर्त्येषु	अ. पुं. स. बहु. (विशेषणम्)
सर्वपापैः	अ. नपुं. तृ. बहु.	प्रमुच्यते	प्र + मुच् (मुच्लृ - मोक्षणे) आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः
- यो माम् — यः + माम् — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
- स मर्त्येषु — सः + मर्त्येषु — विसर्गसन्धिः (लोपः)।

(ख) समासः
- अजम् — न जायते इति अजः, माम् - कर्तरि डप्रत्ययः उपपदसमासश्च।
- अनादिम् — न विद्यते आदिः यस्य सः अनादिः, माम् - बहुव्रीहिः।
- लोकमहेश्वरम् — महान् चासौ ईश्वरः महेश्वरः - कर्मधारयः।
  लोकानां महेश्वरः लोकमहेश्वरः, माम् - षष्ठीतत्पुरुषः।
- असम्मूढः — न सम्मूढ असम्मूढः - नञ्तत्पुरुषः।
- सर्वपापैः — सर्वाणि पापानि सर्वपापानि, तैः - कर्मधारयः।

(ग) कृदन्तः
- सम्मूढः — सम् + मुह् (मुह - वैचित्त्ये) + क्त (कर्तरि)।
- मर्त्येषु — मृ (मृङ् -प्राणत्यागे) + क्यप्, तेषु।

भावस्पष्टीकरणम् -

प्रमुच्यते (मुक्तः भवति)।	
कैः प्रमुच्यते ?	**सर्वपापैः** प्रमुच्यते।
केषु सर्वपापैः प्रमुच्यते ?	**मर्त्येषु** सर्वपापैः प्रमुच्यते।
कः मर्त्येषु सर्वपापैः प्रमुच्यते ?	**सः** मर्त्येषु सर्वपापैः प्रमुच्यते।
कः सः मर्त्येषु सर्वपापैः प्रमुच्यते ?	**यः वेत्ति** सः मर्त्येषु सर्वपापैः प्रमुच्यते।
यः **कं** वेत्ति सः मर्त्येषु सर्वपापैः प्रमुच्यते ?	यः **मां** वेत्ति सः मर्त्येषु सर्वपापैः प्रमुच्यते।
यः मां **कीदृशं** वेत्ति सः मर्त्येषु सर्वपापैः प्रमुच्यते ?	यः माम् **अजं** वेत्ति सः मर्त्येषु सर्वपापैः प्रमुच्यते।
यः माम् अजं **पुनश्च कीदृशं** वेत्ति सः मर्त्येषु सर्वपापैः प्रमुच्यते ?	यः माम् अजम् **अनादिं** वेत्ति सः मर्त्येषु सर्वपापैः प्रमुच्यते।
यः माम् अजम् अनादिं **पुनश्च कीदृशं** वेत्ति सः मर्त्येषु सर्वपापैः प्रमुच्यते ?	यः माम् अजम् अनादिं **लोकमहेश्वरं च** वेत्ति सः मर्त्येषु सर्वपापैः प्रमुच्यते।
यः **कः** माम् अजम् अनादिं लोकमहेश्वरं च वेत्ति सः मर्त्येषु सर्वपापैः प्रमुच्यते ?	यः **असम्मूढः** माम् अजम् अनादिं लोकमहेश्वरं च वेत्ति सः मर्त्येषु सर्वपापैः प्रमुच्यते।

तात्पर्यम् - यः मोहरहितः जनः माम् अजम् आदिरहितं लोकाधिपतिम् अपि जानाति मानवेषु सः सकलपापैः विमुक्तो भवति।

बुद्धिर्ज्ञानमसम्मोहः क्षमा सत्यं दमः शमः।
सुखं दुःखं भवोऽभावो भयं चाभयमेव च॥१०.४॥
अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः।
भवन्ति भावा भूतानां मत्त एव पृथग्विधाः॥१०.५॥

पदच्छेदः - बुद्धिः, ज्ञानम्, असम्मोहः, क्षमा, सत्यम्, दमः, शमः।
सुखम्, दुःखम्, भवः, अभावः, भयम्, च, अभयम्, एव, च॥
अहिंसा, समता, तुष्टिः, तपः, दानम्, यशः, अयशः।
भवन्ति, भावाः, भूतानाम्, मत्तः, एव, पृथग्विधाः॥

अन्वयः - बुद्धिः ज्ञानम् असम्मोहः क्षमा सत्यं दमः शमः सुखं दुःखं भवः अभावः भयं च अभयम् एव च अहिंसा समता तुष्टिः तपः दानं यशः अयशः पृथग्विधाः भावाः भूतानां मत्तः एव भवन्ति।

पदार्थः - बुद्धिः = सूक्ष्मग्राहित्वम्, ज्ञानम् = वस्तुज्ञानम्, असम्मोहः = व्याकुलत्वाभावः, क्षमा = सहनम्, सत्यम् = यथार्थवचनम्, दमः = बाह्येन्द्रियनिग्रहः, शमः = अन्तःकरणनिग्रहः, सुखम् = आह्लादः, दुःखम् = सन्तापः, भवः = उद्भवः, अभावः = विनाशः, भयं च = भीतिः च, अभयम् एव च = भीतिराहित्यम् अपि, अहिंसा = अपीडनम्, समता = साम्यम्, तुष्टिः = सन्तोषः, तपः = नियमपूर्वकं शरीरपीडनम्, दानम् = वितरणम्, यशः = कीर्तिः, अयशः = अपकीर्तिः, पृथग्विधाः = एवं नानाप्रकाराः, भावाः = चित्तवृत्तयः, भूतानाम् = प्राणिनाम्, मत्तः एव = ईश्वरात् एव, भवन्ति = सम्पद्यन्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
बुद्धिः	इ. स्त्री. प्र. एक.	ज्ञानम्	अ. नपुं. प्र. एक.
असम्मोहः	अ. पुं. प्र. एक.	क्षमा	आ. स्त्री. प्र. एक.
सत्यम्	अ. नपुं. प्र. एक.	दमः	अ. पुं. प्र. एक.
शमः	अ. पुं. प्र. एक.	सुखम्	अ. नपुं. प्र. एक.
दुःखम्	अ. नपुं. प्र. एक.	भवः	अ. पुं. प्र. एक.
अभावः	अ. पुं. प्र. एक.	भयम्	अ. नपुं. प्र. एक.
च	अव्ययम्	अभयम्	अ. नपुं. प्र. एक.
एव	अव्ययम्	अहिंसा	आ. स्त्री. प्र. एक.
समता	आ. स्त्री. प्र. एक.	तुष्टिः	इ. स्त्री. प्र. एक.
तपः	तपस्- सका. नपुं. प्र. एक.	दानम्	अ. नपुं. प्र. एक.
यशः	यशस्- सका. नपुं. प्र. एक.	अयशः	अयशस्- सका. नपुं. प्र. एक.
पृथग्विधाः	अ. पुं. प्र. बहु. (विशेषणम्)	भावाः	अ. पुं. प्र. बहु. (विशेष्यम्)
भूतानाम्	अ. नपुं. ष. बहु.	मत्तः	अव्ययम्
भवन्ति	भू (भू - सत्तायाम्) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	बुद्धिर्ज्ञानम्	बुद्धिः + ज्ञानम्	विसर्गसन्धिः (रेफः) ।
	भवोऽभावो भयम्	भवः + अभावः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
		अभावः + भयम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	चाभयम्	च + अभयम्	सवर्णदीर्घसन्धिः ।
	तुष्टिस्तपो	तुष्टिः + तपः	विसर्गसन्धिः (सकारः) ।

	तपो दानम्	तपः + दानम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	यशोऽयशः	यशः + अयशः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
	भावा भूतानाम्	भावाः + भूतानाम्	विसर्गसन्धिः (लोपः) ।
	मत्त एव	मत्तः + एव	विसर्गसन्धिः (लोपः) ।
(ख) समासः	असम्मोहः	न सम्मोहः असम्मोहः - नञ्तत्पुरुषः ।	
	अभावः	न भावः अभावः - नञ्तत्पुरुषः ।	
	अभयम्	न भयम् अभयम् - नञ्तत्पुरुषः ।	
	अहिंसा	न हिंसा अहिंसा - नञ्तत्पुरुषः ।	
	पृथग्विधाः	पृथक् विधाः येषां ते पृथग्विधाः - बहुव्रीहिः ।	
(ग) कृदन्तः	बुद्धिः	बुध् (बुध - अवगमने) + क्तिन् (भावे) ।	
	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।	
	सम्मोहः	सम् + मुह् (मुह - वैचित्त्ये) + घञ् ।	
	भवः	भू (भू - सत्तायाम्) + अप् (भावे) ।	
	भावः	भू (भू - सत्तायाम्) + णिच् + अप् ।	
	भयम्	भी (ञिभी - भये) + अच् ।	
	तुष्टिः	तुष् (तुष - प्रीतौ) + क्तिन् (भावे) ।	
	दानम्	दा (डुदाञ् -दाने) + ल्युट् ।	
	भूतानाम्	भू (भू - सत्तायाम्) + क्त (कर्तरि) ।	
(घ) तद्धितान्तः	समता	सम + तल् (भावार्थे) ।	
	मत्तः	मत् + तसिल् ।	

भावस्पष्टीकरणम् -

एव भवन्ति ।	
कुतः एव भवन्ति ?	**मत्तः** एव भवन्ति ।
के मत्तः एव भवन्ति ?	**भावाः** मत्तः एव भवन्ति ।
कीदृशाः भावाः मत्तः एव भवन्ति ?	**पृथग्विधाः** भावाः मत्तः एव भवन्ति ।
पृथग्विधाः भावाः **केषां** मत्तः एव भवन्ति ?	पृथग्विधाः भावाः **भूतानां** मत्तः एव भवन्ति ।
के च ते पृथग्विधाः भावाः भूतानां मत्तः एव भवन्ति ?	**बुद्धिः ज्ञानम् असम्मोहः क्षमा सत्यं दमः शमः सुखं दुःखं भवः अभावः भयं च अभयम् एव च अहिंसा समता तुष्टिः तपः दानं यशः अयशः** पृथग्विधाः भावाः भूतानां मत्तः एव भवन्ति ।

तात्पर्यम् - सूक्ष्मग्राहित्वम्, वस्तुज्ञानम्, विवेकः, सहनम्, यथार्थवचनम्, बाह्येन्द्रियनिग्रहः, अन्तःकरणनिग्रहः, आह्लादः, सन्तापः, उद्भवः, विनाशः, भीतिः, भीतिराहित्यम्, अहिंसा, साम्यम्, सन्तोषः, तपः, दानम्, कीर्तिः, अपकीर्तिः एवं नानाप्रकाराः चित्तवृत्तयः प्राणिनां मत्तः एव सम्पद्यन्ते ।

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥१०.६॥

पदच्छेदः - महर्षयः, सप्त, पूर्वे, चत्वारः, मनवः, तथा ।
मद्भावाः, मानसाः, जाताः, येषाम्, लोके, इमाः, प्रजाः ॥

अन्वयः - सप्त महर्षयः तथा पूर्वे चत्वारः मनवः मद्भावाः मानसाः जाताः येषाम् इमाः प्रजाः लोके ।

पदार्थः - सप्त महर्षयः = सप्त महामुनयः, तथा = एवम्, पूर्वे = पुरातनाः, चत्वारः मनवः = स्वायम्भुवादयः मनवः, मद्भावाः = मच्चिन्तनपराः, मानसाः = मानसिकाः, जाताः = उत्पन्नाः, येषाम् = महामुनिप्रभृतीनाम्, इमाः = एताः, प्रजाः = सन्ततयः, लोके = भुवने सन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सप्त	सप्तन् - न. पुं. प्र. बहु. (विशेषणम्)	महर्षयः	इ. पुं. प्र. बहु. (विशेष्यम्)
तथा	अव्ययम्	पूर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
चत्वारः	चतुर् - र. पुं. प्र. बहु. (विशेषणम्)	मनवः	उ. पुं. प्र. बहु. (विशेष्यम्)
मद्भावाः	अ. पुं. प्र. बहु. (विशेषणम्)	मानसाः	अ. पुं. प्र. बहु. (विशेषणम्)
जाताः	अ. पुं. प्र. बहु. (विशेषणम्)	येषाम्	यद्- द. सर्व. पुं. ष. बहु. (विशेषणम्)
इमाः	इदम्- म. सर्व. स्त्री. प्र. बहु. (विशेषणम्)	प्रजाः	आ. स्त्री. प्र. बहु. (विशेष्यम्)
लोके	अ. पुं. स. एक.		

व्याकरणम् -

(क) सन्धिः	चत्वारो मनवः	चत्वारः + मनवः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	मनवस्तथा	मनवः + तथा	विसर्गसन्धिः (सकारः) ।
	मद्भावा मानसाः	मद्भावाः + मानसाः	विसर्गसन्धिः (लोपः) ।
	मानसा जाताः	मानसाः + जाताः	विसर्गसन्धिः (लोपः) ।
	जाता येषाम्	जाताः + येषाम्	विसर्गसन्धिः (लोपः) ।

	लोक इमाः	लोके + इमाः — यान्तवान्तादेशसन्धिः, यलोपः, प्रकृतिभावश्च ।
(ख) समासः	महर्षयः	महान्तः चामी ऋषयः महर्षयः - कर्मधारयः ।
	मद्भावाः	मम भावाः मद्भावाः - षष्ठीतत्पुरुषः ।
(ग) कृदन्तः	जाताः	जन् (जनी - प्रादुर्भावे) + क्त (कर्तरि) ।
(घ) तद्धितान्तः	मानसाः	मनः + अण् (आगतः इत्यर्थे) मनसः आगताः मानसाः ।
	मद्भावाः	मद्भाव + अच् (मतुबर्थे), मद्भावः एषाम् एषु वा अस्ति ।

भावस्पष्टीकरणम् -

जाताः ।	
के जाताः ?	**मानसाः** जाताः ।
कीदृशाः मानसाः जाताः ?	**मद्भावाः** मानसाः जाताः ।
के मद्भावाः मानसाः जाताः ?	**महर्षयः** मद्भावाः मानसाः जाताः ।
कति महर्षयः मद्भावाः मानसाः जाताः ?	**सप्त** महर्षयः मद्भावाः मानसाः जाताः ।
सप्त महर्षयः **अन्ये के** मद्भावाः मानसाः जाताः ?	सप्त महर्षयः **तथा मनवः** मद्भावाः मानसाः जाताः ।
सप्त महर्षयः तथा **कति** मनवः मद्भावाः मानसाः जाताः ?	सप्त महर्षयः तथा **चत्वारः** मनवः मद्भावाः मानसाः जाताः ।
सप्त महर्षयः तथा **कीदृशाः** चत्वारः मनवः मद्भावाः मानसाः जाताः ?	सप्त महर्षयः तथा **पूर्वे** चत्वारः मनवः मद्भावाः मानसाः जाताः ।
सप्त महर्षयः तथा पूर्वे चत्वारः मनवः मद्भावाः मानसाः जाताः । **तेषां किं** ?	सप्त महर्षयः तथा पूर्वे चत्वारः मनवः मद्भावाः मानसाः जाताः । **येषां प्रजाः लोके (वर्तन्ते)** ।
सप्त महर्षयः तथा पूर्वे चत्वारः मनवः मद्भावाः मानसाः जाताः । येषां लोके **काः** प्रजाः वर्तन्ते ?	सप्त महर्षयः तथा पूर्वे चत्वारः मनवः मद्भावाः मानसाः जाताः । येषां लोके **इमाः** प्रजाः वर्तन्ते ।

तात्पर्यम् - प्रसिद्धाः सप्त ऋषयः तथा पुरातनाः स्वायम्भुवादयः चत्वारः मनवः मच्चिन्तनपराः सङ्कल्पमात्रेण उत्पन्नाः । तेषामेव सन्ततयः इदानीं भूमौ वर्तन्ते ।

एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥१०.७॥

पदच्छेदः - एताम्, विभूतिम्, योगम्, च, मम, यः, वेत्ति, तत्त्वतः ।
सः, अविकम्पेन, योगेन, युज्यते, न, अत्र, संशयः ॥

अन्वयः - यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति सः अविकम्पेन योगेन युज्यते अत्र संशयः न ।

पदार्थः - यः = यः मनुजः, मम = मे, एताम् = एनाम्, विभूतिम् = ऐश्वर्यम्, योगं च = तत्तदर्थनिर्माणसामर्थ्यं च, तत्त्वतः = यथावत्, वेत्ति = जानाति, सः = सः मानवः, अविकम्पेन = अचञ्चलेन, योगेन = सम्यक् दर्शनेन, युज्यते = सम्बध्यते, अत्र = अस्मिन् विषये, संशयः न = सन्देहः नास्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	मम	अस्मद्- द. सर्व. ष. एक.
एताम्	एतद्- द. सर्व. स्त्री. द्वि. एक. (विशेषणम्)	विभूतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
योगम्	अ. पुं. द्वि. एक.	च	अव्ययम्
तत्त्वतः	अव्ययम्	वेत्ति	विद् (विद - ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	अविकम्पेन	अ. पुं. तृ. एक. (विशेषणम्)
योगेन	अ. पुं. तृ. एक. (विशेष्यम्)	युज्यते	युज् (युजिर् - योगे) आत्म. कर्मणि लट्. प्रपु. एक.
अत्र	अव्ययम्	संशयः	अ. पुं. प्र. एक.
न	अव्ययम्		

व्याकरणम् -

(क) सन्धिः योवेत्ति — यः + वेत्ति — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

सोऽविकम्पेन — सः + अविकम्पेन — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।

नात्र — न + अत्र — सवर्णदीर्घसन्धिः ।

(ख) समासः अविकम्पेन — विकम्पते इति विकम्पः - कर्तरि अच्प्रत्ययः ।
विशेषेण कम्पः यस्य सः विकम्पः - बहुव्रीहिः ।
न विकम्पः अविकम्पः, तेन - नञ्तत्पुरुषः ।

(ग) कृदन्तः विभूतिम् — वि + भू (भू - सत्तायाम्) + क्तिन्, ताम् ।
योगम् — युज् (युजिर् - योगे) + घञ्, तम् ।
संशयः — सम् + शी (शीङ् - शये) अच् ।

(घ) तद्धितान्तः तत्त्वतः — तत् + त्व् + तसिल् । (भावार्थे त्व) ।

भावस्पष्टीकरणम् -

वेत्ति।	
कथं वेत्ति ?	**तत्त्वतः** वेत्ति।
कां तत्त्वतः वेत्ति ?	**विभूतिं** तत्त्वतः वेत्ति।
कस्य विभूतिं तत्त्वतः वेत्ति ?	**मम** विभूतिं तत्त्वतः वेत्ति।
मम **कां** विभूतिं तत्त्वतः वेत्ति ?	मम **एतां** विभूतिं तत्त्वतः वेत्ति।
मम एतां विभूतिं **पुनश्च कं** तत्त्वतः वेत्ति ?	मम एतां विभूतिं **योगं च** तत्त्वतः वेत्ति।
कः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति ?	**यः** मम एतां विभूतिं योगं च तत्त्वतः वेत्ति।
यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति **सः किं करोति** ?	यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति **सः युज्यते**।
यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति सः **केन** युज्यते ?	यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति सः **योगेन** युज्यते।
यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति सः **कीदृशेन** योगेन युज्यते ?	यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति सः **अविकम्पेन** योगेन युज्यते।
यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति सः अविकम्पेन योगेन युज्यते **कुत्र** ?	यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति सः अविकम्पेन योगेन युज्यते, **अत्र**।
यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति सः अविकम्पेन योगेन युज्यते, अत्र **किम्** ?	यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति सः अविकम्पेन योगेन युज्यते, अत्र **नास्ति**।
यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति सः अविकम्पेन योगेन युज्यते, अत्र **कः** नास्ति ?	यः मम एतां विभूतिं योगं च तत्त्वतः वेत्ति सः अविकम्पेन योगेन युज्यते, अत्र **संशयः** नास्ति।

तात्पर्यम् - यः मनुष्यः मम एतत् ऐश्वर्यं तत्तदर्थनिर्माणसामर्थ्यं च यथावत् जानाति सः अचञ्चलेन दर्शनेन सम्यग्रूपेण सम्बद्धः भवति। (सः निश्चलेन भक्तियोगेन युक्तः भवति।) अस्मिन् विषये संशयः नास्ति।

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥१०.८॥

पदच्छेदः - अहम्, सर्वस्य, प्रभवः, मत्तः, सर्वम्, प्रवर्तते।
इति, मत्वा, भजन्ते, माम्, बुधाः, भावसमन्विताः ॥

अन्वयः - अहं सर्वस्य प्रभवः मत्तः सर्वं प्रवर्तते इति मत्वा बुधाः भावसमन्विताः मां भजन्ते ।

पदार्थः - अहम् = परब्रह्म, सर्वस्य = सकलस्य, प्रभवः = उत्पत्तिस्थानम्, मत्तः = परब्रह्मणः एव, सर्वम् = जगत्, प्रवर्तते = सम्भवति, इति = एवम्, मत्वा = विज्ञाय, बुधाः = पण्डिताः, भावसमन्विताः = प्रीतिसहिताः, मां भजन्ते = मां सेवन्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	सर्वस्य	अ. सर्व. पुं. ष. एक. (विशेषणम्)
प्रभवः	अ. पुं. प्र. एक. (विशेषणम्)	मत्तः	अव्ययम्
सर्वम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)	प्रवर्तते	प्र + वृत् (वृतु - वर्तने) आत्म. कर्तरि लट्. प्रपु. एक.
इति	अव्ययम्	मत्वा	क्त्वान्तम् अव्ययम्
बुधाः	अ. पुं. प्र. बहु. (विशेष्यम्)	भावसमन्विताः	अ. पुं. प्र. बहु. (विशेषणम्)
माम्	अस्मद्- द. सर्व. द्वि. एक.	भजन्ते	भज् (भज - सेवायाम्) आत्म. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	प्रभवो मत्तः	प्रभवः + मत्तः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	बुधा भावसमन्विताः	बुधाः + भावसमन्विताः	विसर्गसन्धिः (लोपः) ।
(ख) समासः	भावसमन्विताः	भावेन समन्विताः भावसमन्विताः - तृतीयातत्पुरुषः ।	
(ग) कृदन्तः	प्रभवः	प्र + भू (भू - सत्तायाम्) + अप् ।	
	मत्वा	मन् (मन - ज्ञाने) + क्त्वा ।	
	अन्विताः	अनु + इ (इण् - गतौ) + क्त (कर्तरि) ।	
(घ) तद्धितान्तः	मत्तः	अस्मद् + तसिल् (पञ्चम्यर्थे) ।	

भावस्पष्टीकरणम् -

अस्मि ।	
अहं कीदृशः अस्मि ?	**अहं प्रभवः अस्मि ।**
अहं कस्य प्रभवः अस्मि ।	**अहं सर्वस्य प्रभवः अस्मि ।**
प्रवर्तते ।	

किं प्रवर्तते ?	**सर्वं** प्रवर्तते ।
कस्मात् सर्वं प्रवर्तते ?	**मत्तः** सर्वं प्रवर्तते ।
भजन्ते ।	
कं भजन्ते ?	**मां** भजन्ते ।
के मां भजन्ते ?	**बुधाः** मां भजन्ते ।
बुधाः **कीदृशाः** मां भजन्ते ?	बुधाः **भावसमन्विताः** मां भजन्ते ।
किं कृत्वा बुधाः भावसमन्विताः मां भजन्ते ?	**मत्वा** बुधाः भावसमन्विताः मां भजन्ते ।
किम् इति मत्वा बुधाः भावसमन्विताः मां भजन्ते ?	**अहं सर्वस्य प्रभवः मत्तः सर्वं प्रवर्तते इति** मत्वा बुधाः भावसमन्विताः मां भजन्ते ।

तात्पर्यम् - अहं (परब्रह्म) सकलस्य जगतः मूलकारणम्, मत्तः (परब्रह्मणः) एव इदं सर्वं जगत् सम्भवति इति मत्वा भावसहिताः पण्डिताः मम उपासनां कुर्वन्ति ।

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥१०.९॥

पदच्छेदः - मच्चित्ताः, मद्गतप्राणाः, बोधयन्तः, परस्परम् ।
कथयन्तः, च, माम्, नित्यम्, तुष्यन्ति, च, रमन्ति, च ॥

अन्वयः - (बुधाः भावसमन्विताः) मच्चित्ताः मद्गतप्राणाः परस्परं मां बोधयन्तः कथयन्तः च नित्यं तुष्यन्ति च रमन्ति च ।

पदार्थः - मच्चित्ताः = मन्मानसाः, मद्गतप्राणाः = मद्गतेन्द्रियाः, परस्परम् = अन्योन्यम्, मां बोधयन्तः = माम् अवगमयन्तः, कथयन्तः च = कीर्तयन्तः च, नित्यम् = सदा, तुष्यन्ति च = सन्तोषं प्राप्नुवन्ति च, रमन्ति च = (मय्येव) विहरन्ति च ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मच्चित्ताः	अ. पुं. प्र. बहु. (विशेषणम्)	मद्गतप्राणाः	अ. पुं. प्र. बहु. (विशेषणम्)
परस्परम्	अ. नपुं. द्वि. एक. क्रियावि.	माम्	अस्मद्- द. सर्व. द्वि. एक
बोधयन्तः	बोधयत्- त. पुं. प्र. बहु. (विशेषणम्)	कथयन्तः	कथयत्- त. पुं. प्र. बहु. (विशेषणम्)

च	अव्ययम्	नित्यम्	अ. नपुं. द्वि. एक. क्रियावि.
तुष्यन्ति	तुष् (तुष - प्रीतौ) पर. कर्तरि लट्. प्रपु. बहु.	रमन्ति (रमन्ते)	रम् (रमु - क्रीडायाम्) आत्म. कर्तरि लट्. प्रपु. बहु

व्याकरणम् -

(क) सन्धिः	मच्चित्ता मद्गतप्राणाः	मच्चित्ताः + मद्गतप्राणाः	विसर्गसन्धिः (लोपः) ।
	मद्गतप्राणा बोधयन्तः	मद्गतप्राणाः + बोधयन्तः	विसर्गसन्धिः (लोपः) ।
	कथयन्तश्च	कथयन्तः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
(ख) समासः	मच्चित्ताः	मयि चित्तं येषां ते मच्चित्ताः - बहुव्रीहिः ।	
	मद्गतप्राणाः	मां गताः मद्गताः - द्वितीयातत्पुरुषः ।	
		मद्गताः प्राणाः येषां ते मद्गतप्राणाः - बहुव्रीहिः ।	
(ग) कृदन्तः	चित्ताः	चित् (चिती - संज्ञाने) + क्त (कर्तरि) ।	
	बोधयन्तः	बुध् (बुध - अवगमने) + णिच् + शतृ (कर्तरि) ।	
	कथयन्तः	कथ (कथ - वाक्यप्रबन्धे) णिच् + शतृ (कर्तरि) ।	

भावस्पष्टीकरणम् -

तुष्यन्ति ।	
कदा तुष्यन्ति ?	**नित्यं** तुष्यन्ति ।
के नित्यं तुष्यन्ति ?	**मच्चित्ताः** नित्यं तुष्यन्ति ।
मच्चित्ताः **कीदृशाः** नित्यं तुष्यन्ति ?	मच्चित्ताः **मद्गतप्राणाः** नित्यं तुष्यन्ति ?
मच्चित्ताः मद्गतप्राणाः **किं कुर्वन्तः** नित्यं तुष्यन्ति ?	मच्चित्ताः मद्गतप्राणाः **बोधयन्तः** नित्यं तुष्यन्ति ।
मच्चित्ताः मद्गतप्राणाः **कं** बोधयन्तः नित्यं तुष्यन्ति ?	मच्चित्ताः मद्गतप्राणाः **मां** बोधयन्तः नित्यं तुष्यन्ति ?
मच्चित्ताः मद्गतप्राणाः **कथं** मां बोधयन्तः नित्यं तुष्यन्ति ?	मच्चित्ताः मद्गतप्राणाः **परस्परं** मां बोधयन्तः नित्यं तुष्यन्ति ।
मच्चित्ताः मद्गतप्राणाः परस्परं मां बोधयन्तः **पुनश्च किं कुर्वन्तः** नित्यं तुष्यन्ति ?	मच्चित्ताः मद्गतप्राणाः परस्परं मां बोधयन्तः **कथयन्तः च** नित्यं तुष्यन्ति ।
मच्चित्ताः मद्गतप्राणाः परस्परं मां बोधयन्तः कथयन्तः च नित्यं तुष्यन्ति । **किं च कुर्वन्ति** ?	मच्चित्ताः मद्गतप्राणाः परस्परं मां बोधयन्तः कथयन्तः च नित्यं तुष्यन्ति **रमन्ति च** ।

तात्पर्यम् - येषां चित्तं मयि संलग्नं भवति, येषाम् इन्द्रियाणि मयि सन्ति तादृशाः बुधाः भावसमन्विताः अन्योन्यं (परस्परं) मां बोधयन्तः मम गुणान् कीर्तयन्तः च सदा सन्तोषं प्राप्नुवन्ति, मय्येव विहरन्ति च ।

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥१०.१०॥

पदच्छेदः - तेषाम्, सततयुक्तानाम्, भजताम्, प्रीतिपूर्वकम्।
ददामि, बुद्धियोगम्, तम्, येन, माम्, उपयान्ति, ते॥

अन्वयः - सततयुक्तानां प्रीतिपूर्वकं भजतां तेषां तं बुद्धियोगं ददामि येन ते माम् उपयान्ति।

पदार्थः - सततयुक्तानाम् = नित्ययुक्तानाम्, प्रीतिपूर्वकम् = स्नेहपूर्वकम्, भजताम् = सेवमानानाम्, तेषाम् = तेषां बुधानाम्, तम् = एतम्, बुद्धियोगम् = मद्विषयकं योगम्, ददामि = प्रयच्छामि, येन = येन योगेन, ते = ते बुधाः, माम् उपयान्ति = मां प्राप्नुवन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सततयुक्तानाम्	अ. पुं. ष. बहु. (विशेषणम्)	प्रीतिपूर्वकम्	अ. पुं. द्वि. एक.
भजताम्	भजत्- त. पुं. ष. बहु. (विशेषणम्)	तेषाम्	तद्- द. सर्व. पुं. ष. बहु. (विशेषणम्)
तम्	तद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)	बुद्धियोगम्	अ. पुं. द्वि. एक. (विशेष्यम्)
ददामि	दा (डुदाञ् - दाने) पर. कर्तरि लट्. उपु. एक.	येन	यद्- द. सर्व. पुं. तृ. एक. (विशेषणम्)
ते	तद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	माम्	अस्मद्- द. सर्व. द्वि. एक.
उपयान्ति	उप + या (या - प्रापणे) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) समासः सततयुक्तानाम् — सततं युक्ताः सततयुक्ताः, तेषाम् - सुप्समासः।
प्रीतिपूर्वकम् — प्रीतिः पूर्वा यथा भवति तथेति प्रीतिपूर्वकम्, क्रियाविशेषणम् - बहुव्रीहिः।
बुद्धियोगम् — बुद्धेः योगः बुद्धियोगः, तम् - षष्ठीतत्पुरुषः।

(ख) कृदन्तः युक्तानाम् — युज् (युजिर् - योगे) + क्त (कर्तरि), तेषाम्।
भजताम् — भज् (भज - सेवायाम्) + शतृ (कर्तरि), तेषाम्।

बुद्धिः बुध् (बुध - अवगमने) + क्तिन् ।
योगः युज् (युज - समाधौ) + घञ् ।

भावस्पष्टीकरणम् -

ददामि ।	
केषां ददामि ?	**तेषां** ददामि ।
किं कुर्वतां तेषां ददामि ?	**भजतां** तेषां ददामि ।
कथं भजतां तेषां ददामि ?	**प्रीतिपूर्वकं** भजतां तेषां ददामि ।
कीदृशानां प्रीतिपूर्वकं भजतां तेषां ददामि ?	**सततयुक्तानां** प्रीतिपूर्वकं भजतां तेषां ददामि ।
सततयुक्तानां प्रीतिपूर्वकं भजतां तेषां **कं** ददामि ?	सततयुक्तानां प्रीतिपूर्वकं भजतां तेषां **तं** ददामि ।
सततयुक्तानां प्रीतिपूर्वकं भजतां तेषां तं **कं** ददामि ?	सततयुक्तानां प्रीतिपूर्वकं भजतां तेषां तं **बुद्धियोगं** ददामि ।
सततयुक्तानां प्रीतिपूर्वकं भजतां तेषां तं बुद्धियोगं ददामि, **तेन किं भवति** ?	सततयुक्तानां प्रीतिपूर्वकं भजतां तेषां तं बुद्धियोगं ददामि, **येन उपयान्ति** ।
सततयुक्तानां प्रीतिपूर्वकं भजतां तेषां तं बुद्धियोगं ददामि, येन **के** उपयान्ति ?	सततयुक्तानां प्रीतिपूर्वकं भजतां तेषां तं बुद्धियोगं ददामि, येन **ते** उपयान्ति ।
सततयुक्तानां प्रीतिपूर्वकं भजतां तेषां तं बुद्धियोगं ददामि, येन ते **कम्** उपयान्ति ?	सततयुक्तानां प्रीतिपूर्वकं भजतां तेषां तं बुद्धियोगं ददामि, येन ते **माम्** उपयान्ति ।

तात्पर्यम् - नित्ययुक्तानां स्नेहपूर्वकं सेवमानानां तेषां बुधानां तं मद्विषयकं योगं प्रयच्छामि येन योगेन ते बुधाः मां प्राप्नुवन्ति ।

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥१०.११॥

पदच्छेदः - तेषाम्, एव, अनुकम्पार्थम्, अहम्, अज्ञानजम्, तमः ।
नाशयामि, आत्मभावस्थः, ज्ञानदीपेन, भास्वता ॥

अन्वयः - आत्मभावस्थः अहं तेषाम् एव अनुकम्पार्थं भास्वता ज्ञानदीपेन अज्ञानजं तमः नाशयामि ।

पदार्थः - आत्मभावस्थः = बुद्धौ वर्तमानः, अहम् = परमात्मा, तेषाम् एव = तादृशबुधानाम् एव, अनुकम्पार्थम् = दयाहेतोः, भास्वता = प्रकाशमानेन, ज्ञानदीपेन = विवेकदीपेन, अज्ञानजम् = मिथ्याज्ञानोत्पन्नम्, तमः = अन्धकारम्, नाशयामि = विध्वंसयामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
आत्मभावस्थः	अ. पुं. प्र. एक. (विशेषणम्)	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
तेषाम्	तद्- द. सर्व. ष. बहु. (विशेषणम्)	एव	अव्ययम्
अनुकम्पार्थम्	अव्ययम्	भास्वता	भास्वत्- त. पुं. तृ. एक. (विशेषणम्)
ज्ञानदीपेन	अ. पुं. तृ. एक. (विशेष्यम्)	अज्ञानजम्	अ. नपुं. द्वि. एक. (विशेषणम्)
तमः	तमस्- सका. नपुं. द्वि. एक. (विशेष्यम्)	नाशयामि	नश् (णश - अदर्शने) णिच्. पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः
- एवानुकम्पार्थम् — एव + अनुकम्पार्थम् — सवर्णदीर्घसन्धिः ।
- नाशयाम्यात्मभावस्थः — नाशयामि + आत्मभावस्थः — यण्सन्धिः ।
- आत्मभावस्थो ज्ञानदीपेन — आत्मभावस्थः + ज्ञानदीपेन — विसर्गसन्धिः रेफः, (सकारः) उकारः, गुणः ।

(ख) समासः
- अनुकम्पार्थम् — अनुकम्पायै इदम् अनुकम्पार्थम् - चतुर्थीतत्पुरुषः, (अयं नित्यसमासः) ।
- अज्ञानजम् — न ज्ञानम् अज्ञानम् - नञ्तत्पुरुषः ।
  अज्ञानेन जातम् अज्ञानजम् - कर्तरि डप्रत्ययः उपपदसमासश्च ।
- आत्मभावस्थः — आत्मनः भावः आत्मभावः - षष्ठीतत्पुरुषः ।
  आत्मभावे तिष्ठति इति आत्मभावस्थः - कर्तरि कः उपपदसमासश्च ।
- ज्ञानदीपेन — ज्ञानस्य दीपः ज्ञानदीपः, तेन - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः
- ज्ञानम् — ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।
- दीपः — दीप् (दीपी - दीप्तौ) + क (कर्तरि) ।

(घ) तद्धितान्तः
- भास्वता — भास् + मतुप् । भाः अस्य अस्मिन् वा अस्ति इति, तेन ।

भावस्पष्टीकरणम् -

नाशयामि ।	
किं नाशयामि ?	**तमः** नाशयामि ।
कीदृशं तमः नाशयामि ?	**अज्ञानजं** तमः नाशयामि ।

केन अज्ञानजं तमः नाशयामि ?	**ज्ञानदीपेन** अज्ञानजं तमः नाशयामि ।
कीदृशेन ज्ञानदीपेन अज्ञानजं तमः नाशयामि ?	**भास्वता** ज्ञानदीपेन अज्ञानजं तमः नाशयामि ।
किमर्थं भास्वता ज्ञानदीपेन अज्ञानजं तमः नाशयामि ?	**अनुकम्पार्थं** भास्वता ज्ञानदीपेन अज्ञानजं तमः नाशयामि ।
केषाम् एव अनुकम्पार्थं भास्वता ज्ञानदीपेन अज्ञानजं तमः नाशयामि ?	**तेषाम् एव** अनुकम्पार्थं भास्वता ज्ञानदीपेन अज्ञानजं तमः नाशयामि ।
कः तेषाम् एव अनुकम्पार्थं भास्वता ज्ञानदीपेन अज्ञानजं तमः नाशयामि ?	**अहं** तेषाम् एव अनुकम्पार्थं भास्वता ज्ञानदीपेन अज्ञानजं तमः नाशयामि ।
कीदृशः अहं तेषाम् एव अनुकम्पार्थं भास्वता ज्ञानदीपेन अज्ञानजं तमः नाशयामि ?	**आत्मभावस्थः** अहं तेषाम् एव अनुकम्पार्थं भास्वता ज्ञानदीपेन अज्ञानजं तमः नाशयामि ।

तात्पर्यम् - तादृशानां बुधानाम् अनुग्रहार्थम् अहं तेषाम् अन्तःकरणे तिष्ठन् तेषु अज्ञानेन जन्यं तमः प्रकाशमानेन ज्ञानरूपेण दीपेन नाशयामि ।

अर्जुन उवाच - **परं ब्रह्म परं धाम पवित्रं परमं भवान् ।**
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् ॥१०.१२॥
आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे ॥१०.१३॥

पदच्छेदः -

अर्जुन उवाच - परम्, ब्रह्म, परम्, धाम, पवित्रम्, परमम्, भवान् ।
पुरुषम्, शाश्वतम्, दिव्यम्, आदिदेवम्, अजम्, विभुम् ॥
आहुः, त्वाम्, ऋषयः, सर्वे, देवर्षिः, नारदः, तथा ।
असितः, देवलः, व्यासः, स्वयम्, च, एव, ब्रवीषि, मे ॥

अन्वयः - भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् । देवर्षिः नारदः असितः देवलः व्यासः (इति) सर्वे ऋषयः त्वां शाश्वतं दिव्यं पुरुषम् आदिदेवम् अजं विभुम् आहुः । तथा स्वयं च एव मे ब्रवीषि ।

पदार्थः - भवान् = त्वम्, परम् = उत्तमम्, ब्रह्म = ब्रह्म, परम् = उत्कृष्टम्, धाम = स्थानम्, परमम् = श्रेष्ठम्, पवित्रम् = पावनम्, इति देवर्षिः नारदः = सुरर्षिः नारदः, असितः = असितनामकः ऋषिः, देवलः = देवलनामकः ऋषिः, व्यासः = बादरायणः, सर्वे ऋषयः = सकलाः ऋषयः, त्वाम् = त्वाम्, शाश्वतम् = सनातनम्, दिव्यम् = दिवि भवम्, पुरुषम् = पुरुषोत्तमम्, आदिदेवम् = मूलदेवम्, अजम् = जन्मरहितम्, विभुम् = व्यापकम्, आहुः = वदन्ति, तथा = तेन प्रकारेण, स्वयं च एव = त्वमपि, मे = मह्यम्, ब्रवीषि = वदसि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भवान्	भवत्- त. पुं. प्र. एक.	परम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)
ब्रह्म	ब्रह्मन्- न. नपुं. प्र. एक. (विशेष्यम्)	धाम	धामन्- न. नपुं. प्र. एक. (विशेष्यम्)
परमम्	अ. नपुं. प्र. एक. (विशेषणम्)	पवित्रम्	अ. नपुं. प्र. एक. (विशेषणम्)
देवर्षिः	इ. पुं. प्र. एक. (विशेषणम्)	नारदः	अ. पुं. प्र. एक. (विशेष्यम्)
असितः	अ. पुं. प्र. एक.	देवलः	अ. पुं. प्र. एक.
व्यासः	अ. पुं. प्र. एक.	सर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
ऋषयः	इ. पुं. प्र. बहु. (विशेष्यम्)	त्वाम्	युष्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)
शाश्वतम्	अ. पुं. द्वि. एक. (विशेषणम्)	दिव्यम्	अ. पुं. द्वि. एक. (विशेषणम्)
पुरुषम्	अ. पुं. द्वि. एक. (विशेषणम्)	आदिदेवम्	अ. पुं. द्वि. एक. (विशेषणम्)
अजम्	अ. पुं. द्वि. एक. (विशेषणम्)	विभुम्	उ. पुं. द्वि. एक. (विशेषणम्)
आहुः	ब्रू (ब्रूञ् - व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. बहु.	तथा	अव्ययम्
स्वयम्	अव्ययम्	च	अव्ययम्
एव	अव्ययम्	मे	अस्मद्- द. सर्व. च. एक.
ब्रवीषि	ब्रू (ब्रूञ् - व्यक्तायां वाचि) पर. कर्तरि लट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	आहुस्त्वाम्	आहुः + त्वाम्	विसर्गसन्धिः (सकारः)।
	देवर्षिर्नारदः	देवर्षिः + नारदः	विसर्गसन्धिः (रेफः)।
	नारदस्तथा	नारदः + तथा	विसर्गसन्धिः (सकारः)।
	असितो देवलः	असितः + देवलः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	देवलो व्यासः	देवलः + व्यासः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	चैव	च + एव	वृद्धिसन्धिः।
(ख) समासः	आदिदेवम्	आदिः देवः आदिदेवः, तम् - कर्मधारयः।	
	असितः	न सितः असितः - नञ्तत्पुरुषः।	
(ग) कृदन्तः	पवित्रम्	पू (पूञ् - पवने) + इत्र।	

(घ) तद्धितान्तः शाश्वतम् शश्वत + अण् (भावार्थे), शश्वतः भावः ।
दिव्यम् दिव् + यत् (भवार्थे), दिवि भवम् ।

भावस्पष्टीकरणम् -

(अस्ति) ।	
कः अस्ति ?	**भवान्** अस्ति ।
भवान् **किम्** अस्ति ?	भवान् **ब्रह्म** अस्ति ।
भवान् **कीदृशं** ब्रह्म अस्ति ?	भवान् **परं** ब्रह्म अस्ति ।
भवान् परं ब्रह्म **पुनश्च किम्** अस्ति ?	भवान् परं ब्रह्म **धाम** अस्ति ।
भवान् परं ब्रह्म **कीदृशं** धाम अस्ति ?	भवान् परं ब्रह्म, **परं** धाम अस्ति ।
भवान् परं ब्रह्म, परं धाम, **कीदृशम्** अस्ति ?	भवान् परं ब्रह्म, परं धाम, **पवित्रम्** अस्ति ।
भवान् परं ब्रह्म, परं धाम, **कीदृशं** पवित्रम् अस्ति ?	भवान् परं ब्रह्म, परं धाम, **परमं** पवित्रम् अस्ति ।
भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । **अतः किम्** ?	भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । **(इति) आहुः ।**
भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । **के** इति आहुः ?	भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । **देवर्षिः नारदः असितः देवलः व्यासः इति सर्वे ऋषयः** आहुः ।
भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । देवर्षिः नारदः असितः देवलः व्यासः इति सर्वे ऋषयः **कम्** आहुः ?	भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । देवर्षिः नारदः असितः देवलः व्यासः इति सर्वे ऋषयः **त्वाम्** आहुः ।
भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । देवर्षिः नारदः असितः देवलः व्यासः इति सर्वे ऋषयः त्वां **किं किम्** आहुः ?	भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । देवर्षिः नारदः असितः देवलः व्यासः इति सर्वे ऋषयः त्वां **शाश्वतं दिव्यं पुरुषम् आदिदेवम् अजं विभुम्** आहुः ।
भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । देवर्षिः नारदः असितः देवलः व्यासः इति सर्वे ऋषयः त्वां शाश्वतं दिव्यं पुरुषम् आदिदेवम् अजं विभुम् आहुः । **तथा किम्** ?	भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । देवर्षिः नारदः असितः देवलः व्यासः इति सर्वे ऋषयः त्वां शाश्वतं दिव्यं पुरुषम् आदिदेवम् अजं विभुम् आहुः । **तथा ब्रवीषि** ?

भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । देवर्षिः नारदः असितः देवलः व्यासः इति सर्वे ऋषयः त्वां शाश्वतं दिव्यं पुरुषम् आदिदेवम् अजं विभुम् आहुः । तथा **कस्मै** ब्रवीषि ?	भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । देवर्षिः नारदः असितः देवलः व्यासः इति सर्वे ऋषयः त्वां शाश्वतं दिव्यं पुरुषम् आदिदेवम् अजं विभुम् आहुः । तथा **मे** ब्रवीषि ।
भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । देवर्षिः नारदः असितः देवलः व्यासः इति सर्वे ऋषयः त्वां शाश्वतं दिव्यं पुरुषम् आदिदेवम् अजं विभुम् आहुः । तथा **किं च एव** मे ब्रवीषि ?	भवान् परं ब्रह्म, परं धाम, परमं पवित्रम् अस्ति । देवर्षिः नारदः असितः देवलः व्यासः इति सर्वे ऋषयः त्वां शाश्वतं दिव्यं पुरुषम् आदिदेवम् अजं विभुम् आहुः । तथा **स्वयं च एव** मे ब्रवीषि ।

तात्पर्यम् - भवान् उत्तमं ब्रह्म, उत्कृष्टं स्थानं परमं पवित्रं च अस्ति । देवर्षिः नारदः, असितः, देवलः, बादरायणः इत्यादयः सर्वेऽपि ऋषयः 'त्वं सनातनः दिव्यश्च पुरुषः, त्वम् आदिदेवः, त्वं जन्मरहितः, विभुः' इति वदन्ति यदेतत् त्वम् अपि मां वदसि ।

सर्वमेतदृतं मन्ये यन्मां वदसि केशव ।
न हि ते भगवन्व्यक्तिं विदुर्देवा न दानवाः ॥१०.१४॥

पदच्छेदः - सर्वम्, एतत्, ऋतम्, मन्ये, यत्, माम्, वदसि, केशव ।
न, हि, ते, भगवन्, व्यक्तिम्, विदुः, देवाः, न, दानवाः ॥

अन्वयः - केशव ! मां यत् वदसि एतत् सर्वम् ऋतं मन्ये । भगवन् ! देवाः ते व्यक्तिं न विदुः, न हि दानवाः ।

पदार्थः - केशव = हे कृष्ण ! मां यत् वदसि = मां यत् कथयसि, एतत् = इदम्, सर्वम् = सकलम्, ऋतम् = सत्यम्, मन्ये = भावयामि, भगवन् = हे देव, देवाः = सुराः, ते = तव, व्यक्तिम् = प्रभावम्, न विदुः = न जानन्ति, न हि दानवाः = असुराः अपि न जानन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
केशव	अ. पुं. सम्बो. एक.	माम्	अस्मद् - द. सर्व. द्वि. एक.
यत्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	वदसि	वद् (वद - व्यक्तायां वाचि) पर. कर्तरि लट्. मपु. एक.
एतत्	एतद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	सर्वम्	अ. सर्व. नपुं. द्वि. एक. (विशेषणम्)
ऋतम्	अ. नपुं. द्वि. एक. (विशेषणम्)	मन्ये	मन् (मन - ज्ञाने) आत्म. कर्तरि लट्. उपु. एक.
भगवन्	भगवत्- त. पुं. सम्बो. एक.	देवाः	अ. पुं. प्र. बहु.

ते	युष्मद्- द. सर्व. ष. एक.	व्यक्तिम्	इ. स्त्री. द्वि. एक.
न	अव्ययम्	विदुः	विद् (विद - ज्ञाने) पर. कर्तरि लट्. प्रपु. बहु.
हि	अव्ययम्	दानवाः	अ. पुं. प्र. बहु.

व्याकरणम् -

(क) सन्धिः एतदृतम् — एतत् + ऋतम् — जश्त्वसन्धिः ।
यन्माम् — यत् + माम् — अनुनासिकसन्धिः ।

(ख) कृदन्तः ऋतम् — ऋ (ऋ - गतौ) + क्त (कर्तरि) ।
व्यक्तिम् — वि + अञ्ज् (अञ्जू - व्यक्तिम्रक्षणकान्तिगतिषु) + क्तिन् ।
देवाः — दिव् (दिवु - क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु) + अच् ।

(ग) तद्धितान्तः भगवन् — भग + मतुप् तत्सम्बुद्धौ, भगः अस्य अस्मिन् वा अस्ति ।
दानवाः — दनु + अण् (अपत्यार्थे) । दनोः अपत्यानि पुमांसः ।
केशव — केश + व (मतुबर्थे) प्रशस्ताः केशाः सन्ति अस्य अस्मिन् वा ।

भावस्पष्टीकरणम् -

वदसि ।	
किं वदसि ?	**यत्** वदसि ।
कं यत् वदसि ?	**मां** यत् वदसि ।
मां यत् वदसि **तत् किम्** ?	मां यत् वदसि **एतत् मन्ये** ।
मां यत् वदसि एतत् **किं** मन्ये ?	मां यत् वदसि एतत् **ऋतं** मन्ये
मां यत् वदसि एतत् **किम्** ऋतं मन्ये ?	मां यत् वदसि एतत् **सर्वम्** ऋतं मन्ये ।
न विदुः ।	
के न विदुः ?	**देवाः** न विदुः ।
देवाः **कां** न विदुः ?	देवाः **व्यक्तिं** न विदुः ।
देवाः **कस्य** व्यक्तिं न विदुः ?	देवाः **ते** व्यक्तिं न विदुः ।
देवाः ते व्यक्तिं न विदुः **के च न** ?	देवाः ते व्यक्तिं न विदुः **न हि दानवाः** ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**केशव, भगवन् !**

तात्पर्यम् - कृष्ण ! त्वं माम् उद्दिश्य यद्विषयकं कथयसि इदं सर्वम् अहं सत्यं मन्ये । हे भगवन् ! सुराः तव प्रभावं न जानन्ति । असुराः अपि न जानन्ति ।

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम।
भूतभावन भूतेश देवदेव जगत्पते ॥१०.१५॥

पदच्छेदः - स्वयम्, एव, आत्मना, आत्मानम्, वेत्थ, त्वम्, पुरुषोत्तम।
भूतभावन, भूतेश, देवदेव, जगत्पते ॥

अन्वयः - पुरुषोत्तम भूतभावन भूतेश देवदेव जगत्पते ! त्वं स्वयम् एव आत्मना आत्मानं वेत्थ।

पदार्थः - पुरुषोत्तम = पुरुषश्रेष्ठ, भूतभावन = भूतोत्पादक, भूतेश = भूतप्रभो, देवदेव = देवाधिदेव, जगत्पते = जगदीश ! त्वं स्वयम् एव = त्वं स्वयम् एव, आत्मना आत्मानम् = आत्मना स्वम्, वेत्थ = जानासि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पुरुषोत्तम	अ. पुं. सम्बो. एक.	भूतभावन	अ. पुं. सम्बो. एक.
भूतेश	अ. पुं. सम्बो. एक.	देवदेव	अ. पुं. सम्बो. एक.
जगत्पते	इ. पुं. सम्बो. एक.	त्वम्	युष्मद्- द. सर्व. प्र. एक.
स्वयम्	अव्ययम्	एव	अव्ययम्
आत्मना	आत्मन्- न. पुं. तृ. एक.	आत्मानम्	आत्मन्- न. पुं. द्वि. एक.
वेत्थ	विद् (विद - ज्ञाने) पर. कर्तरि लट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	एवात्मना	एव + आत्मना	सवर्णदीर्घसन्धिः।
	आत्मनात्मानम्	आत्मना + आत्मानम्	सवर्णदीर्घसन्धिः।

(ख) समासः
- पुरुषोत्तम — पुरुषेषु उत्तमः पुरुषोत्तमः, तत्सम्बुद्धौ - सप्तमीतत्पुरुषः।
- भूतभावन — भूतानां भावनः भूतभावनः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।
- भूतेश — भूतानाम् ईशः भूतेशः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।
- देवदेव — देवानां देवः देवदेवः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।
- जगत्पते — जगतः पतिः जगत्पतिः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।

(ग) कृदन्तः
- भूतः — भू (भू - सत्तायाम्) + क्त (कर्तरि)।
- भावनः — भू (भू - सत्तायाम्) + णिच् + ल्युट्।

भावस्पष्टीकरणम् -

वेत्थ।	
कः वेत्थ ?	त्वं वेत्थ।

त्वं **कं** वेत्थ ?	त्वम् **आत्मानं** वेत्थ ।
त्वं **केन** आत्मानं वेत्थ ?	त्वम् **आत्मना** आत्मानं वेत्थ ।
त्वं **कथम्** आत्मना आत्मानं वेत्थ ?	त्वं **स्वयम् एव** आत्मना आत्मानं वेत्थ ।
अस्मिन् श्लोके सम्बोधनपदानि कानि ?	**पुरुषोत्तम, भूतभावन, भूतेश, देवदेव, जगत्पते !**

तात्पर्यम् - पुरुषश्रेष्ठ, भूतोत्पादक, भूतप्रभो, देवाधिदेव, जगदीश ! भवान् स्वयम् एव आत्मानं जानाति, नान्ये ।

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥१०.१६॥

पदच्छेदः - वक्तुम्, अर्हसि, अशेषेण, दिव्याः, हि, आत्मविभूतयः ।
याभिः, विभूतिभिः, लोकान्, इमान्, त्वम्, व्याप्य, तिष्ठसि ॥

अन्वयः - याभिः विभूतिभिः त्वम् इमान् लोकान् व्याप्य तिष्ठसि (ताः) दिव्याः हि आत्मविभूतयः अशेषेण वक्तुम् अर्हसि ।

पदार्थः - याभिः विभूतिभिः = यैः माहात्म्यविस्तरैः, त्वम् इमान् लोकान् = त्वम् एतान् लोकान्, व्याप्य = आक्रम्य, तिष्ठसि = वर्तसे (ताः) दिव्याः हि = लोकोत्तरान्, आत्मविभूतयः = माहात्म्यविस्तरान्, अशेषेण = साकल्येन, वक्तुम् अर्हसि = कथयितुम् अर्हसि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
याभिः	यद्- द. सर्व. स्त्री. तृ. बहु. (विशेषणम्)	विभूतिभिः	इ. स्त्री. तृ. बहु. (विशेष्यम्)
त्वम्	युष्मद्- द. सर्व. प्र. एक.	इमान्	इदम्- म. सर्व. पुं. द्वि. बहु. (विशेषणम्)
लोकान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	व्याप्य	ल्यबन्तम् अव्ययम्
तिष्ठसि	तिष्ठ (ष्ठा - गतिनिवृत्तौ) पर. कर्तरि लट्. मपु. एक.	दिव्याः	आ. स्त्री. प्र. बहु. (विशेषणम्)
आत्मविभूतयः	इ. स्त्री. प्र. बहु. (विशेष्यम्)	अशेषेण	क्रियाविशेषणम्
वक्तुम्	तुमुन्नन्तम् अव्ययम्	अर्हसि	अर्ह् (अर्ह - पूजायाम्) पर. कर्तरि लट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	अर्हस्यशेषेण	अर्हसि + अशेषेण	यण्सन्धिः ।
	दिव्या हि	दिव्याः + हि	विसर्गसन्धिः (लोपः) ।
	याभिर्विभूतिभिः	याभिः + विभूतिभिः	विसर्गसन्धिः (रेफः) ।
	विभूतिभिर्लोकान्	विभूतिभिः + लोकान्	विसर्गसन्धिः (रेफः) ।
	इमांस्त्वम्	इमान् + त्वम्	सत्वसन्धिः, रुत्वम् अनुस्वारागमः सत्वं च ।
(ख) समासः	अशेषेण	न शेषः अशेषः, तेन - नञ्तत्पुरुषः ।	
	आत्मविभूतयः	आत्मनः विभूतयः आत्मविभूतयः - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	वक्तुम्	वच् (वच - परिभाषणे) + तुमुन् ।	
	विभूतिभिः	वि + भू (भू - सत्तायाम्) + क्तिन्, ताभिः ।	
	लोकान्	लोक् (लोकृ - दर्शने) + घञ्, तान् ।	
	व्याप्य	वि + आप् (आप्लृ - व्याप्तौ) + ल्यप् ।	
(घ) तद्धितान्तः	दिव्याः	दिव् + यत् (भवार्थे) दिवि भवाः ।	

भावस्पष्टीकरणम् -

तिष्ठसि ।	
कः तिष्ठसि ?	**त्वं** तिष्ठसि ।
त्वं **किं कृत्वा** तिष्ठसि ?	त्वं **व्याप्य** तिष्ठसि ।
त्वं **कान्** व्याप्य तिष्ठसि ?	त्वं **लोकान्** व्याप्य तिष्ठसि ।
त्वं **कान्** लोकान् व्याप्य तिष्ठसि ?	त्वम् **इमान्** लोकान् व्याप्य तिष्ठसि ।
काभिः त्वम् इमान् लोकान् व्याप्य तिष्ठसि ?	**विभूतिभिः** त्वम् इमान् लोकान् व्याप्य तिष्ठसि ।
काभिः विभूतिभिः त्वम् इमान् लोकान् व्याप्य तिष्ठसि ?	**याभिः** विभूतिभिः त्वम् इमान् लोकान् व्याप्य तिष्ठसि ।
अर्हसि ।	
किं कर्तुम् अर्हसि ?	**वक्तुम्** अर्हसि ।
कथं वक्तुम् अर्हसि ?	**अशेषेण** वक्तुम् अर्हसि ।
काः अशेषेण वक्तुम् अर्हसि ?	**आत्मविभूतयः** अशेषेण वक्तुम् अर्हसि ।
कीदृश्यः आत्मविभूतयः अशेषेण वक्तुम् अर्हसि ?	**दिव्याः हि** आत्मविभूतयः अशेषेण वक्तुम् अर्हसि ।

तात्पर्यम् - भवान् स्वीयैः ऐश्वर्यैः एतान् लोकान् अभिव्याप्य तिष्ठति । तानि सर्वाणि अपि ऐश्वर्याणि साकल्येन कथयितुम् अर्हति ।

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन्।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥१०.१७॥

पदच्छेदः - कथम्, विद्याम्, अहम्, योगिन्, त्वाम्, सदा, परिचिन्तयन्।
केषु, केषु, च, भावेषु, चिन्त्यः, असि, भगवन्, मया ॥

अन्वयः - योगिन् ! अहं सदा त्वां परिचिन्तयन् कथं विद्याम्। भगवन् ! मया केषु केषु च भावेषु चिन्त्यः असि।

पदार्थः - योगिन् = योगिवर ! अहं सदा = अहं सततम्, त्वां परिचिन्तयन् = त्वां ध्यायन्, कथम् = केन प्रकारेण, विद्याम् = विजानीयाम्, भगवन् = पूजार्ह ! मया केषु केषु च = मया केषु केषु च, भावेषु = वस्तुषु, चिन्त्यः असि = ध्यातव्यः असि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
योगिन्	योगिन्- न. पुं. सम्बो. एक.	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
सदा	अव्ययम्	त्वाम्	युष्मद्- द. सर्व. द्वि. एक.
परिचिन्तयन्	परिचिन्तयत्- त. पुं. प्र. एक. (विशेषणम्)	कथम्	अव्ययम्
विद्याम्	विद् (विद - ज्ञाने) पर. कर्तरि विधिलिङ्. उपु. एक.	भगवन्	भगवत्- त. पुं. सम्बो. एक.
मया	अस्मद्- द. सर्व. तृ. एक.	केषु	किम्- म. सर्व. पुं. स. बहु. (विशेषणम्)
च	अव्ययम्	भावेषु	अ. पुं. स. बहु. (विशेष्यम्)
चिन्त्यः	अ. पुं. प्र. एक. (विशेषणम्)	असि	अस् (अस - भुवि) पर. कर्तरि लट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः योगिंस्त्वाम् — योगिन् + त्वाम् — सत्वसन्धिः, रुत्वम्, अनुस्वारागमः, सत्वं च।
चिन्त्योऽसि — चिन्त्यः + असि — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च।

(ख) कृदन्तः परिचिन्तयन् — परि + चित् (चिति - स्मृत्याम्) + शतृ (कर्तरि)।
भावेषु — भू (भू - प्राप्तौ) + णिच् + अच् (पचाद्यच्), तेषु।
चिन्त्यः — चित् (चिति - स्मृत्याम्) + ण्यत् (कर्मणि)।

(ग) तद्धितान्तः कथम् — किम् + (थमु) थाल्।

योगिन्	योग + इनि (मतुबर्थे) योगः अस्य अस्मिन् वा अस्ति।
सदा	सर्व + दा। सर्वस्मिन् काले।

भावस्पष्टीकरणम् -

अहं विद्याम्।	
अहं **कं** विद्याम्?	अहं **त्वां** विद्याम्।
अहं त्वां **किं कुर्वन्** विद्याम्?	अहं त्वां **परिचिन्तयन्** विद्याम्।
अहं **कदा** त्वां परिचिन्तयन् विद्याम्?	अहं **सदा** त्वां परिचिन्तयन् विद्याम्।
अहं सदा त्वां परिचिन्तयन् **कथं** विद्याम्?	
असि।	
कीदृशः असि?	**चिन्त्यः** असि।
केन चिन्त्यः असि?	**मया** चिन्त्यः असि।
मया **केषु** चिन्त्यः असि?	मया **भावेषु** चिन्त्यः असि
मया **केषु केषु च** भावेषु चिन्त्यः असि?	
अस्मिन् श्लोके सम्बोधनपदे के?	**योगिन्, भगवन्!**

तात्पर्यम् - योगिवर! अहं सततं त्वां ध्यायन् केन प्रकारेण विज्ञातुं शक्नुयाम्? हे पूजार्ह! मया केषु केषु पदार्थेषु त्वं ध्यातव्यः भवसि?

विस्तरेणात्मनो योगं विभूतिं च जनार्दन।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम्॥१०.१८॥

पदच्छेदः - विस्तरेण, आत्मनः, योगम्, विभूतिम्, च, जनार्दन।
भूयः, कथय, तृप्तिः, हि, शृण्वतः, न, अस्ति, मे, अमृतम्॥

अन्वयः - जनार्दन! आत्मनः विभूतिं योगं च विस्तरेण भूयः कथय। अमृतं हि शृण्वतः मे तृप्तिः न अस्ति।

पदार्थः - जनार्दन = कृष्ण! आत्मनः = स्वस्य, विभूतिम् = ऐश्वर्यम्, योगं च = स्वरूपं च, विस्तरेण = विपुलं यथा तथा, भूयः = पुनः, कथय = वद, हि = यस्मात्, अमृतम् = अमृततुल्यम्, शृण्वतः मे = आकार्णयतः मम, तृप्तिः = तुष्टिः न अस्ति = न विद्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
जनार्दन	अ. पुं. सम्बो. एक.	आत्मनः	आत्मन्- न. पुं. ष. एक.
विभूतिम्	इ. स्त्री. द्वि. एक.	योगम्	अ. पुं. द्वि. एक.
च	अव्ययम्	विस्तरेण	अ. पुं. तृ. एक.
भूयः	अव्ययम्	कथय	कथ (कथ - वाक्यप्रबन्धे) पर. कर्तरि लोट्. मपु. एक.
अमृतम्	अ. नपुं. द्वि. एक.	शृण्वतः	शृण्वत्- त. पुं. ष. एक. (विशेषणम्)
मे	अस्मद्- द. सर्व. ष. एक. (विशेष्यम्)	तृप्तिः	इ. स्त्री. प्र. एक.
न	अव्ययम्	अस्ति	अस् (अस - भुवि) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	विस्तरेणात्मनः	विस्तरेण + आत्मनः	सवर्णदीर्घसन्धिः ।
	आत्मनो योगम्	आत्मनः + योगम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	जनार्दन	जनैः अर्द्यते याच्यते पुरुषार्थलाभाय इति जनार्दनः, तत्सम्बुद्धौ - कर्मणि ल्युट् उपपदतत्पुरुषश्च ।	
	अमृतम्	न मृतम् अमृतम् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	विस्तरेण	वि + स्तृ (स्तृञ् - आच्छादने) + अप्, तेन ।	
	योगम्	युज् (युज - समाधौ) + घञ्, तम् ।	
	विभूतिम्	वि + भू (भू - सत्तायाम्) + क्तिन्, ताम् ।	
	तृप्तिः	तृप् (तृप - प्रीणने) + क्तिन् ।	
	शृण्वतः	श्रु (श्रु - श्रवणे) + शतृ (कर्तरि), तस्य ।	
	मृतम्	मृ (मृङ् - प्राणत्यागे) + क्त (कर्तरि) ।	

भावस्पष्टीकरणम् -

कथय ।	
कां कथय ?	**विभूतिं कथय ।**
विभूतिं पुनश्च कं कथय ?	**विभूतिं योगं च कथय ।**
कस्य विभूतिं योगं च कथय ?	**आत्मनः विभूतिं योगं च कथय ।**

आत्मनः विभूतिं योगं च **केन प्रकारेण** कथय ?	आत्मनः विभूतिं योगं च **विस्तरेण** कथय ।
आत्मनः विभूतिं योगं च विस्तरेण **कथं** कथय ?	आत्मनः विभूतिं योगं च विस्तरेण **भूयः** कथय ।
आत्मनः विभूतिं योगं च विस्तरेण भूयः कथय । **(यतः) किं न अस्ति** ?	आत्मनः विभूतिं योगं च विस्तरेण भूयः कथय । **यतः तृप्तिः न अस्ति** ।
आत्मनः विभूतिं योगं च विस्तरेण भूयः कथय । **कस्य** तृप्तिः न अस्ति ?	आत्मनः विभूतिं योगं च विस्तरेण भूयः कथय । **मे** तृप्तिः न अस्ति ।
आत्मनः विभूतिं योगं च विस्तरेण भूयः कथय । **किं कुर्वतः** मे तृप्तिः न अस्ति ?	आत्मनः विभूतिं योगं च विस्तरेण भूयः कथय । **शृण्वतः** मे तृप्तिः न अस्ति ।
आत्मनः विभूतिं योगं च विस्तरेण भूयः कथय । **किं** शृण्वतः मे तृप्तिः न अस्ति ?	आत्मनः विभूतिं योगं च विस्तरेण भूयः कथय । **अमृतं हि** शृण्वतः मे तृप्तिः न अस्ति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**जनार्दन** !

तात्पर्यम् - कृष्ण ! स्वस्य स्वरूपं माहात्म्यविस्तरं च विस्तरेण पुनः वद । अमृततुल्यं तत् आकर्णयतः मम तृप्तिः एव न भवति ।

श्रीभगवानुवाच - **हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।**
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥१०.१९॥

पदच्छेदः -

श्रीभगवान्, उवाच - हन्त, ते, कथयिष्यामि, दिव्याः, हि, आत्मविभूतयः ।
प्राधान्यतः, कुरुश्रेष्ठ, न, अस्ति, अन्तः, विस्तरस्य, मे ॥

अन्वयः - कुरुश्रेष्ठ ! हन्त दिव्याः आत्मविभूतयः हि ते प्राधान्यतः कथयिष्यामि । मे विस्तरस्य अन्तः न अस्ति ।

पदार्थः - कुरुश्रेष्ठ = कुरुपुङ्गव ! हन्त = अहो ! दिव्याः = दिव्याः, आत्मविभूतयः हि = स्वस्य ऐश्वर्यविशेषाः, ते = तुभ्यम्, प्राधान्यतः = मुख्यत्वेन, कथयिष्यामि = वदिष्यामि, मे विस्तरस्य = मम विभूतीनां वैशाल्यस्य, अन्तः = अवधिः, न अस्ति = न विद्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कुरुश्रेष्ठ	अ. पुं. सम्बो. एक.	हन्त	अव्ययम्
दिव्याः	आ. स्त्री. प्र. बहु. (विशेषणम्)	आत्मविभूतयः	इ. स्त्री. प्र. बहु. (विशेष्यम्)

हि	अव्ययम्	ते	युष्मद्- द. सर्व. च. एक.
प्राधान्यतः	अव्ययम्	कथयिष्यामि	कथ (कथ वाक्यप्रबन्धे) पर. कर्तरि लृट्. उपु. एक.
मे	अस्मद्- द. सर्व. ष. एक.	विस्तरस्य	अ. पुं. ष. एक.
अन्तः	अव्ययम्	न	अव्ययम्
अस्ति	अस् (अस - भुवि) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	दिव्या हि	दिव्याः + हि	विसर्गसन्धिः (लोपः) ।
	ह्यात्मविभूतयः	हि + आत्मविभूतयः	यण्सन्धिः ।
	नास्ति	न + अस्ति	सवर्णदीर्घसन्धिः ।
	अस्त्यन्तः	अस्ति + अन्तः	यण्सन्धिः ।
(ख) समासः	आत्मविभूतयः	आत्मनः विभूतयः आत्मविभूतयः - षष्ठीतत्पुरुषः ।	
	कुरुश्रेष्ठ	कुरुषु श्रेष्ठः कुरुश्रेष्ठः, तत्सम्बुद्धौ - सप्तमीतत्पुरुषः ।	
(ग) तद्धितान्तः	दिव्याः	दिव् + यत् (भवार्थे) दिवि भवाः ।	
	प्राधान्यतः	प्रधान + ष्यञ् + तसिल् (भावार्थे) । प्रधानतायाः भावः ।	

भावस्पष्टीकरणम् -

कथयिष्यामि ।	
कस्मै कथयिष्यामि ?	**ते** कथयिष्यामि ।
ते **कथं** कथयिष्यामि ?	ते **प्राधान्यतः** कथयिष्यामि ।
काः ते प्राधान्यतः कथयिष्यामि ?	**आत्मविभूतयः हि** ते प्राधान्यतः कथयिष्यामि ।
कीदृश्यः आत्मविभूतयः हि ते प्राधान्यतः कथयिष्यामि ?	**दिव्याः** आत्मविभूतयः हि ते प्राधान्यतः कथयिष्यामि ।
हन्त दिव्याः आत्मविभूतयः हि ते प्राधान्यतः कथयिष्यामि । **यतः किं नास्ति ?**	हन्त दिव्याः आत्मविभूतयः हि ते प्राधान्यतः कथयिष्यामि । यतः **अन्तः नास्ति ।**
हन्त दिव्याः आत्मविभूतयः हि ते प्राधान्यतः कथयिष्यामि । **कस्य** अन्तः नास्ति ?	हन्त दिव्याः आत्मविभूतयः हि ते प्राधान्यतः कथयिष्यामि । **विस्तरस्य** अन्तः नास्ति ।

हन्त दिव्याः आत्मविभूतयः हि ते प्राधान्यतः कथयिष्यामि। **कस्य** विस्तरस्य अन्तः नास्ति ?	हन्त दिव्याः आत्मविभूतयः हि ते प्राधान्यतः कथयिष्यामि। **मे** विस्तरस्य अन्तः नास्ति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कुरुश्रेष्ठ** !

तात्पर्यम् - कुरुपुङ्गव ! अधुना स्वस्य दिव्येषु ऐश्वर्येषु प्राधान्यतः कानिचिदेव कथयिष्यामि। यतः मम विभूतीनाम् अन्तः नास्ति।

अहमात्मा गुडाकेश सर्वभूताशयस्थितः।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥१०.२०॥

पदच्छेदः - अहम्, आत्मा, गुडाकेश, सर्वभूताशयस्थितः।
अहम्, आदिः, च, मध्यम्, च, भूतानाम्, अन्तः, एव, च ॥

अन्वयः - गुडाकेश ! सर्वभूताशयस्थितः आत्मा अहं भूतानाम् आदिः च मध्यं च अन्तः च एव अहम्।

पदार्थः - गुडाकेश = (जितनिद्र) अर्जुन ! सर्वभूताशयस्थितः = सर्वप्राणिहृदयस्थितः, आत्मा = प्रत्यगात्मा, अहम् = अहम्, भूतानाम् = प्राणिनाम्, आदिः च = मूलं च, मध्यं च = मध्यभागः च, अन्तः च = अवसानम् अपि, अहम् एव = अहम् एव।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
गुडाकेश	अ. पुं. सम्बो. एक.	सर्वभूताशयस्थितः	अ. पुं. प्र. एक. (विशेषणम्)
आत्मा	आत्मन्- न. पुं. प्र. एक. (विशेषणम्)	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
भूतानाम्	अ. नपुं. ष. बहु.	आदिः	इ. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	मध्यम्	अ. नपुं. प्र. एक.
अन्तः	अव्ययम्	एव	अव्ययम्

व्याकरणम् -

(क) सन्धिः	अन्त एव	अन्तः + एव	विसर्गसन्धिः (लोपः)।
(ख) समासः	गुडाकेश	गुडाकायाः निद्रायाः ईशः गुडाकेशः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।	
	सर्वभूताशयस्थितः	सर्वभूतानाम् आशयः सर्वभूताशयः - षष्ठीतत्पुरुषः।	
		सर्वभूताशये स्थितः सर्वभूताशयस्थितः - सप्तमीतत्पुरुषः।	
(ग) कृदन्तः	भूतानाम्	भू (भू - सत्तायाम्) + क्त (कर्तरि), तेषाम्।	

भावस्पष्टीकरणम् -

अहम् अस्मि ।	
कः अहम् अस्मि ?	**आत्मा** अहम् अस्मि ।
कीदृशः आत्मा अहम् अस्मि ?	**सर्वभूताशयस्थितः** आत्मा अहम् अस्मि ।
सर्वभूताशयस्थितः आत्मा अहं **पुनश्च कीदृशः** अस्मि ?	सर्वभूताशयस्थितः आत्मा अहम् **आदिः च** अस्मि ।
सर्वभूताशयस्थितः आत्मा अहम् आदिः च **पुनश्च कीदृशम्** अस्मि ?	सर्वभूताशयस्थितः आत्मा अहम् आदिः च **मध्यं च** अस्मि ।
सर्वभूताशयस्थितः आत्मा अहम् आदिः च मध्यं च **पुनश्च कीदृशः** अस्मि ?	सर्वभूताशयस्थितः आत्मा अहम् आदिः च मध्यं च **अन्तः च** अहम् एव अस्मि ।
सर्वभूताशयस्थितः आत्मा अहं **केषाम्** आदिः च मध्यं च अन्तः च अहम् एव अस्मि ?	सर्वभूताशयस्थितः आत्मा अहं **भूतानाम्** आदिः च मध्यं च अन्तः च अहम् एव अस्मि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**गुडाकेश !**

तात्पर्यम् - अर्जुन ! सर्वप्राणिहृदयस्थितः प्रत्यगात्मा अहं प्राणिनां मूलं मध्यभागः अवसानं च अस्मि ।

आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान् ।
मरीचिर्मरुतामस्मि नक्षत्राणामहं शशी ॥१०.२१॥

पदच्छेदः - आदित्यानाम्, अहम्, विष्णुः, ज्योतिषाम्, रविः, अंशुमान् ।
मरीचिः, मरुताम्, अस्मि, नक्षत्राणाम्, अहम्, शशी ॥

अन्वयः - अहम् आदित्यानां विष्णुः, ज्योतिषाम् अंशुमान् रविः, मरुतां मरीचिः अस्मि नक्षत्राणाम् अहं शशी ।

पदार्थः - अहम् = अहम्, आदित्यानाम् = सूर्याणाम्, विष्णुः = विष्णुः, ज्योतिषाम् = प्रकाशयितॄणाम्, अंशुमान् = रश्मिवान्, रविः = सूर्यः, मरुताम् = मरुद्देवतानाम्, मरीचिः = मरीचिनामकः, अहम् अस्मि = अहं भवामि, नक्षत्राणाम् = नक्षत्राणाम्, अहं शशी = अहं चन्द्रः अस्मि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	आदित्यानाम्	अ. पुं. ष. बहु.

विष्णुः	उ. पुं. प्र. एक. (विशेषणम्)	ज्योतिषाम्	ज्योतिस्- सका. नपुं. ष. बहु.
अंशुमान्	अंशुमत्- त. पुं. प्र. एक. (विशेषणम्)	रविः	इ. पुं. प्र. एक. (विशेष्यम्)
मरुताम्	मरुत्- त. पुं. ष. बहु.	मरीचिः	इ. पुं. प्र. एक. (विशेषणम्)
अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.	नक्षत्राणाम्	अ. नपुं. ष. बहु.
शशी	शशिन्- न. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	विष्णुर्ज्योतिषाम्	विष्णुः + ज्योतिषाम्	विसर्गसन्धिः (रेफः)।
	रविरंशुमान्	रविः + अंशुमान्	विसर्गसन्धिः (रेफः)।
(ख) तद्धितान्तः	आदित्यानाम्	अदिति + ण्य, तेषाम्, अदितेः अपत्यं पुमान्।	
	अंशुमान्	अंशु + मतुप् अंशवः अस्य अस्मिन् वा सन्ति।	
	शशी	शश + इनि (मतुबर्थे) शशः अस्य अस्ति इति।	

भावस्पष्टीकरणम् -

अस्मि।	
कः अस्मि ?	**अहं विष्णुः** अस्मि।
अहं **केषां** विष्णुः अस्मि ?	अहम् **आदित्यानां** विष्णुः अस्मि।
अहम् आदित्यानां विष्णुः, **पुनश्च कः** अस्मि ?	अहम् आदित्यानां विष्णुः, **रविः** अस्मि।
अहम् आदित्यानां विष्णुः, **कीदृशः** रविः अस्मि ?	अहम् आदित्यानां विष्णुः, **अंशुमान्** रविः अस्मि।
अहम् आदित्यानां विष्णुः, **केषाम्** अंशुमान् रविः अस्मि ?	अहम् आदित्यानां विष्णुः, **ज्योतिषाम्** अंशुमान् रविः अस्मि।
अहम् आदित्यानां विष्णुः, ज्योतिषाम् अंशुमान् रविः, **पुनश्च कः** अस्मि ?	अहम् आदित्यानां विष्णुः, ज्योतिषाम् अंशुमान् रविः, **मरीचिः** अस्मि।
अहम् आदित्यानां विष्णुः, ज्योतिषाम् अंशुमान् रविः, **केषां** मरीचिः अस्मि ?	अहम् आदित्यानां विष्णुः, ज्योतिषाम् अंशुमान् रविः, **मरुतां** मरीचिः अस्मि।
अहम् आदित्यानां विष्णुः, ज्योतिषाम् अंशुमान् रविः, मरुतां मरीचिः, **पुनश्च कः** अस्मि ?	अहम् आदित्यानां विष्णुः, ज्योतिषाम् अंशुमान् रविः, मरुतां मरीचिः, **शशी** अस्मि।
अहम् आदित्यानां विष्णुः, ज्योतिषाम् अंशुमान् रविः, मरुतां मरीचिः, **केषां** शशी अस्मि ?	अहम् आदित्यानां विष्णुः, ज्योतिषाम् अंशुमान् रविः, मरुतां मरीचिः, **नक्षत्राणां** शशी अस्मि।

तात्पर्यम् - अहं द्वादशादित्यानां मध्ये विष्णुनामकः आदित्यः अस्मि। प्रकाशयितॄणां मध्ये रश्मिवान् सूर्यः अस्मि। मरुद्देवतानां मध्ये मरीचिः अस्मि। नक्षत्राणां मध्ये चन्द्रः अस्मि।

वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।
इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना॥१०.२२॥

पदच्छेदः - वेदानाम्, सामवेदः, अस्मि, देवानाम्, अस्मि, वासवः।
इन्द्रियाणाम्, मनः, च, अस्मि, भूतानाम्, अस्मि, चेतना॥

अन्वयः - वेदानां सामवेदः अस्मि। देवानां वासवः अस्मि। इन्द्रियाणां मनः च अस्मि। भूतानां चेतना अस्मि।

पदार्थः - वेदानाम् = चतुर्णां वेदानाम्, सामवेदः अस्मि = सामवेदः अस्मि, देवानाम् = सुराणाम्, वासवः अस्मि = इन्द्रः अस्मि, इन्द्रियाणाम् = इन्द्रियाणाम्, मनः च अस्मि = चित्तं च अस्मि। भूतानाम् = प्राणिनाम्, चेतना अस्मि = चैतन्यम् अस्मि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
वेदानाम्	अ. पुं. ष. बहु.	सामवेदः	अ. पुं. प्र. एक. (विशेषणम्)
अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.	देवानाम्	अ. पुं. ष. बहु.
वासवः	अ. पुं. प्र. एक. (विशेषणम्)	इन्द्रियाणाम्	अ. नपुं. ष. बहु.
मनः	मनस्- सका. नपुं. प्र. एक.	च	अव्ययम्
भूतानाम्	अ. नपुं. ष. बहु.	चेतना	आ. स्त्री. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	सामवेदोऽस्मि	सामवेदः + अस्मि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च।
	मनश्च	मनः + च	विसर्गसन्धिः(सकारः) श्चुत्वम्।
	चास्मि	च + अस्मि	सवर्णदीर्घसन्धिः।
(ख) कृदन्तः	भूतानाम्	भू (भू - सत्तायाम्) + क्त (कर्तरि), तेषाम्।	
	चेतना	चित् (चिती - संज्ञाने) + ल्युट्।	
(ग) तद्धितान्तः	वासवः	वसु + अण् (अपत्यार्थे) वसोः अपत्यं पुमान्।	

भावस्पष्टीकरणम् -

अस्मि ।	
कः अस्मि ?	**सामवेदः** अस्मि ।
केषां सामवेदः अस्मि ?	**वेदानां** सामवेदः अस्मि ।
वेदानां सामवेदः, **पुनश्च कः** अस्मि ?	वेदानां सामवेदः, **वासवः** अस्मि ।
वेदानां सामवेदः, **केषां** वासवः अस्मि ?	वेदानां सामवेदः, **देवानां** वासवः अस्मि ।
वेदानां सामवेदः, देवानां वासवः, **पुनश्च किम्** अस्मि ?	वेदानां सामवेदः, देवानां वासवः, **मनः च** अस्मि ।
वेदानां सामवेदः, देवानां वासवः, **केषां** मनः च अस्मि ?	वेदानां सामवेदः, देवानां वासवः, **इन्द्रियाणां** मनः च अस्मि ।
वेदानां सामवेदः, देवानां वासवः, इन्द्रियाणां मनः च **पुनश्च का** अस्मि ?	वेदानां सामवेदः, देवानां वासवः, इन्द्रियाणां मनः च, **चेतना** अस्मि ।
वेदानां सामवेदः, देवानां वासवः, इन्द्रियाणां मनः च, **केषां** चेतना अस्मि ?	वेदानां सामवेदः, देवानां वासवः, इन्द्रियाणां मनः च, **भूतानां** चेतना अस्मि ।

तात्पर्यम् - चतुर्षु वेदेषु अहं सामवेदः अस्मि । सुरेषु इन्द्रः अस्मि । इन्द्रियेषु मनः अस्मि । प्राणिषु चैतन्यम् अस्मि ।

रुद्राणां शङ्करश्चास्मि वित्तेशो यक्षरक्षसाम् ।
वसूनां पावकश्चास्मि मेरुः शिखरिणामहम् ॥१०.२३॥

पदच्छेदः - रुद्राणाम्, शङ्करः, च, अस्मि, वित्तेशः, यक्षरक्षसाम् ।
वसूनाम्, पावकः, च, अस्मि, मेरुः, शिखरिणाम्, अहम् ॥

अन्वयः - रुद्राणां शङ्करः च अस्मि । यक्षरक्षसां वित्तेशः, वसूनां पावकः, शिखरिणां मेरुः च अहम् अस्मि ।

पदार्थः - रुद्राणाम् = रुद्राणाम्, शङ्करः च अस्मि = शङ्करः अस्मि, यक्षरक्षसाम् = यक्षाणां राक्षसानां च, वित्तेशः = कुबेरः, वसूनाम् = वसूनाम्, पावकः = अग्निः, शिखरिणाम् = पर्वतानाम्, मेरुः च अहम् अस्मि = मेरुपर्वतः अहम् अस्मि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
रुद्राणाम्	अ. पुं. ष. बहु.	शङ्करः	अ. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	अस्मि	अस् (अस भुवि) पर. कर्तरि लट्. उपु. एक.

यक्षरक्षसाम्	यक्षरक्षस्- सका. नपुं. ष. बहु.	वित्तेशः	अ. पुं. प्र. एक. (विशेषणम्)
वसूनाम्	उ. पुं. ष. बहु.	पावकः	अ. पुं. प्र. एक. (विशेषणम्)
शिखरिणाम्	शिखरिन्- न. पुं. ष. बहु.	मेरुः	उ. पुं. प्र. एक. (विशेषणम्)
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः	शङ्करश्च	शङ्करः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	चास्मि	च + अस्मि	सवर्णदीर्घसन्धिः ।
	वित्तेशो यक्षरक्षसाम्	वित्तेशः + यक्षरक्षसाम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	पावकश्च	पावकः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
(ख) समासः	वित्तेशः	वित्तानाम् ईशः वित्तेशः - षष्ठीतत्पुरुषः ।	
	यक्षरक्षसाम्	यक्षाश्च रक्षांसि च यक्षरक्षांसि, तेषाम् - द्वन्द्वः ।	
(ग) कृदन्तः	पावकः	पू (पूञ् - पवने) + ण्वुल् ।	
(घ) तद्धितान्तः	शिखरिणाम्	शिखर + इनि (मतुबर्थे), तेषाम्, शिखरः अस्य अस्मिन् वा अस्ति ।	

भावस्पष्टीकरणम् -

अस्मि ।	
कः अस्मि ?	**शङ्करः** अस्मि ।
केषां शङ्करः अस्मि ?	**रुद्राणां** शङ्करः अस्मि ।
रुद्राणां शङ्करः, **पुनश्च कः** अस्मि ?	रुद्राणां शङ्करः, **वित्तेशः** अस्मि ।
रुद्राणां शङ्करः, **केषां** वित्तेशः अस्मि ?	रुद्राणां शङ्करः, **यक्षरक्षसां** वित्तेशः अस्मि ।
रुद्राणां शङ्करः, यक्षरक्षसां वित्तेशः, **पुनश्च कः** अस्मि ?	रुद्राणां शङ्करः, यक्षरक्षसां वित्तेशः, **पावकः** अस्मि ।
रुद्राणां शङ्करः, यक्षरक्षसां वित्तेशः, **केषां** पावकः अस्मि ?	रुद्राणां शङ्करः, यक्षरक्षसां वित्तेशः, **वसूनां** पावकः, अस्मि ।
रुद्राणां शङ्करः, यक्षरक्षसां वित्तेशः, वसूनां पावकः, **पुनश्च कः** अस्मि ?	रुद्राणां शङ्करः, यक्षरक्षसां वित्तेशः, वसूनां पावकः, **मेरुः च** अस्मि ।
रुद्राणां शङ्करः, यक्षरक्षसां वित्तेशः, वसूनां पावकः, **केषां** मेरुः च अस्मि ?	रुद्राणां शङ्करः, यक्षरक्षसां वित्तेशः, वसूनां पावकः, **शिखरिणां** मेरुः च अहम् अस्मि ।

तात्पर्यम् - एकादशसु रुद्रेषु अहं शङ्करः अस्मि, यक्षाः राक्षसाश्च ये सन्ति तेषु कुबेरः अस्मि । विख्यातेषु अष्टसु वसुषु अग्निः अस्मि । पर्वतेषु मेरुपर्वतः अस्मि ।

पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्।
सेनानीनामहं स्कन्दः सरसामस्मि सागरः ॥१०.२४॥

पदच्छेदः - पुरोधसाम्, च, मुख्यम्, माम्, विद्धि, पार्थ, बृहस्पतिम्।
सेनानीनाम्, अहम्, स्कन्दः, सरसाम्, अस्मि, सागरः ॥

अन्वयः - पार्थ ! पुरोधसां मुख्यं बृहस्पतिं मां विद्धि। सेनानीनां स्कन्दः अहम्। सरसां सागरः अस्मि।

पदार्थः - पार्थ = अर्जुन ! पुरोधसाम् = पुरोहितानाम्, मुख्यम् = प्रधानम्, बृहस्पतिम् = गुरुम्, मां विद्धि = मां जानीहि,। सेनानीनाम् = सेनापतीनाम्, स्कन्दः अहम् = कार्त्तिकेयः अहम्, सरसाम् = तटाकानाम्, सागरः = समुद्रः, अस्मि = भवामि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	पुरोधसाम्	पुरोधस्- सका. पुं. ष. बहु.
मुख्यम्	अ. पुं. द्वि. एक. (विशेषणम्)	बृहस्पतिम्	इ. पुं. द्वि. एक. (विशेष्यम्)
माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)	विद्धि	विद् (विद - ज्ञाने) पर. कर्तरि लोट्. मपु. एक.
सेनानीनाम् (सेनान्याम्)	ई. पुं. ष. बहु.	स्कन्दः	अ. पु. प्र. एक. (विशेषणम्)
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	सरसाम्	सरस्- सका. नपुं. ष. बहु.
सागरः	अ. पु. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) तद्धितान्तः पार्थ — पार्थ + अण् (अपत्यार्थे) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ।
सागरः — सगर + अण् (इदमर्थे) सगरस्य राज्ञः अयम् इति।

भावस्पष्टीकरणम् -

विद्धि।	
कं विद्धि ?	**मां** विद्धि।
केषां मां विद्धि ?	**पुरोधसां** मां विद्धि।
पुरोधसां **कं** मां विद्धि ?	पुरोधसां **बृहस्पतिं** मां विद्धि।
पुरोधसां **कीदृशं** बृहस्पतिं मां विद्धि ?	पुरोधसां **मुख्यं** बृहस्पतिं मां विद्धि।

पुरोधसां मुख्यं बृहस्पतिं मां विद्धि । **पुनश्च कः अस्मि** ?	पुरोधसां मुख्यं बृहस्पतिं मां विद्धि । **स्कन्दः अहम् अस्मि** ।
पुरोधसां मुख्यं बृहस्पतिं मां विद्धि । **केषां** स्कन्दः अहम् अस्मि ?	पुरोधसां मुख्यं बृहस्पतिं मां विद्धि । **सेनानीनां** स्कन्दः अहम् अस्मि ।
पुरोधसां मुख्यं बृहस्पतिं मां विद्धि । सेनानीनां स्कन्दः अहं **पुनश्च कः** अस्मि ?	पुरोधसां मुख्यं बृहस्पतिं मां विद्धि । सेनानीनां स्कन्दः अहं **सागरः** च अस्मि ।
पुरोधसां मुख्यं बृहस्पतिं मां विद्धि । सेनानीनां स्कन्दः अहं **केषां** सागरः च अस्मि ?	पुरोधसां मुख्यं बृहस्पतिं मां विद्धि । सेनानीनां स्कन्दः अहं **सरसां** सागरः च अस्मि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - अर्जुन ! पुरोहितानां मुख्यः देवगुरुः बृहस्पतिः अहमेव इति जानीहि । सेनापतयः ये सन्ति तेषु अहं देवसेनापतिः स्कन्दः अस्मि । देवखातानि सरांसि यानि सन्ति तेषु अहं सागरः अस्मि ।

महर्षीणां भृगुरहं गिरामस्म्येकमक्षरम् ।
यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः ॥१०.२५॥

पदच्छेदः - महर्षीणाम्, भृगुः, अहम्, गिराम्, अस्मि, एकम्, अक्षरम् ।
यज्ञानाम्, जपयज्ञः, अस्मि, स्थावराणाम्, हिमालयः ॥

अन्वयः - महर्षीणाम् अहं भृगुः । गिराम् एकम् अक्षरम् अस्मि । यज्ञानां जपयज्ञः अस्मि । स्थावराणां हिमालयः ।

पदार्थः - महर्षीणाम् = महामुनीनाम्, अहं भृगुः = अहं भृगुमहर्षिः, गिराम् = वाचाम्, एकम् अक्षरम् अस्मि = ओंकारः अस्मि, यज्ञानाम् = यागेषु, जपयज्ञः अस्मि = जपयागः अस्मि, स्थावराणाम् = स्थितिमताम्, हिमालयः = हिमवान् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महर्षीणाम्	इ. पुं. ष. बहु.	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
भृगुः	उ. पुं. प्र. एक. (विशेषणम्)	गिराम्	गिर्- र. स्त्री. ष. बहु.
एकम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)	अक्षरम्	अ. नपुं. प्र. एक. (विशेष्यम्)
अस्मि	अस् (अस भुवि) पर. कर्तरि लट्. उपु. एक.	यज्ञानाम्	अ. पुं. ष. बहु.

जपयज्ञः	अ. पुं. प्र. एक. (विशेषणम्)	स्थावराणाम्	अ. पुं. ष. बहु.
हिमालयः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	भृगुरहम्	भृगुः + अहम्	विसर्गसन्धिः (रेफः) ।
	अस्म्येकम्	अस्मि + एकम्	यण्सन्धिः ।
	जपयज्ञोऽस्मि	जपयज्ञः + अस्मि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
(ख) समासः	महर्षीणाम्	महान्तश्चामी ऋषयः महर्षयः, तेषाम् - कर्मधारयः ।	
	अक्षरम्	न क्षरम् अक्षरम् - नञ्तत्पुरुषः ।	
	जपयज्ञः	जपः इति यज्ञः जपयज्ञः - कर्मधारयः ।	
	हिमालयः	हिमस्य आलयः हिमालयः - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	गिराम्	गॄ (गॄ - निगरणे) + क्विप्, तासाम् ।	
	क्षरम्	क्षर् (क्षर - सञ्चलने) + अच् ।	
	जपः	जप् (जप - व्यक्तायां वाचि) + अप्, (भावे) जप्यते अनेन इति) ।	

भावस्पष्टीकरणम् -

अस्मि ।	
कः अस्मि ?	**अहं भृगुः** अस्मि ।
केषाम् अहं भृगुः अस्मि ?	**महर्षीणाम्** अहं भृगुः अस्मि ।
महर्षीणाम् अहं भृगुः, **पुनः किम्** अस्मि ?	महर्षीणाम् अहं भृगुः, **अक्षरम्** अस्मि ।
महर्षीणाम् अहं भृगुः, **किम्** अक्षरम् अस्मि ?	महर्षीणाम् अहं भृगुः, **एकम्** अक्षरम् अस्मि ।
महर्षीणाम् अहं भृगुः, **कासाम्** एकम् अक्षरम् अस्मि ?	महर्षीणाम् अहं भृगुः, **गिराम्** एकम् अक्षरम् अस्मि ।
महर्षीणाम् अहं भृगुः, गिराम् एकम् अक्षरम्, **पुनश्च कः** अस्मि ?	महर्षीणाम् अहं भृगुः, गिराम् एकम् अक्षरम्, **जपयज्ञः** अस्मि ।
महर्षीणाम् अहं भृगुः, गिराम् एकम् अक्षरम्, **केषां** जपयज्ञः अस्मि ?	महर्षीणाम् अहं भृगुः, गिराम् एकम् अक्षरम्, **यज्ञानां** जपयज्ञः, अस्मि ।
महर्षीणाम् अहं भृगुः, गिराम् एकम् अक्षरम्, यज्ञानां जपयज्ञः, **पुनश्च कः** अस्मि ?	महर्षीणाम् अहम् भृगुः, गिराम् एकम् अक्षरम्, यज्ञानां जपयज्ञः, **हिमालयः च** अस्मि ।
महर्षीणाम् अहं भृगुः, गिराम् एकम् अक्षरम्, यज्ञानां जपयज्ञः, **केषां** हिमालयः अस्मि ?	महर्षीणाम् अहं भृगुः, गिराम् एकम् अक्षरम्, यज्ञानां जपयज्ञः, **स्थावराणां** हिमालयः अस्मि ।

तात्पर्यम् - महर्षिषु अहं भृगुमहर्षिः। शब्दरूपासु गीर्षु ओंकारः अस्मि। यज्ञेषु जपयज्ञः अस्मि। स्थितियुक्तेषु अहं हिमालयपर्वतः अस्मि।

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः।
गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः ॥१०.२६॥

पदच्छेदः - अश्वत्थः, सर्ववृक्षाणाम्, देवर्षीणाम्, च, नारदः।
गन्धर्वाणाम्, चित्ररथः, सिद्धानाम्, कपिलः, मुनिः ॥

अन्वयः - सर्ववृक्षाणाम् अश्वत्थः देवर्षीणां च नारदः गन्धर्वाणां चित्ररथः सिद्धानां कपिलः मुनिः (अस्मि)।

पदार्थः - सर्ववृक्षाणाम् = सकलतरूणाम्, अश्वत्थः = अश्वत्थवृक्षः, देवर्षीणां च = सुरमुनीनां च, नारदः = नारदमहर्षिः, गन्धर्वाणाम् = गन्धर्वाणाम्, चित्ररथः = तन्नामकः प्रसिद्धगन्धर्वः, सिद्धानाम् = जन्मतः ज्ञानादिशालिनाम्, कपिलः मुनिः = कपिलनामधेयः मुनिः (अस्मि)।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्ववृक्षाणाम्	अ. पुं. ष. बहु.	अश्वत्थः	अ. पुं. प्र. एक. (विशेषणम्)
देवर्षीणाम्	इ. पुं. ष. बहु.	च	अव्ययम्
नारदः	अ. पुं. प्र. एक. (विशेषणम्)	गन्धर्वाणाम्	अ. पुं. ष. बहु.
चित्ररथः	अ. पुं. प्र. एक. (विशेषणम्)	सिद्धानाम्	अ. पुं. ष. बहु.
कपिलः	अ. पुं. प्र. एक. (विशेष्यम्)	मुनिः	इ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	कपिलो मुनिः	कपिलः + मुनिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	सर्ववृक्षाणाम्	सर्वे वृक्षाः सर्ववृक्षाः, तेषाम् - कर्मधारयः।	
	देवर्षीणाम्	देवानाम् ऋषयः देवर्षयः, तेषाम् - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	सिद्धानाम्	सिध् (षिधु - संराद्धौ) + क्त (कर्तरि), तेषाम्।	

भावस्पष्टीकरणम् -

(अस्मि)।	
कः (अस्मि) ?	अश्वत्थः अस्मि।
केषाम् अश्वत्थः अस्मि ?	सर्ववृक्षाणाम् अश्वत्थः अस्मि।

सर्ववृक्षाणाम् अश्वत्थः, **पुनश्च कः** अस्मि ?	सर्ववृक्षाणाम् अश्वत्थः, **नारदः** अस्मि ।
सर्ववृक्षाणाम् अश्वत्थः, **केषां च** नारदः अस्मि ?	सर्ववृक्षाणाम् अश्वत्थः, **देवर्षीणां च** नारदः अस्मि ।
सर्ववृक्षाणाम् अश्वत्थः, देवर्षीणां च नारदः, **पुनश्च कः** अस्मि ?	सर्ववृक्षाणाम् अश्वत्थः, देवर्षीणां च नारदः, **चित्ररथः** अस्मि ।
सर्ववृक्षाणाम् अश्वत्थः, देवर्षीणां च नारदः, **केषां** चित्ररथः अस्मि ?	सर्ववृक्षाणाम् अश्वत्थः, देवर्षीणां च नारदः, **गन्धर्वाणां** चित्ररथः अस्मि ।
सर्ववृक्षाणाम् अश्वत्थः, देवर्षीणां च नारदः, गन्धर्वाणां चित्ररथः, **पुनश्च कः** अस्मि ?	सर्ववृक्षाणाम् अश्वत्थः, देवर्षीणां च नारदः, गन्धर्वाणां चित्ररथः, **मुनिः** अस्मि ।
सर्ववृक्षाणाम् अश्वत्थः, देवर्षीणां च नारदः, गन्धर्वाणां चित्ररथः, **कः** मुनिः अस्मि ?	सर्ववृक्षाणाम् अश्वत्थः, देवर्षीणां च नारदः, गन्धर्वाणां चित्ररथः, **कपिलः** मुनिः अस्मि ।
सर्ववृक्षाणाम् अश्वत्थः, देवर्षीणां च नारदः, गन्धर्वाणां चित्ररथः **केषां** कपिलः मुनिः अस्मि ?	सर्ववृक्षाणाम् अश्वत्थः, देवर्षीणां च नारदः, गन्धर्वाणां चित्ररथः, **सिद्धानां** कपिलः मुनिः अस्मि ।

तात्पर्यम् - सर्वेषु वृक्षेषु अहम् अश्वत्थः अस्मि । देवमुनिषु अहं नारदः । गन्धर्वेषु चित्ररथः अस्मि । जन्मना एव ज्ञानैश्वर्यादिकं प्राप्तवत्सु सिद्धेषु अहं कपिलमुनिः अस्मि ।

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम् ।
ऐरावतं गजेन्द्राणां नराणां च नराधिपम् ॥१०.२७॥

पदच्छेदः - उच्चैःश्रवसम्, अश्वानाम्, विद्धि, माम्, अमृतोद्भवम् ।
ऐरावतम्, गजेन्द्राणाम्, नराणाम्, च, नराधिपम् ॥

अन्वयः - अश्वानाम् अमृतोद्भवम् उच्चैःश्रवसं गजेन्द्राणाम् ऐरावतं नराणां नराधिपं च मां विद्धि ।

पदार्थः - अश्वानाम् = हयानाम्, अमृतोद्भवम् = अमृतमथनकालसम्भवम्, उच्चैःश्रवसम् = तन्नामकम् अश्वम्, गजेन्द्राणाम् = गजाधिपतीनाम्, ऐरावतम् = इन्द्रवाहनम्, नराणाम् = मनुष्याणाम्, नराधिपं च = राजानम् अपि, मां विद्धि = मां जानीहि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अश्वानाम्	अ. पुं. ष. बहु.	अमृतोद्भवम्	अ. पुं. द्वि. एक. (विशेषणम्)
उच्चैःश्रवसम्	उच्चैःश्रवस्- सका. पुं. द्वि. एक. (विशेष्यम्)	गजेन्द्राणाम्	अ. पुं. ष. बहु.

ऐरावतम्	अ. पुं. द्वि. एक. (विशेषणम्)	नराणाम्	अ. पुं. ष. बहु.
नराधिपम्	अ. पुं. द्वि. एक. (विशेषणम्)	च	अव्ययम्
माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)	विद्धि	विद् (विद- ज्ञाने) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) समासः	अमृतोद्भवम्	अमृतात् उद्भवः यस्य सः अमृतोद्भवः, तम् - बहुव्रीहिः ।
	गजेन्द्राणाम्	गजेषु इन्द्राः गजेन्द्राः, तेषाम् - सप्तमीतत्पुरुषः ।
	नराधिपम्	नराणाम् अधिपः नराधिपः, तम् - षष्ठीतत्पुरुषः ।
(ख) कृदन्तः	उद्भवः	उद् + भू (भू - सत्तायाम्) + अप् (भावे) ।
(ग) तद्धितान्तः	ऐरावतः	इरावत् + अण् (तत्र भवः इत्यर्थे) । समुद्रे जातः इत्यर्थः ।

भावस्पष्टीकरणम् -

विद्धि ।	
कं विद्धि ?	**मां** विद्धि ।
केषां मां विद्धि ?	**अश्वानां** मां विद्धि ।
अश्वानां **कं** मां विद्धि ?	अश्वानाम् **उच्चैःश्रवसं** मां विद्धि ।
अश्वानां **कीदृशम्** उच्चैःश्रवसं मां विद्धि ?	अश्वानाम् **अमृतोद्भवम्** उच्चैःश्रवसं मां विद्धि ?
अश्वानाम् अमृतोद्भवम् उच्चैःश्रवसं, **पुनश्च कं** मां विद्धि ?	अश्वानाम् अमृतोद्भवम् उच्चैःश्रवसम्, **ऐरावतं** मां विद्धि ।
अश्वानाम् अमृतोद्भवम् उच्चैःश्रवसम्, **केषाम्** ऐरावतं मां विद्धि ?	अश्वानाम् अमृतोद्भवम् उच्चैःश्रवसम्, **गजेन्द्राणाम्** ऐरावतं मां विद्धि ।
अश्वानाम् अमृतोद्भवम् उच्चैःश्रवसम्, गजेन्द्राणाम् ऐरावतम्, **पुनश्च कं** मां विद्धि ?	अश्वानाम् अमृतोद्भवम् उच्चैःश्रवसम्, गजेन्द्राणाम् ऐरावतम्, **नराधिपं च** मां विद्धि ।
अश्वानाम् अमृतोद्भवम् उच्चैःश्रवसम्, गजेन्द्राणाम् ऐरावतम्, **केषां** नराधिपं च मां विद्धि ?	अश्वानाम् अमृतोद्भवम् उच्चैःश्रवसम्, गजेन्द्राणाम् ऐरावतम्, **नराणां** नराधिपं च मां विद्धि ।

तात्पर्यम् - अमृतस्य हेतोः देवासुरैः यदा समुद्रमथनं कृतं तदा उच्चैःश्रवाः नाम सर्वोत्कृष्टः अश्वः उत्पन्नः । अश्वेषु मां तं जानीहि । गजश्रेष्ठेषु इन्द्रवाहनभूतम् ऐरावतं मनुष्येषु राजानं च मां जानीहि ।

आयुधानामहं वज्रं धेनूनामस्मि कामधुक्।
प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥१०.२८॥

पदच्छेदः - आयुधानाम्, अहम्, वज्रम्, धेनूनाम्, अस्मि, कामधुक्।
प्रजनः, च, अस्मि, कन्दर्पः, सर्पाणाम्, अस्मि, वासुकिः ॥

अन्वयः - अहम् आयुधानां वज्रं धेनूनां कामधुक् प्रजनः कन्दर्पः सर्पाणां वासुकिः च अस्मि।

पदार्थः - अहम् = अहम्, आयुधानाम् = शस्त्राणाम्, वज्रम् = वज्रायुधम्, धेनूनाम् = गवाम्, कामधुक् = कामधेनुः, प्रजनः = अपत्योत्पत्तिहेतुः, कन्दर्पः = कन्दर्पः, सर्पाणाम् = विषसहितानाम् उरगाणाम्, वासुकिः च अस्मि = वासुकिनामकः सर्पः अस्मि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	आयुधानाम्	अ. नपुं. ष. बहु.
वज्रम्	अ. नपुं. प्र. एक. (विशेषणम्)	धेनूनाम्	उ. स्त्री. ष. बहु.
कामधुक्	कामदुह्- ह. पुं. प्र. एक. (विशेषणम्)	प्रजनः	अ. पुं. प्र. एक.
कन्दर्पः	अ. पुं. प्र. एक. (विशेषणम्)	सर्पाणाम्	अ. पुं. ष. बहु.
वासुकिः	इ. पुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक		

व्याकरणम् -

(क) सन्धिः	प्रजनश्च	प्रजनः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	चास्मि	च + अस्मि	सवर्णदीर्घसन्धिः।
(ख) समासः	कामधुक्	कामान् दोग्धि इति कामधुक् - कर्तरि क्विप् उपपदसमासश्च।	
(ग) कृदन्तः	कन्दर्पः	कम् + दृप् (दृप - हर्षमोहनयोः) + अच्। कम्, सुखं तत्र दृप्यति इत्यर्थः।	
	सर्पाणाम्	सृप् (सृप्लृ - गतौ) + घञ्, तेषाम्।	
(घ) तद्धितान्तः	वासुकिः	वसुक + इञ् (अपत्यार्थे)। वसुकस्य अपत्यं पुमान्।	

भावस्पष्टीकरणम् -

अस्मि।	
किम् अस्मि ?	**वज्रम् अस्मि।**

केषां वज्रम् अस्मि ?	अहम् **आयुधानां** वज्रम् अस्मि ।
अहम् आयुधानां वज्रं, **पुनश्च कः** अस्मि ?	अहम् आयुधानां वज्रं, **कामधुक्** अस्मि ।
अहम् आयुधानां वज्रं, **कासां** कामधुक् अस्मि ?	अहम् आयुधानां वज्रं, **धेनूनां** कामधुक् अस्मि ।
अहम् आयुधानां वज्रं, धेनूनां कामधुक्, **पुनश्च कः** अस्मि ?	अहम् आयुधानां वज्रं, धेनूनां कामधुक्, **वासुकिः च** अस्मि ।
अहम् आयुधानां वज्रं, धेनूनां कामधुक्, **केषां** वासुकिः च अस्मि ?	अहम् आयुधानां वज्रं, धेनूनां कामधुक्, **सर्पाणां** वासुकिः च अस्मि ।

तात्पर्यम् - शस्त्रेषु अहं दधीचेः अस्थ्ना निर्मितं वज्रायुधम् अस्मि । धेनुषु कामधेनुः अस्मि । जनयिता मन्मथः अपि अस्मि । सर्पेषु वासुकिनामकः सर्पराजः अस्मि ।

अनन्तश्चास्मि नागानां वरुणो यादसामहम् ।
पितॄणामर्यमा चास्मि यमः संयमतामहम् ॥१०.२९॥

पदच्छेदः - अनन्तः, च, अस्मि, नागानाम्, वरुणः, यादसाम्, अहम् ।
पितॄणाम्, अर्यमा, च, अस्मि, यमः, संयमताम्, अहम् ॥

अन्वयः - नागानां च अनन्तः अस्मि । यादसाम् अहं वरुणः पितॄणां च अहम् अर्यमा अस्मि । संयमतां यमः अहम् ।

पदार्थः - नागानां च = विषरहितानाम् उरगाणाम्, अनन्तः अस्मि = अनन्तः अस्मि, यादसाम् = जलचराणाम्, अहं वरुणः = अहं वरुणदेवः, पितॄणां च = पितृदेवतानाम्, अहम् अर्यमा अस्मि = अर्यमा नाम पितृराजः अस्मि, संयमताम् = संयमवताम्, यमः अहम् = अन्तकः अहम् अस्मि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
नागानाम्	अ. पुं. ष. बहु.	च	अव्ययम्
अनन्तः	अ. पुं. प्र. एक. (विशेषणम्)	अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.
यादसाम्	यादस्- सका. नपुं. ष. बहु.	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
वरुणः	अ. पुं. प्र. एक. (विशेषणम्)	पितॄणाम्	ऋ. पुं. ष. बहु.
अर्यमा	अर्यमन्- न. पुं. प्र. एक. (विशेषणम्)	संयमताम्	संयमत्- त. पुं. ष. बहु.
यमः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	अनन्तश्च	अनन्तः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	चास्मि	च + अस्मि	सवर्णदीर्घसन्धिः।
(ख) समासः	अनन्तः	नास्ति अन्तः विनाशो यस्य सः अनन्तः - बहुव्रीहिः।	
(ग) कृदन्तः	पितॄणाम्	पा + तृच्। पाति रक्षति इति पिता, तेषाम्। (निपातनात् साधुः।)	
	संयमताम्	सम् + यम् (यम - उपरमे) + शतृ (कर्तरि), तेषाम्।	
(घ) तद्धितान्तः	नागानाम्	नग + अण्, तेषाम्, नगे भवाः।	

भावस्पष्टीकरणम् -

अस्मि।	
कः अस्मि ?	**अनन्तः** अस्मि।
केषाम् अनन्तः अस्मि ?	**नागानाम्** अनन्तः अस्मि।
नागानाम् अनन्तः **पुनश्च कः** अस्मि ?	नागानाम् अनन्तः, **वरुणः** अस्मि।
नागानाम् अनन्तः, **केषां** वरुणः अस्मि ?	नागानाम् अनन्तः, **यादसां** वरुणः अस्मि।
नागानाम् अनन्तः, यादसां **कः** वरुणः, अस्मि ?	नागानाम् अनन्तः, यादसाम् अहं **वरुणः** अस्मि।
नागानाम् अनन्तः, यादसाम् अहं वरुणः, **पुनश्च कः** अस्मि ?	नागानाम् अनन्तः, यादसाम् अहं वरुणः, **अर्यमा च** अस्मि।
नागानाम् अनन्तः, यादसाम् अहं वरुणः, **केषाम्** अर्यमा च अस्मि ?	नागानाम् अनन्तः, यादसाम् अहं वरुणः, **पितॄणां च** अर्यमा अस्मि।
नागानाम् अनन्तः, यादसाम् अहं वरुणः, पितॄणां च **कः** अर्यमा अस्मि ?	नागानाम् अनन्तः, यादसाम् अहं वरुणः, पितॄणां च **अहम्** अर्यमा अस्मि।
नागानाम् अनन्तः, यादसाम् अहं वरुणः, पितॄणां च अहम् अर्यमा, **पुनश्च कः** अस्मि ?	नागानाम् अनन्तः, यादसाम् अहं वरुणः, पितॄणां च अहम् अर्यमा, **यमः** अस्मि।
नागानाम् अनन्तः, यादसाम् अहं वरुणः, पितॄणां च अहम् अर्यमा, **केषां** यमः अस्मि ?	नागानाम् अनन्तः, यादसाम् अहं वरुणः, पितॄणां च अहम् अर्यमा, **संयमतां** यमः अहम् अस्मि।

तात्पर्यम् - सर्पविशेषेषु नागराजः अनन्तः अहम् अस्मि। जलचरेषु अहं तदधिपतिः वरुणः अस्मि। पितृदैवतेषु अर्यमा अस्मि। संयमनं कुर्वत्सु अन्तकः अस्मि।

प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहम्।
मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्॥१०.३०॥

पदच्छेदः - प्रह्लादः, च, अस्मि, दैत्यानाम्, कालः, कलयताम्, अहम् ।
मृगाणाम्, च, मृगेन्द्रः, अहम्, वैनतेयः, च, पक्षिणाम् ॥

अन्वयः - दैत्यानां प्रह्लादः च अस्मि । कलयताम् अहं कालः । मृगाणां च अहं मृगेन्द्रः । पक्षिणां च वैनतेयः ।

पदार्थः - दैत्यानाम् = दानवानाम्, प्रह्लादः च अस्मि = हिरण्यकशिपुपुत्रः अस्मि, कलयताम् = गणनं कुर्वताम्, अहं कालः = अहं समयः, मृगाणां च = जन्तूनाम् अपि, अहं मृगेन्द्रः = अहं सिंहः, पक्षिणाम् = खगानाम्, वैनतेयः च = गरुडः च ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
दैत्यानाम्	अ. पुं. ष. बहु.	प्रह्लादः	अ. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.
कलयताम्	कलयत्- त. पुं. ष. बहु.	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
कालः	अ. पुं. प्र. एक. (विशेषणम्)	मृगाणाम्	अ. पुं. ष. बहु.
मृगेन्द्रः	अ. पुं. प्र. एक. (विशेषणम्)	पक्षिणाम्	पक्षिन्- न. पुं. ष. बहु.
वैनतेयः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	प्रह्लादश्च	प्रह्लादः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	चास्मि	च + अस्मि	सवर्णदीर्घसन्धिः ।
(ख) समासः	मृगेन्द्रः	मृगाणाम् इन्द्रः मृगेन्द्रः - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	कालः	कल् (कल - शब्दसंख्यानयोः) + अच् (पचाद्यच्) ।	
	कलयताम्	कल् (कल - शब्दसंख्यानयोः) + शतृ (कर्तरि), तेषाम् ।	
(घ) तद्धितान्तः	दैत्यानाम्	दिति + ण्य (अपत्यार्थे), तेषाम् । दितेः अपत्यानि पुमांसः ।	
	वैनतेयः	विनता + ढक् (अपत्यार्थे, एय इत्यादेशः) विनतायाः अपत्यं पुमान् ।	
	पक्षिणाम्	पक्ष + इनि (मतुबर्थे), तेषाम्, पक्षः अस्य अस्मिन् वा अस्ति ।	

भावस्पष्टीकरणम् -

अस्मि ।	
कः अस्मि ?	**प्रह्लादः अस्मि ।**
केषां प्रह्लादः अस्मि ?	**दैत्यानां प्रह्लादः च अस्मि ।**

दैत्यानां प्रह्लादः च अस्मि। **पुनश्च कः** ?	दैत्यानां प्रह्लादः च अस्मि। **अहं कालः**।
दैत्यानां प्रह्लादः च अस्मि। **केषाम्** अहं कालः ?	दैत्यानां प्रह्लादः च अस्मि। **कलयताम्** अहं कालः।
दैत्यानां प्रह्लादः च अस्मि। कलयताम् अहं कालः। **पुनश्च कः** ?	दैत्यानां प्रह्लादः च अस्मि। कलयताम् अहं कालः। **अहं मृगेन्द्रः**।
दैत्यानां प्रह्लादः च अस्मि। कलयताम् अहं कालः। **केषाम्** अहं मृगेन्द्रः ?	दैत्यानां प्रह्लादः च अस्मि। कलयताम् अहं कालः। **मृगाणां च** अहं मृगेन्द्रः।
दैत्यानां प्रह्लादः च अस्मि कलयताम् अहं कालः, मृगाणां च अहं मृगेन्द्रः। **पुनश्च कः** ?	दैत्यानां प्रह्लादः च अस्मि कलयताम् अहं कालः। मृगाणां च अहं मृगेन्द्रः। **वैनतेयः**।
दैत्यानां प्रह्लादः च अस्मि कलयताम् अहं कालः। मृगाणां च अहं मृगेन्द्रः। **केषां** वैनतेयः।	दैत्यानां प्रह्लादः च अस्मि कलयताम् अहं कालः। मृगाणां च अहं मृगेन्द्रः। **पक्षिणां** च वैनतेयः।

तात्पर्यम् - दानवानाम् अहं प्रह्लादः अस्मि। गणनं कुर्वत्सु अहं समयः, मृगेषु मृगराजः सिंहः, पक्षिषु पक्षिराजः गरुडश्च अस्मि।

पवनः पवतामस्मि रामः शस्त्रभृतामहम्।
झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥१०.३१॥

पदच्छेदः - पवनः, पवताम्, अस्मि, रामः, शस्त्रभृताम्, अहम्।
झषाणाम्, मकरः, च, अस्मि, स्रोतसाम्, अस्मि, जाह्नवी ॥

अन्वयः - पवतां पवनः अस्मि। शस्त्रभृताम् अहं रामः। झषाणां मकरः च अस्मि। स्रोतसां जाह्नवी अस्मि।

पदार्थः - पवताम् = पावयितॄणाम्, पवनः अस्मि = वायुः अस्मि, शस्त्रभृताम् = आयुधधारिणाम्, अहं रामः = अहं दाशरथिः रामः, झषाणाम् = मत्स्यादीनाम्, मकरः च अस्मि = नक्रः च अस्मि, स्रोतसाम् = नदीनाम्, जाह्नवी अस्मि = गङ्गा अस्मि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पवताम्	पवत्- त. पुं. ष. बहु.	पवनः	अ. पुं. प्र. एक. (विशेषणम्)
अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.	शस्त्रभृताम्	शस्त्रभृत्- त. पुं. ष. बहु.
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	रामः	अ. पुं. प्र. एक. (विशेषणम्)

झषाणाम्	अ. पुं. ष. बहु.	मकरः	अ. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	स्रोतसाम्	स्रोतस्- सका. नपुं. ष. बहु.
जाह्नवी	ई. स्त्री. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	मकरश्च	मकरः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	चास्मि	च + अस्मि	सवर्णदीर्घसन्धिः ।
(ख) समासः	शस्त्रभृताम्	शस्त्राणि बिभ्रति इति शस्त्रभृतः, तेषाम् - कर्तरि क्विप् उपपदसमासश्च ।	
(ग) कृदन्तः	पवनः	पू (पूञ् - पवने) + युच् ।	
	रामः	रम् (रमु - क्रीडायाम्) + घञ् (भावे) ।	
	पवताम्	पू (पूञ् - पवने) + शतृ (कर्तरि) तेषाम् ।	
(घ) तद्धितान्तः	जाह्नवी	जह्नु + अण् (अपत्यार्थे) । जह्नोः अपत्यं स्त्री ।	

भावस्पष्टीकरणम् -

अस्मि ।	
कः अस्मि ?	**पवनः** अस्मि ।
केषां पवनः अस्मि ?	**पवतां** पवनः अस्मि ।
पवतां पवनः अस्मि । **पुनश्च कः** ?	पवतां पवनः अस्मि । **अहं रामः** ।
पवतां पवनः अस्मि । **केषाम्** अहं रामः ?	पवतां पवनः अस्मि । **शस्त्रभृताम्** अहं रामः ।
पवतां पवनः अस्मि । शस्त्रभृताम् अहं रामः । **पुनश्च कः अस्मि** ?	पवतां पवनः अस्मि । शस्त्रभृताम् अहं रामः । **मकरः च** अस्मि ।
पवतां पवनः अस्मि । शस्त्रभृताम् अहं रामः । **केषां** मकरः च अस्मि ?	पवतां पवनः अस्मि । शस्त्रभृताम् अहं रामः । **झषाणां** मकरः च अस्मि ।
पवतां पवनः अस्मि । शस्त्रभृताम् अहं रामः । झषाणां मकरः च अस्मि । **पुनश्च कः अस्मि** ?	पवतां पवनः अस्मि । शस्त्रभृताम् अहं रामः । झषाणां मकरः च अस्मि । **जाह्नवी अस्मि** ।
पवतां पवनः अस्मि । शस्त्रभृताम् अहं रामः । झषाणां मकरः च अस्मि । **केषां** जाह्नवी अस्मि ?	पवतां पवनः अस्मि । शस्त्रभृताम् अहं रामः । झषाणां मकरः च अस्मि । **स्रोतसां** जाह्नवी अस्मि ।

तात्पर्यम् - पावयितॄणां मध्ये अहं वायुः अस्मि । आयुधधारिषु कोदण्डधरः रामः अस्मि । मत्स्यादिषु मकरः अस्मि । नदीषु पवित्रतमा गङ्गा अस्मि ।

सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन।
अध्यात्मविद्या विद्यानां वादः प्रवदतामहम् ॥१०.३२॥

पदच्छेदः - सर्गाणाम्, आदिः, अन्तः, च, मध्यम्, च, एव, अहम्, अर्जुन।
अध्यात्मविद्या, विद्यानाम्, वादः, प्रवदताम्, अहम् ॥

अन्वयः - अर्जुन ! सर्गाणाम् आदिः अन्तः च मध्यं च अहम् एव। विद्यानाम् अध्यात्मविद्या प्रवदतां वादः अहम् (अस्मि)।

पदार्थः - अर्जुन = हे अर्जुन ! सर्गाणाम् = सृष्टीनाम्, आदिः = उत्पत्तिः, अन्तः च = लयः च, मध्यं च = स्थितिः, अहम् एव = अहम् एव अस्मि, विद्यानाम् = सर्वविद्यानाम्, अध्यात्मविद्या = ब्रह्मविद्या, प्रवदताम् = वादं कुर्वताम्, वादः अहम् = संयुक्तिकः वादः अस्मि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	सर्गाणाम्	अ. पुं. ष. बहु.
आदिः	इ. पुं. प्र. एक. (विशेषणम्)	अन्तः	अव्ययम्
च	अव्ययम्	मध्यम्	अ. नपुं. प्र. एक. (विशेषणम्)
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	एव	अव्ययम्
विद्यानाम्	आ. स्त्री. ष. बहु.	अध्यात्मविद्या	आ. स्त्री. प्र. एक. (विशेषणम्)
प्रवदताम्	प्रवदत्- त. पुं. ष. बहु.	वादः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः
- आदिरन्तः — आदिः + अन्तः — विसर्गसन्धिः (रेफः)।
- अन्तश्च — अन्तः + च — विसर्गसन्धिः (सकारः) श्चुत्वम्।
- चैव — च + एव — वृद्धिसन्धिः।
- एवाहम् — एव + अहम् — सवर्णदीर्घसन्धिः।

(ख) समासः
- अध्यात्मविद्या — अध्यात्मम् इति विद्या अध्यात्मविद्या - कर्मधारयः।

(ग) कृदन्तः
- सर्गाणाम् — सृज् (सृज - विसर्गे) + घञ्, तेषाम्।
- विद्यानाम् — विद् (विद - ज्ञाने) + क्यप्। स्त्रीत्वे टाप्, तासाम्।
- वादः — वद् (वद - व्यक्तायां वाचि) + घञ्।
- प्रवदताम् — प्र + वद् (वद - व्यक्तायां वाचि) + शतृ (कर्तरि), तेषाम्।

भावस्पष्टीकरणम् -

अहम् (अस्मि)।	
कः अहम् अस्मि ?	**आदिः अन्तः मध्यं च** अहम् एव अस्मि।
केषाम् आदिः अन्तः मध्यं च अहम् एव अस्मि ?	**सर्गाणाम्** आदिः अन्तः मध्यं च अहम् एव अस्मि ?
सर्गाणाम् आदिः अन्तः मध्यं च अहम् एव। **पुनश्च का** अस्मि ?	सर्गाणाम् आदिः अन्तः मध्यं च अहम् एव। **अध्यात्मविद्या** अस्मि।
सर्गाणाम् आदिः अन्तः मध्यं च अहम् एव। **केषाम्** अध्यात्मविद्या अस्मि ?	सर्गाणाम् आदिः अन्तः मध्यं च अहम् एव। **विद्यानाम्** अध्यात्मविद्या अस्मि।
सर्गाणाम् आदिः अन्तः मध्यं च अहम् एव। विद्यानाम् अध्यात्मविद्या, **पुनश्च कः** अस्मि ?	सर्गाणाम् आदिः अन्तः मध्यं च अहम् एव। विद्यानाम् अध्यात्मविद्या, **वादः अस्मि**।
सर्गाणाम् आदिः अन्तः मध्यं च अहम् एव। विद्यानाम् अध्यात्मविद्या, **केषां** वादः अस्मि ?	सर्गाणाम् आदिः अन्तः मध्यं च अहम् एव। विद्यानाम् अध्यात्मविद्या, **प्रवदतां** वादः अस्मि।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन** !

तात्पर्यम् - अर्जुन! सृष्टीनाम् आरम्भः प्रलयः स्थितिः च अहम् एव। विद्यासु ब्रह्मविद्या, वादं कुर्वत्सु सत्यशोधनफलकः सम्भाषणविशेषः अहम् अस्मि।

अक्षराणामकारोऽस्मि द्वन्द्वः सामासिकस्य च।
अहमेवाक्षयः कालो धाताहं विश्वतोमुखः ॥१०.३३॥

पदच्छेदः - अक्षराणाम्, अकारः, अस्मि, द्वन्द्वः, सामासिकस्य, च।
अहम्, एव, अक्षयः, कालः, धाता, अहम्, विश्वतोमुखः ॥

अन्वयः - अक्षराणाम् अकारः अस्मि। सामासिकस्य द्वन्द्वः च। अहम् एव अक्षयः कालः। विश्वतोमुखः धाता अहम्।

पदार्थः - अक्षराणाम् = वर्णानाम्, अकारः अस्मि = अकारः अस्मि, सामासिकस्य = समाससमूहस्य, द्वन्द्वः च = द्वन्द्वसमासः च। अहम् एव अक्षयः = अहम् एव अक्षीणः, कालः = समयः, विश्वतोमुखः = सर्वतोमुखः, धाता अहम् = कर्मफलदाता अहम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अक्षराणाम्	अ. नपुं. ष. बहु.	अकारः	अ. पुं. प्र. एक. (विशेषणम्)

अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.	सामासिकस्य	अ. पुं. ष. एक.
द्वन्द्वः	अ. पुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	एव	अव्ययम्
अक्षयः	अ. पुं. प्र. एक. (विशेषणम्)	कालः	अ. पुं. प्र. एक. (विशेषणम्)
विश्वतोमुखः	अ. पुं. प्र. एक. (विशेषणम्)	धाता	ऋ. पुं. प्र. एक. (विशेष्यम्)

व्याकरणम् -

(क) सन्धिः	अकारोऽस्मि	अकारः + अस्मि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च।
	एवाक्षयः	एव + अक्षयः	सवर्णदीर्घसन्धिः।
	कालो धाता	कालः + धाता	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	धाताहम्	धाता + अहम्	सवर्णदीर्घसन्धिः।
(ख) समासः	अक्षराणाम्	न क्षरम् अक्षरम्, तेषाम् - नञ्तत्पुरुषः।	
	अक्षयः	न विद्यते क्षयः यस्य अक्षयः - नञ्बहुव्रीहिः।	
	विश्वतोमुखः	विश्वतः मुखानि यस्य सः विश्वतोमुखः - बहुव्रीहिः।	
(ग) कृदन्तः	क्षयः	क्षि (क्षि - क्षये) + अच्।	
	कालः	कल् (कल - शब्दसङ्ख्यानयोः) + घञ्।	
	धाता	धा (डुधाञ् - धारणपोषणयोः) + तृच्।	
(घ) तद्धितान्तः	सामासिकस्य	समास + ठक् (समूहार्थे ठक् (इक) प्रत्ययः) समासानां समूहः सामासिकम्।	

भावस्पष्टीकरणम् -

अस्मि।	
कः अस्मि ?	**अकारः** अस्मि।
केषाम् अकारः अस्मि ?	**अक्षराणाम्** अकारः अस्मि।
अक्षराणाम् अकारः अस्मि। **पुनश्च कः** ?	अक्षराणाम् अकारः अस्मि। **द्वन्द्वः च।**
अक्षराणाम् अकारः अस्मि। **कस्य** द्वन्द्वः च ?	अक्षराणाम् अकारः अस्मि। **सामासिकस्य** द्वन्द्वः च।
अक्षराणाम् अकारः अस्मि। सामासिकस्य द्वन्द्वः च। **पुनश्च कः** ?	अक्षराणाम् अकारः अस्मि। सामासिकस्य द्वन्द्वः च। **कालः।**

अक्षराणाम् अकारः अस्मि। सामासिकस्य द्वन्द्वः च। **कीदृशः** कालः ?	अक्षराणाम् अकारः अस्मि। सामासिकस्य द्वन्द्वः च। **अक्षयः** कालः।
अक्षराणाम् अकारः अस्मि। सामासिकस्य द्वन्द्वः च। **कः** अक्षयः कालः ?	अक्षराणाम् अकारः अस्मि। सामासिकस्य द्वन्द्वः च। **अहम् एव** अक्षयः कालः।
अक्षराणाम् अकारः अस्मि। सामासिकस्य द्वन्द्वः च। अहम् एव अक्षयः कालः। **पुनश्च कः** ?	अक्षराणाम् अकारः अस्मि। सामासिकस्य द्वन्द्वः च। अहम् एव अक्षयः कालः। **धाता अहम्**।
अक्षराणाम् अकारः अस्मि। सामासिकस्य द्वन्द्वः च। अहम् एव अक्षयः कालः। **कीदृशः** धाता अहम् ?	अक्षराणाम् अकारः अस्मि। सामासिकस्य द्वन्द्वः च। अहम् एव अक्षयः कालः। **विश्वतोमुखः** धाता अहम्।

तात्पर्यम् - वर्णेषु अकारः अस्मि। समाससमुदाये द्वन्द्वसमासः अस्मि। अहमेव अक्षीणः कालः। सर्वजगतः सर्वतोमुखः कर्मफलदाता च अहमेव अस्मि।

मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यताम्।
कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा ॥१०.३४॥

पदच्छेदः - मृत्युः, सर्वहरः, च, अहम्, उद्भवः, च, भविष्यताम्।
कीर्तिः, श्रीः, वाक्, च, नारीणाम्, स्मृतिः, मेधा, धृतिः, क्षमा ॥

अन्वयः - अहं सर्वहरः मृत्युः च। भविष्यताम् उद्भवः च। नारीणां कीर्तिः श्रीः वाक् च स्मृतिः मेधा धृतिः क्षमा च।

पदार्थः - सर्वहरः = संहारकारिणां मध्ये, अहं मृत्युः च = अहं मृत्युदेवता च। भविष्यताम् = उत्पत्स्यमानानां शुभानाम्, उद्भवः च = प्रकर्षः च, नारीणाम् = स्त्रीणाम्, कीर्तिः = यशः, श्रीः = शोभा, वाक् = वाणी, स्मृतिः = स्मृतिः, मेधा = उत्तमा बुद्धिः, धृतिः = धैर्यम्, क्षमा च = सहनं च।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेषणम्)	सर्वहरः	अ. पुं. प्र. एक. (विशेषणम्)
मृत्युः	उ. पुं. प्र. एक. (विशेष्यम्)	च	अव्ययम्
भविष्यताम्	भविष्यत्- त. पुं. ष. बहु. (विशेषणम्)	उद्भवः	अ. पुं. प्र. एक. (विशेषणम्)
नारीणाम्	ई. स्त्री. ष. बहु.	कीर्तिः	इ. स्त्री. प्र. एक. (विशेषणम्)
श्रीः	ई. स्त्री. प्र. एक. (विशेषणम्)	वाक्	वाच्- चका. स्त्री. प्र. एक. (विशेषणम्)
स्मृतिः	इ. स्त्री. प्र. एक. (विशेषणम्)	मेधा	आ. स्त्री. प्र. एक. (विशेषणम्)
धृतिः	इ. स्त्री. प्र. एक. (विशेषणम्)	क्षमा	आ. स्त्री. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	सर्वहरश्च	सर्वहरः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	चाहम्	च + अहम्	सवर्णदीर्घसन्धिः ।
(ख) समासः	सर्वहरः	सर्वं हरति इति सर्वहरः - कर्तरि अच् उपपदसमासश्च ।	
(ग) कृदन्तः	हरः	हृ (हृञ् - हरणे) + अप् ।	
	उद्भवः	उत् + भू (भू - सत्तायाम्) + अप् (भावे) भूयते इति ।	
	भविष्यताम्	भू (भू - सत्तायाम्) + लृट् + स्य + शतृ (कर्तरि), तेषाम् ।	
	कीर्तिः	कॄ (कॄ - विक्षेपे) + क्तिन् (भावे) ।	
	वाक्	वच् (वच - परिभाषणे) + क्विप् ।	
	स्मृतिः	स्मृ (स्मृ - चिन्तायाम्) + क्तिन् (भावे) ।	
	धृतिः	धृ (धृञ् - धरणे) + क्तिन् (भावे) ।	
	क्षमा	क्षम् (क्षमूष् - सहने) + अङ् ।	

भावस्पष्टीकरणम् -

अहम् (अस्मि) ।	
कः अहम् अस्मि ?	अहं **मृत्युः च** अस्मि ।
अहं **कीदृशः** मृत्युः च अस्मि ?	अहं **सर्वहरः** मृत्युः च अस्मि ।
अहं सर्वहरः मृत्युः च । **पुनश्च कः** अस्मि ?	अहं सर्वहरः मृत्युः च । **उद्भवः** अस्मि ।
अहं सर्वहरः मृत्युः च । **केषाम्** उद्भवः अस्मि ?	अहं सर्वहरः मृत्युः च । **भविष्यताम्** उद्भवः च अस्मि ।
अहं सर्वहरः मृत्युः च । भविष्यताम् उद्भवः च । **पुनश्च काः** अस्मि ?	अहं सर्वहरः मृत्युः च । भविष्यताम् उद्भवः च । **कीर्तिः श्रीः वाक् च स्मृतिः मेधा धृतिः क्षमा च** अस्मि ।
अहं सर्वहरः मृत्युः च । भविष्यताम् उद्भवः । **कासां** कीर्तिः श्रीः वाक् च स्मृतिः मेधा धृतिः क्षमा च अस्मि ?	अहं सर्वहरः मृत्युः च । भविष्यताम् उद्भवः । **नारीणां** कीर्तिः श्रीः वाक् च स्मृतिः मेधा धृतिः क्षमा च अस्मि ।

तात्पर्यम् - अहं प्राणहरः मृत्युः । अहम् उत्पत्स्यमानानां पदार्थानाम् अभ्युदयः । नारीणां यशः शोभा वाणी स्मृतिः मेधा धृतिः क्षमा इत्येते सद्गुणाः अहम् अस्मि ।

बृहत्साम तथा साम्नां गायत्री छन्दसामहम् ।
मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः ॥१०.३५॥

पदच्छेदः - बृहत्साम, तथा, साम्नाम्, गायत्री, छन्दसाम्, अहम् ।
मासानाम्, मार्गशीर्षः, अहम्, ऋतूनाम्, कुसुमाकरः ॥

अन्वयः - तथा साम्नां बृहत्साम । छन्दसाम् अहं गायत्री । मासानां मार्गशीर्षः अहम् ऋतूनां कुसुमाकरः ।

पदार्थः - तथा = एवम्, साम्नाम् = साम्नाम्, बृहत्साम = बृहत्साम, । छन्दसाम् = छन्दोविशिष्टानां मन्त्राणाम्, अहं गायत्री = अहं गायत्री ऋक्, मासानाम् = द्वादशमासानाम्, मार्गशीर्षः अहम् = आग्रहायणिकः मासः अहम्, ऋतूनाम् = षण्णाम् ऋतूनाम्, कुसुमाकरः = वसन्तः अस्मि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तथा	अव्ययम्	साम्नाम्	सामन्- न. नपुं. ष. बहु.
बृहत्साम	बृहत्सामन्- न. नपुं. प्र. एक.	छन्दसाम्	छन्दस्- सका. नपुं. ष. बहु.
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	गायत्री	ई. स्त्री. प्र. एक. (विशेषणम्)
मासानाम्	अ. पुं. ष. बहु.	मार्गशीर्षः	अ. पुं. प्र. एक. (विशेषणम्)
ऋतूनाम्	उ. पुं. ष. बहु.	कुसुमाकरः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः मार्गशीर्षोऽहम् मार्गशीर्षः + अहम् विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।

(ख) समासः बृहत्साम बृहत् साम बृहत्साम - कर्मधारयः ।

कुसुमाकरः कुसुमानाम् आकरः कुसुमाकरः - षष्ठीतत्पुरुषः ।

भावस्पष्टीकरणम् -

तथा अस्मि ।	
तथा **किम्** अस्मि ?	तथा **बृहत्साम** अस्मि ।
तथा **केषां** बृहत्साम अस्मि ?	तथा **साम्नां** बृहत्साम अस्मि ।
तथा साम्नां बृहत्साम । **पुनश्च का** अस्मि ?	तथा साम्नां बृहत्साम । **अहं गायत्री** अस्मि ।
तथा साम्नां बृहत्साम । **केषाम्** अहं गायत्री अस्मि ?	तथा साम्नां बृहत्साम । **छन्दसाम्** अहं गायत्री अस्मि ।
तथा साम्नां बृहत्साम । छन्दसाम् अहं गायत्री । **पुनश्च कः** अस्मि ?	तथा साम्नां बृहत्साम । छन्दसाम् अहं गायत्री । **मार्गशीर्षः अहम्** अस्मि ।
तथा साम्नां बृहत्साम । छन्दसाम् अहं गायत्री । **केषां** मार्गशीर्षः अहम् अस्मि ?	तथा साम्नां बृहत्साम । छन्दसाम् अहं गायत्री । **मासानां** मार्गशीर्षः अहम् अस्मि ।
तथा साम्नां बृहत्साम । छन्दसाम् अहं गायत्री । मासानां मार्गशीर्षः अहम्, **पुनश्च कः** अस्मि ?	तथा साम्नां बृहत्साम । छन्दसाम् अहं गायत्री । मासानां मार्गशीर्षः अहं, **कुसुमाकरः** अस्मि ।

तथा साम्नां बृहत्साम। छन्दसाम् अहं गायत्री। मासानां मार्गशीर्षः अहं, **केषां** कुसुमाकरः अस्मि ?	तथा साम्नां बृहत्साम। छन्दसाम् अहं गायत्री। मासानां मार्गशीर्षः अहम्, **ऋतूनां** कुसुमाकरः अस्मि।

तात्पर्यम् - तथा सामसु अहं बृहत्साम अस्मि। छन्दोविशिष्टानाम् ऋचाम् अहं गायत्रीच्छन्दः अस्मि। द्वादशमासेषु मार्गशीर्षः अहम्। षण्णाम् ऋतूनां मध्ये अहं वसन्तः अस्मि।

द्यूतं छलयतामस्मि तेजस्तेजस्विनामहम्।
जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववतामहम्॥१०.३६॥

पदच्छेदः - द्यूतम्, छलयताम्, अस्मि, तेजः, तेजस्विनाम्, अहम्।
जयः, अस्मि, व्यवसायः, अस्मि, सत्त्वम्, सत्त्ववताम्, अहम्॥

अन्वयः - छलयतां द्यूतम् अस्मि। तेजस्विनां तेजः अहम्। जयः अस्मि। व्यवसायः अस्मि। सत्त्ववतां सत्त्वम् अहम्।

पदार्थः - छलयताम् = छलकारिणाम्, द्यूतम् अस्मि = अक्षक्रीडा अस्मि, तेजस्विनाम् = तेजोवताम्, तेजः अहम् = कान्तिः अहम्, जयः अस्मि = विजयः अस्मि, व्यवसायः अस्मि = प्रयत्नः अस्मि, सत्त्ववताम् = सात्त्विकानाम्, सत्त्वम् अहम् = सत्त्वगुणः अहम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
छलयताम्	छलयत्- त. पुं. ष. बहु.	द्यूतम्	अ. नपुं. प्र. एक. (विशेषणम्)
अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.	तेजस्विनाम्	तेजस्विन्- न. पुं. ष. बहु.
तेजः	तेजस्- सका. नपुं. प्र. एक.	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
जयः	अ. पुं. प्र. एक. (विशेषणम्)	व्यवसायः	अ. पुं. प्र. एक. (विशेषणम्)
सत्त्ववताम्	सत्त्ववत्- त. पुं. ष. बहु.	सत्त्वम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	तेजस्तेजस्विनाम्	तेजः + तेजस्विनाम्	विसर्गसन्धिः (सकारः)।
	जयोऽस्मि	जयः + अस्मि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च।
	व्यवसायोऽस्मि	व्यवसायः + अस्मि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च।

(ख) कृदन्तः	द्यूतम्	दिव् (दिवु - क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु) + क्त (भावे)।
	छलयताम्	छल (नामधातुः) + शतृ, तेषाम्।
	जयः	जि (जि - जये) + अच्।
	व्यवसायः	वि + अव + सो (षो - अन्तकर्मणि) + घञ्।
(ग) तद्धितान्तः	सत्त्वम्	सत् + त्व (भावार्थे)।
	तेजस्विनाम्	तेजस् + विनि (मतुबर्थे), तेषाम्, तेजः एषाम् एषु वा अस्ति।
	सत्त्ववताम्	सत्त्व + मतुप् (मतुबर्थे), तेषाम्, सत्त्वम् एषाम् एषु वा अस्ति।

भावस्पष्टीकरणम् -

अस्मि।	
किम् अस्मि?	**द्यूतम्** अस्मि।
केषां द्यूतम् अस्मि?	**छलयतां** द्यूतम् अस्मि।
छलयतां द्यूतम् अस्मि। **पुनः किम्** अहम्?	छलयतां द्यूतम् अस्मि। **तेजः** अहम्।
छलयतां द्यूतम् अस्मि। **केषां** तेजः अहम्?	छलयतां द्यूतम् अस्मि। **तेजस्विनां** तेजः अहम्।
छलयतां द्यूतम् अस्मि। तेजस्विनां तेजः अहम्। **पुनश्च कः** अस्मि?	छलयतां द्यूतम् अस्मि। तेजस्विनां तेजः अहम्। **जयः** अस्मि।
छलयतां द्यूतम् अस्मि। तेजस्विनां तेजः अहम्। जयः अस्मि। **पुनश्च कः** अस्मि?	छलयतां द्यूतम् अस्मि। तेजस्विनां तेजः अहम्। जयः अस्मि। **व्यवसायः** अस्मि।
छलयतां द्यूतम् अस्मि। तेजस्विनां तेजः अहम्। जयः अस्मि। व्यवसायः अस्मि। **पुनश्च किम्**?	छलयतां द्यूतम् अस्मि। तेजस्विनां तेजः अहम्। जयः अस्मि। व्यवसायः अस्मि। **सत्त्वम् अहम्।**
छलयतां द्यूतम् अस्मि। तेजस्विनां तेजः अहम्। जयः अस्मि। व्यवसायः अस्मि। **केषां** सत्त्वम् अहम्	छलयतां द्यूतम् अस्मि। तेजस्विनां तेजः अहम्। जयः अस्मि। व्यवसायः अस्मि। **सत्त्ववतां** सत्त्वम् अहम्।

तात्पर्यम् - छलकर्तॄणां द्यूतम् अस्मि। तेजोवतां तेजः अहम् अस्मि। विजेतॄणां विजयः अस्मि। व्यवसायिनां व्यवसायः अस्मि। सात्त्विकानां सत्त्वगुणः अहम् अस्मि।

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः।
मुनीनामप्यहं व्यासः कवीनामुशना कविः ॥१०.३७॥

पदच्छेदः - वृष्णीनाम्, वासुदेवः, अस्मि, पाण्डवानाम्, धनञ्जयः।
मुनीनाम्, अपि, अहम्, व्यासः, कवीनाम्, उशना, कविः ॥

अन्वयः - वृष्णीनां वासुदेवः अस्मि। पाण्डवानां धनञ्जयः। मुनीनाम् अपि अहं व्यासः कवीनाम् उशनाः कविः।

पदार्थः - वृष्णीनाम् = यादवानाम्, वासुदेवः अस्मि = कृष्णः अस्मि, पाण्डवानाम् = पाण्डुपुत्राणाम्, धनञ्जयः = अर्जुनः, मुनीनाम् अपि = ऋषिषु अपि, अहं व्यासः = अहं बादरायणः, कवीनाम् = क्रान्तदर्शिनाम्, उशनाः कविः = शुक्राचार्यः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
वृष्णीनाम्	इ. पुं. ष. बहु.	वासुदेवः	अ. पुं. प्र. एक. (विशेषणम्)
अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.	पाण्डवानाम्	अ. पुं. ष. बहु.
धनञ्जयः	अ. पुं. प्र. एक. (विशेषणम्)	मुनीनाम्	इ. पुं. ष. बहु.
अपि	अव्ययम्	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
व्यासः	अ. पुं. प्र. एक. (विशेषणम्)	कवीनाम्	इ. पुं. ष. बहु.
उशनाः	उशनस्- सका. पुं. प्र. (विशेषणम्) एक.	कविः	इ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	वासुदेवोऽस्मि	वासुदेवः + अस्मि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	अप्यहम्	अपि + अहम्	यण्सन्धिः।
	उशना कविः	उशनाः + कविः	विसर्गसन्धिः (लोपः)।
(ख) समासः	धनञ्जयः	धनं जयति इति धनञ्जयः - कर्तरि खश् उपपदसमासश्च।	
(ग) कृदन्तः	व्यासः	वि + अस् (अस - गतिदीप्त्यादानेषु) + घञ्।	
(घ) तद्धितान्तः	वासुदेवः	वसुदेव + अण् (अपत्यार्थे) वसुदेवस्य अपत्यं पुमान्।	
	पाण्डवानाम्	पाण्डु + अण् (अपत्यार्थे), तेषाम्, पाण्डोः अपत्यानि पुमांसः।	

भावस्पष्टीकरणम् -

अस्मि।	
कः अस्मि ?	**वासुदेवः** अस्मि।
केषां वासुदेवः अस्मि ?	**वृष्णीनां** वासुदेवः अस्मि।

वृष्णीनां वासुदेवः अस्मि **पुनश्च कः** ?	वृष्णीनां वासुदेवः अस्मि । **धनञ्जयः** ।
वृष्णीनां वासुदेवः अस्मि । **केषां** धनञ्जयः ?	वृष्णीनां वासुदेवः अस्मि । **पाण्डवानां** धनञ्जयः ।
वृष्णीनां वासुदेवः अस्मि। पाण्डवानां धनञ्जयः। **पुनश्च कः** ?	वृष्णीनां वासुदेवः अस्मि । पाण्डवानां धनञ्जयः । **अहं व्यासः** ।
वृष्णीनां वासुदेवः अस्मि। पाण्डवानां धनञ्जयः। **केषाम्** अहं व्यासः ?	वृष्णीनां वासुदेवः अस्मि। पाण्डवानां धनञ्जयः। **मुनीनाम्** अपि अहं व्यासः ।
वृष्णीनां वासुदेवः अस्मि। पाण्डवानां धनञ्जयः। मुनीनाम् अपि अहं व्यासः । **पुनश्च कः** अस्मि ?	वृष्णीनां वासुदेवः अस्मि। पाण्डवानां धनञ्जयः। मुनीनाम् अपि अहं व्यासः । **कविः** अस्मि ।
वृष्णीनां वासुदेवः अस्मि। पाण्डवानां धनञ्जयः। मुनीनाम् अपि अहं व्यासः । **कः** कविः अस्मि ?	वृष्णीनां वासुदेवः अस्मि। पाण्डवानां धनञ्जयः। मुनीनाम् अपि अहं व्यासः । **उशनाः** कविः अस्मि ।
वृष्णीनां वासुदेवः अस्मि। पाण्डवानां धनञ्जयः। मुनीनाम् अपि अहं व्यासः। **केषाम्** उशनाः कविः अस्मि ?	वृष्णीनां वासुदेवः अस्मि। पाण्डवानां धनञ्जयः। मुनीनाम् अपि अहं व्यासः । **कवीनाम्** उशनाः कविः अस्मि ।

तात्पर्यम् - यादवानां कृष्णः अस्मि । पाण्डवानां धनञ्जयः अहमेव अस्मि । मुनीनाम् अपि अहं व्यासः । क्रान्तदर्शिनां शुक्राचार्यः अहमेव अस्मि ।

दण्डो दमयतामस्मि नीतिरस्मि जिगीषताम् ।
मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहम् ॥१०.३८॥

पदच्छेदः - दण्डः, दमयताम्, अस्मि, नीतिः, अस्मि, जिगीषताम् ।
मौनम्, च, एव, अस्मि, गुह्यानाम्, ज्ञानम्, ज्ञानवताम्, अहम् ॥

अन्वयः - दमयतां दण्डः अस्मि । जिगीषतां नीतिः अस्मि । गुह्यानां मौनं च एव अस्मि । ज्ञानवतां ज्ञानम् अहम् ।

पदार्थः - दमयताम् = दमयितॄणाम्, दण्डः अस्मि = दमनम् अस्मि, जिगीषताम् = जेतुमिच्छताम्, नीतिः अस्मि = नीतिः अस्मि, गुह्यानाम् = गोप्यानाम्, मौनं च एव अस्मि = मौनमेव अस्मि, ज्ञानवताम् = ज्ञानयुक्तेषु, ज्ञानम् अहम् = प्रज्ञानम् अहम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
दमयताम्	दमयत्- त. पुं. ष. बहु.	दण्डः	अ. पुं. प्र. एक. (विशेषणम्)

अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.	जिगीषताम्	जिगीषत्- त. पुं. ष. बहु.
नीतिः	इ. पुं. प्र. एक. (विशेषणम्)	गुह्यानाम्	अ. नपुं. ष. बहु.
मौनम्	अ. नपुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
एव	अव्ययम्	ज्ञानवताम्	ज्ञानवत्- त. पुं. ष. बहु.
ज्ञानम्	अ. नपुं. प्र. एक. (विशेषणम्)	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)

व्याकरणम् -

(क) सन्धिः	दण्डो दमयताम्	दण्डः + दमयताम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	नीतिरस्मि	नीतिः + अस्मि	विसर्गसन्धिः (रेफः) ।
	चैव	च + एव	वृद्धिसन्धिः ।
	एवास्मि	एव + अस्मि	सवर्णदीर्घसन्धिः ।
(ख) कृदन्तः	दमयताम्	दम् (दमु - उपशमे) + शतृ (कर्तरि), तेषाम् ।	
	नीतिः	नी (णीञ् - प्रापणे) + क्तिन् (भावे) ।	
	जिगीषताम्	जि (जि - जये) + सन् (जिगीष) + शतृ (कर्तरि), तेषाम् ।	
	गुह्यानाम्	गुह् (गुहू - संवरणे) क्यप्, तेषाम् ।	
	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।	
(ग) तद्धितान्तः	मौनम्	मुनि + अण् (भावार्थे) मुनेः भावः ।	
	ज्ञानवताम्	ज्ञान + मतुप्, तेषाम्, ज्ञानम् एषाम् एषु वा अस्ति ।	

भावस्पष्टीकरणम् -

अस्मि ।	
कः अस्मि ?	**दण्डः** अस्मि ।
केषां दण्डः अस्मि ?	**दमयतां** दण्डः अस्मि ।
दमयतां दण्डः अस्मि । **पुनश्च का** अस्मि ?	दमयतां दण्डः अस्मि । **नीतिः** अस्मि ।
दमयतां दण्डः अस्मि । **केषां** नीतिः अस्मि ?	दमयतां दण्डः अस्मि । **जिगीषतां** नीतिः अस्मि ।
दमयतां दण्डः अस्मि । जिगीषतां नीतिः अस्मि । **पुनश्च किम् अस्मि** ?	दमयतां दण्डः अस्मि । जिगीषतां नीतिः अस्मि । **मौनं च अस्मि** ।
दमयतां दण्डः अस्मि । जिगीषतां नीतिः अस्मि । **केषां** मौनं च अस्मि ?	दमयतां दण्डः अस्मि । जिगीषतां नीतिः अस्मि । **गुह्यानां** मौनं च अस्मि ।

दमयतां दण्डः अस्मि । जिगीषतां नीतिः अस्मि । गुह्यानां मौनं च अस्मि । **पुनश्च किम् अस्मि** ?	दमयतां दण्डः अस्मि । जिगीषतां नीतिः अस्मि । गुह्यानां मौनं च अस्मि । **ज्ञानम् अहम् एव अस्मि** ।
दमयतां दण्डः अस्मि । जिगीषतां नीतिः अस्मि । गुह्यानां मौनं च अस्मि । **केषां** ज्ञानम् अहम् एव अस्मि ?	दमयतां दण्डः अस्मि । जिगीषतां नीतिः अस्मि । गुह्यानां मौनं च अस्मि । **ज्ञानवतां** ज्ञानम् अहम् एव अस्मि ।

तात्पर्यम् - दमयितॄणां दमनम् अस्मि । जेतुमिच्छतां नीतिः अस्मि । गोप्यानां मौनम् अस्मि । ज्ञानिनां प्रज्ञानम् अहम् अस्मि ।

यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥१०.३९॥

पदच्छेदः - यत्, च, अपि, सर्वभूतानाम्, बीजम्, तत्, अहम्, अर्जुन ।
न, तत्, अस्ति, विना, यत्, स्यात्, मया, भूतम्, चराचरम् ॥

अन्वयः - अर्जुन ! सर्वभूतानां यत् बीजं तत् अपि अहं मया विना चराचरं भूतं यत् स्यात् तत् न अस्ति ।

पदार्थः - अर्जुन = हे अर्जुन ! सर्वभूतानाम् = सकलभूतानाम्, यत् बीजम् = यत् प्ररोहकारणम्, तत् अपि अहम् = तदपि अहमेव, मया विना = मां विना, चराचरम् = स्थावरजङ्गमम्, भूतम् = जगत्, यत् स्यात् = यत् भवेत्, तत् न अस्ति = तद्वस्तु न विद्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	सर्वभूतानाम्	अ. नपुं. ष. बहु.
यत्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	बीजम्	अ. नपुं. प्र. एक. (विशेष्यम्)
तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	अपि	अव्ययम्
अहम्	अस्मद्- द. सर्व. प्र. एक.	मया	अस्मद्- द. सर्व. तृ. एक.
विना	अव्ययम्	चराचरम्	अ. नपुं. प्र. एक. (विशेषणम्)
भूतम्	अ. नपुं. प्र. एक. (विशेषणम्)	यत्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)
स्यात्	अस् (अस - भुवि) पर. कर्तरि विधिलिङ्. प्रपु. एक.	तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)
न	अव्ययम्	अस्ति	अस् (अस - भुवि) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	यच्च	यत् + च	श्चुत्वसन्धिः।
	चापि	च + अपि	सवर्णदीर्घसन्धिः।
	स्यान्मया	स्यात् + मया	अनुनासिकसन्धिः।
(ख) समासः	सर्वभूतानाम्	सर्वाणि भूतानि सर्वभूतानि, तेषाम् - कर्मधारयः।	
	चराचरम्	चरश्च अचरश्च अनयोः समाहारः चराचरम् - द्वन्द्वः।	
(ग) कृदन्तः	भूतम्	भू (भू - सत्तायाम्) + क्त (भावे)।	

भावस्पष्टीकरणम् -

अहम् (एव अस्मि)।	
केषाम् अहम् एव अस्मि ?	**सर्वभूतानाम्** अहम् एव अस्मि।
सर्वभूतानां **किम्** अहम् एव अस्मि ?	सर्वभूतानां **बीजम्** अहम् एव अस्मि।
सर्वभूतानां **किं** बीजम् अहम् एव अस्मि ?	सर्वभूतानां **यत्** बीजं **तत् अपि** अहम् एव अस्मि।
सर्वभूतानां यत् बीजं तत् अपि अहम् एव अस्मि। **किं नास्ति** ?	सर्वभूतानां यत् बीजं तत् अपि अहम् एव अस्मि। **तत् न अस्ति**।
सर्वभूतानां यत् बीजं तत् अपि अहम् एव अस्मि। **केन विना** तत् न अस्ति ?	सर्वभूतानां यत् बीजं तत् अपि अहम् एव अस्मि। **मया विना** तत् न अस्ति।
सर्वभूतानां यत् बीजं तत् अपि अहम् एव अस्मि। मया विना **किं स्यात्** तत् न अस्ति ?	सर्वभूतानां यत् बीजं तत् अपि अहम् एव अस्मि। मया विना **भूतं यत् स्यात्** तत् न अस्ति।
सर्वभूतानां यत् बीजं तत् अपि अहम् एव अस्मि। मया विना **कीदृशं** भूतं यत् स्यात् तत् न अस्ति ?	सर्वभूतानां यत् बीजं तत् अपि अहम् एव अस्मि। मया विना **चराचरं** भूतं यत् स्यात् तत् न अस्ति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन** !

तात्पर्यम् - अर्जुन ! सर्वभूतानां यत् प्ररोहकारणम् अस्ति तदपि अहमेव। मया विरहितं यत्किञ्चिदपि स्थावरजङ्गमं नैव भवितुम् अर्हति। तादृशं किमपि न विद्यते।

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥१०.४०॥

पदच्छेदः - न, अन्तः, अस्ति, मम, दिव्यानाम्, विभूतीनाम्, परन्तप।
एषः, तु, उद्देशतः, प्रोक्तः, विभूतेः, विस्तरः, मया ॥

अन्वयः - परन्तप ! मम दिव्यानां विभूतीनाम् अन्तः न अस्ति मया एषः विभूतेः विस्तरः तु उद्देशतः प्रोक्तः ।

पदार्थः - परन्तप = शत्रुतापन ! मम दिव्यानाम् = मे दिव्यानाम्, विभूतीनाम् = ऐश्वर्याणाम्, अन्तः न अस्ति = अवधिः नास्ति, मया एषः = अयम्, विभूतेः = ऐश्वर्यस्य, विस्तरः = प्रपञ्चः, तु = एव, उद्देशतः = एकदेशतः, प्रोक्तः = कथितः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
परन्तप	अ. पुं. सम्बो. एक.	मम	अस्मद्- द. सर्व. ष. एक.
दिव्यानाम्	आ. स्त्री. ष. बहु. (विशेषणम्)	विभूतीनाम्	इ. स्त्री. ष. बहु. (विशेष्यम्)
अन्तः	अव्ययम्	न	अव्ययम्
अस्ति	अस् (अस - भुवि) पर. कर्तरि लट्. प्रपु. एक.	मया	अस्मद्- द. सर्व. तृ. एक.
एषः	एतद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	विभूतेः	इ. स्त्री. ष. एक.
विस्तरः	अ. पुं. प्र. एक. (विशेष्यम्)	तु	अव्ययम्

व्याकरणम् -

(क) सन्धिः	नान्तः	न + अन्तः	सवर्णदीर्घसन्धिः ।
	अन्तोऽस्ति	अन्तः + अस्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।
	एष तु	एषः + तु	विसर्गसन्धिः (लोपः) ।
	तूद्देशतः	तु + उद्देशतः	सवर्णदीर्घसन्धिः ।
	प्रोक्तो विभूतेः	प्रोक्तः + विभूतेः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	विभूतेर्विस्तरः	विभूतेः + विस्तरः	विसर्गसन्धिः (रेफः) ।
	विस्तरो मया	विस्तरः + मया	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	परन्तप	परान् शत्रून् तापयति इति परन्तपः, तत्सम्बुद्धौ - कर्तरि खच् उपपदसमासश्च ।	
(ग) कृदन्तः	प्रोक्तः	प्र + वच् (वच - परिभाषणे) क्त (कर्मणि) ।	
	विभूतीनाम्	वि + भू (भू - सत्तायाम्) + क्तिन् (भावे) ।	
(घ) तद्धितान्तः	दिव्यानाम्	दिव् + यत् (भवार्थे), तेषाम्, दिवि भवाः ।	

भावस्पष्टीकरणम् -

न अस्ति ।	
किं न अस्ति ?	अन्तः न अस्ति ।

केषाम् अन्तः न अस्ति ?	**विभूतीनाम्** अन्तः न अस्ति ।
कीदृशानां विभूतीनाम् अन्तः न अस्ति ?	**दिव्यानां** विभूतीनाम् अन्तः न अस्ति ।
कस्य दिव्यानां विभूतीनाम् अन्तः न अस्ति ?	**मम** दिव्यानां विभूतीनाम् अन्तः न अस्ति ।
मम दिव्यानां विभूतीनाम् अन्तः न अस्ति । **तथापि किं कृतः** ?	मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, **प्रोक्तः** ।
मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, **कथं** प्रोक्तः ?	मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, **उद्देशतः** प्रोक्तः ।
मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, **कः** उद्देशतः प्रोक्तः ?	मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, **विस्तरः तु** उद्देशतः प्रोक्तः ।
मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, **कस्याः** विस्तरः तु उद्देशतः प्रोक्तः ?	मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, **विभूतेः** विस्तरः तु उद्देशतः प्रोक्तः ।
मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, **कः** विभूतेः विस्तरः तु उद्देशतः प्रोक्तः ?	मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, **एषः** विभूतेः विस्तरः तु उद्देशतः प्रोक्तः ।
मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, **केन** एषः विभूतेः विस्तरः तु उद्देशतः प्रोक्तः ?	मम दिव्यानां विभूतीनाम् अन्तः न अस्ति, **मया** एषः विभूतेः विस्तरः तु उद्देशतः प्रोक्तः ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**परन्तप** !

तात्पर्यम् - मम दिव्याः विभूतयः अनन्ताः सन्ति । ताः सर्वाः नैव उक्ताः । अधुना यदुक्तं तत्तु केवलं मम विभूतीनाम् एकदेशमात्रम् अस्ति ।

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ॥१०.४१॥

पदच्छेदः - यत्, यत्, विभूतिमत्, सत्त्वम्, श्रीमत्, ऊर्जितम्, एव, वा ।
तत्, तत्, एव, अवगच्छ, त्वम्, मम, तेजोंऽशसम्भवम् ॥

अन्वयः - यत् यत् विभूतिमत् श्रीमत् ऊर्जितम् एव वा सत्त्वं तत् तत् एव मम तेजोंऽशसम्भवं त्वम् अवगच्छ ।

पदार्थः - यत् यत् विभूतिमत् = यत् यत् प्रभावयुक्तम्, श्रीमत् = शोभावहम्, ऊर्जितम् एव वा = उत्साहसहितं वा, सत्त्वम् = वस्तु, तत् तत् एव = तत् सकलं वस्तु, मम तेजोंऽशसम्भवम् = मम ऐश्वर्यात् उत्पन्नम्, त्वम् अवगच्छ = त्वं विजानीहि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यत्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	विभूतिमत्	विभूतिमत्- त. नपुं. प्र. एक. (विशेषणम्)
श्रीमत्	श्रीमत्- त. नपुं. प्र. एक. (विशेषणम्)	ऊर्जितम्	अ. नपुं. प्र. एक. (विशेषणम्)
एव	अव्ययम्	वा	अव्ययम्
सत्त्वम्	अ. नपुं. प्र. एक. (विशेष्यम्)	तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
मम	अस्मद्- द. सर्व. ष. एक.	तेजोंऽशसम्भवम्	अ. नपुं. द्वि. एक.
त्वम्	युष्मद्- द. सर्व. प्र. एक.	अवगच्छ	अव + गम् (गम्लृ - गतौ) कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः
- यद्यत् — यत् + यत् — जश्त्वसन्धिः ।
- तदेव — तत् + एव — जश्त्वसन्धिः ।
- एवावगच्छ — एव + अवगच्छ — सवर्णदीर्घसन्धिः ।

(ख) समासः
- तेजोंऽशसम्भवम् — तेजसः अंशः तेजोंऽशः - षष्ठीतत्पुरुषः ।
  तेजोंऽशात् सम्भवम्, तेजोंऽशसम्भवम् - पञ्चमीतत्पुरुषः ।

(ग) कृदन्तः
- ऊर्जितम् — ऊर्ज् (ऊर्ज - बलप्राणनयोः) + क्त ।

(घ) तद्धितान्तः
- विभूतिमत् — विभूति + मतुप् । विभूतिः अस्य अस्मिन् वा अस्ति ।
- सत्त्वम् — सत् + त्व (भावार्थे) ।
- श्रीमत् — श्री + मतुप् । श्रीः अस्य अस्मिन् वा अस्ति इति ।

भावस्पष्टीकरणम् -

त्वम् अवगच्छ ।	
कीदृशं त्वम् अवगच्छ ?	**तेजोंऽशसम्भवं** त्वम् अवगच्छ ।
कस्य तेजोंऽशसम्भवं त्वम् अवगच्छ ?	**मम** तेजोंऽशसम्भवं त्वम् अवगच्छ ।
किं किं मम तेजोंऽशसम्भवं त्वम् अवगच्छ ?	**यत् यत् विभूतिमत् श्रीमत् ऊर्जितम् एव वा सत्त्वं** मम तेजोंऽशसम्भवं त्वम् अवगच्छ ।
यत् यत् विभूतिमत् श्रीमत् ऊर्जितम् एव वा सत्त्वं **तेन किं** मम तेजोंऽशसम्भवं त्वम् अवगच्छ ?	यत् यत् विभूतिमत् श्रीमत् ऊर्जितम् एव वा सत्त्वं **तत् तत् एव** मम तेजोंऽशसम्भवं त्वम् अवगच्छ ।

तात्पर्यम् - प्रभावयुक्तं शोभावहं बलसहितं वा यद्यत् वस्तु तत् सकलं मम ऐश्वर्यात् उत्पन्नम् इति त्वं जानीहि ।

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्॥१०.४२॥

पदच्छेदः - अथवा, बहुना, एतेन, किम्, ज्ञातेन, तव, अर्जुन।
विष्टभ्य, अहम्, इदम्, कृत्स्नम्, एकांशेन, स्थितः, जगत्॥

अन्वयः - अर्जुन ! अथवा एतेन बहुना ज्ञातेन तव किम् ? अहम् इदं कृत्स्नं जगत् एकांशेन विष्टभ्य स्थितः।

पदार्थः - अर्जुन = धनञ्जय ! अथवा = यद्वा, एतेन = अनेन, बहुना = अत्यधिकेन, ज्ञातेन = विदितेन, तव किम् = ते किं प्रयोजनम्, अहम् इदम् = अहम् एतम्, कृत्स्नम् = निखिलम्, जगत् = लोकम्, एकांशेन = एकदेशेन, विष्टभ्य = व्याप्य, स्थितः = स्थितः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	अथवा	अव्ययम्
एतेन	एतद्- द. सर्व. पुं. तृ. एक. (विशेषणम्)	बहुना	उ. नपु. तृ. एक. (विशेषणम्)
ज्ञातेन	अ. नपु. तृ. एक. (विशेष्यम्)	तव	युष्मद्- द. सर्व. ष. एक.
किम्	अव्ययम्	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
इदम्	इदम्- म. सर्व. नपुं. द्वि. एक. (विशेषणम्)	कृत्स्नम्	अव्ययम्
जगत्	जगत्- त. नपुं. द्वि. एक. (विशेष्यम्)	एकांशेन	अ. पु. तृ. एक.
विष्टभ्य	ल्यबन्तम् अव्ययम्	स्थितः	अ. पु. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	बहुनैतेन	बहुना + एतेन	वृद्धिसन्धिः।
	तवार्जुन	तव + अर्जुन	सवर्णदीर्घसन्धिः।
	विष्टभ्याहम्	विष्टभ्य + अहम्	सवर्णदीर्घसन्धिः।
	स्थितो जगत्	स्थितः + जगत्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	एकांशेन	एकस्य अंशः एकांशः, तेन - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	ज्ञातेन	ज्ञा (ज्ञा - अवबोधने) + क्त (कर्मणि), तेन।	
	विष्टभ्य	वि + स्टभ् (ष्टभि - प्रतिबन्धे) + ल्यप्।	
	स्थितः	स्था (ष्ठा - गतिनिवृत्तौ) + क्त (कर्तरि)।	

भावस्पष्टीकरणम् -

अथवा किम् ?	
अथवा **केन** किम् ?	अथवा **ज्ञातेन** किम् ?
अथवा ज्ञातेन **कस्य** किम् ?	अथवा ज्ञातेन **तव** किम् ?
अथवा **कियता** ज्ञातेन तव किम् ?	अथवा **बहुना** ज्ञातेन तव किम् ?
अथवा **केन** बहुना ज्ञातेन तव किम् ?	अथवा **एतेन** बहुना ज्ञातेन तव किम् ?
अथवा एतेन बहुना ज्ञातेन तव किम् ? **कथम्** (अस्मि) ?	अथवा बहुना ज्ञातेन तव किम् ? **स्थितः** (अस्मि) ।
अथवा बहुना ज्ञातेन तव किम् ? **किं कृत्वा** स्थितः अस्मि ?	अथवा बहुना ज्ञातेन तव किम् ? **विष्टभ्य** स्थितः अस्मि ।
अथवा बहुना ज्ञातेन तव किम् ? **केन** विष्टभ्य स्थितः अस्मि ?	अथवा बहुना ज्ञातेन तव किम् ? **एकांशेन** विष्टभ्य स्थितः अस्मि ।
अथवा बहुना ज्ञातेन तव किम् ? **किम्** एकांशेन विष्टभ्य स्थितः अस्मि ?	अथवा बहुना ज्ञातेन तव किम् ? **जगत्** एकांशेन विष्टभ्य स्थितः अस्मि ।
अथवा बहुना ज्ञातेन तव किम् ? **कीदृशं** जगत् एकांशेन विष्टभ्य स्थितः अस्मि ?	अथवा बहुना ज्ञातेन तव किम् ? अहम् **इदं कृत्स्नं** जगत् एकांशेन विष्टभ्य स्थितः अस्मि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन !**

तात्पर्यम् - अर्जुन ! अथवा मम विभूतीनां सर्वमपि विस्तरं विदित्वा तव किम् अधिकं प्रयोजनम् ? अतः संक्षेपतः इदं जानीहि यत् अहं निखिलमपि एतत् जगत् एकावयवेन व्याप्य स्थितः अस्मि ।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियोगो नाम दशमोऽध्यायः ॥१०॥

दशमाध्यायस्य सारः

जगति विद्यमानं प्रत्येकमपि उत्कृष्टं वस्तु भगवतः विभूतिः एव इति सोदाहरणं वर्णितम् अस्ति अस्मिन् अध्याये। अतः एव विभूतियोगः इति अस्य अध्यायस्य नाम वर्तते। भगवान् वदति - "मम उत्पत्तिस्थानं देवाः महामुनयः चापि न जानन्ति। यतः अहं सर्वथा तेषाम् आदिमः। यः मां तादृशम् अजम् आदिरहितं लोकाधिपतिं जानाति सः सकलपापैः विमुक्तो भवति। सूक्ष्मग्राहित्वम्, वस्तुज्ञानम्, विवेकः, सहनम्, यथार्थवचनम्, बाह्येन्द्रियनिग्रहः, अन्तःकरणनिग्रहः, आह्लादः, सन्तापः, उद्भवः, विनाशः, भीतिः, भीतिराहित्यम्, अहिंसा, साम्यम्, सन्तोषः, तपः, दानम्, कीर्तिः, अपकीर्तिः एतादृश्यः प्राणिनां नानाप्रकाराः चित्तवृत्तयः मत्तः एव सम्पद्यन्ते। प्रसिद्धाः सप्त ऋषयः तथा पुरातनाः स्वायम्भुवादयः चत्वारः मनवः मम सङ्कल्पमात्रेण उत्पन्नाः। तेषामेव सन्ततयः इदानीं भूमौ वर्तन्ते।

यः मनुष्यः मम एतत् ऐश्वर्यं तत्तदर्थनिर्माणसामर्थ्यं च यथावत् जानाति सः स्थिरेण दर्शनेन सम्बध्यते। अहं सकलस्य मूलकारणम्, मत्तः एव निखिलं जगत् सम्भवति इति मत्वा पण्डिताः मामुपासते। येषां चित्तं मयि संलग्नं तादृशाः बुधाः अन्योन्यं मां बोधयन्तः कीर्तयन्तः च सदा सन्तोषं प्राप्नुवन्ति, मय्येव विहरन्ति च। तेषां नित्ययुक्तानां स्नेहपूर्वकं सेवमानानां तं मद्विषयकं योगं प्रयच्छामि, येन ते बुधाः मां प्राप्नुवन्ति। तेषाम् अनुग्रहार्थम् अहं तेषाम् अन्तःकरणे तिष्ठन् तेषु अज्ञानजन्यं तमः ज्ञानदीपेन नाशयामि।"

तत् श्रुत्वा अर्जुनः वदति - 'भवान् उत्तमं ब्रह्म, उत्कृष्टं स्थानं परमं पवित्रं च अस्ति। देवर्षिः नारदः, असितः, देवलः इत्यादयः सर्वेऽपि तदेव वदन्ति। हे भगवन्! सुराः असुराः वा तव भावं न जानन्ति। भवान् स्वीयैः ऐश्वर्यैः एतान् लोकान् अभिव्याप्य तिष्ठति। तानि सर्वाणि अपि ऐश्वर्याणि मां कथयतु'' इति।

तदा भगवान् स्वस्य विभूतीः वर्णयति यथा - ''मम विभूतीनाम् अन्तः नास्ति इति कारणेन तासु कासाञ्चित् एव उल्लेखम् अत्र करोमि। सर्वप्राणिहृदयस्थितः प्रत्यगात्मा अहं प्राणिनां मूलं मध्यभागः अवसानं च अस्मि। अहं द्वादशादित्यानां मध्ये विष्णुनामकः आदित्यः अस्मि। प्रकाशयितॄणां मध्ये सूर्यः। मरुद्देवतानां मध्ये मरीचिः। नक्षत्राणां मध्ये चन्द्रः। वेदेषु सामवेदः। सुरेषु इन्द्रः। इन्द्रियेषु मनः। प्राणिषु चैतन्यम्। एकादशसु रुद्रेषु शङ्करः, यक्षराक्षसेषु कुबेरः। अष्टसु वसुषु अग्निः। पर्वतेषु मेरुः। पुरोहितेषु बृहस्पतिः। सेनापतिषु स्कन्दः। सरस्सु सागरः। महर्षिषु भृगुः। शब्दरूपासु गीर्षु ओङ्कारः। यज्ञेषु जपयज्ञः। स्थितियुक्तेषु हिमालयपर्वतः। वृक्षेषु अश्वत्थः। देवमुनिषु नारदः। गन्धर्वेषु चित्ररथः। सिद्धेषु कपिलमुनिः। अश्वेषु उच्चैःश्रवाः। गजश्रेष्ठेषु ऐरावतः, मनुष्येषु राजा। शस्त्रेषु वज्रायुधम्। धेनुषु कामधेनुः। सर्पविशेषेषु वासुकिः। नागेषु अनन्तः। जलचरेषु वरुणः। पितृदैवतेषु अर्यमा। संयमनं कुर्वत्सु अन्तकः। दानवानां प्रह्लादः। गणनं कुर्वत्सु समयः, मृगेषु मृगराजः सिंहः, पक्षिषु पक्षिराजः गरुडश्च अस्मि। पावयितॄणां मध्ये अहं वायुः अस्मि। आयुधधारिषु कोदण्डधरः रामः अस्मि। मत्स्यादिषु मकरः अस्मि। नदीषु पवित्रतमा गङ्गा अस्मि। सृष्टीनाम् आरम्भः प्रलयः स्थितिः च अहम् एव।"

एवं च लोके सर्वोत्कृष्टं यद्यदस्ति तत्सर्वम् अहमेव इति भगवान् निरूपयति।

अग्रे स्वविभूतीनां व्याप्तिं बोधयन् सः कथयति - "मया विरहितं यत्किञ्चिदपि स्थावरजङ्गमं नैव भवितुम् अर्हति। मम दिव्याः विभूतयः अनन्ताः सन्ति। ताः सर्वाः नैव उक्ताः। अधुना यदुक्तं तत्तु केवलं मम विभूतीनाम् एकदेशमात्रम् अस्ति। प्रभावयुक्तम् अतिविशिष्टं वा यद्यत् वस्तु तत् सकलं मम ऐश्वर्यात् उत्पन्नम् इति जानीहि। संक्षेपतः वक्तुं शक्यते यत् अहं निखिलमपि एतत् जगत् एकावयवेन व्याप्य स्थितः अस्मि" इति।

अथ एकादशोऽध्यायः

अर्जुन उवाच - मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितम्।
यत्त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम॥११.१॥

पदच्छेदः -

अर्जुनः, उवाच - मदनुग्रहाय, परमम्, गुह्यम्, अध्यात्मसंज्ञितम्।
यत्, त्वया, उक्तम्, वचः, तेन, मोहः, अयम्, विगतः, मम।

अन्वयः - मदनुग्रहाय परमं गुह्यम् अध्यात्मसंज्ञितं यत् वचः त्वया उक्तं तेन मम अयं मोहः विगतः।

पदार्थः - मदनुग्रहाय = मम अनुग्रहार्थम्, परमम् = श्रेष्ठम्, गुह्यम् = गोप्यम्, अध्यात्मसंज्ञितम् = अध्यात्मनामकम्, यत् वचः = यत् वाक्यम्, त्वया उक्तम् = त्वया उच्चारितम्, तेन = तेन वचनेन, मम अयम् = मम एषः, मोहः = अविवेकः, विगतः = अपगतः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मदनुग्रहाय	अ. पुं. च. एक.	परमम्	अ. नपुं. प्र. एक. (विशेषणम्)
गुह्यम्	अ. नपुं. प्र. एक. (विशेष्यम्)	अध्यात्मसंज्ञितम्	अ. नपुं. प्र. एक. (विशेषणम्)
यत्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	वचः	वचस्- सका. नपुं. प्र. एक. (विशेष्यम्)
त्वया	युष्मद्- द. सर्व. तृ. एक.	उक्तम्	अ. नपुं. प्र. एक. (विशेषणम्)
तेन	तद्- द. सर्व. नपुं. तृ. एक. (विशेषणम्)	मम	अस्मद्- द. सर्व. ष. एक.
मोहः	अ. पुं. प्र. एक. (विशेष्यम्)	विगतः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः वचस्तेन — वचः + तेन — विसर्गसन्धिः (सकारः)।
मोहोऽयम् — मोहः + अयम् — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च।

(ख) समासः मदनुग्रहाय — मम अनुग्रहः मदनुग्रहः, तस्मै - चतुर्थीतत्पुरुषः।
अध्यात्मसंज्ञितम् — अध्यात्मम् इति संज्ञा अध्यात्मसंज्ञा - कर्मधारयः।
अध्यात्मसंज्ञा अस्य सञ्जाता अध्यात्मसंज्ञितम् इति इतच् प्रत्ययान्तः शब्दः।

(ग) कृदन्तः मोहः — मुह् (मुह - वैचित्त्ये) + घञ् (भावे)।
गुह्यम् — गुह् (गुहू - संवरणे) + क्यप्।
विगतः — वि + गम् (गम्लृ - गतौ) + क्त (कर्तरि)।
उक्तम् — वच् (वच - परिभाषणे) + क्त (कर्मणि)।

भावस्पष्टीकरणम् -

विगतः ।	
कः विगतः ?	**मोहः** विगतः ।
कः मोहः विगतः ?	**अयं** मोहः विगतः ।
कस्य अयं मोहः विगतः ?	**मम** अयं मोहः विगतः ।
केन मम अयं मोहः विगतः ?	**तेन** मम अयं मोहः विगतः ।
किं कृतं तेन मम अयं मोहः विगतः ?	**उक्तं** तेन मम अयं मोहः विगतः ।
किम् उक्तं तेन मम अयं मोहः विगतः ?	**वचः** उक्तं तेन मम अयं मोहः विगतः ।
कीदृशं वचः उक्तं तेन मम अयं मोहः विगतः ?	**यत्** वचः उक्तं तेन मम अयं मोहः विगतः ।
कीदृशं वचः उक्तं तेन मम अयं मोहः विगतः ?	**अध्यात्मसंज्ञितं** वचः उक्तं तेन मम अयं मोहः विगतः ।
पुनः कीदृशम् अध्यात्मसंज्ञितं वचः उक्तं तेन मम अयं मोहः विगतः ?	**गुह्यम् अध्यात्मसंज्ञितं** वचः उक्तं तेन मम अयं मोहः विगतः ।
पुनः कीदृशं गुह्यम् अध्यात्मसंज्ञितं वचः उक्तं तेन मम अयं मोहः विगतः ?	**परमं** गुह्यम् अध्यात्मसंज्ञितं वचः उक्तं तेन मम अयं मोहः विगतः ।
किमर्थं परमं गुह्यम् अध्यात्मसंज्ञितं वचः उक्तं तेन मम अयं मोहः विगतः ?	**मदनुग्रहाय** परमं गुह्यम् अध्यात्मसंज्ञितं वचः उक्तं तेन मम अयं मोहः विगतः ।

तात्पर्यम् - अर्जुनः वदति यत् - मम अनुग्रहार्थं श्रेष्ठं गोप्यम् अध्यात्मनामकं यम् उपदेशं कृतवान् तेन (उपदेशेन) मम मनसि यः सम्भ्रमः आसीत् सः अपगतः ।

भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम्॥११.२॥

पदच्छेदः - भवाप्ययौ, हि, भूतानाम्, श्रुतौ, विस्तरशः, मया ।
त्वत्तः, कमलपत्राक्ष, माहात्म्यम्, अपि, च, अव्ययम् ॥

अन्वयः - कमलपत्राक्ष ! भूतानां भवाप्ययौ हि विस्तरशः त्वत्तः मया श्रुतौ । अव्ययं माहात्म्यम् अपि च ।

पदार्थः - कमलपत्राक्ष = पद्मपत्रनेत्र (हे श्रीकृष्ण) ! भूतानाम् = प्राणिनाम्, भवाप्ययौ हि = उत्पत्तिप्रलयौ हि, विस्तरशः = विस्तरेण, त्वत्तः = भवतः सकाशात्, मया = मया, श्रुतौ = आकर्णितौ, अव्ययम् = अक्षयम्, माहात्म्यम् अपि च = महत्ता (गौरवः), (श्रुतः) ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कमलपत्राक्ष	अ. पुं. सम्बो. एक.	भूतानाम्	अ. नपुं. ष. बहु.
भवाप्ययौ	अ. पुं. प्र. द्विव. (विशेष्यम्)	हि	अव्ययम्
विस्तरशः	अव्ययम्	त्वत्तः	अव्ययम्
मया	अस्मद् - द. सर्व. तृ. एक.	श्रुतौ	अ. पुं. प्र. द्विव. (विशेषणम्)
अव्ययम्	अ. नपुं. प्र. एक.	माहात्म्यम्	अ. नपुं. प्र. एक.
अपि	अव्ययम्	च	अव्ययम्

व्याकरणम् -

(क) सन्धिः	चाव्ययम्	च + अव्ययम्	सवर्णदीर्घसन्धिः ।
	विस्तरशो मया	विस्तरशः + मया	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	भवाप्ययौ	भवः च अप्ययः च भवाप्ययौ - द्वन्द्वः ।	
	कमलपत्राक्ष	कमलपत्रे इव अक्षिणी यस्य सः कमलपत्राक्षः, तत्सम्बुद्धौ - बहुव्रीहिः ।	
	अव्ययम्	न विद्यते व्ययः यस्य सः अव्ययः, तम् - नञ्बहुव्रीहिः ।	
(ग) कृदन्तः	भवः	भू (भू - सत्तायाम्) + अप् (अपादाने) ।	
	अप्ययः	अप + इ (इण् - गतौ) + अच् (भावे) ।	
	भूतानाम्	भू (भू - सत्तायाम्) + क्त (कर्तरि), तेषाम् ।	
	श्रुतौ	श्रु (श्रु - श्रवणे) + क्त (कर्मणि) ।	
(घ) तद्धितान्तः	त्वत्तः	युष्मद् + तसिल् ।	
	विस्तरशः	विस्तर + शस्, विस्तरं विस्तरमिति विस्तरशः - वीप्सायां शस् ।	
	माहात्म्यम्	महात्मा + ष्यञ् (भावार्थे) (महात्मनः भावः) ।	

भावस्पष्टीकरणम् -

श्रुतौ ।	
कौ श्रुतौ ?	**भवाप्ययौ** श्रुतौ ।
भवाप्ययौ **कथं** श्रुतौ ?	भवाप्ययौ **विस्तरशः** श्रुतौ ।
केषां भवाप्ययौ हि विस्तरशः श्रुतौ ?	**भूतानां** भवाप्ययौ हि विस्तरशः श्रुतौ ।
केन भूतानां भवाप्ययौ हि विस्तरशः श्रुतौ ?	**मया** भूतानां भवाप्ययौ हि विस्तरशः श्रुतौ ।
पुनः च अपि किं श्रुतम् ?	**माहात्म्यं** च अपि श्रुतम् ।

कीदृशं माहात्म्यम् अपि श्रुतम् ?	**अव्ययं माहात्म्यं च अपि श्रुतम् ।**
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कमलपत्राक्ष !**

तात्पर्यम् - हे पद्मपत्रनेत्रश्रीकृष्ण ! प्राणिनाम् उत्पत्तिं प्रलयं च भवतः मुखात् विस्तरेण अहं श्रुतवान् । भवतः अक्षयं प्रभावम् (महिमानम्) अपि श्रुतवान् ।

एवमेतद्यथात्थ त्वमात्मानं परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम ॥११.३॥

पदच्छेदः - एवम्, एतद्, यथा, आत्थ, त्वम्, आत्मानम्, परमेश्वर ।
द्रष्टुम्, इच्छामि, ते, रूपम्, ऐश्वरम्, पुरुषोत्तम ॥

अन्वयः - परमेश्वर ! पुरुषोत्तम ! आत्मानं त्वं यथा आत्थ एतद् एवं ते ऐश्वरं रूपं द्रष्टुम् इच्छामि ।

पदार्थः - परमेश्वर = श्रीकृष्ण, पुरुषोत्तम = श्रीकृष्ण ! आत्मानम् = स्वम्, त्वं यथा आत्थ = त्वं येन प्रकारेण ब्रवीषि, एवम् = इत्थम्, एतद् = एतद्, ते = तव, ऐश्वरम् = ज्ञानैश्वर्यादियुक्तम्, रूपम् = आकारम्, द्रष्टुम् = अवलोकयितुम्, इच्छामि = अभिलषामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
परमेश्वर	अ. पुं. सम्बो. एक.	पुरुषोत्तम	अ. पुं. सम्बो. एक.
आत्मानम्	आत्मन् - न. पुं. द्वि. एक.	त्वम्	युष्मद् - द. सर्व. प्र. एक.
यथा	अव्ययम्	आत्थ	ब्रू (ब्रूञ् - व्यक्तायां वाचि) पर. कर्तरि लट्. मपु. एक.
एतत्	एतद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	एवम्	अव्ययम्
ते	युष्मद्- द. सर्व. ष. एक.	ऐश्वरम्	अ. नपुं. द्वि. एक. (विशेषणम्)
रूपम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	द्रष्टुम्	तुमुन्नन्तम् अव्ययम्
इच्छामि	इष् (इषु - इच्छायाम्) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः	एतद्यथा	एतत् + यथा	जश्त्वसन्धिः ।
	यथात्थ	यथा + आत्थ	सवर्णदीर्घसन्धिः ।
(ख) समासः	परमेश्वर	परमश्चासौ ईश्वरः परमेश्वरः, तत्सम्बुद्धौ - कर्मधारयः ।	

	पुरुषोत्तम	पुरुषेषु उत्तमः पुरुषोत्तमः, तत्सम्बुद्धौ - सप्तमीतत्पुरुषः।
(ग) कृदन्तः	द्रष्टुम्	दृश् (दृशिर् - प्रेक्षणे) + तुमुन्।
(घ) तद्धितान्तः	ऐश्वरम्	ईश्वर + अण् (इदमर्थे) ईश्वरस्य इदम् इत्यर्थः।
	पुरुषोत्तम	पुरुष + उद् + तमप् (अतिशयार्थे)। अतिशयेन पुरुषः पुरुषोत्तमः, तत्सम्बुद्धौ - बहुषु अन्यतमस्मिन् अतिशये तमप्।

भावस्पष्टीकरणम् -

आत्थ।	
कथम् आत्थ ?	**यथा** आत्थ।
कः यथा आत्थ ?	**त्वं** यथा आत्थ।
त्वं यथा **कम्** आत्थ ?	त्वं यथा **आत्मानम्** आत्थ।
त्वं यथा आत्मानम् आत्थ **तथा किम्** ?	त्वं यथा आत्मानम् आत्थ **तथा इच्छामि**।
त्वं यथा आत्मानम् आत्थ तथा **किम् इच्छामि** ?	त्वं यथा आत्मानम् आत्थ तथा **द्रष्टुम् इच्छामि**।
त्वं यथा आत्मानम् आत्थ तथा **किं** द्रष्टुम् इच्छामि ?	त्वं यथा आत्मानम् आत्थ तथा **रूपं** द्रष्टुम् इच्छामि।
त्वं यथा आत्मानम् आत्थ तथा **कस्य** रूपं द्रष्टुम् इच्छामि ?	त्वं यथा आत्मानम् आत्थ तथा **ते** रूपं द्रष्टुम् इच्छामि।
त्वं यथा आत्मानम् आत्थ तथा ते **कीदृशं** रूपं द्रष्टुम् इच्छामि ?	त्वं यथा आत्मानम् आत्थ तथा ते **ऐश्वरं** रूपं द्रष्टुम् इच्छामि।
अस्मिन् श्लोके सम्बोधनपदे के ?	**परमेश्वर, पुरुषोत्तम** !

तात्पर्यम् - श्रीकृष्ण ! पुरुषोत्तम ! आत्मानं भवान् येन प्रकारेण वदति तादृशमेव तव ऐश्वर्ययुक्तं स्वरूपं द्रष्टुम् अभिलषामि।

मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो।
योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययम्॥११.४॥

पदच्छेदः - मन्यसे, यदि, तत्, शक्यम्, मया, द्रष्टुम्, इति, प्रभो।
योगेश्वर, ततः, मे, त्वम्, दर्शय, आत्मानम्, अव्ययम्॥

अन्वयः - प्रभो ! तत् मया द्रष्टुं शक्यम् इति यदि मन्यसे ततः योगेश्वर ! त्वम् अव्ययम् आत्मानं मे दर्शय।

पदार्थः - प्रभो = ईश्वर ! तत् = तत् रूपम्, मया द्रष्टुम् = मया अवलोकयितुम्, शक्यम् = शक्यम् इति, यदि मन्यसे = चिन्तयसि चेत्, ततः = तर्हि, योगेश्वर = श्रीकृष्ण ! त्वम् अव्ययम् = अखिलम् , आत्मानम् = स्वम्, मे दर्शय = मां प्रदर्शय।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
प्रभो	उ. पुं. सम्बो. एक.	तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)
द्रष्टुम्	तुमुन्नन्तम् अव्ययम्	शक्यम्	अ. नपुं. प्र. एक. (विशेषणम्)
इति	अव्ययम्	यदि	अव्ययम्
मन्यसे	मन् (मन - ज्ञाने) आत्म. कर्तरि लट्. मपु. एक.	ततः	अव्ययम्
योगेश्वर	अ. पुं. सम्बो. एक.	त्वम्	युष्मद्- द. सर्व. प्र. एक.
अव्ययम्	अ. पुं. द्वि. एक. (विशेषणम्)	आत्मानम्	आत्मन्- न. पुं. द्वि. एक. (विशेष्यम्)
मे	अस्मद्- द. सर्व. च. एक.	दर्शय	दृश् (दृशिर् - प्रेक्षणे) णिच्. पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	तच्छक्यम्	तत् + शक्यम्	छत्वसन्धिः ।
	ततो मे	ततः + मे	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	दर्शयात्मानम्	दर्शय + आत्मानम्	सवर्णदीर्घसन्धिः ।
(ख) समासः	योगेश्वर	योगानाम् ईश्वरः योगेश्वरः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः ।	
	अव्ययम्	न विद्यते व्ययः यस्य सः अव्ययः, तम् - बहुव्रीहिः ।	
(ग) कृदन्तः	शक्यम्	शक् (शक्लृ - शक्तौ) + यत् (कर्मणि) ।	
	द्रष्टुम्	दृश् (दृशिर् - प्रेक्षणे) + तुमुन् ।	

भावस्पष्टीकरणम् -

मन्यसे ।	
किं मन्यसे ?	**यदि** मन्यसे ।
यदि **कीदृशं** मन्यसे ?	यदि **शक्यं** मन्यसे ।
यदि **किं कर्तुं** शक्यं मन्यसे ?	यदि **द्रष्टुं** शक्यं मन्यसे ।
यदि **किं** द्रष्टुं शक्यं मन्यसे ?	यदि **तत्** द्रष्टुं शक्यं मन्यसे ।
तर्हि किम्?	**ततः दर्शय ।**
ततः **कस्य** दर्शय ?	ततः **मे** दर्शय ।
ततः **कं** मे दर्शय ?	ततः **आत्मानं** मे दर्शय ।

ततः **कीदृशम्** आत्मानं मे दर्शय ?	ततः **अव्ययम्** आत्मानं मे दर्शय ।
ततः **कः** अव्ययम् आत्मानं मे दर्शय ?	ततः **त्वम्** अव्ययम् आत्मानं मे दर्शय ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**प्रभो, योगेश्वर !**

तात्पर्यम् - श्रीकृष्ण ! तत् रूपं मया अवलोकितुं शक्यम् इति यदि चिन्तयसि तर्हि त्वं तत् अनश्वरं रूपं मां दर्शय ।

श्रीभगवानुवाच - पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ।
नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥११.५॥

पदच्छेदः -

श्रीभगवान्, उवाच - पश्य, मे, पार्थ, रूपाणि, शतशः, अथ, सहस्रशः ।
नानाविधानि, दिव्यानि, नानावर्णाकृतीनि, च ॥

अन्वयः - पार्थ ! शतशः अथ सहस्रशः नानाविधानि दिव्यानि नानावर्णाकृतीनि च मे रूपाणि पश्य ।

पदार्थः - पार्थ = अर्जुन ! शतशः = शताधिकानि, अथ = अपि च, सहस्रशः = सहस्राधिकानि, नानाविधानि = बहुप्रकाराणि, दिव्यानि = अप्राकृतानि, नानावर्णाकृतीनि = नाना-वर्णाकाराणि च, मे = मम, रूपाणि = अवस्थाः (स्वरूपाणि), पश्य = वीक्षस्व ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	शतशः	अव्ययम्
अथ	अव्ययम्	सहस्रशः	अव्ययम्
नानाविधानि	अ. नपुं. द्वि. बहु. (विशेषणम्)	दिव्यानि	अ. नपुं द्वि. बहु. (विशेषणम्)
नानावर्णकृतीनि	इ. नपुं. द्वि. बहु. (विशेषणम्)	च	अव्ययम्
मे	अस्मद्- द. सर्व. ष. एक.	रूपाणि	अ. नपुं. द्वि. बहु. (विशेषणम्)
पश्य	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः शतशोऽथ — शतशः + अथ — विसर्गसन्धिः (सकारः) रेफः,उकारः, गुणः, पूर्वरूपं च ।

(ख) समासः नानाविधानि — नाना विधाः येषां तानि नानाविधानि - बहुव्रीहिः ।
नानावर्णाकृतीनि — नाना वर्णाकृतयः येषां तानि नानावर्णाकृतीनि - बहुव्रीहिः ।

(ग) तद्धितान्तः शतशः — शत + शस्, शतं शतमिति शतशः - वीप्सायां शस्।

सहस्रशः — सहस्र + शस्, सहस्रं सहस्रमिति सहस्रशः - वीप्सायां शस्।

पार्थ — पृथा + अण् (अपत्यार्थे), तत्सम्बुद्धौ, पृथायाः अपत्यं पुमान् इत्यर्थः।

दिव्यानि — दिव् (दिवुक्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्ति-गतिषु) + यत् (भवार्थे), दिवि भवम्।

भावस्पष्टीकरणम् -

पश्य।	
कानि पश्य ?	**रूपाणि** पश्य।
कस्य रूपाणि पश्य ?	**मे** रूपाणि पश्य।
कीदृशानि मे रूपाणि पश्य ?	**नानावर्णाकृतीनि** मे रूपाणि पश्य।
नानावर्णाकृतीनि **पुनः कीदृशानि** मे रूपाणि पश्य ?	नानावर्णाकृतीनि **दिव्यानि** मे रूपाणि पश्य।
नानावर्णाकृतीनि दिव्यानि, **पुनः च कीदृशानि** मे रूपाणि पश्य ?	नानावर्णाकृतीनि दिव्यानि, **नानाविधानि** मे रूपाणि पश्य।
नानावर्णाकृतीनि दिव्यानि, नानाविधानि, **पुनश्च कतिविधानि** मे रूपाणि पश्य ?	नानावर्णाकृतीनि दिव्यानि, नानाविधानि, **शतशः** मे रूपाणि पश्य।
नानावर्णाकृतीनि दिव्यानि, नानाविधानि, शतशः **अथ पुनश्च कतिविधानि** मे रूपाणि पश्य ?	नानावर्णाकृतीनि दिव्यानि, नानाविधानि, शतशः **अथसहस्रशः** मे रूपाणि पश्य।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - अर्जुन ! बहुप्रकाराणि दिव्यानि नाना-आकारकाणि च मम रूपाणि पश्य।

पश्यादित्यान्वसून् रुद्रानश्विनौ मरुतस्तथा।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥११.६॥

पदच्छेदः - पश्य, आदित्यान्, वसून्, रुद्रान्, अश्विनौ, मरुतः, तथा।
बहूनि, अदृष्टपूर्वाणि, पश्य, आश्चर्याणि, भारत ॥

अन्वयः - भारत ! आदित्यान् वसून् रुद्रान् अश्विनौ तथा मरुतः पश्य, अदृष्टपूर्वाणि बहूनि आश्चर्याणि पश्य।

पदार्थः - भारत = अर्जुन ! आदित्यान् = द्वादश-आदित्यान्, वसून् = अष्टवसून्, रुद्रान् = एकादश-रुद्रान्, अश्विनौ = देववैद्यौ, तथा = तथा, मरुतः = सप्त मरुतः, पश्य = अवलोकय, अदृष्टपूर्वाणि = पूर्वम् अनवलोकितानि, बहूनि = नानासङ्ख्याकानि, आश्चर्याणि = अद्भुतानि, पश्य = अवलोकय।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	आदित्यान्	अ. पुं. द्वि. बहु.
वसून्	उ. पुं. द्वि. बहु.	रुद्रान्	अ. पुं. द्वि. बहु.
अश्विनौ	अश्विन्- न. पुं. द्वि. द्वि.	तथा	अव्ययम्
मरुतः	मरुत्- त. पुं. द्वि. बहु.	पश्य	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लोट्. मपु. एक.
अदृष्टपूर्वाणि	अ. नपुं. द्वि. बहु. (विशेषणम्)	बहूनि	उ. नपुं. द्वि. बहु. (विशेषणम्)
आश्चर्याणि	अ. नपुं. द्वि. बहु. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः	पश्यादित्यान्	पश्य + आदित्यान्	सवर्णदीर्घसन्धिः ।
	मरुतस्तथा	मरुतः + तथा	विसर्गसन्धिः (सकारः) ।
	बहून्यदृष्टपूर्वाणि	बहूनि + अदृष्टपूर्वाणि	यण्सन्धिः ।
	पश्याश्चर्याणि	पश्य + आश्चर्याणि	सवर्णदीर्घसन्धिः ।
(ख) समासः	अदृष्टपूर्वाणि	पूर्वं दृष्टानि दृष्टपूर्वाणि - सुप्सुपासमासः ।	
		न दृष्टपूर्वाणि अदृष्टपूर्वाणि - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	आश्चर्याणि	आ + चर् (चर - गतिभक्षणयोः) + ण्यत्, तानि ।	
(घ) तद्धितान्तः	आदित्यान्	अदिति + ण्य (अदितेः अपत्यं पुमान्), तान् ।	
	भारत	भरत + अण् (अपत्यार्थे), तत्सम्बुद्धौ, भरतस्य अपत्यं पुमान् ।	

भावस्पष्टीकरणम् -

पश्य ।	
कान् पश्य ?	**आदित्यान्** पश्य ।
आदित्यान् **पुनः कान्** पश्य ?	आदित्यान् **वसून्** पश्य ।
आदित्यान् वसून् **पुनश्च कान्** पश्य ?	आदित्यान् वसून् **रुद्रान् च** पश्य ।
आदित्यान् वसून् रुद्रान् **पुनश्च कौ** पश्य ?	आदित्यान् वसून् रुद्रान् **अश्विनौ च** पश्य ।
आदित्यान् वसून् रुद्रान् अश्विनौ **तथा च कान्** पश्य ?	आदित्यान् वसून् रुद्रान् अश्विनौ **तथा च मरुतः** पश्य ।
पश्य ।	
कानि पश्य ?	**आश्चर्याणि** पश्य ।

कीदृशानि आश्चर्याणि पश्य ?	**अदृष्टपूर्वाणि** आश्चर्याणि पश्य।
कतिविधानि अदृष्टपूर्वाणि आश्चर्याणि पश्य ?	**बहूनि** अदृष्टपूर्वाणि आश्चर्याणि पश्य।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - अर्जुन ! द्वादशादित्यान् अष्टवसून् एकादशरुद्रान् देववैद्यौ तथा मरुतः पश्य, पूर्वम् अनवलोकितानि नानासङ्ख्याकानि अद्भुतानि अत्र पश्य।

इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरम्।
मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि ॥११.७॥

पदच्छेदः - इह, एकस्थम्, जगत्, कृत्स्नम्, पश्य, अद्य, सचराचरम्।
मम, देहे, गुडाकेश, यत्, च, अन्यत्, द्रष्टुम्, इच्छसि ॥

अन्वयः - गुडाकेश ! अद्य एकस्थं सचराचरं कृत्स्नं जगत् अन्यत् च यत् द्रष्टुम् इच्छसि तत्सर्वम् इह मम देहे पश्य।

पदार्थः - गुडाकेश = जितनिद्र (अर्जुन) ! अद्य = इदानीम्, एकस्थम् = एकत्रस्थितम्, सचराचरम् = स्थावरजङ्गमसहितम्, कृत्स्नम् = सम्पूर्णम्, जगत् = भुवनम्, अन्यत् च = अपरमपि, यत् = यत्, द्रष्टुम् = अवलोकितुम्, इच्छसि = अभिलषसि, तत् इह = तत्सर्वम् अत्र, मम = मे, देहे = शरीरे, पश्य = अवलोकय (वीक्षस्व)।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
गुडाकेश	अ. पुं. सम्बो. एक.	अद्य	अव्ययम्
एकस्थम्	अ. नपुं. द्वि. एक. (विशेषणम्)	सचराचरम्	अ. नपुं. द्वि. एक. (विशेषणम्)
कृत्स्नम्	अ. नपुं. द्वि. एक. (विशेषणम्)	जगत्	अ. नपुं. द्वि. एक. (विशेष्यम्)
अन्यत्	अव्ययम्	च	अव्ययम्
यत्	अव्ययम्	द्रष्टुम्	तुमुन्नन्तम् अव्ययम्
इच्छसि	इष् (इषु - इच्छायाम्) पर.कर्तरि लट्. मपु. एक.	इह	अव्ययम्
मम	अस्मद्- द. सर्व. ष. एक.	देहे	अ. पुं. स. एक.
पश्य	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	इहैकस्थम्	इह + एकस्थम्	वृद्धिसन्धिः ।
	पश्याद्य	पश्य + अद्य	सवर्णदीर्घसन्धिः ।
	यच्च	यत् + च	श्चुत्वसन्धिः ।
	चान्यत्	च + अन्यत्	सवर्णदीर्घसन्धिः ।
	अन्यद्द्रष्टुम्	अन्यत् + द्रष्टुम्	जश्त्वसन्धिः ।
(ख) समासः	एकस्थम्	एकस्मिन् तिष्ठति इति एकस्थं, तत् - कर्तरि क उपपदसमासः ।	
	सचराचरम्	चराचरैः सहितं, सचराचरम् - बहुव्रीहिः ।	
	गुडाकेश	गुडाकायाः (निद्रायाः) ईशः गुडाकेशः, तत्सम्बुद्धौ-षष्ठीतत्पुरुषः ।	
	चरम्	चर् (चर - गतिभक्षणयोः) + अच् ।	
(ग) कृदन्तः	देहे	दिह् (दिह - उपचये) + घञ् (भावे), तस्मिन् ।	
	द्रष्टुम्	दृश् (दृशिर् - प्रेक्षणे) + तुमुन् ।	

भावस्पष्टीकरणम् -

पश्य ।	**अद्य** पश्य ।
कदा पश्य ?	**अद्य** पश्य ।
अद्य **किं** पश्य ?	अद्य **जगत्** पश्य ।
अद्य **कीदृशं** जगत् पश्य ?	अद्य **सचराचरं** जगत् पश्य ।
अद्य सचराचरं **पुनश्च कीदृशं** जगत् पश्य ?	अद्य सचराचरं **कृत्स्नं** जगत् पश्य ।
अद्य **पुनश्च कीदृशं** सचराचरं कृत्स्नं जगत् पश्य ?	अद्य **एकस्थं** सचराचरं कृत्स्नं जगत् पश्य ।
अन्यत् च **किं कर्तुम्** इच्छसि ?	अन्यत् च **यत् द्रष्टुम्** इच्छसि ।
अन्यत् च यत् द्रष्टुम् इच्छसि । **तत् किम् ?**	अन्यत् च यत् द्रष्टुम् इच्छसि । **तत्सर्वं पश्य ।**
अन्यत् च यत् द्रष्टुम् इच्छसि । तत्सर्वं **कुत्र** पश्य ?	अन्यत् च यत् द्रष्टुम् इच्छसि । तत्सर्वम् **इह** पश्य ।
अन्यत् च यत् द्रष्टुम् इच्छसि । तत्सर्वम् इह **कस्मिन्** पश्य ?	अन्यत् च यत् द्रष्टुम् इच्छसि । तत्सर्वम् इह **देहे** पश्य ।
अन्यत् च यत् द्रष्टुम् इच्छसि । तत्सर्वम् इह **कस्य** देहे पश्य ?	अन्यत् च यत् द्रष्टुम् इच्छसि । तत्सर्वम् इह **मम** देहे पश्य ।

तात्पर्यम् - गुडाकेश ! इदानीम् एकत्रैव वर्तमानं स्थावरजङ्गमसहितं समग्रमपि भुवनं पश्य । अन्यदपि यत् यत् द्रष्टुमिच्छसि तत्सर्वं मम अस्मिन् शरीरे पश्य ।

न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥११.८॥

पदच्छेदः - न, तु, मां, शक्यसे, द्रष्टुम्, अनेन, एव, स्वचक्षुषा।
दिव्यं, ददामि, ते, चक्षुः, पश्य, मे, योगम्, ऐश्वरम् ॥

अन्वयः - अनेन स्वचक्षुषा एव मां द्रष्टुम् न शक्यसे। ते दिव्यं चक्षुः ददामि। ऐश्वरं मे योगम् पश्य।

पदार्थः - अनेन = एतेन, स्वचक्षुषा एव = स्वनेत्रेण एव,माम् = माम्, द्रष्टुम् = अवलोकितुम्, न तु शक्यसे = न समर्थः भवसि, ते = तुभ्यम्, दिव्यम् = अलौकिकम्, चक्षुः = नेत्रम्, ददामि = यच्छामि, ऐश्वरम् = ईश्वरसम्बद्धम्, मे योगम् = मम सामर्थ्यम्, पश्य = अवलोकय।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनेन	इदम्- म. सर्व. नपुं. तृ. एक. (विशेषणम्)	स्वचक्षुषा	स्वचक्षुस् - सका. नपुं. तृ. एक. (विशेष्यम्)
एव	अव्ययम्	माम्	अस्मद् - द. सर्व. द्वि. एक.
द्रष्टुम्	तुमुन्नन्तम् अव्ययम्	न	अव्ययम्
तु	अव्ययम्	शक्यसे	शक् (शक्लृ - शक्तौ) आत्म. कर्मणि लट्. मपु. एक.
ते	युष्मद्- द. सर्व. च. एक.	दिव्यम्	अ. नपुं. द्वि. एक. (विशेषणम्)
चक्षुः	चक्षुस्- सका. नपुं. द्वि. एक. (विशेष्यम्)	ददामि	दा (डुदाञ् - दाने) पर. कर्तरि लट्. उपु. एक.
ऐश्वरम्	अ. नपुं. द्वि. एक. (विशेषणम्)	मे	अस्मद् - द. सर्व. ष. एक.
योगम्	अ. पुं. द्वि. एक. (विशेष्यम्)	पश्य	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः अनेनैव — अनेन + एव वृद्धिसन्धिः।

(ख) समासः स्वचक्षुषा — स्वस्य + चक्षुः स्वचक्षुः, तेन - षष्ठीतत्पुरुषः।

(ग) कृदन्तः द्रष्टुम् — दृश् (दृशिर् - प्रेक्षणे) + तुमुन्।
योगम् — युज् (युजिर् - योगे) + घञ्, तम्।

(घ) तद्धितान्तः दिव्यम् — दिव + यत्, दिवि भवम्।
ऐश्वरम् — ईश्वर + अण् (इदमर्थे) ईश्वरस्य इदम्।

भावस्पष्टीकरणम् -

न शक्यसे ।	
किं न शक्यसे ?	**द्रष्टुं** न शक्यसे ।
केन द्रष्टुं न शक्यसे ?	**स्वचक्षुषा** द्रष्टुं न शक्यसे ।
कीदृशेन एव स्वचक्षुषा द्रष्टुं न शक्यसे ?	**अनेन** एव स्वचक्षुषा द्रष्टुं न शक्यसे ।
अनेन एव स्वचक्षुषा **कं** द्रष्टुं न शक्यसे ?	अनेन एव स्वचक्षुषा **मां** द्रष्टुं न शक्यसे ।
अनेन एव स्वचक्षुषा मां द्रष्टुं न शक्यसे । **तर्हि किम्** ?	**ददामि ।**
किं ददामि ?	**चक्षुः** ददामि ।
कीदृशं चक्षुः ददामि ?	**दिव्यं** चक्षुः ददामि ।
दिव्यं चक्षुः **कस्मै** ददामि ?	दिव्यं चक्षुः **ते** ददामि ।
दिव्यं चक्षुः ते ददामि । ततः **किम् ?**	दिव्यं चक्षुः ते ददामि । **पश्य ।**
दिव्यं चक्षुः ते ददामि । **किं** पश्य ?	दिव्यं चक्षुः ते ददामि । **योगं** पश्य ।
दिव्यं चक्षुः ते ददामि । **कीदृशं** योगं पश्य ?	दिव्यं चक्षुः ते ददामि । **ऐश्वरं** योगं पश्य ।
दिव्यं चक्षुः ते ददामि । **कस्य** ऐश्वरं योगं पश्य ?	दिव्यं चक्षुः ते ददामि । **मे** ऐश्वरं योगं पश्य ।

तात्पर्यम् - एतेन नेत्रेण एव मां द्रष्टुं समर्थः न भवसि । अतः तुभ्यम् अलौकिकं नेत्रं यच्छामि येन ईश्वरस्य मम असाधारणं सामर्थ्यं पश्य ।

सञ्जय उवाच - **एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः।**
दर्शयामास पार्थाय परमं रूपमैश्वरम् ॥११.९॥

पदच्छेदः -

सञ्जयः, उवाच - एवम्, उक्त्वा, ततः, राजन्, महायोगेश्वरः, हरिः।
दर्शयामास, पार्थाय, परमम्, रूपम्, ऐश्वरम् ॥

अन्वयः - राजन् ! महायोगेश्वरः हरिः एवम् उक्त्वा ततः परमम् ऐश्वरं रूपं पार्थाय दर्शयामास ।

पदार्थः - राजन् = धृतराष्ट्र ! महायोगेश्वरः = महान् योगेश्वरः, हरिः = कृष्णः, उक्त्वा = कथयित्वा, ततः = पश्चात्, परमम् = उत्कृष्टम्, ऐश्वरम् = ईश्वरसम्बद्धम्, रूपम् = आकरम्, पार्थाय = अर्जुनाय, दर्शयामास = प्रदर्शितवान् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
राजन्	राजन्- न. पुं. सम्बो. एक.	महायोगेश्वरः	अ. पुं. प्र. एक. (विशेषणम्)
हरिः	इ. पुं. प्र. एक. (विशेष्यम्)	एवम्	अव्ययम्
उक्त्वा	क्त्वान्तम् अव्ययम्	ततः	अव्ययम्
परमम्	अ. नपुं. प्र. एक. (विशेषणम्)	ऐश्वरम्	अ. नपुं. द्वि. एक. (विशेषणम्)
रूपम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	पार्थाय	अ. पुं. च. एक.
दर्शयामास	दृश् (दृशिर् - प्रेक्षणे) णिच्. पर. कर्तरि लिट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	ततो राजन्	ततः + राजन्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	महायोगेश्वरो हरिः	महायोगेश्वरः + हरिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	महायोगेश्वरः	योगानाम् ईश्वरः योगेश्वरः - षष्ठीतत्पुरुषः।	
		महान् च असौ योगेश्वरः महायोगेश्वरः - कर्मधारयः।	
(ग) कृदन्तः	उक्त्वा	वच् (वच - परिभाषणे) + क्त्वा।	
	पार्थ	पृथा + अण् (अपत्यार्थे) तत्सम्बुद्धौ, पृथायाः अपत्यं पुमान्।	
	ऐश्वरम्	ईश्वर + अण् (इदमर्थे) ईश्वरस्य इदम्।	

भावस्पष्टीकरणम् -

दर्शयामास।	
कः दर्शयामास ?	**हरिः** दर्शयामास।
कीदृशः हरिः दर्शयामास ?	**महायोगेश्वरः** हरिः दर्शयामास।
महायोगेश्वरः हरिः **किं कृत्वा** दर्शयामास ?	महायोगेश्वरः हरिः **एवम् उक्त्वा** दर्शयामास।
महायोगेश्वरः हरिः एवम् उक्त्वा ततः **किं** दर्शयामास ?	महायोगेश्वरः हरिः एवम् उक्त्वा ततः **रूपं** दर्शयामास।
महायोगेश्वरः हरिः एवम् उक्त्वा ततः **कीदृशं** रूपं दर्शयामास ?	महायोगेश्वरः हरिः एवम् उक्त्वा ततः **परमं** रूपं दर्शयामास।
महायोगेश्वरः हरिः एवम् उक्त्वा ततः पुनः **कीदृशं** परमं रूपं दर्शयामास ?	महायोगेश्वरः हरिः एवम् उक्त्वा ततः परमम् **ऐश्वरं** रूपं दर्शयामास।

महायोगेश्वरः हरिः एवम् उक्त्वा ततः परमम् ऐश्वरं रूपं **कस्मै** दर्शयामास ?	महायोगेश्वरः हरिः एवम् उक्त्वा ततः परमम् ऐश्वरं रूपं **पार्थाय** दर्शयामास।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**राजन् !**

तात्पर्यम् - धृतराष्ट्र ! महान् योगेश्वरः कृष्णः इत्थम् उक्त्वा पश्चात् स्वीयम् उत्कृष्टम् ईश्वरसम्बन्धिनम् आकारं पार्थाय प्रदर्शितवान्।

अनेकवक्त्रनयनमनेकाद्भुतदर्शनम्।
अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम् ॥११.१०॥
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्।
सर्वाश्चर्यमयं देवमनन्तं विश्वतोमुखम् ॥११.११॥

पदच्छेदः - अनेकवक्त्रनयनम्, अनेकाद्भुतदर्शनम्।
अनेकदिव्याभरणम्, दिव्यानेकोद्यतायुधम् ॥
दिव्यमाल्याम्बरधरम्, दिव्यगन्धानुलेपनम्।
सर्वाश्चर्यमयम्, देवम्, अनन्तम्, विश्वतोमुखम् ॥

अन्वयः - (तच्च रूपम्) अनेकवक्त्रनयनम् अनेकाद्भुतदर्शनम् अनेकदिव्याभरणं दिव्यानेकोद्यतायुधं दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं देवम् अनन्तं विश्वतोमुखम्।

पदार्थः - अनेकवक्त्रनयनम् = यस्मिन् बहूनि मुखानि बहूनि नेत्राणि च सन्ति, अनेकाद्भुतदर्शनम् = विविधाश्चर्यभूतं दर्शनम्, अनेकदिव्याभरणम् = नानाप्रकारकदिव्यैः आभरणैः युक्तम्, दिव्यानेकोद्यतायुधम् = अनेकैः दिव्यशस्त्रास्त्रैः युक्तम्, दिव्यमाल्याम्बरधरम् = लोको-त्तरमालावस्त्रधारकम्, दिव्यगन्धानुलेपनम् = दिव्यगन्धेन अनुलिप्तम्, सर्वाश्चर्यमयम् = सर्वविधाश्चर्ययुक्तम्, देवम् = भगवन्तम्, अनन्तम् = अन्तरहितम्, विश्वतोमुखम् = व्याप्तम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनेकवक्त्रनयनम्	अ. नपुं. द्वि. एक. (विशेषणम्)	अनेकाद्भुतदर्शनम्	अ. नपुं. द्वि. एक. (विशेषणम्)
अनेकदिव्याभरणम्	अ. नपुं. द्वि. एक. (विशेषणम्)	दिव्यानेकोद्यतायुधम्	अ. नपुं. द्वि. एक. (विशेषणम्)
दिव्यमाल्याम्बरधरम्	अ. नपुं. द्वि. एक. (विशेषणम्)	दिव्यगन्धानुलेपनम्	अ. नपुं. द्वि. एक. (विशेषणम्)

सर्वाश्चर्यमयम्	अ. नपुं. द्वि. एक. (विशेषणम्)	देवम्	अ. नपुं. द्वि. एक. (विशेषणम्)
अनन्तम्	अ. नपुं. द्वि. एक. (विशेषणम्)	विश्वतोमुखम्	अ. नपुं. द्वि. एक. (विशेषणम्)

व्याकरणम् -

(क) समासः अनेकवक्त्रनयनम् वक्त्रं च नयनं च अनयोः समाहारः वक्त्रनयनम् - समाहारद्वन्द्वः।
अनेकं वक्त्रनयनं यस्मिन् तत् अनेकवक्त्रनयनम् - बहुव्रीहिः।

अनेकाद्भुतदर्शनम् अनेकम् अद्भुतम् अनेकाद्भुतम् - कर्मधारयः।
अनेकाद्भुतस्य दर्शनं यस्मिन् तत् अनेकाद्भुतदर्शनम् - बहुव्रीहिः।

अनेकदिव्याभरणम् दिव्यम् आभरणं दिव्याभरणम् - कर्मधारयः।
अनेकं दिव्याभरणं यस्मिन् तत् अनेकदिव्याभरणम् - बहुव्रीहिः।

दिव्यानेकोद्यतायुधम् उद्यतम् आयुधम् उद्यतायुधम् - कर्मधारयः।
अनेकम् उद्यतायुधम् अनेकोद्यतायुधम् - कर्मधारयः।
दिव्यम् अनेकोद्यतायुधं यस्मिन् तत् दिव्यानेकोद्यतायुधम् -बहुव्रीहिः।

दिव्यमाल्याम्बरधरम् माल्यं च अम्बरं च माल्याम्बरे - द्वन्द्वः।
दिव्ये माल्याम्बरे दिव्यमाल्याम्बरे - कर्मधारयः।
दिव्यमाल्याम्बरयोः धरः दिव्यमाल्याम्बरधरः, तम् - षष्ठीतत्पुरुषः।

दिव्यगन्धानुलेपनम् दिव्यः गन्धः दिव्यगन्धः - कर्मधारयः।
दिव्यगन्धस्य अनुलेपनं यस्मिन् तत् दिव्यगन्धानुलेपनम् - बहुव्रीहिः।

अनन्तम् न विद्यते अन्तः यस्य सः अनन्तः, तम् - बहुव्रीहिः।

विश्वतोमुखम् विश्वतः मुखानि यस्य सः विश्वतोमुखः, तम् - बहुव्रीहिः।

देवम् दिव् (दिवु - क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्न-कान्तिगतिषु) + घञ्, (दीव्यतीति देवः) तम्।

(ख) कृदन्तः वक्त्रम् वच् (वच - परिभाषणे) + ष्ट्रन् (करणार्थे) वक्ति अनेन इत्यर्थः।

नयनम् नी (णीञ् - प्रापणे) + ल्युट् (करणे)।

दर्शनम् दृश् (दृशिर् - प्रेक्षणे) + ल्युट् (भावे)।

आभरणम् आ + भृ (भृञ् - भरणे) + ल्युट् (भावे)।

अनुलेपनम् अनु + लिप् (लिप - उपदेहे) + ल्युट् (भावे)।

उद्यतः उद् + यम् (यम - उपरमे) + क्त (कर्तरि)।

आश्चर्यमयम् आश्चर्य + मयट्।

भावस्पष्टीकरणम् -

देवम्।	
कं देवम्?	**अनन्तम्** देवम्।
कीदृशम् अनन्तं देवम्?	**विश्वतोमुखम्** अनन्तं देवम्।
पुनः कीदृशं विश्वतोमुखम् अनन्तं देवम्?	**सर्वाश्चर्यमयं** विश्वतोमुखम् अनन्तं देवम्।
पुनः कीदृशं सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम्?	**दिव्यगन्धानुलेपनं** सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम्।
पुनः कीदृशं सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम्?	**दिव्यमाल्याम्बरधरं** दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम्।
पुनः कीदृशं दिव्यमाल्याम्बरधरं दिव्यगन्धा-नुलेपनं सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम्?	**दिव्यानेकोद्यतायुधं** दिव्यमाल्याम्बरधरं दिव्य-गन्धानुलेपनं सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम्।
पुनः कीदृशं दिव्यानेकोद्यतायुधं दिव्यमाल्या-म्बरधरं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम्?	**अनेकदिव्याभरणं** दिव्यानेकोद्यतायुधं दिव्यमाल्या-म्बरधरं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम्।
पुनः कीदृशम् अनेकदिव्याभरणं दिव्यानेको-द्यतायुधं दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम्?	**अनेकाद्भुतदर्शनम्** अनेकदिव्याभरणं दिव्यानेको-द्यतायुधं दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम्।
पुनः कीदृशम् अनेकाद्भुतदर्शनम् अनेकदिव्या-भरणं दिव्यानेकोद्यतायुधं दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनं सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम्?	**अनेकवक्त्रनयनम्** अनेकाद्भुतदर्शनम् अनेकदिव्या-भरणं दिव्यानेकोद्यतायुधं दिव्यमाल्याम्बरधरं दिव्य-गन्धानुलेपनं सर्वाश्चर्यमयं विश्वतोमुखम् अनन्तं देवम्।

तात्पर्यम् - भगवान् कृष्णः अर्जुनाय तादृशं स्वरूपं प्रदर्शयामास यस्मिन् बहूनि मुखानि नेत्राणि अद्भुतवस्तूनि दिव्याभरणानि लोकोत्तरशस्त्राणि च आसन्। तच्च स्वरूपम् अत्यन्तं विस्मयकरं द्योतमानं व्याप्तं च आसीत्।

दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता।
यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः॥११.१२॥

पदच्छेदः - दिवि, सूर्यसहस्रस्य, भवेत्, युगपत्, उत्थिता।
यदि, भाः, सदृशी, सा, स्यात्, भासः, तस्य, महात्मनः॥

अन्वयः - यदि दिवि सूर्यसहस्रस्य भाः युगपत् उत्थिता भवेत् सा तस्य महात्मनः भासः सदृशी स्यात्।

पदार्थः - यदि = चेत्, दिवि = आकाशे, सूर्यसहस्रस्य = आदित्यसहस्रस्य, भाः = कान्तिः, युगपत् = सद्यः (एकस्मिन् काले), उत्थिता भवेत् = उद्गता स्यात्, सा = कान्तिः, महात्मनः = महानुभावस्य, तस्य = नारायणस्य, भासः = कान्तेः, सदृशी = तुल्या, स्यात् = भवेत्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यदि	अव्ययम्	दिवि	दिव्- व. पुं. स. एक.
सूर्यसहस्रस्य	अ. पुं. ष. एक.	भाः	भास् - सका. स्त्री. प्र. एक. (विशेषणम्)
युगपत्	अव्ययम्	उत्थिता	आ. स्त्री. प्र. एक. (विशेष्यम्)
भवेत्	भू (भू - सत्तायाम्) पर. कर्तरि विधिलिङ्. प्रपु. एक.	सा	तद्- द. सर्व. स्त्री. प्र. एक. (विशेषणम्)
महात्मनः	महात्मन् - न. पुं. ष. एक. (विशेषणम्)	तस्य	तद्- द. सर्व. पुं. ष. एक. (विशेषणम्)
भासः	भास्- सका. स्त्री. ष. एक.	सदृशी	ई. स्त्री. प्र. एक.
स्यात्	अस् (अस - भुवि) पर. कर्तरि विधिलिङ्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	भवेद्युगपत्	भवेत् + युगपत्	जश्त्वसन्धिः।
	स्याद्भासः	स्यात् + भासः	जश्त्वसन्धिः।
	भासस्तस्य	भासः + तस्य	विसर्गसन्धिः (सकारः)।
(ख) समासः	सूर्यसहस्रस्य	सूर्याणां सहस्रं सूर्यसहस्रम्, तस्य - षष्ठीतत्पुरुषः।	
	महात्मनः	महान् आत्मा यस्य सः महात्मा, तस्य - बहुव्रीहिः।	
(ग) कृदन्तः	उत्थिता	उद् + स्था (ष्ठा - गतिनिवृत्तौ) + क्त, (कर्तरि) स्त्रीत्वे टाप्।	

भावस्पष्टीकरणम् -

भवेत्।	
किं भवेत्?	**उत्थिता** भवेत्।
कथम् उत्थिता भवेत्?	**युगपत्** उत्थिता भवेत्।
का युगपत् उत्थिता भवेत्?	**भाः** युगपत् उत्थिता भवेत्।
कस्य भाः युगपत् उत्थिता भवेत्?	**सूर्यसहस्रस्य** भाः युगपत् उत्थिता भवेत्।

कुत्र सूर्यसहस्रस्य भाः युगपत् उत्थिता भवेत् ?	दिवि सूर्यसहस्रस्य भाः युगपत् उत्थिता भवेत् ।
सा भाः स्यात् ।	
सा भाः **कीदृशी** स्यात् ?	सा भाः **सदृशी** स्यात् ।
सा भाः **कस्याः** सदृशी स्यात् ?	सा भाः **भासः** सदृशी स्यात् ।
सा भाः **कस्य** भासः सदृशी स्यात् ?	सा भाः **महात्मनः** भासः सदृशी स्यात् ।
सा भाः **कस्य** महात्मनः भासः सदृशी स्यात् ?	सा भाः **तस्य** महात्मनः भासः सदृशी स्यात् ।

तात्पर्यम् - आकाशे यदि युगपदेव सहस्रं सूर्याः उत्थिताः स्युः तर्हि तेषां या कान्तिः स्यात् सा कान्तिः महानुभावस्य तस्य नारायणस्य कान्तेः तुल्या भवेत् ।

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तम् अनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥११.१३॥

पदच्छेदः - तत्र, एकस्थम्, जगत्, कृत्स्नम्, प्रविभक्तम्, अनेकधा ।
अपश्यत्, देवदेवस्य, शरीरे, पाण्डवः, तदा ॥

अन्वयः - तदा पाण्डवः देवदेवस्य तत्र शरीरे अनेकधा प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत् ।

पदार्थः - तदा = तदानीम्, पाण्डवः = अर्जुनः, देवदेवस्य = कृष्णस्य, तत्र = तस्मिन्, शरीरे = देहे, अनेकधा = बहुधा, प्रविभक्तम् = पृथग्भूतम्, कृत्स्नम् = सकलमपि, जगत् = विश्वम्, एकस्थम् = वर्तमानम्, अपश्यत् = दृष्टवान् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तदा	अव्ययम्	पाण्डवः	अ. पुं. प्र. एक.
देवदेवस्य	अ. पुं. ष. एक.	तत्र	अव्ययम्
शरीरे	अ. नपुं. स. एक.	अनेकधा	अव्ययम्
प्रविभक्तम्	अ. नपुं. द्वि. एक. (विशेषणम्)	कृत्स्नम्	अ. नपुं. द्वि. एक. (विशेषणम्)
जगत्	जगत्- त. नपुं. द्वि. एक. (विशेषणम्)	एकस्थम्	अ. नपुं. द्वि. एक.
अपश्यत्	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लङ्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	तत्रैकस्थम्	तत्र + एकस्थम्	वृद्धिसन्धिः।
	अपश्यद्देवदेवस्य	अपश्यत् + देवदेवस्य	जश्त्वसन्धिः।
	पाण्डवस्तदा	पाण्डवः + तदा	विसर्गसन्धिः (सकारः)।
(ख) समासः	एकस्थम्	एकस्मिन् तिष्ठति इति एकस्थम्, तत् - कर्तरि क उपपदसमासश्च।	
	अनेकधा	न एकधा अनेकधा - नञ्तत्पुरुषः।	
	देवदेवस्य	देवानां देवः देवदेवः, तस्य - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	प्रविभक्तम्	प्र + वि + भज् (भज - सेवायाम्) + क्त (कर्मणि)।	
	देवस्य	दिव् (दिवुक्रीडाविजिगिषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु) + घञ्, तस्य (दीव्यति इति देवः)।	
(घ) तद्धितान्तः	पाण्डवः	पाण्डु + अण् (अपत्यार्थे), पाण्डोः अपत्यं पुमान्।	

भावस्पष्टीकरणम् -

अपश्यत्।	
कथम् अपश्यत्?	**एकस्थम्** अपश्यत्।
किम् एकस्थम् अपश्यत्?	**जगत्** एकस्थम् अपश्यत्।
कीदृशं जगत् एकस्थम् अपश्यत्?	**कृत्स्नं** जगत् एकस्थम् अपश्यत्।
पुनः कीदृशं कृत्स्नं जगत् एकस्थम् अपश्यत्?	**प्रविभक्तं** कृत्स्नं जगत् एकस्थम् अपश्यत्।
कतिधा प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत्?	**अनेकधा** प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत्।
कुत्र अनेकधा प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत्?	**शरीरे** अनेकधा प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत्।
पुनः कुत्र शरीरे अनेकधा प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत्?	**तत्र** शरीरे अनेकधा प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत्।
कस्य तत्र शरीरे अनेकधा प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत्?	**देवदेवस्य** तत्र शरीरे अनेकधा प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत्।
कः देवदेवस्य तत्र शरीरे अनेकधा प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत्?	**पाण्डवः** देवदेवस्य तत्र शरीरे अनेकधा प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत्।
कदा पाण्डवः देवदेवस्य तत्र शरीरे अनेकधा प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत्?	**तदा** पाण्डवः देवदेवस्य तत्र शरीरे अनेकधा प्रविभक्तं कृत्स्नं जगत् एकस्थम् अपश्यत्।

तात्पर्यम् - तदा अर्जुनः हरेः (कृष्णस्य) तस्मिन् शरीरे बहुधा विभक्तं सकलमपि जगत् एकत्रैव वर्तमानम् अपश्यत्।

ततः सः विस्मयाविष्टो हृष्टरोमा धनञ्जयः।
प्रणम्य शिरसा देवं कृताञ्जलिरभाषत॥११.१४॥

पदच्छेदः - ततः, सः, विस्मयाविष्टः, हृष्टरोमा, धनञ्जयः।
प्रणम्य, शिरसा, देवम्, कृताञ्जलिः, अभाषत॥

अन्वयः - ततः हृष्टरोमा सः धनञ्जयः विस्मयाविष्टः शिरसा देवं प्रणम्य कृताञ्जलिः अभाषत।

पदार्थः - ततः = अनन्तरम्, हृष्टरोमा = सरोमाञ्चः, सः धनञ्जयः = सः अर्जुनः, विस्मयाविष्टः = आश्चर्योपेतः, शिरसा = शीर्षेण, देवम् = कृष्णम्, प्रणम्य = नमस्कृत्य, कृताञ्जलिः = बद्धाञ्जलिः, अभाषत = अवदत्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ततः	अव्ययम्	हृष्टरोमा	हृष्टरोमन्- न. पुं. प्र. एक. (विशेषणम्)
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	धनञ्जयः	अ. पुं. प्र. एक. (विशेषणम्)
विस्मयाविष्टः	अ. पुं. प्र. एक. (विशेषणम्)	शिरसा	शिरस्- सका. नपुं. तृ. एक.
देवम्	अ. पुं. द्वि. एक.	प्रणम्य	ल्यबन्तम् अव्ययम्
कृताञ्जलिः	इ. पुं. प्र. एक. (विशेषणम्)	अभाषत	भाष् (भाष - व्यक्तायां वाचि) आत्म. कर्तरि लङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः विस्मयाविष्टो हृष्टरोमा — विस्मयाविष्टः + हृष्टरोमा — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
कृताञ्जलिरभाषत — कृताञ्जलिः + अभाषत — विसर्गसन्धिः (रेफः)।

(ख) समासः विस्मयाविष्टः — विस्मयेन आविष्टः विस्मयाविष्टः - तृतीयातत्पुरुषः।
हृष्टरोमा — हृष्टानि रोमाणि यस्य सः हृष्टरोमा - बहुव्रीहिः।
धनञ्जयः — धनं जयति इति धनञ्जयः - कर्तरि खश् उपपदसमासश्च।
कृताञ्जलिः — कृतः अञ्जलिः येन सः कृताञ्जलिः - बहुव्रीहिः।

(ग) कृदन्तः विस्मयः — वि + स्मि (ष्मिङ् - ईषद्धसने) + अच्।
आविष्टः — आ + विश् (विश - प्रवेशने) + क्त (कर्मणि)।
हृष्टः — हृष् (हृष - तुष्टौ) + क्त (कर्तरि)।
प्रणम्य — प्र + नम् (णम - प्रह्वत्वे शब्दे च) + ल्यप्।
देवम् — दिव् (दिवु - क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु) + घञ् (भावे), तम्।
कृतः — कृ (डुकृञ् - करणे) + क्त (कर्मणि)।

भावस्पष्टीकरणम् -

ततः अभाषत ।	
ततः **कः** अभाषत ?	ततः **धनञ्जयः** अभाषत ।
ततः **कः** धनञ्जयः अभाषत ?	ततः **सः** धनञ्जयः अभाषत ।
ततः सः **कीदृशः** धनञ्जयः अभाषत ?	ततः सः **कृताञ्जलिः** धनञ्जयः अभाषत ।
ततः सः कृताञ्जलिः **पुनश्च कीदृशः** धनञ्जयः अभाषत ?	ततः सः कृताञ्जलिः **विस्मयाविष्टः** धनञ्जयः अभाषत ।
ततः सः कृताञ्जलिः विस्मयाविष्टः **पुनश्च कीदृशः** धनञ्जयः अभाषत ?	ततः सः कृताञ्जलिः विस्मयाविष्टः **हृष्टरोमा** धनञ्जयः अभाषत ।
ततः सः कृताञ्जलिः विस्मयाविष्टः हृष्टरोमा धनञ्जयः **कम्** अभाषत ?	ततः सः कृताञ्जलिः विस्मयाविष्टः हृष्टरोमा धनञ्जयः **देवम्** अभाषत ।
ततः सः कृताञ्जलिः विस्मयाविष्टः हृष्टरोमा धनञ्जयः देवं **किं कृत्वा** अभाषत ?	ततः सः कृताञ्जलिः विस्मयाविष्टः हृष्टरोमा धनञ्जयः देवं **प्रणम्य** अभाषत ।
ततः सः कृताञ्जलिः विस्मयाविष्टः हृष्टरोमा धनञ्जयः देवं **केन** प्रणम्य अभाषत ?	ततः सः कृताञ्जलिः विस्मयाविष्टः हृष्टरोमा धनञ्जयः देवं **शिरसा** प्रणम्य अभाषत ।

तात्पर्यम् - अनन्तरं सरोमहर्षः सः अर्जुनः विस्मितः शिरसा देवं प्रणम्य कृताञ्जलिः अभाषत ।

अर्जुन उवाच - पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान् ॥११.१५॥

पदच्छेदः -

अर्जुनः, उवाच - पश्यामि, देवान्, तव, देव, देहे, सर्वान्, तथा, भूतविशेषसङ्घान् ।
ब्रह्माणम्, ईशम्, कमलासनस्थम्, ऋषीन्, च, सर्वान्, उरगान्, च, दिव्यान् ॥

अन्वयः - देव ! तव देहे सर्वान् देवान् तथा भूतविशेषसङ्घान् कमलासनस्थं ब्रह्माणम् ईशं सर्वान् ऋषीन् च दिव्यान् उरगान् च पश्यामि ।

पदार्थः - देव = ईश्वर ! तव देहे = तव शरीरे, सर्वान् = सकलान्, देवान् = सुरान्, तथा = तथा, भूतविशेषसङ्घान् = विशेषप्राणिमात्रान् (भूतविशेषसमुदायान्), कमलासनस्थम् = कमलासने स्थितम्, ब्रह्माणम् = चतुर्मुखम्, ईशम् = ईश्वरम्, सर्वान् = सकलान्, ऋषीन् च = मुनीन् च, दिव्यान् = दिवि स्थितान्, उरगान् च = सर्पान् च, पश्यामि = अवलोकयामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
देव	अ. पुं. सम्बो. एक.	तव	युष्मद्- द. सर्व. ष. एक.
सर्वान्	अ. सर्व. पुं. द्वि. बहु. (विशेषणम्)	देवान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
तथा	अव्ययम्	भूतविशेष-सङ्घान्	अ. पुं. द्वि. बहु. (विशेषणम्)
कमलासनस्थम्	अ. पुं. द्वि. एक. (विशेषणम्)	ब्रह्माणम्	ब्रह्मन् - न. पुं. द्वि. एक. (विशेष्यम्)
ईशम्	अ. पुं. द्वि. एक.	ऋषीन्	इ. पुं. द्वि. बहु.
च	अव्ययम्	दिव्यान्	अ. पुं. द्वि. बहु. (विशेषणम्)
उरगान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	पश्यामि	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	देवांस्तव	देवान् + तव	सत्वसन्धिः, रुत्वम् अनुस्वारागमः सत्वं च।
	सर्वांस्तथा	सर्वान् + तथा	सत्वसन्धिः, रुत्वम् अनुस्वारागमः सत्वं च।
	ऋषींश्च	ऋषीन् + च	सत्वसन्धिः, रुत्वम् अनुस्वारागमः सत्वं श्चुत्वं च।
	उरगांश्च	उरगान् + च	सत्वसन्धिः, रुत्वम् अनुस्वारागमः सत्वं श्चुत्वं च।

(ख) समासः	भूतविशेषसङ्घान्	भूतानां विशेषाः भूतविशेषाः - षष्ठीतत्पुरुषः। भूतविशेषाणां सङ्घाः भूतविशेषसङ्घाः, तान् - षष्ठीतत्पुरुषः।
	कमलासनस्थम्	कमलमेव आसनम्, कमलासनम् - कर्मधारयः। कमलासने तिष्ठतीति कमलासनस्थः, तम् - कर्तरि कः उपपदसमासः।
	उरगान्	उरसा गच्छतीति उरगः, तान् - कर्तरि डः उपपदसमासः।
(ग) कृदन्तः	देवः	दिव् (दिवु - क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु) दिव् + घञ् (भावे)।
	देहे	दिह् (दिह - उपचये) + घञ्, तस्मिन्।
	सङ्घान्	सम् + हन् (हन - हिंसागत्योः) + अप्, तान् (टिलोपः, घत्वम्)।
	आसनम्	आस् (आस - उपवेशने) + ल्युट् (अधिकरणे)।
(घ) तद्धितान्तः	दिव्यान्	दिव + यत् (भवार्थे) तान्, (दिवि भवः)।

भावस्पष्टीकरणम् -

पश्यामि ।	
कुत्र पश्यामि ?	**देहे** पश्यामि ।
कस्य देहे पश्यामि ?	**तव** देहे पश्यामि ।
तव देहे **कान्** पश्यामि ?	तव देहे **सर्वान्** पश्यामि ।
तव देहे सर्वान् **तथा कान्** पश्यामि ?	तव देहे सर्वान् **तथा भूतविशेषसङ्घान्** पश्यामि ।
तव देहे सर्वान् तथा भूतविशेषसङ्घान् **पुनः कं** पश्यामि ?	तव देहे सर्वान् तथा भूतविशेषसङ्घान् **ब्रह्माणं** पश्यामि ।
तव देहे सर्वान् तथा भूतविशेषसङ्घान् **पुनः कीदृशं** ब्रह्माणं पश्यामि ?	तव देहे सर्वान् तथा भूतविशेषसङ्घान् **कमलासनस्थं** ब्रह्माणं पश्यामि ।
तव देहे सर्वान् तथा भूतविशेषसङ्घान् कमलासनस्थं ब्रह्माणं **पुनः कं** पश्यामि ?	तव देहे सर्वान् तथा भूतविशेषसङ्घान् कमलासनस्थं ब्रह्माणम् **ईशं** पश्यामि ।
तव देहे सर्वान् तथा भूतविशेषसङ्घान् कमलासनस्थं ब्रह्माणम् ईशं **पुनः कान्** पश्यामि ?	तव देहे सर्वान् तथा भूतविशेषसङ्घान् कमलासनस्थं ब्रह्माणम् ईशम् **ऋषीन्** च पश्यामि ।
तव देहे सर्वान् तथा भूतविशेषसङ्घान् कमलासनस्थं ब्रह्माणम् ईशं **कान्** ऋषीन् च पश्यामि ?	तव देहे सर्वान् तथा भूतविशेषसङ्घान् कमलासनस्थं ब्रह्माणम् ईशं **सर्वान्** ऋषीन् च पश्यामि ।

तात्पर्यम् - देव ! तव शरीरे सकलान् देवान् तथा स्थावरजङ्गमात्मकभूतविशेषसमुदायान्, पद्मासने स्थितं ब्रह्माणम्, पार्वतीपतिम् ईश्वरम्, सकलान् ऋषीन् मुनीन्, दिवि स्थितान् सर्पान् च पश्यामि ।

अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप ॥११.१६॥

पदच्छेदः - अनेकबाहूदरवक्त्रनेत्रम्, पश्यामि, त्वाम्, सर्वतः, अनन्तरूपम् ।
नान्तम्, न, मध्यम्, न, पुनः, तव, आदिम्, पश्यामि, विश्वेश्वर, विश्वरूप ॥

अन्वयः - विश्वेश्वर, विश्वरूप ! त्वाम् अनेकबाहूदरवक्त्रनेत्रं सर्वतः अनन्तरूपं पश्यामि । तव आदिं न पश्यामि । तव आदिं मध्यं पुनः अन्तं च न पश्यामि ।

पदार्थः - विश्वेश्वर = जगदीश्वर, विश्वरूप = सर्वरूप ! त्वाम् = भवन्तम्, अनेकबाहूदरवक्त्रनेत्रम् = अनेकहस्तोदरमुखनयनम्, सर्वतः = सर्वत्र, अनन्तरूपम् = विशालरूपम्, पश्यामि = वीक्षे (अवलोकयामि), तव = भवतः, आदिम् = मूलम्, न पश्यामि = न वीक्षे । मध्यम् = स्थितिम्, पुनः अन्तं च = पुनः लयं च, न पश्यामि = न वीक्षे ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विश्वेश्वर	अ. पुं. सम्बो. एक.	विश्वरूप	अ. पुं. सम्बो. एक.
त्वाम्	युष्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)	अनेकबाहूदर-वक्त्रनेत्रम्	अ. पुं. द्वि. एक. (विशेषणम्)
सर्वतः	अव्ययम्	अनन्तरूपम्	अ. पुं. द्वि. एक. (विशेषणम्)
पश्यामि	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लट्. उपु. एक.	तव	युष्मद्- द. सर्व. ष. एक.
आदिम्	अ. पुं. द्वि. एक. (विशेषणम्)	न	अव्ययम्
मध्यम्	अ. पुं. द्वि. एक. (विशेषणम्)	पुनः	अव्ययम्
अन्तम्	अ. पुं. द्वि. एक. (विशेषणम्)	च	अव्ययम्

व्याकरणम् -

(क) सन्धिः	सर्वतोऽनन्तरूपम्	सर्वतः + अनन्तरूपम्	विसर्गसन्धिः (सकारः) रेफः, उकारः गुणः पूर्वरूपं च।
	नान्तम्	न + अन्तम्	सवर्णदीर्घसन्धिः।
	पुनस्तव	पुनः + तव	विसर्गसन्धिः (सकारः)।
	तवादिम्	तव + आदिम्	सवर्णदीर्घसन्धिः।

(ख) समासः	अनेकबाहूदरवक्त्रनेत्रम्	बाहुश्च उदरं च वक्त्रं च नेत्रं च एषां समाहारः बाहूदरवक्त्रनेत्रम् - द्वन्द्वः। अनेकं बाहूदरवक्त्रनेत्रं यस्मिन् सः, अनेकबाहूदरवक्त्रनेत्रः, तम् - बहुव्रीहिः।
	अनन्तरूपम्	अनन्तं रूपं यस्य सः अनन्तरूपः, तम् - बहुव्रीहिः।
	विश्वेश्वर	विश्वस्य ईश्वरः विश्वेश्वरः, तत्सम्बुद्धौ - बहुव्रीहिः।

भावस्पष्टीकरणम् -

पश्यामि।	
कं पश्यामि ?	**त्वां पश्यामि।**
कीदृशं त्वां पश्यामि ?	**अनेकबाहूदरवक्त्रनेत्रं त्वां पश्यामि।**
पुनः कीदृशम् अनेकबाहूदरवक्त्रनेत्रं त्वां पश्यामि ?	**सर्वतोऽनन्तरूपम् अनेकबाहूदरवक्त्रनेत्रं त्वां पश्यामि।**

न पश्यामि।	
किं न पश्यामि ?	**आदिं** न पश्यामि।
आदिं **पुनः किं** च न पश्यामि ?	आदिं **मध्यं** च न पश्यामि।
आदिं मध्यं **पुनः किं** न पश्यामि ?	आदिं मध्यम् **अन्तं च** न पश्यामि।
कस्य आदिं मध्यम् अन्तं च न पश्यामि ?	**तव** आदिं मध्यम् अन्तं च न पश्यामि।
अस्मिन् श्लोके सम्बोधनपदे के ?	**विश्वेश्वर, विश्वरूप** !

तात्पर्यम् - जगदीश्वर ! सर्वरूप ! त्वां तव बहुहस्तं बहुमुखं बहुनयनम् अनन्तं च स्वरूपं पश्यामि। तव मूलं मध्यम् अन्तं च ज्ञातुं न शक्नोमि।

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम्।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥११.१७॥

पदच्छेदः - किरीटिनम्, गदिनम्, चक्रिणम्, च, तेजोराशिम्, सर्वतः, दीप्तिमन्तम्।
पश्यामि, त्वाम्, दुर्निरीक्ष्यम्, समन्तात्, दीप्तानलार्कद्युतिम्, अप्रमेयम् ॥

अन्वयः - त्वां किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतो दीप्तिमन्तं समन्तात् दीप्तानलार्कद्युतिम् अप्रमेयं दुर्निरीक्ष्यं च पश्यामि।

पदार्थः - त्वाम् = भवन्तम्, किरीटिनम् = मुकुटधारिणम्, गदिनम् = गदाधारिणम्, चक्रिणम् = चक्रधारिणम्, तेजोराशिम् = कान्तिमन्तम्, समन्तात् = सर्वतः, दीप्तिमन्तम् = तेजस्विनम्, दीप्तानलार्कद्युतिम् = प्रदीप्ताग्नितुल्यतेजसम्, अप्रमेयम् = विज्ञातुम् अशक्यम्, दुर्निरीक्ष्यं च = द्रष्टुं कठिनं च, पश्यामि = अवलोकयामि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
त्वाम्	युष्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)	किरीटिनम्	किरीटिन्- न. पुं. द्वि. एक. (विशेषणम्)
गदिनम्	गदिन्- न. पुं. द्वि. एक. (विशेषणम्)	चक्रिणम्	चक्रिन्- न. पुं. द्वि. एक. (विशेषणम्)
तेजोराशिम्	इ. पुं. द्वि. एक. (विशेषणम्)	समन्तात्	क्रियाविशेषणम्
दीप्तिमन्तम्	दीप्तिमत्- त. पुं. द्वि. एक. (विशेषणम्)	दीप्तानला-र्कद्युतिम्	इ. पुं. द्वि. एक. (विशेषणम्)

अप्रमेयम्	अ. पुं. द्वि. एक. (विशेषणम्)	दुर्निरीक्ष्यम्	अ. पुं. द्वि. एक. (विशेषणम्)
च	अव्ययम्	पश्यामि	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः सर्वतो दीप्तिमन्तम् सर्वतः + दीप्तिमन्तम् विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

समन्ताद्दीप्तानलार्कद्युतिम् समन्तात् + दीप्तानलार्कद्युतिम् जश्त्वसन्धिः ।

(ख) समासः तेजोराशिः

तेजोराशिम् तेजसः राशिः तेजोराशिः - षष्ठीतत्पुरुषः ।

तेजोराशिः यस्मिन् सः तेजोराशिः, तम् - बहुव्रीहिः ।

दीप्तानलार्कद्युतिम् अनलश्च अर्कश्च अनलार्कौ - द्वन्द्वः ।

दीप्तौ अनलार्कौ दीप्तानलार्कौ - कर्मधारयः ।

दीप्तानलार्कयोः द्युतिः, दीप्तानलार्कद्युतिः - षष्ठीतत्पुरुषः ।

दीप्तानलार्कद्युतिः इव द्युतिः यस्य सः दीप्तानलार्कद्युतिः, तम् - बहुव्रीहिः ।

अप्रमेयम् न प्रमेयः अप्रमेयः, तम् - नञ्तत्पुरुषः ।

(ग) कृदन्तः दुर्निरीक्ष्यम् दुर् + निर् + ईक्ष् (ईक्ष - दर्शने) + ण्यत् ।

दीप्तः दीप् (दीपी - दीप्तौ) + क्त (कर्तरि) ।

प्रमेयम् प्र + मा (माङ् - माने शब्दे च) + यत् (कर्मणि) ।

(घ) तद्धितान्तः किरीटिनम् किरीट + इनि (मतुबर्थे), तम्, किरीटम् अस्य अस्मिन् वा अस्ति इति ।

गदिनम् गदा + इनि (मतुबर्थे) तम्, गदा अस्य अस्मिन् वा अस्ति इति ।

चक्रिणम् चक्र + इनि (मतुबर्थे) तम्, चक्रम् अस्य अस्मिन् वा अस्ति इति ।

दीप्तिमन्तम् दीप्ति + मतुप्, तम्, दीप्तिः अस्य अस्मिन् वा अस्ति इति ।

भावस्पष्टीकरणम् -

पश्यामि ।	
कं पश्यामि ?	**त्वां** पश्यामि ।
त्वां **कीदृशं** पश्यामि ?	त्वां **किरीटिनं** पश्यामि ।
त्वां किरीटिनं **पुनः कीदृशं** पश्यामि ?	त्वां किरीटिनं **गदिनं** पश्यामि ।
त्वां किरीटिनं गदिनं **पुनः कीदृशं** पश्यामि ?	त्वां किरीटिनं गदिनं **चक्रिणं** पश्यामि ।
त्वां किरीटिनं गदिनं चक्रिणं **पुनः कीदृशं** पश्यामि ।	त्वां किरीटिनं गदिनं चक्रिणं **तेजोराशिं** पश्यामि ।

त्वां किरीटिनं गदिनं चक्रिणं तेजोराशिं **पुनः कीदृशं** पश्यामि ?	त्वां किरीटिनं गदिनं चक्रिणं तेजोराशिं **सर्वतो दीप्तिमन्तं** पश्यामि।
त्वां किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतो दीप्तिमन्तं **पुनः कीदृशं** पश्यामि ?	त्वां किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतो दीप्तिमन्तं **दुर्निरीक्ष्यं** पश्यामि।
त्वां किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतो दीप्तिमन्तं दुर्निरीक्ष्यं **पुनः कीदृशं** पश्यामि ?	त्वां किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतो दीप्तिमन्तं दुर्निरीक्ष्यम् **अप्रमेयं** पश्यामि।
त्वां किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतो दीप्तिमन्तं दुर्निरीक्ष्यम् अप्रमेयं **पुनः कीदृशं** पश्यामि ?	त्वां किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतो दीप्तिमन्तं दुर्निरीक्ष्यम् अप्रमेयं **दीप्तानलार्कद्युतिं** पश्यामि।
त्वां किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतो दीप्तिमन्तं दुर्निरीक्ष्यम् अप्रमेयं **कुतः** दीप्तानलार्कद्युतिं पश्यामि ?	त्वां किरीटिनं गदिनं चक्रिणं तेजोराशिं सर्वतो दीप्तिमन्तं दुर्निरीक्ष्यम् अप्रमेयं **समन्तात्** दीप्तानलार्कद्युतिं पश्यामि।

तात्पर्यम् - त्वं किरीटवान् गदाधरः चक्रपाणिः तेजस्वी दीप्तिमान् द्रष्टुम् अशक्यः, कान्त्या अग्नेः सूर्यस्य च समानः अप्रमेयश्च वर्तसे। तादृशं त्वाम् अहं पश्यामि।

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥११.१८॥

पदच्छेदः - त्वम्, अक्षरम्, परमम्, वेदितव्यम्, त्वम्, अस्य, विश्वस्य, परम्, निधानम्।
त्वम्, अव्ययः, शाश्वतधर्मगोप्ता, सनातनः, त्वम्, पुरुषः, मतः, मे ॥

अन्वयः - त्वं परमं वेदितव्यम् अक्षरम्, त्वम् अस्य विश्वस्य परं निधानम्, त्वम् अव्ययः, शाश्वतधर्मगोप्ता, त्वं सनातनः पुरुषः मे मतः।

पदार्थः - त्वम् = भवान्, परमम् = उत्कृष्टम्, वेदितव्यम् = ज्ञातव्यम्, अक्षरम् = अनश्वरं ब्रह्म, त्वम् अस्य = त्वम् एतस्य, विश्वस्य = जगतः, परम् = परमम्, निधानम् = आश्रयः, त्वम् अव्ययः = त्वं नाशरहितः, शाश्वतधर्मगोप्ता = सनातनधर्मरक्षकः, त्वं सनातनः = त्वं शाश्वतः, पुरुषः = पुरुषोत्तमः, मे = मम, मतः = ज्ञातः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
त्वम्	युष्मद्- द. सर्व. प्र. एक.	परमम्	अ. नपुं. प्र. एक. (विशेषणम्)
वेदितव्यम्	अ. नपुं. प्र. एक. (विशेषणम्)	अक्षरम्	अ. नपुं. प्र. एक. (विशेष्यम्)

अस्य	इदम्- म. सर्व. नपुं. ष. एक. (विशेषणम्)	विश्वस्य	अ. नपुं. ष. एक. (विशेष्यम्)
परम्	अ. नपुं. प्र. एक. (विशेषणम्)	निधानम्	अ. नपुं. प्र. एक. (विशेष्यम्)
अव्ययः	अ. पुं. प्र. एक. (विशेषणम्)	शाश्वतधर्मगोप्ता	शाश्वतधर्मगोप्तृ- ऋ. पुं. प्र. एक.
सनातनः	अ. पुं. प्र. एक. (विशेषणम्)	पुरुषः	अ. पुं. प्र. एक. (विशेष्यम्)
मे	अस्मद्- द. सर्व. ष. एक.	मतः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	सनातनस्त्वम्	सनातनः + त्वम्	विसर्गसन्धिः (सकारः)।
	पुरुषो मतः	पुरुषः + मतः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	मतो मे	मतः + मे	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	अक्षरम्	न क्षरः अक्षरः, तम् - नञ्तत्पुरुषः।	
	अव्ययः	न विद्यते व्ययः यस्य सः - बहुव्रीहिः।	
	शाश्वतधर्मगोप्ता	शाश्वतः धर्मः, शाश्वतधर्मः - कर्मधारयः। शाश्वतधर्मस्य गोप्ता, शाश्वतधर्मगोप्ता - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	वेदितव्यम्	विद् (विद - ज्ञाने) + तव्यत् (कर्मणि)।	
	निधानम्	नि + धा (डुधाञ् - धारणपोषणयोः) + ल्युट् (अधिकरणे), निधीयते अत्र इति आधारः इत्यर्थः।	
	गोप्ता	गुप् (गुपू - रक्षणे) + तृच्।	
	मतः	मन् (मन - ज्ञाने) + क्त (कर्मणि)।	
(घ) तद्धितान्तः	शाश्वतम्	शश्वत् + अण् (भवार्थे) (शश्वद्भवम्)।	
	सनातनः	सना + ट्युल् तुट् च (भवार्थे)। सदा भवः इत्यर्थः।	

भावस्पष्टीकरणम् -

त्वम् (ब्रह्म) असि।	
त्वं **कीदृशम्** (ब्रह्म) असि ?	त्वम् **अक्षरम्** (ब्रह्म) असि।
त्वं **कीदृशं पुनश्च** अक्षरम् (ब्रह्म) असि ?	त्वं **वेदितव्यम्** अक्षरम् (ब्रह्म) असि।
त्वं **कीदृशं पुनश्च** वेदितव्यम् अक्षरम् (ब्रह्म) असि ?	त्वं **परमं** वेदितव्यम् अक्षरम् (ब्रह्म) असि।
त्वम् असि।	
त्वं **कीदृशः** असि ?	त्वम् **अव्ययः** असि।
त्वम् अव्ययः **पुनश्च कीदृशः** असि ?	त्वम् अव्ययः **शाश्वतधर्मगोप्ता (च)** असि।

मतः ।	
कस्य मतः ?	**मे** मतः ।
कः मे मतः ?	**पुरुषः** मे मतः ।
कीदृशः पुरुषः मे मतः ?	**सनातनः** पुरुषः मे मतः ।
सनातनः **कः** पुरुषः मे मतः ?	सनातनः **त्वं पुरुषः** मे मतः ।

तात्पर्यम् - त्वम् अनश्वरम् उत्कृष्टं ब्रह्म, त्वम् अस्य जगतः आधारः, त्वं नाशरहितः सनातनधर्मरक्षकः च त्वं शाश्वतः पुरुषोत्तमः च असि । एवम् अहं जानामि ।

अनादिमध्यान्तमनन्तवीर्यमनन्तबाहुं शशिसूर्यनेत्रम् ।
पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपन्तम् ॥११.१९॥

पदच्छेदः - अनादिमध्यान्तम्, अनन्तवीर्यम्, अनन्तबाहुम्, शशिसूर्यनेत्रम् ।
पश्यामि, त्वाम्, दीप्तहुताशवक्त्रम्, स्वतेजसा, विश्वम्, इदम्, तपन्तम् ॥

अन्वयः - अनादिमध्यान्तम् अनन्तवीर्यम् अनन्तबाहुं शशिसूर्यनेत्रं दीप्तहुताशवक्त्रं स्वतेजसा इदं विश्वं तपन्तं त्वां पश्यामि ।

पदार्थः - अनादिमध्यान्तम् = आदिमध्यान्तरहितम्, अनन्तवीर्यम् = अनन्तपराक्रमिणम्, अनन्तबाहुम् = असंख्याकहस्तम्, शशिसूर्यनेत्रम् = चन्द्रार्कनयनम्, दीप्तहुताशवक्त्रम् = प्रदीप्ताग्निमुखम्, स्वतेजसा = आत्मकान्त्या, इदम् = एतत्, विश्वम् = जगत्, तपन्तम् = तापयन्तम्, त्वाम् = भवन्तम्, पश्यामि = अवलोकयामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनादिमध्यान्तम्	अ. पुं. द्वि. एक. (विशेषणम्)	अनन्तवीर्यम्	अ. पुं. द्वि. एक. (विशेषणम्)
अनन्तबाहुम्	उ. पुं. द्वि. एक. (विशेषणम्)	शशिसूर्यनेत्रम्	अ. पुं. द्वि. एक. (विशेषणम्)
दीप्तहुताशवक्त्रम्	अ. पुं. द्वि. एक. (विशेषणम्)	स्वतेजसा	स्वतेजस् - सका. नपुं. तृ. एक.
इदम्	अ. पुं. द्वि. एक. (विशेषणम्)	विश्वम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
तपन्तम्	तपत्- त. पुं. द्वि. एक. (विशेषणम्)	त्वाम्	युष्मद्- द. पुं. द्वि. एक. (विशेष्यम्)
पश्यामि	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) समासः

(क) समासः	अनादिमध्यान्तम्	आदिश्च मध्यश्च अन्तश्च आदिमध्यान्ताः - द्वन्द्वः । न विद्यन्ते आदिमध्यान्ताः यस्य सः अनादिमध्यान्तः, तम् - बहुव्रीहिः ।
	अनन्तवीर्यम्	अनन्तं वीर्यं यस्य सः अनन्तवीर्यः, तम् - बहुव्रीहिः ।
	अनन्तबाहुम्	अनन्तः बाहुः यस्य सः, अनन्तबाहुः, तम् - बहुव्रीहिः ।
	शशिसूर्यनेत्रम्	शशी च सूर्यश्च शशिसूर्यौ - द्वन्द्वः । शशिसूर्यौ नेत्रे यस्य सः शशिसूर्यनेत्रः, तम् - बहुव्रीहिः ।
	दीप्तहुताशवक्त्रम्	दीप्तः हुताशः दीप्तहुताशः - कर्मधारयः । दीप्तहुताशः वक्त्रेषु यस्य सः दीप्तहुताशवक्त्रः, तम् - बहुव्रीहिः ।
	स्वतेजसा	स्वस्य तेजः स्वतेजः, तेन - षष्ठीतत्पुरुषः ।
(ख) कृदन्तः	नेत्रम्	नी (णीञ् - प्रापणे) + ष्ट्रन् (नीयते अनेन इति) (करणेऽर्थे)
	दीप्तः	दीप् (दीपी - दीप्तौ) + क्त (कर्तरि) ।
	तपन्तम्	तप् (तप - सन्तापे) + शतृ (कर्तरि), तम् ।

भावस्पष्टीकरणम् -

पश्यामि ।	
कं पश्यामि ?	**त्वां** पश्यामि ।
कीदृशं त्वां पश्यामि ?	**तपन्तं** त्वां पश्यामि ।
किं तपन्तं त्वां पश्यामि ?	**विश्वं** तपन्तं त्वां पश्यामि ।
किं विश्वं तपन्तं त्वां पश्यामि ?	**इदं** विश्वं तपन्तं त्वां पश्यामि ।
केन इदं विश्वं तपन्तं त्वां पश्यामि ?	**स्वतेजसा** इदं विश्वं तपन्तं त्वां पश्यामि ।
कीदृशं स्वतेजसा इदं विश्वं तपन्तं त्वां पश्यामि ?	**दीप्तहुताशवक्त्रं** स्वतेजसा इदं विश्वं तपन्तं त्वां पश्यामि ।
पुनश्च कीदृशं स्वतेजसा इदं विश्वं तपन्तं त्वां पश्यामि ?	**शशिसूर्यनेत्रं** स्वतेजसा इदं विश्वं तपन्तं त्वां पश्यामि ।
पुनश्च कीदृशं शशिसूर्यनेत्रं स्वतेजसा इदं विश्वं तपन्तं त्वां पश्यामि ?	**अनन्तबाहुं** शशिसूर्यनेत्रं स्वतेजसा इदं विश्वं तपन्तं त्वां पश्यामि ।
पुनश्च कीदृशम् अनन्तबाहुं शशिसूर्यनेत्रं स्वतेजसा इदं विश्वं तपन्तं त्वां पश्यामि ?	**अनन्तवीर्यम्** अनन्तबाहुं शशिसूर्यनेत्रं स्वतेजसा इदं विश्वं तपन्तं त्वां पश्यामि ।
पुनश्च कीदृशम् अनन्तवीर्यम् अनन्तबाहुं शशिसूर्यनेत्रं स्वतेजसा इदं विश्वं तपन्तं त्वां पश्यामि ?	अनादिमध्यान्तम् **अनन्तवीर्यम्** अनन्तबाहुं शशिसूर्यनेत्रं स्वतेजसा इदं विश्वं तपन्तं त्वां पश्यामि ।

तात्पर्यम् - तव आदिः मध्यः अन्तश्च नास्ति, तव पराक्रमः परिच्छेत्तुं न शक्यः, तव अनन्ताः हस्ताः सन्ति, सूर्यचन्द्रौ तव नयने स्तः। तव मुखेषु जाज्वल्यमानः अग्निः भासते। त्वं स्वस्य तेजसा इदं समग्रं जगत् तापयन् वर्तसे। एतादृशं त्वामहं पश्यामि।

द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः।
दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोकत्रयं प्रव्यथितं महात्मन्॥११.२०॥

पदच्छेदः - द्यावापृथिव्योः, इदम्, अन्तरम्, हि, व्याप्तम्, त्वया, एकेन, दिशः, च, सर्वाः।
दृष्ट्वा, अद्भुतम्, रूपम्, उग्रम्, तव, इदम्, लोकत्रयम्, प्रव्यथितम्, महात्मन्॥

अन्वयः - महात्मन्! द्यावापृथिव्योः इदम् अन्तरं हि त्वया एकेन व्याप्तं सर्वाः दिशः च। तव उग्रम् अद्भुतम् इदं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम्।

पदार्थः - महात्मन् = महानुभाव! द्यावापृथिव्योः = भूम्यन्तरिक्षयोः, इदम् = असौ, अन्तरम् = अवकाशः, हि त्वया = भवता, एकेन = केवलेन, व्याप्तम् = परिव्याप्तम्, सर्वाः = सकलाः, दिशः च = आशाः (दिशाः) अपि, तव = ते, उग्रम् = क्रूरम्, अद्भुतम् = विस्मयकारकम्, इदम् = एतत्, रूपम् = स्वरूपम्, दृष्ट्वा = ईक्षित्वा, लोकत्रयम् = भुवनत्रयम्, प्रव्यथितम् = खिन्नम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महात्मन्	महात्मन्- न. पुं. सम्बो. एक.	द्यावापृथिव्योः	ई. स्त्री. ष. द्वि.
इदम्	इदम् - म. नपुं. प्र. एक. (विशेषणम्)	अन्तरम्	अ. नपुं. प्र. एक. (विशेष्यम्)
हि	अव्ययम्	त्वया	युष्मद्- द. सर्व. तृ. एक. (विशेष्यम्)
एकेन	अ. सर्व. पुं. तृ. एक. (विशेषणम्)	व्याप्तम्	अ. नपुं. प्र. एक. (विशेषणम्)
सर्वाः	आ. सर्व. स्त्री. प्र. बहु. (विशेषणम्)	दिशः	दिश्- श. स्त्री. प्र. बहु. (विशेष्यम्)
च	अव्ययम्	तव	युष्मद्- द. सर्व. ष. एक.
उग्रम्	अ. नपुं. द्वि. एक. (विशेषणम्)	अद्भुतम्	अ. नपुं. द्वि. एक. (विशेषणम्)
रूपम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	दृष्ट्वा	क्त्वान्तम् अव्ययम्
लोकत्रयम्	अ. नपुं. प्र. एक. (विशेष्यम्)	प्रव्यथितम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः

द्यावापृथिव्योरिदम्	द्यावापृथिव्योः + इदम्	विसर्गसन्धिः (रेफः)।
त्वयैकेन	त्वया + एकेन	वृद्धिसन्धिः।
दिशश्च	दिशः + च	विसर्गसन्धिः (सकारः) श्चुत्वं च।

दृष्ट्वाद्भुतम्	दृष्ट्वा + अद्भुतम्	सवर्णदीर्घसन्धिः ।
तवेदम्	तव + इदम्	गुणसन्धिः ।

(ख) समासः

महात्मन्	महान् आत्मा यस्य सः महात्मा, तत्सम्बुद्धौ - बहुव्रीहिः ।
द्यावापृथिव्योः	द्यौः च पृथिवी च द्यावापृथिव्यौ, तयोः - द्वन्द्वः ।
लोकत्रयम्	लोकानां त्रयम् लोकत्रयम्, - कर्मधारयः ।

(ग) कृदन्तः

व्याप्तम्	वि + आप् (आप्लृ - व्याप्तौ) + क्त (कर्मणि) ।
दृष्ट्वा	दृश् (दृशिर् - प्रेक्षणे) + क्त्वा ।
प्रव्यथितम्	प्र + व्यथ् (व्यथ - भयसञ्चलनयोः) + क्त (कर्मणि) ।

भावस्पष्टीकरणम् -

व्याप्तम् ।	
किं व्याप्तम् ?	**अन्तरं** व्याप्तम् ।
कयोः अन्तरं व्याप्तम् ?	**द्यावापृथिव्योः** अन्तरं व्याप्तम् ।
द्यावापृथिव्योः **किम्** अन्तरं व्याप्तम् ?	द्यावापृथिव्योः **इदम्** अन्तरं व्याप्तम् ।
द्यावापृथिव्योः इदम् अन्तरं **केन** व्याप्तम् ?	द्यावापृथिव्योः इदम् अन्तरं **त्वया** व्याप्तम् ।
द्यावापृथिव्योः इदम् अन्तरं **कीदृशेन** त्वया व्याप्तम् ?	द्यावापृथिव्योः इदम् अन्तरं त्वया **एकेन** व्याप्तम् ।
द्यावापृथिव्योः इदम् अन्तरं त्वया एकेन व्याप्तं **काः** दिशः च (व्याप्ताः) ?	द्यावापृथिव्योः इदम् अन्तरं त्वया एकेन व्याप्तं **सर्वाः** दिशः च (व्याप्ताः) ।
प्रव्यथितम् ।	
किं प्रव्यथितम् ?	**लोकत्रयं** प्रव्यथितम् ।
किं कृत्वा लोकत्रयं प्रव्यथितम् ?	**दृष्ट्वा** लोकत्रयं प्रव्यथितम् ।
किं दृष्ट्वा लोकत्रयं प्रव्यथितम् ?	**रूपं** दृष्ट्वा लोकत्रयं प्रव्यथितम् ।
किं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम् ?	**इदं** रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम् ।
कीदृशम् इदं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम् ?	**अद्भुतम्** इदं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम् ।
अद्भुतं **पुनः कीदृशम्** इदं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम् ?	अद्भुतम् **उग्रम्** इदं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम् ।
कस्य अद्भुतम् उग्रम् इदं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम् ?	**तव** अद्भुतम् उग्रम् इदं रूपं दृष्ट्वा लोकत्रयं प्रव्यथितम् ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**महात्मन् !**

तात्पर्यम् - महात्मन्! भूम्यन्तरिक्षयोः मध्ये वर्तमानः सर्वोऽपि अवकाशः भवता एकेन परिव्याप्तः अस्ति। सर्वाः दिशः अपि त्वयैव व्याप्ताः। तव क्रूरं विस्मयजनकं च इदं स्वरूपं दृष्ट्वा भुवनत्रयमपि किं भविष्यतीति चिन्ताकुलम् अस्ति।

अमी हि त्वां सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति।
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः॥११.२१॥

पदच्छेदः - अमी, हि, त्वाम्, सुरसङ्घाः, विशन्ति, केचित्, भीताः, प्राञ्जलयः, गृणन्ति।
स्वस्ति, इति, उक्त्वा, महर्षिसिद्धसङ्घाः, स्तुवन्ति, त्वाम्, स्तुतिभिः, पुष्कलाभिः॥

अन्वयः - अमी हि सुरसङ्घाः त्वां विशन्ति। केचित् भीताः प्राञ्जलयः गृणन्ति। महर्षिसिद्धसङ्घाः स्वस्ति इति उक्त्वा पुष्कलाभिः स्तुतिभिः त्वां स्तुवन्ति।

पदार्थः - अमी हि = एते हि, सुरसङ्घाः = देवसमूहाः, त्वां विशन्ति = त्वां प्रविशन्ति, केचित् भीताः = केचन भयसहिताः, प्राञ्जलयः = मुकुलितहस्ताः, गृणन्ति = स्तुवन्ति, महर्षिसिद्ध-सङ्घाः = महामुनीनां सिद्धानां च समुदायाः, गृणन्ति = स्तुवन्ति, स्वस्ति इति = स्वस्ति इत्येवम्, उक्त्वा = कथयित्वा, पुष्कलाभिः = समृद्धाभिः, स्तुतिभिः = नुतिभिः, त्वां स्तुवन्ति = त्वां प्रशंसन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अमी	अदस्- सका. सर्व. पुं. प्र. बहु. (विशेषणम्)	हि	अव्ययम्
सुरसङ्घाः	अ. पुं. प्र. बहु. (विशेष्यम्)	त्वाम्	युष्मद्- द. सर्व. द्वि. एक.
विशन्ति	विश् (विश - प्रवेशने) पर. कर्तरि लट्. प्रपु. बहु.	केचित्	अव्ययम्
भीताः	अ. पुं. प्र. बहु. (विशेषणम्)	प्राञ्जलयः	इ. पुं. प्र. बहु. (विशेष्यम्)
गृणन्ति	गॄ (गॄ - शब्दे) पर. कर्तरि लट्. प्रपु. बहु.	महर्षिसिद्धसङ्घाः	अ. पुं. प्र. बहु.
स्वस्ति	अव्ययम्	इति	अव्ययम्
उक्त्वा	क्त्वान्तम् अव्ययम्	पुष्कलाभिः	आ. स्त्री. तृ. बहु. (विशेषणम्)
स्तुतिभिः	इ. स्त्री. तृ. बहु. (विशेष्यम्)	स्तुवन्ति	स्तु (ष्टुञ् - स्तुतौ) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः सुरसङ्घा विशन्ति सुरसङ्घाः + विशन्ति विसर्गसन्धिः (लोपः)।

केचिद्भीताः	केचित् + भीताः	जश्त्वसन्धिः।
प्राञ्जलयो गृणन्ति	प्राञ्जलयः + गृणन्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
स्वस्तीति	स्वस्ति + इति	सवर्णदीर्घसन्धिः।
इत्युक्त्वा	इति + उक्त्वा	यण्सन्धिः।

(ख) समासः

सुरसङ्घाः	सुराणां सङ्घाः सुरसङ्घाः - षष्ठीतत्पुरुषः।
प्राञ्जलयः	प्रकृष्टः अञ्जलिः येषां ते प्राञ्जलयः - बहुव्रीहिः।
महर्षयः	महान्तः चामी ऋषयः महर्षयः - कर्मधारयः।

(ग) कृदन्तः

भीताः	भी (ञिभी - भये) + क्त (कर्तरि)।
स्तुतिभिः	स्तु (ष्टुञ् - स्तुतौ) + क्तिन् (भावे) ताभिः।

भावस्पष्टीकरणम् -

विशन्ति।	
कं विशन्ति?	**त्वां** विशन्ति।
के त्वां विशन्ति?	**सुरसङ्घाः** त्वां विशन्ति।
के हि सुरसङ्घाः त्वां विशन्ति?	**अमी हि** सुरसङ्घाः त्वां विशन्ति।
गृणन्ति।	
के गृणन्ति?	**केचित्** गृणन्ति।
केचित् **कीदृशाः** गृणन्ति?	केचित् **भीताः** गृणन्ति।
केचित् भीताः **पुनश्च कीदृशाः** गृणन्ति?	केचित् भीताः **प्राञ्जलयः** गृणन्ति।
स्तुवन्ति।	
कं स्तुवन्ति?	**त्वां** स्तुवन्ति।
काभिः त्वां स्तुवन्ति?	**स्तुतिभिः** त्वां स्तुवन्ति।
कीदृग्भिः स्तुतिभिः त्वां स्तुवन्ति?	**पुष्कलाभिः** स्तुतिभिः त्वां स्तुवन्ति।
किं कृत्वा पुष्कलाभिः स्तुतिभिः त्वां स्तुवन्ति?	**उक्त्वा** पुष्कलाभिः स्तुतिभिः त्वां स्तुवन्ति।
किम् इति उक्त्वा पुष्कलाभिः स्तुतिभिः त्वां स्तुवन्ति?	**स्वस्ति इति** उक्त्वा पुष्कलाभिः स्तुतिभिः त्वां स्तुवन्ति।
के स्वस्ति इति उक्त्वा पुष्कलाभिः स्तुतिभिः त्वां स्तुवन्ति?	**महर्षिसिद्धसङ्घाः** स्वस्ति इति उक्त्वा पुष्कलाभिः स्तुतिभिः त्वां स्तुवन्ति।

तात्पर्यम् - एते हि देवसमूहाः त्वां प्रविशन्ति। केचित् भयसहिताः मुकुलितहस्ताः स्तुवन्ति। बहवः मुनयः सिद्धाश्च स्वस्ति इति उक्त्वा अर्थगर्भैः स्तोत्रैः त्वां प्रशंसन्ति।

रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च।
गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे॥११.२२॥

पदच्छेदः - रुद्रादित्याः, वसवः, ये, च, साध्याः, विश्वे, अश्विनौ, मरुतः, च, ऊष्मपाः, च।
गन्धर्वयक्षासुरसिद्धसङ्घाः, वीक्षन्ते, त्वाम्, विस्मिताः, च, एव, सर्वे॥

अन्वयः - रुद्रादित्याः वसवो ये च साध्याः विश्वे अश्विनौ मरुतः च ऊष्मपाः च गन्धर्वयक्षासुरसिद्ध-सङ्घाः सर्वे विस्मिताः एव त्वां वीक्षन्ते।

पदार्थः - रुद्रादित्याः = एकादशरुद्राः द्वादशादित्याः च, वसवः = अष्टवसवः, ये च साध्याः = ये अपि साध्याः, विश्वे = विश्वेदेवाः, अश्विनौ = देवभिषजौ, मरुतः च = सप्त मरुद्गणाः, ऊष्मपाः च = पितृगणाः च, गन्धर्वयक्षासुरसिद्धसङ्घाः = गन्धर्वयक्षासुरसिद्धसमूहाः, सर्वे = सकलाः, विस्मिताः = आश्चर्यान्विताः एव च, त्वां वीक्षन्ते = त्वां पश्यन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
रुद्रादित्याः	अ. पुं. प्र.बहु. (विशेष्यम्)	वसवः	उ. पुं. प्र.बहु. (विशेष्यम्)
ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	च	अव्ययम्
साध्याः	अ. पुं. प्र. बहु. (विशेष्यम्)	विश्वे	अ. पुं. प्र. बहु.
मरुतः	मरुत्- त. पुं. प्र. बहु. (विशेष्यम्)	ऊष्मपाः	अ. पुं. प्र. बहु. (विशेष्यम्)
गन्धर्वयक्षासुर-सिद्धसङ्घाः	अ. पुं. प्र. बहु. (विशेष्यम्)	सर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
विस्मिताः	अ. पुं. प्र. बहु. (विशेष्यम्)	एव	अव्ययम्
त्वाम्	युष्मद्- द. सर्व. द्वि. एक.	वीक्षन्ते	वि + ईक्ष् (ईक्ष - दर्शने) आत्म. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	रुद्रादित्या वसवः	रुद्रादित्याः + वसवः	विसर्गसन्धिः (लोपः)।
	साध्या विश्वे	साध्याः + विश्वे	विसर्गसन्धिः (लोपः)।
	विश्वेऽश्विनौ	विश्वे + अश्विनौ	पूर्वरूपसन्धिः।

मरुतश्च	मरुतः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
चोष्मपाः	च + ऊष्मपाः	गुणसन्धिः।
ऊष्मपाश्च	ऊष्मपाः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
गन्धर्वयक्षासुरसिद्धसङ्घा वीक्षन्ते	गन्धर्वयक्षासुरसिद्धसङ्घाः + वीक्षन्ते	विसर्गसन्धिः(लोपः)।
विस्मिताश्चैव	विस्मिताः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
चैव	च + एव	वृद्धिसन्धिः।

(ख) समासः रुद्रादित्याः — रुद्राश्च आदित्याश्च रुद्रादित्याः - द्वन्द्वः।

गन्धर्वयक्षासुरसिद्धसङ्घाः — गन्धर्वाश्च यक्षाश्च असुराश्च सिद्धाश्च गन्धर्वयक्षासुरसिद्धाः - द्वन्द्वः।

गन्धर्वयक्षासुरसिद्धानां सङ्घाः गन्धर्वयक्षासुरसिद्धसङ्घाः - षष्ठीतत्पुरुषः।

(ग) तद्धितान्तः आदित्याः — अदिति + अण् (अपत्यार्थे) अदितेः अपत्यानि पुमांसः।

साध्याः — साध् (साध - संसिद्धौ) + णिच् + यत्।

भावस्पष्टीकरणम् -

वीक्षन्ते।	
कं वीक्षन्ते ?	**त्वां** वीक्षन्ते।
के त्वां वीक्षन्ते?	**रुद्रादित्याः** त्वां वीक्षन्ते।
रुद्रादित्याः **पुनः के** त्वां वीक्षन्ते ?	रुद्रादित्याः **वसवः च** त्वां वीक्षन्ते।
रुद्रादित्याः वसवः **पुनश्च के** त्वां वीक्षन्ते ?	रुद्रादित्याः वसवः **ये च साध्याः** त्वां वीक्षन्ते।
रुद्रादित्याः वसवः ये च साध्याः **पुनश्च के** त्वां वीक्षन्ते ?	रुद्रादित्याः वसवः ये च साध्याः **विश्वे** त्वां वीक्षन्ते।
रुद्रादित्याः वसवः ये च साध्याः विश्वे **पुनश्च कौ** त्वां वीक्षन्ते ?	रुद्रादित्याः वसवः ये च साध्याः विश्वे **अश्विनौ** त्वां वीक्षन्ते।
रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ **पुनश्च के** त्वां वीक्षन्ते ?	रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ **मरुतः च** त्वां वीक्षन्ते।
रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च **पुनश्च के** त्वां वीक्षन्ते ?	रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च **ऊष्मपाः** च त्वां वीक्षन्ते।
रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च ऊष्मपाः च **पुनश्च के** त्वां वीक्षन्ते ?	रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च ऊष्मपाः च **गन्धर्वयक्षासुरसिद्धसङ्घाः** च त्वां वीक्षन्ते।

रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च ऊष्मपाः च गन्धर्वयक्षासुरसिद्धसङ्घाः **कति** त्वां वीक्षन्ते ?	रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च ऊष्मपाः च गन्धर्वयक्षासुरसिद्धसङ्घाः **सर्वे** त्वां वीक्षन्ते ।
रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च ऊष्मपाः गन्धर्वयक्षासुरसिद्धसङ्घाः च सर्वे **कीदृशाः** त्वां वीक्षन्ते ?	रुद्रादित्याः वसवः ये च साध्याः विश्वे अश्विनौ मरुतः च ऊष्मपाः गन्धर्वयक्षासुरसिद्धसङ्घाः च सर्वे **विस्मिताः** एव त्वां वीक्षन्ते ।

तात्पर्यम् - रुद्राः आदित्याः वसवः साध्याः विश्वेदेवाः देवभिषजौ अश्विनीकुमारौ मरुद्गणाः पितृगणाः गन्धर्वाणां यक्षाणाम् असुराणां सिद्धानां च समूहाः सर्वेऽपि आश्चर्यान्विताः त्वां पश्यन्ति ।

रूपं महत्ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम् ।
बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥११.२३॥

पदच्छेदः - रूपम्, महत्, ते, बहुवक्त्रनेत्रम्, महाबाहो, बहुबाहूरुपादम् ।
बहूदरम्, बहुदंष्ट्राकरालम्, दृष्ट्वा, लोकाः, प्रव्यथिताः तथा, अहम् ॥

अन्वयः - महाबाहो ! बहुवक्त्रनेत्रं बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं महत् ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः तथा अहम् ।

पदार्थः - महाबाहो = दीर्घबाहो ! बहुवक्त्रनेत्रम् = अनेकाननलोचनम्, बहुबाहूरुपादम् = असङ्ख्याकहस्तोरुचरणम्, बहूदरम् = अनेककुक्षिम्, बहुदंष्ट्राकरालम् = अनेकदन्तभयानकम्, महत् = बृहत्, ते रूपम् = तव स्वरूपम्, दृष्ट्वा = अवलोक्य, हि लोकाः = निश्चयेन जनाः, प्रव्यथिताः = चिन्ताकुलाः, तथा अहम् = तथा अहम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाबाहो	उ. पुं. सम्बो. एक.	बहुवक्त्रनेत्रम्	अ. नपुं. द्वि. एक. (विशेषणम्)
बहुबाहूरुपादम्	अ. नपुं. द्वि. एक. (विशेषणम्)	बहूदरम्	अ. नपुं. द्वि. एक. (विशेषणम्)
बहुदंष्ट्राकरालम्	अ. नपुं. द्वि. एक. (विशेषणम्)	महत्	महत्- त. नपुं. द्वि. एक. (विशेषणम्)
ते	युष्मद्- द. सर्व. ष. एक.	रूपम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
दृष्ट्वा	क्त्वान्तम् अव्ययम्	हि	अव्यम्
लोकाः	अ. पुं. प्र. बहु. (विशेष्यम्)	प्रव्यथिताः	अ. पुं. प्र. बहु. (विशेषणम्)
तथा	अव्ययम्	अहम्	अस्मद्- द. सर्व. प्र. एक.

व्याकरणम् -

(क) सन्धिः	प्रव्यथितास्तथा	प्रव्यथिताः + तथा	विसर्गसन्धिः (सकारः) ।
	तथाहम्	तथा + अहम्	सवर्णदीर्घसन्धिः ।
(ख) समासः	बहुवक्त्रनेत्रम्	वक्त्राणि च नेत्राणि च एतेषां समाहारः, वक्त्रनेत्रम् - द्वन्द्वः ।	
		बहु वक्त्रनेत्रं यस्य तत्, तत् - बहुव्रीहिः ।	
	महाबाहो	महान्तौ बाहू यस्य सः, महाबाहुः, तत्सम्बुद्धौ - बहुव्रीहिः ।	
	बहुबाहूरुपादम्	बाहवश्च ऊरवश्च पादाश्च बाहूरुपादम् - समाहारद्वन्द्वः ।	
		बहु बहुबाहूरुपादं यस्य तत् - बहुव्रीहिः ।	
	बहुदंष्ट्राकरालम्	बह्व्यश्च दंष्ट्राश्च बहुदंष्ट्राः - कर्मधारयः ।	
		बहुदंष्ट्राभिः करालं बहुदंष्ट्राकरालम् - बहुव्रीहिः ।	
(ग) कृदन्तः	वक्त्रम्	वच् (वच - परिभाषणे) + ष्ट्रन् ।	
	नेत्रम्	नी (णीञ् - प्रापणे) + ष्ट्रन् ।	
	पादम्	पद् (पद - गतौ) + घञ् (भावे) ।	
	उदरम्	उद् + ऋ (ऋ - गतौ) + अप् ।	
	दंष्ट्रा	दंश् (दंश - दंशने) + ष्ट्रन् (करणे) ।	
	दृष्ट्वा	दृश् (दृशिर् - प्रेक्षणे) + क्त्वा ।	
	लोकाः	लोक् (लोकृ - दर्शने) + घञ् (भावे) ।	
	प्रव्यथिताः	प्र + व्यथ् (व्यथ - भयसञ्चलनयोः) + क्त ।	

भावस्पष्टीकरणम् -

प्रव्यथिताः ।	
के प्रव्यथिताः ?	**लोकाः** प्रव्यथिताः ।
लोकाः **किं कृत्वा** हि प्रव्यथिताः ?	लोकाः **रूपं दृष्ट्वा** हि प्रव्यथिताः ।
कस्य रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः ?	**ते** रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः ।
कीदृशं ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः ?	**महत्** ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः ।
पुनः कीदृशं महत् ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः ?	**बहुदंष्ट्राकरालं** महत् ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः ।
पुनः कीदृशं बहुदंष्ट्राकरालं महत् ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः ?	**बहूदरं** बहुदंष्ट्राकरालं महत् ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः ।

पुनः **कीदृशं** बहूदरं बहुदंष्ट्राकरालं महत् ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः ?	**बहुबाहूरुपादं** बहूदरं बहुदंष्ट्राकरालं महत् ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः।
पुनः **कीदृशं** बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं महत् ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः ?	**बहुवक्त्रनेत्रं** बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं महत् ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः।
बहुवक्त्रनेत्रं बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं महत् ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः **तथा च कः** ?	**बहुवक्त्रनेत्रं** बहुबाहूरुपादं बहूदरं बहुदंष्ट्राकरालं महत् ते रूपं दृष्ट्वा हि लोकाः प्रव्यथिताः **तथा अहम्**।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**महाबाहो** !

तात्पर्यम् - दीर्घबाहो ! तव आकारः अत्यन्तं विचित्रः। तत्र बहूनि मुखानि लोचनानि सन्ति। बहवः हस्ताः ऊरवः पादाश्च सन्ति। बहूनि उदराणि अपि सन्ति। बहुभिः दन्तैः भयानकः दृश्यसे। एतादृशस्य आकारस्य दर्शनात् एव सर्वे जनाः किं भवेत् इति चिन्ताम् उपगताः तथा अहम्।

नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्।
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो ॥११.२४॥

पदच्छेदः - नभःस्पृशम्, दीप्तम्, अनेकवर्णम्, व्यात्ताननम्, दीप्तविशालनेत्रम्।
दृष्ट्वा, हि, त्वाम्, प्रव्यथितान्तरात्मा, धृतिम्, न, विन्दामि, शमम्, च, विष्णो ॥

अन्वयः - विष्णो ! नभःस्पृशं दीप्तम् अनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि।

पदार्थः - विष्णो = सर्वव्यापक ! नभस्पृशम् = गगनचुम्बिनम्, दीप्तम् = प्रज्वलितम्,अनेकवर्णम् = नानावर्णम्, व्यात्ताननम् = विवृतमुखम्, दीप्तविशालनेत्रम् = ज्वलितविस्तृतलोचनम्, त्वां दृष्ट्वा हि = त्वां विलोक्य, प्रव्यथितान्तरात्मा = खिन्नचित्तः, धृतिम् = धैर्यम्, शमं च = शान्तिं च, न विन्दामि = न लभे (न प्राप्नोमि)।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विष्णो	उ. पु. सम्बो. एक.	नभःस्पृशम्	नभःस्पृश्- श. पुं. द्वि. एक. (विशेष्यम्)
दीप्तम्	अ. पुं. द्वि. एक. (विशेषणम्)	अनेकवर्णम्	अ. पुं. द्वि. एक. (विशेषणम्)
व्यात्ताननम्	अ. पुं. द्वि. एक. (विशेषणम्)	दीप्तविशालनेत्रम्	अ. पुं. द्वि. एक. (विशेषणम्)

त्वाम्	युष्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)	दृष्ट्वा	क्त्वान्तम् अव्ययम्
हि	अव्ययम्	प्रव्यथितान्तरात्मा	प्रव्यथितान्तरात्मन्- न. पुं. प्र. एक. (विशेषणम्)
धृतिम्	इ. स्त्री. द्वि. एक.	शमम्	अ. पुं. द्वि. एक.
च	अव्ययम्	न	अव्ययम्
विन्दामि	विद् (विद्लृ - लाभे) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) समासः नभःस्पृशम् — नभः स्पृशतीति नभःस्पृक्, तम् - कर्तरि क्विप् उपपदसमासः ।

अनेकवर्णम् — अनेकः वर्णः यस्मिन् सः अनेकवर्णः, तम्- बहुव्रीहिः ।

प्रव्यथितान्तरात्मा — प्रव्यथितः अन्तरात्मा यस्य सः, प्रव्यथितान्तरात्मा - बहुव्रीहिः ।

व्यात्ताननम् — व्यात्तम् आननम् यस्य सः व्यात्ताननः, तम् - बहुव्रीहिः ।

दीप्तविशालनेत्रम् — दीप्ते च ते विशाले च दीप्तविशाले - कर्मधारयः ।
दीप्तविशाले नेत्रे यस्य सः दीप्तविशालनेत्रः, तम् - बहुव्रीहिः ।

(ख) कृदन्तः दीप्तम् — दीप् (दीपी - दीप्तौ) + क्त (कर्मणि) ।

दृष्ट्वा — दृश् (दृशिर् - प्रेक्षणे) + क्त्वा ।

प्रव्यथितम् — प्र + व्यथ् (व्यथ - भयसञ्चलनयोः) + क्त (कर्मणि) ।

धृतिम् — धृ + (धृञ् - धारणे) + क्तिन् ।

शमम् — शम् (शमु - उपशमने) + घञ् ।

भावस्पष्टीकरणम् -

न विन्दामि ।	
कां न विन्दामि ?	**धृतिं** न विन्दामि ।
धृतिं **पुनश्च कं** न विन्दामि ?	धृतिं **शमं च** न विन्दामि ।
कीदृशः अहं धृतिं शमं च न विन्दामि ?	**प्रव्यथितान्तरात्मा** धृतिं शमं च न विन्दामि ।
किं कृत्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि ?	**दृष्ट्वा** हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि ।
कं दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि ?	**त्वां** दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि ।

कीदृशं त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि ?	**दीप्तविशालनेत्रं** त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि।
पुनश्च कीदृशं दीप्तविशालनेत्रं त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि ?	**व्यात्ताननं** दीप्तविशालनेत्रं त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि।
पुनश्च कीदृशं व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि ?	**अनेकवर्णं** व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि।
पुनश्च कीदृशम् अनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि ?	**दीप्तम्** अनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि।
पुनश्च कीदृशं दीप्तम् अनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि ?	**नभःस्पृशं** दीप्तम् अनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा हि प्रव्यथितान्तरात्मा धृतिं शमं च न विन्दामि।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**विष्णो** !

तात्पर्यम् - हे विष्णो ! त्वं गगनचुम्बी, नानावर्णोपेतः, उद्घाटितवदनः, ज्वलितविस्तृतलोचनश्च भासि। मम चित्तं प्रकम्पते। तेन अहं धैर्यं शान्तिं च न प्राप्नोमि।

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि।
दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास॥११.२५॥

पदच्छेदः - दंष्ट्राकरालानि, च, ते, मुखानि, दृष्ट्वा, एव, कालानलसन्निभानि।
दिशः, न, जाने, न, लभे, च, शर्म, प्रसीद, देवेश, जगन्निवास॥

अन्वयः - जगन्निवास, देवेश ! दंष्ट्राकरालानि कालानलसन्निभानि च ते मुखानि दृष्ट्वा एव दिशः न जाने। शर्म च न लभे। प्रसीद।

पदार्थः - जगन्निवास = विश्वनिकेतन, देवेश = सुराधिप ! दंष्ट्राकरालानि = दन्तभयानकानि, कालानलसन्निभानि च = प्रलयाग्निसदृशानि च, ते मुखानि = तव आननानि, दृष्ट्वा एव = ईक्षित्वा एव, दिशः = आशाः, न जाने = न वेद्मि, शर्म च = सुखमपि, न लभे = न प्राप्नोमि, प्रसीद = प्रसन्नो भव।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
जगन्निवास	अ. पुं. सम्बो. एक.	देवेश	अ. पुं. सम्बो. एक.
दंष्ट्राकरालानि	अ. नपुं. द्वि. बहु. (विशेषणम्)	कालानलसन्निभानि	अ. नपुं. द्वि. बहु. (विशेषणम्)
च	अव्ययम्	ते	युष्मद्- द. सर्व. ष. एक.
मुखानि	अ. नपुं. द्वि. बहु. (विशेष्यम्)	दृष्ट्वा	क्त्वान्तम् अव्ययम्
दिशः	दिश्- श. स्त्री. द्वि. बहु.	न	अव्ययम्
जाने	ज्ञा (ज्ञा - अवबोधने) आत्म. कर्तरि लट्. उपु. एक.	शर्म	शर्मन्- न. नपुं. द्वि. एक.
च	अव्ययम्	लभे	लभ् (डुलभष् - प्राप्तौ) आत्म. कर्तरि लट्. उपु. एक.
प्रसीद	प्र + सीद् (षद्लृ - विशरणगत्यवसादनेषु) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः
- दृष्ट्वैव — दृष्ट्वा + एव — वृद्धिसन्धिः ।
- दिशो न — दिशः + न — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः
- दंष्ट्राकरालानि — दंष्ट्राभिः करालानि दंष्ट्राकरालानि, तानि - तृतीयातत्पुरुषः ।
- कालानलसन्निभानि — कालस्य अनलः, कालानलः - षष्ठीतत्पुरुषः ।
  कालानलस्य सन्निभानि, कालानलसन्निभानि, तानि - षष्ठीतत्पुरुषः ।
- जगन्निवास — जगदेव निवासः यस्य सः जगन्निवासः, तत्सम्बुद्धौ - बहुव्रीहिः ।

(ग) कृदन्तः
- दृष्ट्वा — दृश् (दृशिर् - प्रेक्षणे) + क्त्वा ।
- शर्म — शृ (शृ - हिंसायाम्) + मनिन् ।

भावस्पष्टीकरणम् -

न जाने ।	
काः न जाने ?	दिशः न जाने ।

किं कृत्वा एव दिशः न जाने ?	**दृष्ट्वा** एव दिशः न जाने।
कानि दृष्ट्वा एव दिशः न जाने ?	**मुखानि दृष्ट्वा** एव दिशः न जाने।
कस्य मुखानि दृष्ट्वा एव दिशः न जाने ?	**ते** मुखानि दृष्ट्वा एव दिशः न जाने।
कीदृशानि ते मुखानि दृष्ट्वा एव दिशः न जाने ?	**कालानलसन्निभानि** च ते मुखानि दृष्ट्वा एव दिशः न जाने।
पुनश्च कीदृशानि कालानलसन्निभानि च ते मुखानि दृष्ट्वा एव दिशः न जाने ?	**दंष्ट्राकरालानि** कालानलसन्निभानि च ते मुखानि दृष्ट्वा एव दिशः न जाने।
दंष्ट्राकरालानि कालानलसन्निभानि च ते मुखानि दृष्ट्वा एव दिशः न जाने। **किं च न लभे ?**	दंष्ट्राकरालानि कालानलसन्निभानि च ते मुखानि दृष्ट्वा एव दिशः न जाने। **शर्म च न लभे।**
दंष्ट्राकरालानि कालानलसन्निभानि च ते मुखानि दृष्ट्वा एव दिशः न जाने। शर्म च न लभे। **(अतः) किं कुरु ?**	दंष्ट्राकरालानि कालानलसन्निभानि च ते मुखानि दृष्ट्वा एव दिशः न जाने। शर्म च न लभे। **(अतः) प्रसीद।**
अस्मिन् श्लोके सम्बोधनपदे के ?	**जगन्निवास, देवेश !**

तात्पर्यम् - विश्वनिकेतन, सुराधिप ! दन्तभयानकानि प्रलयाग्निसदृशानि च तव वदनानि दृष्ट्वा एव दिशः न जानामि। धैर्यं शान्तिं च कथमपि न प्राप्नोमि। प्रसन्नो भव।

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसङ्घैः।
भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः ॥११.२६॥
वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि।
केचिद्विलग्ना दशनान्तरेषु सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥११.२७॥

पदच्छेदः - अमी, च, त्वाम्, धृतराष्ट्रस्य, पुत्राः, सर्वे, सह, एव, अवनिपालसङ्घैः।
भीष्मो, द्रोणः, सूतपुत्रः, तथा, असौ, सह, अस्मदीयैः, अपि, योधमुख्यैः ॥
वक्त्राणि, ते, त्वरमाणाः, विशन्ति, दंष्ट्राकरालानि, भयानकानि।
केचिद्, विलग्नाः, दशनान्तरेषु, सन्दृश्यन्ते, चूर्णितैः, उत्तमाङ्गैः ॥

अन्वयः - अमी धृतराष्ट्रस्य पुत्राः सर्वे च अवनिपालसङ्घैः सह एव तथा असौ भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां दंष्ट्राकरालानि भयानकानि ते वक्त्राणि विशन्ति। केचित् दशनान्तरेषु विलग्नाः चूर्णितैः उत्तमाङ्गैः सन्दृश्यन्ते।

पदार्थः - अवनिपालसङ्घैः सहैव = राजसमुदायैः साकम् एव, सर्वे च = सकलाः अपि, अमी = एते, धृतराष्ट्रस्य पुत्राः = दुर्योधनादयः, तथा = एवम्, असौ भीष्मो द्रोणः सूतपुत्रः = अयं भीष्मः द्रोणः कर्णः च, अस्मदीयैः = आस्माकीनैः, योधमुख्यैः सह अपि = प्रधानयोधैः सह अपि, त्वां विशन्ति = त्वयि प्रविशन्ति, ते दंष्ट्राकरालानि = तव दन्तैः घोराणि, भयानकानि = भयङ्कराणि, वक्त्राणि = मुखानि, विशन्ति = प्रविशन्ति, केचित् = केचित्, दशनान्तरेषु = दन्तमध्यभागेषु, विलग्नाः = संसक्ताः, चूर्णितैः = चूर्णीभूतैः, उत्तमाङ्गैः = शीर्षैः उपलक्षिताः, सन्दृश्यन्ते = दृश्यन्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अवनिपालसङ्घैः	अ. पुं. तृ. बहु. (विशेषणम्)	सह	अव्ययम्
एव	अव्ययम्	सर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
च	अव्ययम्	अमी	अदस्- सका. सर्व. पुं. प्र. बहु. (विशेषणम्)
धृतराष्ट्रस्य	अ. पुं. ष. एक.	पुत्राः	अ. पुं. प्र. बहु. (विशेष्यम्)
तथा	अव्ययम्	असौ	अदस्- सका. सर्व. पुं. प्र. एक. (विशेषणम्)
भीष्मः	अ. पुं. प्र. एक. (विशेष्यम्)	द्रोणः	अ. पुं. प्र. एक. (विशेष्यम्)
सूतपुत्रः	अ. पुं. प्र. एक. (विशेष्यम्)	अस्मदीयैः	अ. पुं. तृ. बहु. (विशेषणम्)
योधमुख्यैः	अ. पुं. तृ. बहु. (विशेष्यम्)	सह	अव्ययम्
अपि	अव्ययम्	त्वाम्	युष्मद्- द. सर्व. द्वि. एक.
विशन्ति	विश् (विश - प्रवेशने) पर. कर्तरि लट्. प्रपु. बहु.	ते	युष्मद्- द. सर्व. ष. एक.
दंष्ट्राकरालानि	अ. नपुं. द्वि. बहु. (विशेषणम्)	भयानकानि	अ. नपुं. द्वि. बहु. (विशेषणम्)
वक्त्राणि	अ. नपुं. द्वि. बहु. (विशेष्यम्)	केचित्	अव्ययम्
दशनान्तरेषु	अ. नपुं. स. बहु.	विलग्नाः	अ. पुं. प्र. बहु.
चूर्णितैः	अ. पुं. तृ. बहु. (विशेषणम्)	उत्तमाङ्गैः	अ. नपुं. तृ. बहु. (विशेष्यम्)
सन्दृश्यन्ते	सम् + दृश् (दृशिर् - प्रेक्षणे) आत्म. कर्मणि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः सहैव सह + एव वृद्धिसन्धिः ।

	एवावनिपालसङ्घैः	एव + अवनिपालसङ्घैः	सवर्णदीर्घसन्धिः ।
	भीष्मो द्रोणः	भीष्मः + द्रोणः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	सूतपुत्रस्तथा	सूतपुत्रः + तथा	विसर्गसन्धिः (सकारः) ।
	तथासौ	तथा + असौ	सवर्णदीर्घसन्धिः ।
	त्वरमाणा विशन्ति	त्वरमाणाः + विशन्ति	विसर्गसन्धिः (लोपः) ।
	केचिद्विलग्नाः	केचित् + विलग्नाः	जश्त्वसन्धिः ।
	चूर्णितैरुत्तमाङ्गैः	चूर्णितैः + उत्तमाङ्गैः	विसर्गसन्धिः (रेफः) ।
(ख) समासः	धृतराष्ट्रस्य	धृतं राष्ट्रं येन सः धृतराष्ट्रः, तस्य - षष्ठीतत्पुरुषः ।	
	अवनिपालसङ्घैः	अवनिपालानां सङ्घाः अवनिपालसङ्घाः, तैः - षष्ठीतत्पुरुषः ।	
	सूतपुत्रः	सूतस्य पुत्रः सूतपुत्रः - षष्ठीतत्पुरुषः ।	
	योधमुख्यैः	योधेषु मुख्याः योधमुख्याः, तैः - सप्तमीतत्पुरुषः ।	
	दंष्ट्राकरालानि	दंष्ट्राभिः करालानि दंष्ट्राकरालानि, तानि - तृतीयातत्पुरुषः ।	
	दशनान्तरेषु	दशनानाम् अन्तराणि दशनान्तराणि, तेषु - षष्ठीतत्पुरुषः ।	
	उत्तमाङ्गैः	उत्तमम् अङ्गम् उत्तमाङ्गम्, तैः - कर्मधारयः ।	
(ग) कृदन्तः	त्वरमाणाः	त्वर् (ञित्वरा - सम्भ्रमे) + शानच् ।	
	विलग्नाः	लग (लगे - सङ्गे) + क्त (कर्तरि) ।	
	चूर्णितम्	चूर्ण् (चूर्ण - सङ्कोचने) + क्त (कर्तरि) ।	
(घ) तद्धितान्तः	अस्मदीयः	अस्मद् + छ (आवयोः अस्माकं वा अस्मदीयः इत्यर्थः ।)	

भावस्पष्टीकरणम् -

विशन्ति ।	
कानि विशन्ति ?	**वक्त्राणि** विशन्ति ।
कीदृशानि वक्त्राणि विशन्ति ?	**भयानकानि** वक्त्राणि विशन्ति ।
पुनश्च कीदृशानि भयानकानि वक्त्राणि विशन्ति ?	**दंष्ट्राकरालानि** भयानकानि वक्त्राणि विशन्ति ।
कस्य दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**ते** दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ।
कं ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**त्वां** ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ।
कैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**योधमुख्यैः** सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ।
पुनश्च कैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**अस्मदीयैः** योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ।

कः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**सूतपुत्रः** अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ।
पुनश्च कः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**द्रोणः** सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ।
पुनश्च कः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**भीष्मः** द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ।
कः भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**असौ** भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ।
तथा कैः सह एव असौ भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**अवनिपालसङ्घैः सह एव** असौ भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ।
के च अवनिपालसङ्घैः सह एव असौ भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**सर्वे च** अवनिपालसङ्घैः सह एव असौ भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ।
पुनश्च के अवनिपालसङ्घैः सह एव असौ भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**पुत्राः** अवनिपालसङ्घैः सह एव असौ भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ।
कस्य पुत्राः अवनिपालसङ्घैः सह एव असौ भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**धृतराष्ट्रस्य** पुत्राः अवनिपालसङ्घैः सह एव असौ भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ।
के धृतराष्ट्रस्य पुत्राः अवनिपालसङ्घैः सह एव असौ भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां ते दंष्ट्राकरालानि भयानकानि वक्त्राणि विशन्ति ?	**अमी** धृतराष्ट्रस्य पुत्राः सर्वे च अवनिपालसङ्घैः सह एव तथा असौ भीष्मः द्रोणः सूतपुत्रः अस्मदीयैः योधमुख्यैः सह त्वां दंष्ट्राकरालानि भयानकानि ते वक्त्राणि विशन्ति ।
सन्दृश्यन्ते ।	
कैः सन्दृश्यन्ते ?	**उत्तमाङ्गैः** सन्दृश्यन्ते ।
कीदृशैः उत्तमाङ्गैः सन्दृश्यन्ते ?	**चूर्णितैः** उत्तमाङ्गैः सन्दृश्यन्ते ।
कीदृशाः चूर्णितैः उत्तमाङ्गैः सन्दृश्यन्ते ?	**विलग्नाः** चूर्णितैः उत्तमाङ्गैः सन्दृश्यन्ते ।
केषु विलग्नाः चूर्णितैः उत्तमाङ्गैः सन्दृश्यन्ते ?	**दशनान्तरेषु** विलग्नाः चूर्णितैः उत्तमाङ्गैः सन्दृश्यन्ते ।

के दशनान्तरेषु विलग्नाः चूर्णितैः उत्तमाङ्गैः सन्दृश्यन्ते ।	केचित् दशनान्तरेषु विलग्नाः चूर्णितैः उत्तमाङ्गैः सन्दृश्यन्ते ।

तात्पर्यम् - एते सर्वे अपि कौरवाः अन्येषां नृपाणां समूहैः सह तव मुखानि त्वरया प्रविशन्तः सन्ति । तैः सह भीष्मः द्रोणः कर्णः तथा अस्मत्पक्षीयाः बहवो योधमुख्याः प्रविशन्तः सन्ति । तव मुखानि दंष्ट्राभिः अत्यन्तं घोराणि भयानकानि च सन्ति । तव मुखानि प्रविष्टवत्सु एतेषु केचन दन्तानां मध्ये विलग्नाः दृश्यन्ते । तेषां च शिरांसि चूर्णितानि दृश्यन्ते ।

यथा नदीनां बहवोऽम्बुवेगाः समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥११.२८॥

पदच्छेदः - यथा, नदीनाम्, बहवः, अम्बुवेगाः, समुद्रम्, एव, अभिमुखाः, द्रवन्ति ।
तथा, तव, अमी, नरलोकवीराः, विशन्ति, वक्त्राणि, अभिविज्वलन्ति ॥

अन्वयः - यथा नदीनां बहवः अम्बुवेगाः समुद्रमेवाभिमुखाः द्रवन्ति तथा अमी, नरलोकवीराः अभिविज्वलन्ति तव वक्त्राणि विशन्ति ।

पदार्थः - यथा = येन प्रकारेण, नदीनाम् = स्रोतसाम्, बहवः = असङ्ख्याकाः, अम्बुवेगाः = जलप्रवाहाः, समुद्रम् एव = सागरम् एव, अभिमुखाः = सम्मुखाः, द्रवन्ति = प्रवहन्ति, तथा = तेन प्रकारेण, अमी = एते, नरलोकवीराः = मर्त्यलोकशूराः, अभिविज्वलन्ति = प्रकाशमानानि, तव = ते, वक्त्राणि = मुखानि, विशन्ति = प्रविशन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यथा	अव्ययम्	नदीनाम्	ई. स्त्री. ष. बहु.
बहवः	उ. पुं. प्र. बहु. (विशेषणम्)	अम्बुवेगाः	अ. पुं. प्र. बहु. (विशेष्यम्)
समुद्रम्	अ. पुं. द्वि. बहु.	एव	अव्ययम्
अभिमुखाः	अ. पुं. प्र. बहु. (विशेषणम्)	द्रवन्ति	द्रु (द्रु - गतौ) पर. कर्तरि लट्. प्रपु. बहु.
तथा	अव्ययम्	अमी	अदस्- स. सर्व. प्र. बहु. (विशेषणम्)
नरलोकवीराः	अ. पुं. प्र. बहु. (विशेष्यम्)	अभिविज्वलन्ति	अभिविज्वलत् - त. नपुं. द्वि. बहु.
तव	युष्मद्- द. सर्व. ष. एक.	वक्त्राणि	अ. नपुं. द्वि. बहु.
विशन्ति	विश् (विश - प्रवेशने) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	बहवोऽम्बुवेगाः	बहवः + अम्बुवेगाः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	एवाभिमुखाः	एव + अभिमुखाः	सवर्णदीर्घसन्धिः।
	अभिमुखा द्रवन्ति	अभिमुखाः + द्रवन्ति	विसर्गसन्धिः (लोपः)।
(ख) समासः	नरलोकवीराः	नराणां लोकः नरलोकः - षष्ठीतत्पुरुषः।	
		नरलोकस्य वीराः, नरलोकवीराः - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	नदीनाम्	नद् (णद - अव्यक्ते शब्दे) + अच् + ङीप्।	
	वक्त्राणि	वच् (वच - परिभाषणे) + ष्ट्रन्।	

भावस्पष्टीकरणम् -

विशन्ति।	
कानि विशन्ति ?	**वक्त्राणि** विशन्ति।
कस्य वक्त्राणि विशन्ति ?	**तव** वक्त्राणि विशन्ति।
कीदृशानि तव वक्त्राणि विशन्ति ?	**अभिविज्वलन्ति** तव वक्त्राणि विशन्ति।
के अभिविज्वलन्ति तव वक्त्राणि विशन्ति ?	**नरलोकवीराः** अभिविज्वलन्ति तव वक्त्राणि विशन्ति।
तथा च **के** नरलोकवीराः अभिविज्वलन्ति तव वक्त्राणि विशन्ति ?	तथा **अमी** नरलोकवीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति।
यथा के द्रवन्ति तथा अमी नरलोकवीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति ?	**यथा अम्बुवेगाः द्रवन्ति** तथा अमी नरलोकवीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति।
यथा **कासाम्** अम्बुवेगाः द्रवन्ति तथा अमी नरलोकवीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति ?	यथा **नदीनाम्** अम्बुवेगाः द्रवन्ति तथा अमी नरलोकवीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति।
यथा नदीनां **कीदृशाः** अम्बुवेगाः द्रवन्ति तथा अमी नरलोकवीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति ?	यथा नदीनां **बहवः** अम्बुवेगाः समुद्रमेव द्रवन्ति तथा अमी नरलोकवीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति।
यथा नदीनां बहवः **पुनः कीदृशाः** अम्बुवेगाः समुद्रमेव अभिमुखाः द्रवन्ति तथा अमी नरलोकवीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति ?	यथा नदीनाम् **अभिमुखाः** बहवः अम्बुवेगाः द्रवन्ति तथा अमी नरलोकवीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति।

यथा नदीनां **कमेव** अभिमुखाः बहवः अम्बुवेगाः द्रवन्ति तथा अमी नरलोकवीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति ?	यथा नदीनाम् **समुद्रमेव** अभिमुखाः बहवः अम्बुवेगाः द्रवन्ति तथा अमी नरलोकवीराः तव अभिविज्वलन्ति वक्त्राणि विशन्ति ।

तात्पर्यम् - यथा स्रोतसाम् असङ्ख्याकाः जलप्रवाहाः सागरम् एव अभिभूय प्रविशन्ति तथा एते शूराः प्रकाशमानानि तव मुखानि प्रविशन्ति ।

यथा प्रदीप्तं ज्वलनं पतङ्गा विशन्ति नाशाय समृद्धवेगाः ।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥११.२९॥

पदच्छेदः - यथा, प्रदीप्तम्, ज्वलनम्, पतङ्गाः, विशन्ति, नाशाय, समृद्धवेगाः ।
तथा, एव, नाशाय, विशन्ति, लोकाः, तव, अपि, वक्त्राणि, समृद्धवेगाः ॥

अन्वयः - यथा समृद्धवेगाः पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति तथा एव समृद्धवेगाः लोकाः तव वक्त्राणि अपि नाशाय विशन्ति ।

पदार्थः - यथा = येन प्रकारेण, समृद्धवेगाः = गतिशीलाः, पतङ्गाः = शलभाः, प्रदीप्तम् = ज्वलितम्, ज्वलनम् = अग्निम्, समृद्धवेगाः = गतिशीलाः, नाशाय = विनाशाय, विशन्ति = प्रविशन्ति, तथा एव = तेन प्रकारेण एव, लोकाः = प्राणिनः, तव = ते, वक्त्राणि अपि = मुखानि अपि, नाशाय = विनाशाय, विशन्ति = प्रविशन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यथा	अव्ययम्	समृद्धवेगाः	अ. पुं. प्र. बहु. (विशेषणम्)
पतङ्गाः	अ. पुं. प्र. बहु. (विशेष्यम्)	प्रदीप्तम्	अ. नपुं. द्वि. एक. (विशेषणम्)
ज्वलनम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	विशन्ति	विश् (विश - प्रवेशने) पर. कर्तरि लट्. प्रपु. बहु.
नाशाय	अ. पुं. च. एक.	तथा	अव्ययम्
एव	अव्ययम्	लोकाः	अ. पुं. प्र. बहु.
तव	युष्मद्- द. सर्व. ष. एक	वक्त्राणि	अ. नपुं. द्वि. एक.
अपि	अव्ययम्		

व्याकरणम् -

(क) सन्धिः	पतङ्गा विशन्ति	पतङ्गाः + विशन्ति	विसर्गसन्धिः (लोपः) ।
	तथैव	तथा + एव	वृद्धिसन्धिः ।

लोकास्तव	लोकाः + तव	विसर्गसन्धिः सकारः।
तवापि	तव + अपि	सवर्णदीर्घसन्धिः।

(ख) समासः समृद्धवेगाः — समृद्धः वेगः येषां ते समृद्धवेगाः - बहुव्रीहिः।

(ग) कृदन्तः प्रदीप्तम् — प्र + दीप् (दीपी - दीप्तौ) + क्त (कर्तरि)।

ज्वलनम् — ज्वल् (ज्वल - दीप्तौ) + ल्युट्।

भावस्पष्टीकरणम् -

विशन्ति।	
किमर्थं विशन्ति ?	**नाशाय** विशन्ति।
कथं नाशाय विशन्ति ?	**यथा** नाशाय विशन्ति।
यथा **कं** नाशाय विशन्ति ?	यथा **ज्वलनं** नाशाय विशन्ति।
यथा **कीदृशं** ज्वलनं नाशाय विशन्ति ?	यथा **प्रदीप्तं** ज्वलनं नाशाय विशन्ति।
यथा **के** प्रदीप्तं ज्वलनं नाशाय विशन्ति ?	यथा **पतङ्गाः** प्रदीप्तं ज्वलनं नाशाय विशन्ति।
यथा **कीदृशाः** पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति ?	यथा **समृद्धवेगाः** पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति।
यथा समृद्धवेगाः पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति तथा एव **के** विशन्ति ?	यथा समृद्धवेगाः पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति तथा एव **लोकाः** विशन्ति।
यथा समृद्धवेगाः पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति तथा एव **कीदृशाः** लोकाः विशन्ति ?	यथा समृद्धवेगाः पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति तथा एव **समृद्धवेगाः** लोकाः विशन्ति।
यथा समृद्धवेगाः पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति तथा एव समृद्धवेगाः लोकाः **कानि** विशन्ति ?	यथा समृद्धवेगाः पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति तथा एव समृद्धवेगाः लोकाः **वक्त्राणि** विशन्ति।
यथा समृद्धवेगाः पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति तथा एव समृद्धवेगाः लोकाः **कस्य** वक्त्राणि विशन्ति ?	यथा समृद्धवेगाः पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति तथा एव समृद्धवेगाः लोकाः **तव** वक्त्राणि विशन्ति।
यथा समृद्धवेगाः पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति तथा एव समृद्धवेगाः लोकाः तव वक्त्राणि **किमर्थं** विशन्ति ?	यथा समृद्धवेगाः पतङ्गाः प्रदीप्तं ज्वलनं नाशाय विशन्ति तथा एव समृद्धवेगाः लोकाः तव वक्त्राणि **नाशाय** विशन्ति।

तात्पर्यम् - यथा तीव्रगतयः पतङ्गाः ज्वलितम् अग्निम् आत्मविनाशाय प्रविशन्ति तथा एव वेगवन्तः प्राणिनः तव मुखानि स्वविनाशाय एव प्रविशन्ति।

लेलिह्यसे ग्रसमानः समन्ताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः ।
तेजोभिरापूर्य जगत्समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो ॥११.३०॥

पदच्छेदः - लेलिह्यसे, ग्रसमानः, समन्तात्, लोकान्, समग्रान्, वदनैः, ज्वलद्भिः ।
तेजोभिः, आपूर्य, जगत्, समग्रम्, भासः, तव, उग्राः, प्रतपन्ति, विष्णो ।

अन्वयः - ज्वलद्भिः वदनैः समग्रान् लोकान् समन्तात् ग्रसमानः लेलिह्यसे । विष्णो ! तव उग्राः भासः तेजोभिः समग्रं जगत् प्रतपन्ति ।

पदार्थः - ज्वलद्भिः = प्रकाशमानैः, वदनैः = आननैः, समग्रान् = सर्वान्, लोकान् = भुवनानि, समन्तात् = सर्वतः, ग्रसमानः = निगिरन्, लेलिह्यसे = आस्वादयसि, विष्णो = व्यापक ! तव उग्राः = तव तीक्ष्णाः, भासः = दीप्तयः, तेजोभिः = किरणैः, आपूर्य = पूरयित्वा, समग्रम् = सर्वम्, जगत् = विश्वम्, प्रतपन्ति = नितरां तापयन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ज्वलद्भिः	ज्वलत्- त. नपुं. तृ. बहु. (विशेषणम्)	वदनैः	अ. नपुं. तृ. बहु. (विशेष्यम्)
समग्रान्	अ. पुं. द्वि. बहु. (विशेषणम्)	लोकान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
समन्तात्	अव्ययम्	ग्रसमानः	अ. पुं. प्र. एक.
लेलिह्यसे	लिह् (लिह आस्वादने) यङ्न्तः लट्. कर्तरि. आत्म. प्रपु. एक.	विष्णो	उ. पुं. सम्बो. एक.
तव	युष्मद् - द. सर्व. ष. एक.	उग्राः	आ. स्त्री. प्र. बहु. (विशेषणम्)
भासः	भास् - सका. स्त्री. प्र. बहु. (विशेष्यम्)	तेजोभिः	तेजस् - सका. नपुं. तृ. बहु.
आपूर्य	ल्यबन्तम् अव्ययम्	समग्रम्	अ. नपुं. द्वि. एक. (विशेषणम्)
जगत्	जगत् - त. नपुं. द्वि. एक. (विशेष्यम्)	तपन्ति	प्र + तप् (तप - सन्तापे) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	समन्ताल्लोकान्	समन्तात् + लोकान्	परसवर्णसन्धिः ।
	वदनैर्ज्वलद्भिः	वदनैः + ज्वलद्भिः	विसर्गसन्धिः (रेफः) ।
	तेजोभिरापूर्य	तेजोभिः + आपूर्य	विसर्गसन्धिः (रेफः) ।
	भासस्तव	भासः + तव	विसर्गसन्धिः (सकारः) ।
	तवोग्राः	तव + उग्राः	गुणसन्धिः ।

(ख) कृदन्तः ग्रसमानः ग्रस् (ग्रसु - अदने) + शानच् (कर्तरि) ।
ज्वलत् ज्वल् (ज्वल - दीप्तौ) + शतृ (कर्तरि) ।
आपूर्य आ + पॄ (पॄ - पालनपूरणयोः) + ल्यप् ।

भावस्पष्टीकरणम् -

प्रतपन्ति ।	
किं प्रतपन्ति ?	**जगत्** प्रतपन्ति ।
कीदृशं जगत् प्रतपन्ति ?	**समग्रं** जगत् प्रतपन्ति ।
कैः समग्रं जगत् प्रतपन्ति ?	**तेजोभिः** समग्रं जगत् प्रतपन्ति ।
के तेजोभिः समग्रं जगत् प्रतपन्ति ?	**भासः** तेजोभिः समग्रं जगत् प्रतपन्ति ।
कीदृशाः भासः तेजोभिः समग्रं जगत् प्रतपन्ति ?	**उग्राः** भासः तेजोभिः समग्रं जगत् प्रतपन्ति ।
कस्य उग्राः भासः तेजोभिः समग्रं जगत् प्रतपन्ति ?	**तव** उग्राः भासः तेजोभिः समग्रं जगत् प्रतपन्ति ।
लेलिह्यसे ।	
कीदृशः लेलिह्यसे ?	**ग्रसमानः** लेलिह्यसे ।
कुतः ग्रसमानः लेलिह्यसे ?	**समन्तात्** ग्रसमानः लेलिह्यसे ।
कान् समन्तात् ग्रसमानः लेलिह्यसे ?	**लोकान्** समन्तात् ग्रसमानः लेलिह्यसे ।
कीदृशान् लोकान् समन्तात् ग्रसमानः लेलिह्यसे ?	**समग्रान्** लोकान् समन्तात् ग्रसमानः लेलिह्यसे ।
कैः समग्रान् लोकान् समन्तात् ग्रसमानः लेलिह्यसे ?	**वदनैः** समग्रान् लोकान् समन्तात् ग्रसमानः लेलिह्यसे ।
कीदृशैः वदनैः समग्रान् लोकान् समन्तात् ग्रसमानः लेलिह्यसे ?	**ज्वलद्भिः** वदनैः समग्रान् लोकान् समन्तात् ग्रसमानः लेलिह्यसे ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**विष्णो !**

तात्पर्यम् - त्वं प्रकाशमानैः आननैः सर्वतः समग्रान् लोकान् समन्तात् ग्रसमानः लेलिह्यसे । विष्णो ! तव तीक्ष्णाः किरणाः कान्तिभिः समस्तं जगत् सम्पूर्य नितरां तापयन्ति ।

आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्यं न हि प्रजानामि तव प्रवृत्तिम् ॥११.३१॥

पदच्छेदः - आख्याहि, मे, कः, भवान्, उग्ररूपः, नमः, अस्तु, ते, देववर, प्रसीद ।
विज्ञातुम्, इच्छामि, भवन्तम्, आद्यम्, न, हि, प्रजानामि, तव, प्रवृत्तिम् ॥

अन्वयः - देववर ! भवान् उग्ररूपः मे कः आख्याहि । ते नमः अस्तु । प्रसीद । आद्यं भवन्तं विज्ञातुम् इच्छामि । तव प्रवृत्तिं न जानामि ।

पदार्थः - देववर = देवश्रेष्ठ ! भवान् = त्वम्, उग्ररूपः = भयङ्करस्वरूपः, कः = कः, मे = मह्यम्, आख्याहि = कथय, ते = तुभ्यम्, नमः = प्रणामः, अस्तु = भवतु, प्रसीद = प्रसन्नो भव, आद्यम् = प्रथमम्, भवन्तम् = त्वाम्, विज्ञातुम् = वेदितुम्, इच्छामि = अभिलषामि, तव = ते, प्रवृत्तिम् = चेष्टाम्, न जानामि = न वेद्मि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
देववर	अ. पुं. सम्बो. एक.	भवान्	भवत्- त. सर्व. पुं. प्र. एक. (विशेष्यम्)
उग्ररूपः	अ. पुं. प्र. एक. (विशेषणम्)	मे	अस्मद्- द. सर्व. च. एक.
कः	किम्- म. सर्व. पुं. प्र. एक. (विशेषणम्)	आख्याहि	आ + ख्या (ख्या - प्रकथने) पर. कर्तरि लोट्. मपु. एक.
ते	युष्मद्- द. सर्व. च. एक.	नमः	अव्ययम्
अस्तु	अस् (अस - भुवि) पर. कर्तरि लोट्. प्रपु. एक.	प्रसीद	प्र + सीद (षद्लृ - विशरणगत्यवसादनेषु) पर. कर्तरि लोट्. मपु. एक.
आद्यम्	अ. पुं. द्वि. एक. (विशेषणम्)	भवन्तम्	भवत्- त. सर्व. पुं. द्वि. एक. (विशेष्यम्)

व्याकरणम् -

(क) सन्धिः को भवान् — कः + भवान् — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
नमोऽस्तु — नमः + अस्तु — विसर्गसन्धिः, सकारः, रेफः, उकारः, गुणः, पूर्वरूपं च ।

(ख) समासः उग्ररूपः — उग्रं रूपं यस्य सः उग्ररूपः - बहुव्रीहिः ।
देववर — देवानां वरः देववरः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः विज्ञातुम् — वि + ज्ञा (ज्ञा - अवबोधने) + तुमुन् ।
प्रवृत्तिम् — प्र + वृत् (वृतु - वर्तने) + क्तिन्, ताम् ।

(घ) तद्धितान्तः आद्यम् — आदि + यत् (भवार्थे) तम्, आदौ भवः ।

भावस्पष्टीकरणम् -

न जानामि ।	
किं न जानामि ?	**प्रवृत्तिं न जानामि ।**

कस्य प्रवृत्तिं न जानामि ?	तव प्रवृत्तिं न जानामि ।
इच्छामि ।	
किं कर्तुम् इच्छामि ?	विज्ञातुम् इच्छामि ।
कं विज्ञातुम् इच्छामि ?	भवन्तं विज्ञातुम् इच्छामि ।
कीदृशं भवन्तं विज्ञातुम् इच्छामि ?	आद्यं भवन्तं विज्ञातुम् इच्छामि ।
आद्यं भवन्तं विज्ञातुम् इच्छामि । अतः किम् ?	आद्यं भवन्तं विज्ञातुम् इच्छामि । प्रसीद !
अस्तु ।	
किम् अस्तु ?	नमः अस्तु ।
कस्मै नमः अस्तु ?	ते नमः अस्तु ।
आख्याहि ।	
कस्मै आख्याहि ?	मे आख्याहि ।
किम् इति मे आख्याहि ?	भवान् कः (इति) मे आख्याहि ।
कीदृशः भवान् कः (इति) मे आख्याहि ?	उग्ररूपः भवान् कः (इति) मे आख्याहि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	देववर !

तात्पर्यम् - देवश्रेष्ठ ! उग्ररूपः भवान् कः मे आख्याहि । ते नमः अस्तु । अनुगृहाण । प्रथमं त्वां वेदितुम् इच्छामि । तव प्रवृत्तिं न जानामि ।

श्रीभगवानुवाच - कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्तः ।
ऋतेऽपि त्वां न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥११.३२॥

पदच्छेदः -

श्रीभगवान्, उवाच - कालः, अस्मि, लोकक्षयकृत्, प्रवृद्धः, लोकान्, समाहर्तुम्, इह, प्रवृत्तः ।
ऋते, अपि, त्वाम्, न, भविष्यन्ति, सर्वे, ये, अवस्थिताः, प्रत्यनीकेषु, योधाः ॥

अन्वयः - लोकक्षयकृत्प्रवृद्धः कालः अस्मि । लोकान् समाहर्तुम् इह प्रवृत्तः । त्वाम् ऋते प्रत्यनीकेषु ये अवस्थिताः योधाः सर्वे अपि न भविष्यन्ति ।

पदार्थः - लोकक्षयकृत् = लोकविनाशकः, प्रवृद्धः = बृंहितः, कालः = समयः, अस्मि = भवामि, लोकान् = भुवनानि, समाहर्तुम् = उपसंहर्तुम्, इह प्रवृत्तः = अत्र व्यापृतः, त्वाम् ऋते = त्वां विना,

प्रत्यनीकेषु = परसैन्येषु, अवस्थिताः = उपस्थिताः, ये योधाः = ये योद्धारः, सर्वे अपि = ते सकलाः अपि, न भविष्यन्ति = न स्थास्यन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
लोकक्षयकृत्	त. पुं. प्र. एक. (विशेषणम्)	प्रवृद्धः	अ. पुं. प्र. एक. (विशेषणम्)
कालः	अ. पुं. प्र. एक. (विशेष्यम्)	अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.
लोकान्	अ. पुं. द्वि. बहु.	समाहर्तुम्	तुमुन्नन्तम् अव्ययम्
इह	अव्ययम्	प्रवृत्तः	अ. पुं. प्र. एक. (विशेषणम्)
त्वाम्	युष्मद् - द. सर्व. द्वि. एक.	प्रत्यनीकेषु	अ. पुं. स. बहु.
ये	यद् - द. सर्व. प्र. बहु. (विशेषणम्)	योधाः	अ. पुं. प्र. बहु. (विशेष्यम्)
सर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	अपि	अव्ययम्
न	अव्ययम्	भविष्यन्ति	भू (भू - सत्तायाम्) पर. कर्तरि लृट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	कालोऽस्मि	कालः + अस्मि	विसर्गसन्धिः, सकारः, रेफः, उकारः, गुणः, पूर्वरूपं च ।
	ऋतेऽपि	ऋते + अपि	पूर्वरूपसन्धिः ।
	येऽवस्थिताः	ये + अवस्थिताः	पूर्वरूपसन्धिः।

(ख) समासः लोकक्षयकृत् — लोकानां क्षयः लोकक्षयः - षष्ठीतत्पुरुषः । लोकक्षयं करोति इति लोकक्षयकृत् - कर्तरि क्विप् उपपदसमासः ।

प्रत्यनीकेषु — प्रतिगतानि अनीकानि प्रत्यनीकानि, तेषु - प्रादिसमासः, शत्रुसैन्येषु इत्यर्थः ।

(ग) कृदन्तः	क्षयः	क्षि (क्षि - क्षये) + अच् ।
	प्रवृद्धः	प्र + वृध् (वृधु + वर्धने) + क्त (कर्तरि) ।
	समाहर्तुम्	सम् + आ + हृ (हृ - हरणे) + तुमुन् ।
	प्रवृत्तः	प्र + वृत् (वृतु - वर्तने) + क्त (कर्तरि) ।
	अवस्थिताः	अव + स्था (ष्ठा - गतिनिवृत्तौ) + क्तः (कर्तरि) ।
	योधाः	युध् (युध - सम्प्रहारे) + घञ् ।

(घ) विशेषः ऋते त्वाम् विनार्थकस्य ऋतेशब्दस्य योगे प्राचीनव्याकरणानुसारेण त्वाम् इति द्वितीया।

भावस्पष्टीकरणम् -

न भविष्यन्ति।	
के न भविष्यन्ति ?	**सर्वे** अपि न भविष्यन्ति।
के सर्वे अपि न भविष्यन्ति ?	**योधाः** सर्वे अपि न भविष्यन्ति।
कीदृशाः योधाः सर्वे अपि न भविष्यन्ति ?	**अवस्थिताः** योधाः सर्वे अपि न भविष्यन्ति।
केषु अवस्थिताः योधाः सर्वे अपि न भविष्यन्ति ?	**प्रत्यनीकेषु** अवस्थिताः योधाः सर्वे अपि न भविष्यन्ति।
प्रत्यनीकेषु अवस्थिताः **के** योधाः सर्वे अपि न भविष्यन्ति ?	प्रत्यनीकेषु अवस्थिताः **ये** योधाः सर्वे अपि न भविष्यन्ति।
कम् ऋते ये प्रत्यनीकेषु अवस्थिताः योधाः सर्वे अपि न भविष्यन्ति ?	**त्वाम्** ऋते ये प्रत्यनीकेषु अवस्थिताः योधाः सर्वे अपि न भविष्यन्ति।
प्रवृत्तः।	
कुत्र प्रवृत्तः ?	**इह** प्रवृत्तः।
किं कर्तुम् इह प्रवृत्तः ?	**समाहर्तुम्** इह प्रवृत्तः।
कान् समाहर्तुम् इह प्रवृत्तः ?	**लोकान्** समाहर्तुम् इह प्रवृत्तः।
अस्मि।	
कः अस्मि ?	**कालः** अस्मि।
कीदृशः कालः अस्मि ?	**लोकक्षयकृत् प्रवृद्धः** कालः अस्मि।

तात्पर्यम् - अहं सर्वान् लोकान् संहर्तुं प्रवृद्धः कालोऽस्मि। प्रतिपक्षसैन्येषु ये भीष्मद्रोणप्रभृतयः योधाः सन्ति तान् त्वं न मारयसि चेदपि अवश्यं मया ते मारिताः भविष्यन्ति।

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम्।
मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्॥११.३३॥

पदच्छेदः - तस्मात्, त्वम्, उत्तिष्ठ, यशः, लभस्व, जित्वा, शत्रून्, भुङ्क्ष्व, राज्यम्, समृद्धम्।
मया, एव, एते, निहताः, पूर्वम्, एव, निमित्तमात्रम्, भव, सव्यसाचिन्॥

अन्वयः - सव्यसाचिन् ! तस्मात् त्वम् उत्तिष्ठ, यशः लभस्व । शत्रून् जित्वा समृद्धं राज्यं भुङ्क्ष्व । एते पूर्वं मया निहताः । निमित्तमात्रं भव ।

पदार्थः - सव्यसाचिन् = सव्येन हस्तेन अपि शरप्रयोगे निपुणः, तस्मात् = ततः हेतोः, त्वम् = भवान्, उत्तिष्ठ = सज्जो भव, यशः = कीर्तिम्, लभस्व = आप्नुहि, शत्रून् = अरीन्, जित्वा = विजित्य, समृद्धम् = निष्कण्टकम्, राज्यम् = आधिपत्यम्, भुङ्क्ष्व = अनुभव, एते = इमे, पूर्वम् एव = प्रथममेव, मया = मम माध्यमेन, निहताः = विनाशिताः, निमित्तमात्रं भव = हेतुमात्रं भव ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सव्यसाचिन्	सव्यसाचिन्- न. पुं. सम्बो. एक.	तस्मात्	तद्- द. सर्व. पुं. पं. एक. (विशेषणम्)
त्वम्	युष्मद्- द. सर्व. प्र. एक.	उत्तिष्ठ	उद् + स्था (ष्ठा - गतिनिवृत्तौ) पर. कर्तरि लोट्. मपु. एक.
यशः	यशस्- स. नपुं. द्वि. एक.	लभस्व	लभ् (डुलभष् - प्राप्तौ) आत्म. कर्तरि लोट्. मपु. एक.
शत्रून्	उ. पुं. द्वि. बहु.	जित्वा	क्त्वान्तम् अव्ययम्
समृद्धम्	अ. नपुं. द्वि. एक. (विशेषणम्)	राज्यम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
भुङ्क्ष्व	भुज् (भुज - पालनाभ्यवहारयोः) आत्म. कर्तरि लोट्. मपु. एक.	एते	एतद्- द. सर्व. प्र. बहु. (विशेषणम्)
पूर्वम्	अव्ययम्	एव	अव्ययम्
मया	अस्मद्- द. सर्व. तृ. एक.	निहताः	अ. पुं. प्र. बहु. (विशेषणम्)
निमित्तमात्रम्	अव्ययम्	भव	भू (भू - सत्तायाम्) आत्म. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	यशो लभस्व	यशः + लभस्व	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	मयैव	मया + एव	वृद्धिसन्धिः ।
	एवैते	एव + एते	वृद्धिसन्धिः ।
(ख) समासः	सव्यसाचिन्	सव्येन (हस्तेन) साधु सचते (बाणान् प्रयुङ्क्ते) इति सव्यसाची, तत्सम्बुद्धौ - कर्तरि णिनिः उपपदसमासश्च ।	
	निमित्तमेव	निमित्तमात्रम् - तत्पुरुषः ।	

(ग) कृदन्तः जित्वा — जि (जि - जये) + क्त्वा ।
समृद्धम् — सम् + (ऋधु - वृद्धौ) + क्त (कर्मणि) ।
निहताः — नि + हन् (हन् - हिंसागत्योः) + क्त (कर्मणि) ।

(घ) तद्धितान्तः राज्यम् — राजन् + यक् (भावार्थे) राज्ञो भावः कर्म वा ।

भावस्पष्टीकरणम् -

भव ।	
कीदृशः भव ।	**निमित्तमात्रं** भव ।
निहताः ।	
केन निहताः ?	**मया** निहताः ।
कदा मया निहताः ?	**पूर्वं** मया निहताः ।
के पूर्वं मया निहताः ?	**एते** पूर्वं मया निहताः ।
भुङ्क्ष्व ।	
किं भुङ्क्ष्व ?	**राज्यं** भुङ्क्ष्व ।
कीदृशं राज्यं भुङ्क्ष्व ?	**समृद्धं** राज्यं भुङ्क्ष्व ।
किं कृत्वा समृद्धं राज्यं भुङ्क्ष्व ?	**जित्वा** समृद्धं राज्यं भुङ्क्ष्व ।
कान् जित्वा समृद्धं राज्यं भुङ्क्ष्व ?	**शत्रून्** जित्वा समृद्धं राज्यं भुङ्क्ष्व ।
लभस्व ।	
किं लभस्व ?	**यशः** लभस्व ।
यशः लभस्व । तस्मात् किम् ?	यशः लभस्व । **तस्मात् उत्तिष्ठ ।**
तस्मात् **कः** उत्तिष्ठ ?	तस्मात् **त्वम्** उत्तिष्ठ ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**सव्यसाचिन् !**

तात्पर्यम् - तस्मात् हे अर्जुन ! त्वम् उत्तिष्ठ, कीर्तिं प्राप्नुहि । अरीन् विजित्य निष्कण्टकम् आधिपत्यम् अनुभव । एते मया इतः पूर्वमेव विनाशिताः । अतः त्वं तु केवलं निमित्तमात्रं भव ।

द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान्।
मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान्॥११.३४॥

पदच्छेदः - द्रोणम्, च, भीष्मम्, च, जयद्रथम्, च, कर्णम्, तथा, अन्यान्, अपि, योधवीरान्।
मया, हतान्, त्वम्, जहि, मा, व्यथिष्ठाः, युध्यस्व, जेतासि, रणे, सपत्नान्॥

अन्वयः - द्रोणं च भीष्मं च जयद्रथं च कर्णं तथा अन्यान् अपि योधवीरान् मया हतान् त्वं जहि। मा व्यथिष्ठाः। युध्यस्व। रणे सपत्नान् जेतासि।

पदार्थः - द्रोणं च भीष्मं च = द्रोणं भीष्मं च, जयद्रथं च कर्णं च = जयद्रथं कर्णं च, तथा = तथा अन्यान् अपि = इतरान् अपि, योधवीरान् = शत्रून्, मया हतान् = मया निहतान्, त्वं जहि = त्वं नाशय, मा व्यथिष्ठाः = मा खेदं प्राप्नुहि, युध्यस्व = युद्धं कुरु, रणे = युद्धे, सपत्नान् = शत्रून्, जेतासि = जेष्यसि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
द्रोणम्	अ. पुं. द्वि. एक.	च	अव्ययम्
भीष्मम्	अ. पुं. द्वि. एक.	जयद्रथम्	अ. पुं. द्वि. एक.
कर्णम्	अ. पुं. द्वि. एक.	तथा	अव्ययम्
अन्यान्	अ. सर्व. पुं. द्वि. बहु. (विशेषणम्)	अपि	अव्ययम्
योधवीरान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	मया	अस्मद्- द. सर्व. तृ. एक.
हतान्	अ. पुं. द्वि. बहु. (विशेषणम्)	त्वम्	युष्मद्- द. सर्व. प्र. एक.
जहि	प्र + हन् (हन - हिंसागत्योः) पर. कर्तरि लोट्. मपु. एक.	मा	अव्ययम्
व्यथिष्ठाः	व्यथ् (व्यथ - भयसञ्चलनयोः) आत्म. कर्तरि लुङ्. मपु. एक.	युध्यस्व	युध् (युध - सम्प्रहारे) आत्म. कर्तरि लोट्. मपु. एक.
रणे	अ. पुं. स. एक.	सपत्नान्	अ. पुं. द्वि. बहु.
जेतासि	जि (जि जये) पर. कर्तरि लुट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः

तथान्यान्	तथा + अन्यान्	सवर्णदीर्घसन्धिः।
हतांस्त्वम्	हतान् + त्वम्	सत्वसन्धिः, रुत्वम्, अनुस्वारागमः, विसर्गः, सत्वं च।

	व्यथिष्ठा युध्यस्व	व्यथिष्ठाः + युध्यस्व विसर्गसन्धिः (लोपः)।
(ख) समासः	योधवीरान्	योधेषु वीराः योधवीराः, तान् - सप्तमीतत्पुरुषः।
(ग) कृदन्तः	हतान्	हन् (हन् - हिंसागत्योः) + क्त, तान्।

भावस्पष्टीकरणम् -

जहि।	
कः जहि ?	**त्वं** जहि।
कान् त्वं जहि ?	**हतान्** त्वं जहि।
केन हतान् त्वं जहि ?	**मया** हतान् त्वं जहि।
कान् मया हतान् त्वं जहि ?	**योधवीरान्** मया हतान् त्वं जहि।
पुनश्च कान् अपि योधवीरान् मया हतान् त्वं जहि ?	**अन्यान्** अपि योधवीरान् मया हतान् त्वं जहि।
कं च अन्यान् अपि योधवीरान् मया हतान् त्वं जहि ?	**कर्णं** च अन्यान् अपि योधवीरान् मया हतान् त्वं जहि।
कर्णम् **इतोऽपि कं** च अन्यान् अपि योधवीरान् मया हतान् त्वं जहि ?	कर्णं **जयद्रथं** इतोऽपि च अन्यान् अपि योधवीरान् मया हतान् त्वं जहि।
द्रोणं कर्णं जयद्रथं भीष्मं च अन्यान् अपि योधवीरान् मया हतान् त्वं जहि। **किं कुरु ?**	द्रोणं कर्णं जयद्रथं भीष्मं च अन्यान् अपि योधवीरान् मया हतान् त्वं जहि। **मा व्यथिष्ठाः।**
द्रोणं कर्णं जयद्रथं भीष्मं च अन्यान् अपि योधवीरान् मया हतान् त्वं जहि। मा व्यथिष्ठाः। **पुनश्च किं कुरु ?**	द्रोणं कर्णं जयद्रथं भीष्मं च अन्यान् अपि योधवीरान् मया हतान् त्वं जहि। मा व्यथिष्ठाः। **युध्यस्व।**
द्रोणं कर्णं जयद्रथं भीष्मं च अन्यान् अपि योधवीरान् मया हतान् त्वं जहि। मा व्यथिष्ठाः। युध्यस्व। **किमर्थम् ?**	द्रोणं च भीष्मं च जयद्रथं च कर्णं तथा अन्यान् अपि योधवीरान् मया हतान् त्वं जहि। मा व्यथिष्ठाः। युध्यस्व। **जेतासि।**
कान् जेतासि ?	**सपत्नान्** जेतासि।
कुत्र सपत्नान् जेतासि ?	**रणे** सपत्नान् जेतासि।

तात्पर्यम् - द्रोणः भीष्मः जयद्रथः कर्णः तथा अन्ये सर्वे अपि मया पूर्वमेव निहताः। मया निहतान् एव त्वं नाशय। व्यथां मा कुरु। युद्धे प्रवर्तस्व। रणे शत्रून् जेष्यसि।

सञ्जय उवाच - एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य॥११.३५॥

पदच्छेदः -

सञ्जयः उवाच - एतत्, श्रुत्वा, वचनम्, केशवस्य, कृताञ्जलिः, वेपमानः, किरीटी ।
नमस्कृत्वा, भूयः, एव, आह, कृष्णम्, सगद्गदम्, भीतभीतः, प्रणम्य ॥

अन्वयः - किरीटी केशवस्य एतत् वचनं श्रुत्वा कृताञ्जलिः वेपमानः भीतभीतः कृष्णं नमस्कृत्वा सगद्गदं भूयः एव प्रणम्य आह ।

पदार्थः - किरीटी = अर्जुनः, केशवस्य = श्रीकृष्णस्य, एतत् = इदम्, वचनम् = वाक्यम्, श्रुत्वा = आकर्ण्य, कृताञ्जलिः = मुकुलितकरः, वेपमानः = कम्पमानः, भीतभीतः = भयसहितः, कृष्णम् = श्रीकृष्णम्, नमस्कृत्वा = प्रणम्य, सगद्गदम् = निरुद्धकण्ठम्, भूयः एव = पुनरपि, प्रणम्य = प्रणम्य, आह = कथयति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
किरीटी	किरीटिन्- न. पुं. प्र. एक. (विशेष्यम्)	केशवस्य	अ. पुं. ष. एक.
एतत्	एतद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	वचनम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
श्रुत्वा	क्त्वान्तम् अव्ययम्	कृताञ्जलिः	इ. पुं. प्र. एक. (विशेषणम्)
वेपमानः	अ. पुं. प्र. एक. (विशेषणम्)	भीतभीतः	अ. पुं. प्र. एक. (विशेषणम्)
कृष्णम्	अ. पुं. द्वि. एक.	नमस्कृत्वा	क्त्वान्तम् अव्ययम्
सगद्गदम्	क्रियाविशेषणम्	भूयः	अव्ययम्
एव	अव्ययम्	प्रणम्य	ल्यबन्तम् अव्ययम्
आह	ब्रू (ब्रूञ् - व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	एतच्छ्रुत्वा	एतत् + श्रुत्वा	श्चुत्वसन्धिः, छत्वसन्धिश्च ।
	कृताञ्जलिर्वेपमानः	कृताञ्जलिः + वेपमानः	विसर्गसन्धिः (रेफः) ।
	भूय एव	भूयः + एव	विसर्गसन्धिः (लोपः) ।
	एवाह	एव + आह	सवर्णदीर्घसन्धिः ।
(ख) समासः	कृताञ्जलिः	कृतः अञ्जलिः येन सः कृताञ्जलिः - बहुव्रीहिः ।	
	सगद्गदम्	गद्गदेन सहितः यथा स्यात् तथा - अव्ययीभावः ।	
	भीतभीतः	भीतशब्दस्य द्वित्वं पीडायां द्योत्यायाम् भीतभीतः, भयेन पीडितः इत्यर्थः ।	
(ग) कृदन्तः	श्रुत्वा	श्रु (श्रु - श्रवणे) + क्त्वा ।	

	वचनम्	वच् (वच - परिभाषणे) + ल्युट् ।
	वेपमानः	वेप् (वेपृ - कम्पने) + शानच् (कर्तरि) ।
	प्रणम्य	प्र + नम् (णम - प्रह्वत्वे शब्दे च) + ल्यप् ।
(घ) तद्धितान्तः	किरीटी	किरीट + इनि (मतुबर्थे), किरीटम् अस्य अस्मिन् वा अस्ति इति ।

भावस्पष्टीकरणम् -

आह ।	
किं कृत्वा आह ।	**प्रणम्य** आह ।
कदा एव प्रणम्य आह ?	**भूय एव** प्रणम्य आह ।
कीदृशं भूय एव प्रणम्य आह ?	**सगद्गदं** भूय एव प्रणम्य आह ।
किं कृत्वा सगद्गदं भूय प्रणम्य आह ?	**नमस्कृत्वा** सगद्गदं भूय एव प्रणम्य आह ।
कं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ?	**कृष्णं** नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ।
कः कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ?	**किरीटी** कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ।
कीदृशः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ?	**भीतभीतः** किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ।
पुनश्च कीदृशः भीतभीतः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ?	**वेपमानः** भीतभीतः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ।
पुनश्च कीदृशः वेपमानः भीतभीतः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ?	**कृताञ्जलिः** वेपमानः भीतभीतः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ।
किं कृत्वा कृताञ्जलिः वेपमानः भीतभीतः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ?	**श्रुत्वा** कृताञ्जलिः वेपमानः भीतभीतः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ।
किं श्रुत्वा कृताञ्जलिः वेपमानः भीतभीतः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ?	**वचनं** श्रुत्वा कृताञ्जलिः वेपमानः भीतभीतः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ।
किं वचनं श्रुत्वा कृताञ्जलिः वेपमानः भीतभीतः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ?	**एतत्** वचनं श्रुत्वा कृताञ्जलिः वेपमानः भीतभीतः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ।
कस्य एतत् वचनं श्रुत्वा कृताञ्जलिः वेपमानः भीतभीतः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ?	**केशवस्य** एतत् वचनं श्रुत्वा कृताञ्जलिः वेपमानः भीतभीतः किरीटी कृष्णं नमस्कृत्वा सगद्गदं भूय एव प्रणम्य आह ।

तात्पर्यम् - श्रीकृष्णस्य एतत् वाक्यं श्रुत्वा अर्जुनः मुकुलितकरः कम्पमानः भयसहितश्च सन् कृष्णं नमस्कृत्य गद्गदितकण्ठः पुनरपि प्रणम्य आह।

अर्जुन उवाच - स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च।
रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥११.३६॥

पदच्छेदः -

अर्जुन उवाच - स्थाने, हृषीकेश, तव, प्रकीर्त्या, जगत्, प्रहृष्यति, अनुरज्यते, च।
रक्षांसि, भीतानि, दिशः, द्रवन्ति, सर्वे, नमस्यन्ति, च, सिद्धसङ्घाः ॥

अन्वयः - हृषीकेश ! तव प्रकीर्त्या जगत् प्रहृष्यति अनुरज्यते च। रक्षांसि भीतानि दिशः द्रवन्ति। सर्वे सिद्धसङ्घाः च नमस्यन्ति इति स्थाने।

पदार्थः - हृषीकेश = इन्द्रियाधिप ! तव प्रकीर्त्या = ते सङ्कीर्तनेन, जगत् = भुवनम्, प्रहृष्यति = सन्तुष्यति, अनुरज्यते च = त्वयि अनुरक्तं च भवति, रक्षांसि = राक्षसाः, भीतानि = भययुक्ताः, दिशः = दिशाः, द्रवन्ति = पलायन्ते, सर्वे = सकलाः, सिद्धसङ्घाः च = सिद्धसमुदायाः च, नमस्यन्ति = प्रणमन्ति, इति स्थाने = इत्येतत् समुचितम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
हृषीकेश	अ. पुं. सम्बो. एक.	तव	युष्मद्- द. सर्व. ष. एक.
प्रकीर्त्या	इ. स्त्री. तृ. एक.	जगत्	जगत्- त. नपुं. प्र. एक.
प्रहृष्यति	प्र + हृ (हृष - तुष्टौ) पर. कर्तरि लट्. प्रपु. एक.	अनुरज्यते	अनु + रञ्ज (रञ्ज - रागे) आत्म. कर्तरि लट्. प्रपु. एक.
च	अव्ययम्	रक्षांसि	रक्षस् - सका. नपुं. प्र. बहु. (विशेष्यम्)
भीतानि	अ. नपुं. प्र. बहु. (विशेषणम्)	दिशः	दिश् - श. स्त्री. प्र. बहु.
द्रवन्ति	द्रु (द्रु - गतौ) पर. कर्तरि लट्. प्रपु. बहु.	सर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
सिद्धसङ्घाः	अ. पुं. प्र. बहु. (विशेष्यम्)	इति	अव्ययम्
स्थाने	अव्ययम्		

व्याकरणम् -

(क) सन्धिः	प्रहृष्यत्यनुरज्यते	प्रहृष्यति + अनुरज्यते	यण्सन्धिः।
	दिशो द्रवन्ति	दिशः + द्रवन्ति	विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः।

(ख) समासः हृषीकेश — हृषीकाणाम् इन्द्रियाणाम् ईशः हृषीकेशः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः ।
सिद्धसङ्घाः — सिद्धानां सङ्घाः, सिद्धसङ्घाः - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः प्रकीर्त्या — प्र + कॄ (कॄ - विक्षेपे) + क्तिन् (भावे), तया ।
भीतानि — भि (भी भये) + क्त (कर्तरि), तानि ।
सिद्धः — सिध् (षिधु - संराद्धौ) + क्त (कर्तरि) ।

भावस्पष्टीकरणम् -

नमस्यन्ति ।	
के नमस्यन्ति ?	**सिद्धसङ्घाः** नमस्यन्ति ।
के सिद्धसङ्घाः नमस्यन्ति ?	**सर्वे** सिद्धसङ्घाः नमस्यन्ति ।
द्रवन्ति ।	
कानि द्रवन्ति ?	**रक्षांसि** द्रवन्ति ।
रक्षांसि **कीदृशानि** द्रवन्ति ?	रक्षांसि **भीतानि** द्रवन्ति ।
रक्षांसि भीतानि **कुत्र** द्रवन्ति ?	रक्षांसि भीतानि **दिशः** द्रवन्ति ।
स्थाने ।	
किं स्थाने ?	**तव प्रकीर्त्या जगत् प्रहृष्यति अनुरज्यते च** (इति स्थाने) ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**हृषीकेश !**

तात्पर्यम् - कृष्ण ! तव सङ्कीर्तनेन जगत् सन्तुष्यति त्वयि अनुरक्तं च भवति । राक्षसाः भीताः सन्तः दिशः पलायन्ते । सर्वे सिद्धसमुदायाः अपि प्रणमन्ति इत्येतत् सर्वं युक्तम् ।

कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥११.३७॥

पदच्छेदः - कस्मात्, च, ते, न, नमेरन्, महात्मन्, गरीयसे, ब्रह्मणः, अपि, आदिकर्त्रे ।
अनन्त, देवेश, जगन्निवास, त्वम्, अक्षरम्, सत्, असत्, तत्परम्, यत् ॥

अन्वयः - महात्मन् ! गरीयसे ब्रह्मणः अपि आदिकर्त्रे ते कस्मात् च न नमेरन् ? अनन्त देवेश जगन्निवास ! त्वं सत् असत् (च) तत्परम्, यत् अक्षरम् (तदपि) ।

पदार्थः - महात्मन् = हे महात्मन् !, ब्रह्मणः अपि = हिरण्यगर्भादपि, गरीयसे = गुरुतराय, आदिकर्त्रे = (ब्रह्मणः) तस्यापि जनकाय, ते = तुभ्यम्, कस्मात् = केन हेतुना, न नमेरन् = न नमस्कुर्युः ? अनन्त = अन्तरहित,

देवेश = सुराधिप, जगन्निवास = जगतः आश्रय ! त्वम् = भवान्, सत् = व्यक्तम् असि, असत् = अव्यक्तम् असि, तत्परम् = सदसद्भ्याम् अपि श्रेष्ठम्, यत् अक्षरम् = यत् ब्रह्म (तदपि असि इत्यर्थः) ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महात्मन्	महात्मन्- न. पुं. सम्बो. एक.	गरीयसे	गरीयस्- सका. पुं. च. एक.
ब्रह्मणः	ब्रह्मन्- न. नपुं. पं. एक.	अपि	अव्ययम्
आदिकर्त्रे	ऋ. पुं. च. एक. (विशेषणम्)	ते	युष्मद्- द. सर्व. च. एक. (विशेष्यम्)
कस्मात्	किम्- म. सर्व. पुं. पं. एक. (विशेषणम्)	च	अव्ययम्
न	अव्ययम्	नमेरन् (नमेयुः)	नम् (णम - प्रह्वत्वे शब्दे च) पर. कर्तरि विधिलिङ्. प्रपु. बहु.
अनन्त	अ. पुं. सम्बो.एक.	देवेश	अ. पुं. सम्बो. एक.
जगन्निवास	अ. पुं. सम्बो.एक.	त्वम्	युष्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
सत्	सत्- त. नपुं. प्र. एक. (विशेषणम्)	असत्	असत्- त. नपुं. प्र. एक. (विशेषणम्)
तत्परम्	अ. नपुं. प्र. एक. (विशेषणम्)	यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
अक्षरम्	अ. नपुं. प्र. एक. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः

कस्माच्च	कस्मात् + च	श्चुत्वसन्धिः ।
ब्रह्मणोऽपि	ब्रह्मणः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।
अप्यादिकर्त्रे	अपि + आदिकर्त्रे	यण्सन्धिः ।
सदसत्	सत् + असत्	जश्त्वसन्धिः ।

(ख) समासः

महात्मन्	महान् आत्मा यस्य सः महात्मा, तत्सम्बुद्धौ - बहुव्रीहिः ।
आदिकर्त्रे	आदिः कर्ता आदिकर्ता, तस्मै - कर्मधारयः ।
अनन्त	न विद्यते अन्तः यस्य सः अनन्तः, तत्सम्बुद्धौ - बहुव्रीहिः ।
देवेश	देवानाम् ईशः देवेशः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।
जगन्निवास	जगतः निवासः जगन्निवासः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।
अक्षरम्	न विद्यते क्षरः यस्य सः अक्षरः, तम् - ब्रहुव्रीहिः ।
तत्परम्	तस्मात् परः तत्परः, तम् - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः आदिकर्त्रे आदि + कृ (डुकृञ् - करणे) + तृच्, तस्मै ।
(घ) तद्धितान्तः गरीयसे गुरु + ईयसुन्, तस्मै (अतिशयार्थे) ।

भावस्पष्टीकरणम् -

कस्मात् च न नमेरन् ?	
कस्मै कस्मात् च न नमेरन् ?	**ते** कस्मात् च न नमेरन् ?
पुनश्च कस्मै ते कस्मात् च न नमेरन् ?	**आदिकर्त्रे** ते कस्मात् च न नमेरन् ?
कस्मात् अपि आदिकर्त्रे ते कस्मात् च न नमेरन् ?	**ब्रह्मणः** अपि आदिकर्त्रे ते कस्मात् च न नमेरन् ?
कीदृशात् ब्रह्मणः अपि आदिकर्त्रे ते कस्मात् च न नमेरन् ?	**गरीयसे** ब्रह्मणः अपि आदिकर्त्रे ते कस्मात् च न नमेरन् ?
गरीयसे ब्रह्मणः अपि आदिकर्त्रे ते कस्मात् च न नमेरन् ? **किमर्थम् ?**	**(यतः) त्वम् (असि) ।**
त्वं **कीदृशम्** (असि) ।	**अक्षरम्** (असि) ।
त्वं **किम्** अक्षरम् (असि)?	त्वं **यत्** अक्षरम् (असि) ।
त्वं तत् **कीदृशं** यत् अक्षरम् ?	त्वं **तत्परम्**, यत् अक्षरम् (असि) ।
त्वं **पुनश्च कीदृशं** तत्परम्, यत् अक्षरम् (असि) ?	त्वम् **असत् (च)** तत्परम्, यत् अक्षरम् (असि) ।
त्वं **पुनश्च कीदृशम्** असत् (च) तत्परम्, यत् अक्षरम् (असि) ?	त्वं **सत्** असत् (च) तत्परम्, यत् अक्षरम् (असि) ।
अस्मिन् श्लोके सम्बोधनपदानि कानि ?	**महात्मन्, अनन्त, देवेश, जगन्निवास !**

तात्पर्यम् - हे महात्मन् ! त्वं ब्रह्मणोऽपि जनकः । तादृशं त्वां जनाः किं कारणं न नमस्कुर्वन्ति ? अवश्यं ते नमस्कुर्वन्ति ।

त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानम् ।
वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वमनन्तरूप ॥११.३८॥

पदच्छेदः - त्वम्, आदिदेवः, पुरुषः, पुराणः, त्वम्, अस्य, विश्वस्य, परम्, निधानम् ।
वेत्ता, असि, वेद्यम्, च, परम्, च, धाम, त्वया, ततम्, विश्वम्, अनन्तरूप ॥

अन्वयः - अनन्तरूप ! त्वम् आदिदेवः पुरुषः पुराणः । त्वम् अस्य विश्वस्य परं निधानं वेत्ता असि । वेद्यं परं धाम च । विश्वं त्वया ततम् ।

पदार्थः - अनन्तरूप = अगण्यरूप ! त्वम् आदिदेवः = त्वं प्रथमदेवः, पुराणः पुरुषः = प्राचीनः पुरुषः, अस्य = एतस्य, विश्वस्य = जगतः, परं निधानम् = प्रकृष्टम् अधिकरणम्, वेत्ता असि = ज्ञाता असि, वेद्यम् = ज्ञेयम्, परम् = प्रकृष्टम्, धाम च = निवासश्च, विश्वम् = जगत्, त्वया = भवता, ततम् = व्याप्तम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनन्तरूप	अ. पुं. सम्बो. एक.	त्वम्	युष्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
आदिदेवः	अ. पुं. प्र. एक. (विशेषणम्)	पुरुषः	अ. पुं. प्र. एक. (विशेषणम्)
पुराणः	अ. पुं. प्र. एक. (विशेषणम्)	अस्य	अस्मद्- द. सर्व. ष. एक. (विशेषणम्)
विश्वस्य	अ. नपुं. ष. एक. (विशेषणम्)	परम्	अ. नपुं. प्र. एक.
निधानम्	अ. नपुं. प्र. एक.	वेत्ता	ऋ. पुं. प्र. एक. (विशेषणम्)
असि	अस् (अस - भुवि) पर. कर्तरि लट्. मपु. एक.	वेद्यम्	अ. नपुं. प्र. एक. (विशेषणम्)
धाम	धामन्- न. नपुं. प्र. एक. (विशेष्यम्)	विश्वम्	अ. नपुं. प्र. एक. (विशेष्यम्)
च	अव्ययम्	त्वया	युष्मद्- द. सर्व. तृ. एक
ततम्	अ. नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	पुराणस्त्वम्	पुराणः + त्वम्	विसर्गसन्धिः (सकारः) ।
	वेत्तासि	वेत्ता + असि	सवर्णदीर्घसन्धिः ।
(ख) समासः	आदिदेवः	आदिः देवः आदिदेवः - कर्मधारयः ।	
	अनन्तरूप	अनन्तं रूपं यस्य सः अनन्तरूपः, तत्सम्बुद्धौ - बहुव्रीहिः ।	
(ग) कृदन्तः	निधानम्	नि + धा (डुधाञ् - धारणपोषणयोः) + ल्युट् ।	
	वेत्ता	विद् (विद - ज्ञाने) + तृच् ।	
	वेद्यम्	विद् (विद - ज्ञाने) + यत् (कर्मणि) ।	
	ततम्	तन् (तनु - विस्तारे) + क्त (कर्मणि) ।	

भावस्पष्टीकरणम् -

त्वम् असि ।	
त्वं कः असि ?	त्वम् आदिदेवः असि ।

त्वम् आदिदेवः **पुनश्च कः** असि ?	त्वम् आदिदेवः **पुरुषः** असि।
त्वम् आदिदेवः **कीदृशः** पुरुषः असि ?	त्वम् आदिदेवः **पुराणः** पुरुषः असि।
निधानम् असि।	
कीदृशं निधानम् असि ?	**परं** निधानम् असि।
कस्य परं निधानम् असि ?	**विश्वस्य** परं निधानम् असि।
कीदृशस्य विश्वस्य परं निधानम् असि ?	**अस्य** विश्वस्य परं निधानम् असि।
वेत्ता असि।	
पुनः किम् असि ?	**वेद्यम्** असि।
पुनः किम् असि ?	**धाम** असि।
कीदृशं धाम असि ?	**परं च** धाम असि।
ततम्।	
केन ततम् ?	**त्वया** ततम्।
किं ततम् ?	**विश्वं** ततम्।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अनन्तरूप !**

तात्पर्यम् - अगण्यरूप ! भवान् प्रथमदेवः, प्राचीनः पुरुषः, त्वम् एतस्य जगतः परमाश्रयः, त्वं ज्ञाता असि। ज्ञेयं च असि। प्रकृष्टं पदमपि असि। जगत् भवता व्याप्तम्।

वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च।
नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते ॥११.३९॥

पदच्छेदः - वायुः, यमः, अग्निः, वरुणः, शशाङ्कः, प्रजापतिः, त्वम्, प्रपितामहः, च। नमः, नमः, ते, अस्तु, सहस्रकृत्वः, पुनः, च, भूयः, अपि, नमः, नमः, ते ॥

अन्वयः - त्वं वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः प्रपितामहः च। ते सहस्रकृत्वः नमः नमः अस्तु। भूयः अपि ते नमः नमः।

पदार्थः - त्वम् = भवान्, वायुः = वायुः, यमः = मृत्युदेवता, अग्निः = हुताशनः, वरुणः = प्रचेताः, शशाङ्कः = चन्द्रः, प्रजापतिः = हिरण्यगर्भः, प्रपितामहः च = हिरण्यगर्भस्य अपि पिता, ते = तुभ्यम्, सहस्रकृत्वः = सहस्रवारम्, नमः = नमः अस्तु। भूयः अपि = पुनः पुनः, ते नमः नमः = तव नमस्कारः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
त्वम्	युष्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	वायुः	उ. पुं. प्र. एक. (विशेषणम्)
यमः	अ. पुं. प्र. एक. (विशेषणम्)	अग्निः	इ. पुं. प्र. एक. (विशेषणम्)
वरुणः	अ. पुं. प्र. एक. (विशेषणम्)	शशाङ्कः	अ. पुं. प्र. एक. (विशेषणम्)
प्रजापतिः	इ. पुं. प्र. एक. (विशेषणम्)	प्रपितामहः	अ. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	ते	युष्मद्- द. सर्व. च. एक.
सहस्रकृत्वः	अव्ययम्	नमः	अव्ययम्
अस्तु	अस् (अस - भुवि) पर. कर्तरि लोट्. प्रपु. एक.	भूयः	अव्ययम्
अपि	अव्ययम्		

व्याकरणम् -

(क) सन्धिः

वायुर्यमः	वायुः + यमः	विसर्गसन्धिः (रेफः)।
यमोऽग्निः	यमः + अग्निः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च।
अग्निर्वरुणः	अग्निः + वरुणः	विसर्गसन्धिः (रेफः)।
प्रजापतिस्त्वम्	प्रजापतिः + त्वम्	विसर्गसन्धिः (सकारः)।
प्रपितामहश्च	प्रपितामहः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
नमस्तेऽस्तु	नमस्ते + अस्तु	पूर्वरूपसन्धिः।
पुनश्च	पुनः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
भूयोऽपि	भूयः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च।
नमो नमः	नमः + नमः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
नमस्ते	नमः + ते	विसर्गसन्धिः (सकारः)।

(ख) समासः

प्रजापतिः	प्रजानां पतिः प्रजापतिः - षष्ठीतत्पुरुषः।
प्रपितामहः	प्रगतः पितामहः प्रपितामहः - प्रादितत्पुरुषः।

भावस्पष्टीकरणम् -

त्वम् असि।	
त्वं **कः** असि ?	त्वं **वायुः** असि।

त्वं वायुः **पुनश्च कः असि ?**	त्वं वायुः **यमः** असि ।
त्वं वायुः यमः **पुनश्च कः** असि ?	त्वं वायुः **यमः अग्निः** असि ।
त्वं वायुः यमः अग्निः **पुनश्च कः** असि ?	त्वं वायुः यमः अग्निः **वरुणः** असि ।
त्वं वायुः यमः अग्निः वरुणः **पुनश्च कः** असि ?	त्वं वायुः यमः अग्निः वरुणः **शशाङ्कः** असि ।
त्वं वायुः यमः अग्निः वरुणः शशाङ्कः **पुनश्च कः** असि ?	त्वं वायुः यमः अग्निः वरुणः शशाङ्कः **प्रजापतिः** च असि ।
त्वं वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः **पुनश्च कः** च असि ?	त्वं वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः **प्रपितामहः** च असि ।
त्वं वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः प्रपितामहः च असि ? **ते किम् ?**	त्वं वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः प्रपितामहः च असि । **ते अस्तु ।**
त्वं वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः प्रपितामहः च असि । **ते किम् अस्तु ?**	त्वं वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः प्रपितामहः च असि । **ते नमः अस्तु ।**
त्वं वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः प्रपितामहः च असि । ते **कतिकृत्वः** नमः नमः अस्तु ?	त्वं वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः प्रपितामहः च असि । ते **सहस्रकृत्वः** नमः नमः अस्तु ।

तात्पर्यम् - त्वं वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः प्रपितामहः च । ते सहस्रकृत्वः नमः नमः अस्तु ।

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः ॥११.४०॥

पदच्छेदः - नमः, पुरस्तात्, अथ, पृष्ठतः, ते, नमः, अस्तु, ते, सर्वतः, एव, सर्व ।
अनन्तवीर्य ! अमितविक्रमः, त्वम्, सर्वम्, समाप्नोषि, ततः, असि, सर्वः ॥

अन्वयः - पुरस्तात् अथ पृष्ठतः ते नमः । सर्व ! ते सर्वत एव नमः अस्तु । अनन्तवीर्य ! त्वम् अमितविक्रमः सर्वं समाप्नोषि । ततः सर्वः असि ।

पदार्थः - पुरस्तात् = पुरतः, अथ पृष्ठतः = पश्चात् च, ते नमः = तुभ्यं नमः, सर्व = सर्वात्मन् ! ते सर्वतः = परितः एव, नमः अस्तु = नमोऽस्तु, अनन्तवीर्य = अपरिमितपराक्रम ! त्वम् अमितविक्रमः = त्वम् अगणितपराक्रमः, सर्वम् = सर्वम्, समाप्नोषि = व्याप्नोषि । ततः = तस्मात्, सर्वः असि = सकलः असि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पुरस्तात्	अव्ययम्	अथ	अव्ययम्
पृष्ठतः	अव्ययम्	नमः	अव्ययम्
ते	युष्मद्- द. सर्व. च. एक.	सर्वतः	अव्ययम्
एव	अव्ययम्	अस्तु	अस् (अस - भुवि) पर. कर्तरि लोट्. प्रपु. एक.
अनन्तवीर्य	अ. पुं. सम्बो. एक.	सर्वम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)
समाप्नोषि	सम् + आप् (आप्लृ व्याप्तौ) पर. कर्तरि लट्. मपु. एक.	ततः	अव्ययम्
सर्व	अ. सर्व. पुं. सम्बो. एक.	असि	अस् (अस - भुवि) पर. कर्तरि लट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः

पुरस्तादथ	पुरस्तात् + अथ	जश्त्वसन्धिः ।
पृष्ठतस्ते	पृष्ठतः + ते	विसर्गसन्धिः (सकारः) ।
नमोऽस्तु	नमः + अस्तु	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।
सर्वत एव	सर्वतः + एव	विसर्गसन्धिः (लोपः) ।
अनन्तवीर्यामितविक्रमः	अनन्तवीर्य + अमितविक्रमः	सवर्णदीर्घसन्धिः ।
अनन्तवीर्यामितविक्रमस्त्वम्	अनन्तवीर्यामितविक्रमः + त्वम्	विसर्गसन्धिः (सकारः) ।
ततोऽसि	ततः + असि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः

अनन्तवीर्य	अनन्तं वीर्यं यस्य सः अनन्तवीर्यः, तत्सम्बुद्धौ - बहुव्रीहिः।
अमितः	न मितः अमितः - नञ्तत्पुरुषः ।
अमितविक्रमः	अमितः विक्रमः यस्य सः बहुव्रीहिः।

भावस्पष्टीकरणम् -

ते नमः ।	
कुतः ते नमः ?	**पृष्ठतः** ते नमः ।
पुनश्च कुतः पृष्ठतः ते नमः ?	**पुरस्तात् अथ** पृष्ठतः ते नमः ।
पुरस्तात् अथ पृष्ठतः ते नमः । **पुनश्च किम् ?**	पुरस्तात् अथ पृष्ठतः ते नमः । **(पुनश्च) नमः अस्तु ।**
पुरस्तात् अथ पृष्ठतः ते नमः । **पुनश्च कुतः नमः अस्तु ?**	पुरस्तात् अथ पृष्ठतः ते नमः । **सर्वत एव नमः अस्तु ।**
पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव **कस्मै** नमः अस्तु ?	पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव **ते** नमः अस्तु ।
पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव ते नमः अस्तु । **किमर्थम् ?**	पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव ते नमः अस्तु । **(यतः) समाप्नोषि ।**
पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव ते नमः अस्तु । **(यतः) किं समाप्नोषि ?**	पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव ते नमः अस्तु । **(यतः) सर्वं समाप्नोषि ।**
पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव ते नमः अस्तु । **(यतः) कः सर्वं समाप्नोषि ?**	पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव ते नमः अस्तु । **(यतः) त्वं सर्वं समाप्नोषि ।**
पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव ते नमः अस्तु । (यतः) **कीदृशः** त्वं सर्वं समाप्नोषि ?	पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव ते नमः अस्तु । (यतः) **अमितविक्रमः** त्वं सर्वं समाप्नोषि ।
पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव ते नमः अस्तु । (यतः) अमितविक्रमः त्वं सर्वं समाप्नोषि । **ततः किम् ?**	पुरस्तात् अथ पृष्ठतः ते नमः । सर्व ! ते सर्वत एव नमः अस्तु । अमितविक्रमः त्वम् सर्वं समाप्नोषि । **ततः असि ।**
पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव ते नमः अस्तु । (यतः) अमितविक्रमः त्वं सर्वं समाप्नोषि । **ततः कीदृशः असि ?**	पुरस्तात् अथ पृष्ठतः ते नमः । सर्वत एव ते नमः अस्तु । (यतः) अमितविक्रमः त्वं सर्वं समाप्नोषि । **ततः सर्वः असि ।**
अस्मिन् श्लोके सम्बोधनपदे के ?	**सर्व ! अनन्तवीर्य !**

तात्पर्यम् - पुरतः पश्चात् च तुभ्यं नमोऽस्तु । सर्वात्मक ! तुभ्यं परितः नमः अस्तु । अपरिमितविक्रम ! त्वम् अगणितपराक्रमः सर्वं व्याप्नोषि । तस्मात् सकलः असि ।

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ।
अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि ॥११.४१॥

यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।
एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम् ॥११.४२॥

पदच्छेदः - सखा, इति, मत्वा, प्रसभम्, यत्, उक्तम्, हे, कृष्ण, हे, यादव, हे, सखा, इति ।
अजानता, महिमानम्, तव, इदम्, मया, प्रमादात्, प्रणयेन, वा, अपि ॥
यत्, च, अवहासार्थं, असत्कृतः, असि, विहारशय्यासनभोजनेषु ।
एकः, अथवा, अपि, अच्युत, तत्समक्षम्, तत्, क्षामये, त्वाम्, अहम्, अप्रमेयम् ॥

अन्वयः - तव इदं महिमानम् अजानता मया प्रमादात् प्रणयेन वा अपि यत् सखा इति मत्वा प्रसभं हे कृष्ण हे यादव हे सखा इति उक्तम्, विहारशय्यासनभोजनेषु अवहासार्थं एकः अथवा तत्समक्षं वा यत् असत्कृतः असि अच्युत तत् अहम् अप्रमेयं त्वां क्षामये ।

पदार्थः - तव इदं महिमानम् = तव एतद् माहात्म्यम्, अजानता = अनवगच्छता, मया = मया, प्रमादात् = मनोविक्षेपेण, प्रणयेन वा अपि = प्रेम्णा वा अपि, यत् = यत्, सखा इति = वयस्यः इति, मत्वा = विचिन्त्य, प्रसभम् = सहसा, हे कृष्ण हे यादव हे सखा इति उक्तम् = यत् आलपितम्, विहारशय्यासनभोजनेषु = सञ्चारे शयने भक्षणे भोजने च, अवहासार्थं = परिहासार्थम्, एकः = मित्रैः रहितः, अथवा = यद्वा, तत्समक्षम् = मित्राणां पुरतः, वा यत् असत्कृतः = अवमानितः, असि = भवसि, अच्युत = विष्णो, तत् = तत्, अहम् = अहम्, अप्रमेयम् = प्रमातुम् अयोग्यम्, त्वां क्षामये = यथा त्वं क्षाम्यसि तथा करोमि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तव	युष्मद्- द. सर्व. ष. एक.	इदम्	इदम्- म. सर्व. नपुं. द्वि. एक. (विशेषणम्)
महिमानम्	महिमन्- न. पुं. द्वि. एक. (विशेष्यम्)	अजानता	अजानत्- त. पुं. तृ. एक.
मया	अस्मद्- द. सर्व. तृ. एक.	प्रमादात्	अ. पुं. प. एक.
प्रणयेन	अ. पुं. तृ. एक.	वा	अव्ययम्
अपि	अव्ययम्	यत्	अव्ययम्
इति	अव्ययम्	मत्वा	क्त्वान्तम् अव्ययम्
प्रसभम्	अव्ययम्	कृष्ण	अ. पुं. सम्बो. एक.
यादव	अ. पुं. सम्बो. एक.	सखा (सखे)	सखि- इ. पुं. सम्बो. एक.
उक्तम्	अ. नपुं. द्वि. एक. (विशेषणम्)	विहारशय्या-सनभोजनेषु	अ. नपुं. स. बहु.

अवहासार्थम्	अव्ययम्	एकः	अ. सर्व. पुं. प्र. एक. (विशेषणम्)
अथवा	अव्ययम्	तत्समक्षम्	अव्ययम्
असत्कृतः	अ. पुं. प्र. एक. (विशेष्यम्)	असि	अस् (अस - भुवि) पर. कर्तरि. लट्. मपु. एक.
अच्युत	अ. पुं. सम्बो. एक.	तत्	तद्- द. सर्व. प्र. एक. (विशेषणम्)
अहम्	अस्मद्- द. सर्व. प्र. एक.	अप्रमेयम्	अ. पुं. द्वि. एक. (विशेषणम्)
त्वाम्	युष्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)	क्षामये	क्षम् (क्षमु - सहने) आत्म. णिच्. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	सखेति	सखा + इति	गुणसन्धिः ।
	यदुक्तम्	यत् + उक्तम्	जश्त्वसन्धिः ।
	तवेदम्	तव + इदम्	गुणसन्धिः ।
	वापि	वा + अपि	सवर्णदीर्घसन्धिः ।
	यच्च	यत् + च	श्चुत्वसन्धिः ।
	चावहासार्थम्	च + अवहासार्थं	सवर्णदीर्घसन्धिः ।
	कृतोऽसि	कृतः + असि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।
	एकोऽथवा	एकः + अथवा	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।
	अप्यच्युत	अपि + अच्युत	यण्सन्धिः ।

(ख) समासः	अजानता	न जानन् अजानन् तेन - नञ्तत्पुरुषः ।
	अवहासार्थं	अवहासाय इदम्, अवहासार्थं - चतुर्थीतत्पुरुषः ।
	विहारशय्यासनभोजनेषु	विहारश्च शय्या च आसनं च भोजनं च विहारशय्यासनभोजनानि, तेषु - द्वन्द्वः ।
	तत्क्षामये	तस्य क्षामये, तत्क्षामये - षष्ठीतत्पुरुषः ।
	अप्रमेयम्	न प्रमेयः अप्रमेयः, तम् - नञ्तत्पुरुषः।
(ग) कृदन्तः	मत्वा	मन् (मन - ज्ञाने) + क्त्वा ।
	उक्तम्	वच् (वच - परिभाषणे) + क्त (कर्मणि) ।
	जानता	ज्ञा (ज्ञा - अवबोधने) + शतृ, (कर्तरि) तेन ।

	सत्कृतः	सत् + कृ (डुकृञ् - करणे) + क्त (कर्मणि) ।
	आसनम्	आस् (आस - उपवेशने) + ल्युट् (अधिकरणे) ।
	भोजनम्	भुज् (भुज - पालनाभ्यवहारयोः) + ल्युट् ।
	प्रमेयम्	प्र + मा (माङ् - माने शब्दे च) + ण्यत् ।
(घ) तद्धितान्तः	महिमानम्	महा + इमनिच्, तम् ।

भावस्पष्टीकरणम् -

उक्तम् ।	
किम् इति उक्तम् ?	**हे कृष्ण हे यादव हे सखा** इति उक्तम् ।
हे कृष्ण हे यादव हे सखा इति **कथम्** उक्तम् ?	हे कृष्ण हे यादव हे सखा इति **प्रसभम्** उक्तम् ।
किं कृत्वा हे कृष्ण हे यादव हे सखा इति प्रसभम् उक्तम् ?	**मत्वा** हे कृष्ण हे यादव हे सखा इति प्रसभम् उक्तम् ।
कः इति मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभम् उक्तम् ?	**सखा इति** मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभम् उक्तम् ।
सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभं **केन** उक्तम् ?	सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति **मया** प्रसभम् उक्तम् ।
सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभं **कीदृशेन** मया उक्तम् ?	सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभम् **अजानता** मया उक्तम् ।
सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति **कम्** अजानता मया प्रसभम् उक्तम् ?	सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति **महिमानम्** अजानता मया प्रसभम् उक्तम् ।
सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति **कस्य** महिमानम् अजानता मया प्रसभम् उक्तम् ?	सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति **तव** महिमानम् अजानता मया प्रसभम् उक्तम् ।
तव महिमानम् अजानता मया सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभं **कस्मात्** उक्तम् ?	तव महिमानम् अजानता मया सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभं **प्रमादात् प्रणयेन वापि** उक्तम् ?
असत्कृतः असि ।	
किमर्थम् असत्कृतः असि ?	**अवहासार्थं** असत्कृतः असि ।
अवहासार्थं **केषु** असत्कृतः असि ?	अवहासार्थं **विहारशय्यासनभोजनेषु** असत्कृतः असि ।

अवहासार्थं विहारशय्यासनभोजनेषु **कीदृशः** (त्वम्) असत्कृतः असि ?	अवहासार्थं विहारशय्यासनभोजनेषु **एकः** (त्वम्) असत्कृतः असि ।
अवहासार्थं विहारशय्यासनभोजनेषु एकः अथवा **कथम्** (त्वम्) असत्कृतः असि ?	अवहासार्थं विहारशय्यासनभोजनेषु एकः **अथवा तत्समक्षम्** (त्वम्) असत्कृतः असि ।
तव महिमानम् अजानता मया सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभं प्रमादात् प्रणयेन वापि उक्तम्, अवहासार्थं विहारशय्यासनभोजनेषु एकः अथवा तत्समक्षम् (त्वम्) असत्कृतः असि । **तेन किम् ?**	तव महिमानम् अजानता मया सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभं प्रमादात् प्रणयेन वापि उक्तम्, अवहासार्थं विहारशय्यासनभोजनेषु एकः अथवा तत्समक्षम् (त्वम्) असत्कृतः असि । **क्षामये ।**
तव महिमानम् अजानता मया सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभं प्रमादात् प्रणयेन वापि उक्तम्, अवहासार्थं विहारशय्यासनभोजनेषु एकः अथवा तत्समक्षम् (त्वम्) असत्कृतः असि । **कं** क्षामये ?	तव महिमानम् अजानता मया सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभं प्रमादात् प्रणयेन वापि उक्तम्, अवहासार्थं विहारशय्यासनभोजनेषु एकः अथवा तत्समक्षम् (त्वम्) असत्कृतः असि । **त्वां** क्षामये ।
तव महिमानम् अजानता मया सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभं प्रमादात् प्रणयेन वापि उक्तम्, अवहासार्थं विहारशय्यासनभोजनेषु एकः अथवा तत्समक्षम् (त्वम्) असत्कृतः असि । **कीदृशं** त्वां क्षामये ?	तव महिमानम् अजानता मया सखा इति मत्वा हे कृष्ण हे यादव हे सखा इति प्रसभं प्रमादात् प्रणयेन वापि उक्तम्, अवहासार्थं विहारशय्यासनभोजनेषु एकः अथवा तत्समक्षम् (त्वम्) असत्कृतः असि । **अप्रमेयम्** त्वां क्षामये ।
अनयोः श्लोकयोः सम्बोधनपदानि कानि ?	**कृष्ण, यादव, सखा (सखे), अच्युत !**

तात्पर्यम् - हे कृष्ण ! तवेदं माहात्म्यम् अनवगच्छन् अहं पूर्वम् अनवधानेन प्रणयेन वा साधारणपुरुषधिया हे कृष्ण ! हे यादव ! हे सखे ! इत्यादिना शब्देन त्वां सम्बोधितवान् तथा विहारे शयने उपवेशने भोजने च मित्राणां पुरतः पृष्ठतो वा त्वाम् अवहासार्थं तिरस्कृतवान् तत्सर्वं यथा त्वं मां क्षाम्यसि तथा करोमि । अर्थात् तदपराधप्रायश्चित्तार्थं सर्वमपि इदानीं करोमि इत्यर्थः ।

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥११.४३॥

पदच्छेदः - पिता, असि, लोकस्य, चराचरस्य, त्वम्, अस्य, पूज्यः, च, गुरुः, गरीयान् ।
न, त्वत्समः, अस्ति, अभ्यधिकः, कुतः, अन्यः, लोकत्रये, अपि, अप्रतिमप्रभाव ॥

अन्वयः - त्वं चराचरस्य अस्य लोकस्य पिता असि पूज्यः गुरुः गरीयान् च। अप्रतिमप्रभाव ! लोकत्रये अपि त्वत्समः न अस्ति अभ्यधिकः कुतः अन्यः।

पदार्थः - त्वम् = भवान्, चराचरस्य = स्थावरजङ्गमस्य, अस्य = एतस्य, लोकस्य = जगतः, पिता असि = जनकः असि, पूज्यः = अर्च्यः, गुरुः = शास्त्रोपदेष्टा, गरीयान् च = गुरुतरः च, अप्रतिमप्रभाव = अवर्णनीयप्रभाववान्, लोकत्रये अपि = भुवनत्रये अपि, त्वत्समः = भवत्सदृशः, न अस्ति = न विद्यते अभ्यधिकः = अतिशयानस्तु, अन्यः= परः, कुतः = कथम् ?

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
त्वम्	युष्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	चराचरस्य	अ. पुं. ष. एक. (विशेषणम्)
अस्य	इदम् - द. सर्व. पुं. ष. एक. (विशेषणम्)	लोकस्य	अ. पुं. ष. एक. (विशेष्यम्)
पिता	ऋ. पुं. प्र. एक. (विशेषणम्)	असि	अस् (अस - भुवि) पर. कर्तरि लट्. मपु. एक.
पूज्यः	अ. पुं. प्र. एक. (विशेषणम्)	गुरुः	उ. पुं. प्र. एक. (विशेष्यम्)
गरीयान्	गरीयस्- सका. पुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
अप्रतिमप्रभाव	अ. पुं. सम्बो. एक	लोकत्रये	अ. नपुं. स. एक.
अपि	अव्ययम्	त्वत्समः	अ. पुं. प्र. एक.
न	अव्ययम्	अस्ति	अस् (अस - भुवि) पर. कर्तरि लट्. प्रपु. एक.
अभ्यधिकः	अ. पुं. प्र. एक.	कुतः	अव्ययम्
अन्यः	अ. सर्व. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः

पितासि	पिता + असि	सवर्णदीर्घः।
पूज्यश्च	पूज्यः + च	विसर्गसन्धिः श्चुत्वम्।
गुरुर्गरीयान्	गुरुः + गरीयान्	विसर्गसन्धिः (रेफः)।
त्वत्समोऽस्ति	त्वत्समः + अस्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
अस्त्यभ्यधिकः	अस्ति + अभ्यधिकः	यण्सन्धिः।
कुतोऽन्यः	कुतः + अन्यः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।

	लोकत्रयेऽपि	लोकत्रये + अपि	पूर्वरूपसन्धिः।
	अप्यप्रतिमप्रभाव	अपि + अप्रतिमप्रभाव	यण्सन्धिः।
(ख) समासः	चराचरस्य	चरश्च अचरश्च अनयोः समाहारः, चराचरम् - द्वन्द्वः।	
	त्वत्समः	त्वया समः, त्वत्समः - तृतीयातत्पुरुषः।	
	लोकत्रये	लोकानां त्रयं लोकत्रयम्, तस्मिन् - षष्ठीतत्पुरुषः।	
	अप्रतिमप्रभाव	अप्रतिमः प्रभावः यस्य सः अप्रतिमप्रभावः, तत्सम्बुद्धौ - बहुव्रीहिः।	
(ग) कृदन्तः	पूज्यः	पूज् (पूज - पूजने) + यत्।	
(घ) तद्धितान्तः	गरीयान्	गुरु + ईयसुन् (अतिशयार्थे)।	

भावस्पष्टीकरणम् -

असि।	
कः असि ?	**पिता** असि।
कस्य पिता असि ?	**लोकस्य** पिता असि।
कस्य लोकस्य पिता असि ?	**अस्य** लोकस्य पिता असि।
पुनश्च कस्य अस्य लोकस्य पिता असि ?	**चराचरस्य** अस्य लोकस्य पिता असि।
कः चराचरस्य अस्य लोकस्य पिता असि ?	**त्वं** चराचरस्य अस्य लोकस्य पिता असि।
त्वं चराचरस्य अस्य लोकस्य पिता **पुनश्च कीदृशः** असि ?	त्वं चराचरस्य अस्य लोकस्य पिता **पूज्यः** च असि।
त्वं चराचरस्य अस्य लोकस्य पिता पूज्यः **पुनश्च कीदृशः** च असि ?	त्वं चराचरस्य अस्य लोकस्य पिता पूज्यः **गुरुः** च असि।
त्वं चराचरस्य अस्य लोकस्य पिता पूज्यः गुरुः **पुनश्च कीदृशः** च असि ?	त्वं चराचरस्य अस्य लोकस्य पिता पूज्यः गुरुः **गरीयान्** च असि।
त्वं चराचरस्य अस्य लोकस्य पिता पूज्यः गुरुः गरीयान् च असि। **पुनः किम् ?**	त्वं चराचरस्य अस्य लोकस्य पिता पूज्यः गुरुः गरीयान् च असि। **(पुनः) न अस्ति।**
त्वं चराचरस्य अस्य लोकस्य पिता पूज्यः गुरुः गरीयान् च असि। (पुनः) **कः न अस्ति ?**	त्वं चराचरस्य अस्य लोकस्य पिता पूज्यः गुरुः गरीयान् च असि। **त्वत्समः न अस्ति।**
त्वं चराचरस्य अस्य लोकस्य पिता पूज्यः गुरुः गरीयान् च असि। **कुत्र** त्वत्समः न अस्ति ?	त्वं चराचरस्य अस्य लोकस्य पिता पूज्यः गुरुः गरीयान् च असि। **लोकत्रये** त्वत्समः न अस्ति।
त्वं चराचरस्य अस्य लोकस्य पिता पूज्यः गुरुः गरीयान् च असि। लोकत्रये त्वत्समः न अस्ति ? **ततः किं ?**	त्वं चराचरस्य अस्य लोकस्य पिता पूज्यः गुरुः गरीयान् च असि। लोकत्रये त्वत्समः न अस्ति। **(ततः) अभ्यधिकः कुतः अन्यः स्यात् ?**

तात्पर्यम् - भवान् स्थावरजङ्गमस्य एतस्य लोकस्य जनकः असि। अर्च्यः आचार्यः गुरुतरः च असि। अप्रमेयमहिमन्! भुवनत्रये अपि भवत्सदृशः न विद्यते। कथं पुनः भवतः अत्यधिकः ?

तस्मात् प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमीशमीड्यम्।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम्॥११.४४॥

पदच्छेदः - तस्मात्, प्रणम्य, प्रणिधाय, कायम्, प्रसादये, त्वाम्, अहम्, ईशम्, ईड्यम्।
पिता, इव, पुत्रस्य, सखा, इव, सख्युः, प्रियः, प्रियायाः, अर्हसि, देव, सोढुम्॥

अन्वयः - देव! तस्मात् प्रणम्य कायं प्रणिधाय ईड्यम् ईशम् त्वाम् अहं प्रसादये। पुत्रस्य पिता इव, सख्युः सखा इव, प्रियायाः प्रियः इव सोढुम् अर्हसि।

पदार्थः - देव = प्रभो! तस्मात् = हेतोः, प्रणम्य = नमस्कृत्य, कायम् = शरीरम्, प्रणिधाय = नम्रं कृत्वा, ईड्यम् = स्तुत्यम्, ईशम् = प्रभुम्, अहम् = अहम्, त्वां प्रसादये = त्वां प्रसन्नं करोमि, पुत्रस्य = तनयस्य, पिता इव = जनकः इव, सख्युः = सुहृदः, सखा इव = सुहृत् इव, प्रियायाः = प्रेयस्याः, प्रियः इव = प्रियकरः इव, सोढुम् = क्षन्तुम्, अर्हसि = योग्यः असि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
देव	अ. पुं. सम्बो. एक.	तस्मात्	तद्- द. सर्व. पं. एक. (विशेषणम्)
प्रणम्य	ल्यबन्तम् अव्ययम्	कायम्	अ. पुं. द्वि. एक.
प्रणिधाय	ल्यबन्तम् अव्ययम्	ईड्यम्	अ. नपुं. द्वि. एक. (विशेषणम्)
ईशम्	अ. पुं. द्वि. एक. (विशेष्यम्)	अहम्	अस्मद्- द. सर्व. प्र. एक.
त्वाम्	युष्मद्- द. सर्व. द्वि. एक.	प्रसादये	प्र + सद् (षद्लृ - विशरणगत्यवसादनेषु) णिच्. आत्म. कर्तरि लट्. उपु. एक.
पुत्रस्य	अ. पुं. स. एक.	पिता	ऋ. पुं. प्र. एक.
इव	अव्ययम्	सख्युः	सखि - इ. पुं. ष. एक.
सखा	सखि - इ. पुं. प्र. एक.	प्रियायाः	आ. स्त्री. ष. एक.
प्रियः	अ. पुं. प्र. एक.	सोढुम्	ल्यबन्तम् अव्ययम्
अर्हसि	अर्ह् (अर्ह - पूजायाम्) पर. कर्तरि लट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	पितेव	पिता + इव	गुणसन्धिः।
	सखेव	सखा + इव	गुणसन्धिः।
	प्रियायार्हसि	प्रियायाः अर्हसि अत्र सवर्णदीर्घसन्धिः - आर्षप्रयोगः।	
(ख) कृदन्तः	प्रणम्य	प्र + नम् (णम - प्रह्वत्वे शब्दे च) + ल्यप्।	
	प्रणिधाय	प्र + नि + धा (डुधाञ् - धारणपोषणयोः) + ल्यप्।	
	ईड्यम्	ईड् (ईड - स्तुतौ) + यत्।	
	सोढुम्	सह् (षह - मर्षणे) + तुमुन्।	
(ग) तद्धितान्तः	कायम्	चि (चिञ् - चयने) + घञ् (चिनोति अस्थ्यादीनि अस्मिन् इति कायः।)	

भावस्पष्टीकरणम् -

अहं प्रसादये।	
अहं **कं** प्रसादये ?	अहं **त्वां** प्रसादये।
कीदृशं त्वाम् अहं प्रसादये ?	**ईशं** त्वाम् अहं प्रसादये।
पुनश्च कीदृशम् ईशं त्वाम् अहं प्रसादये ?	**ईड्यम्** ईशं त्वाम् अहं प्रसादये।
किं कृत्वा ईड्यम् ईशं त्वाम् अहं प्रसादये ?	**प्रणिधाय** ईड्यम् ईशं त्वाम् अहं प्रसादये।
किं प्रणिधाय ईड्यम् ईशं त्वाम् अहं प्रसादये ?	**कायं** प्रणिधाय ईड्यम् ईशं त्वाम् अहं प्रसादये।
पुनश्च किं कृत्वा कायं प्रणिधाय ईड्यम् ईशं त्वाम् अहं प्रसादये ?	**प्रणम्य** कायं प्रणिधाय ईड्यम् ईशं त्वाम् अहं प्रसादये।
कुतः प्रणम्य कायं प्रणिधाय ईड्यम् ईशं त्वाम् अहं प्रसादये ?	**तस्मात्** प्रणम्य कायं प्रणिधाय ईड्यम् ईशं त्वाम् अहं प्रसादये।
तस्मात् प्रणम्य कायं प्रणिधाय ईड्यम् ईशं त्वाम् अहं प्रसादये। **तेन किम् ?**	तस्मात् प्रणम्य कायं प्रणिधाय ईड्यम् ईशं त्वाम् अहं प्रसादये। **सोढुम् अर्हसि।**
कः इव सोढुम् अर्हसि ?	**पिता** इव सोढुम् अर्हसि।
कस्य पिता इव सोढुम् अर्हसि ?	**पुत्रस्य** पिता इव सोढुम् अर्हसि।
पुत्रस्य पिता इव **पुनश्च कः** इव सोढुम् अर्हसि ?	पुत्रस्य पिता इव **सखा** इव (च) सोढुम् अर्हसि।
पुत्रस्य पिता इव **कस्य** सखा इव, (च) सोढुम् अर्हसि ?	पुत्रस्य पिता इव, **सख्युः** सखा इव (च) सोढुम् अर्हसि।
पुत्रस्य पिता इव, सख्युः सखा इव, **पुनश्च कः इव** (च) सोढुम् अर्हसि ?	पुत्रस्य पिता इव, सख्युः सखा इव, **प्रियः इव** च (च) सोढुम् अर्हसि।

पुत्रस्य पिता इव, सख्युः सखा इव, **कस्याः** प्रियः इव च (च) सोढुम् अर्हसि ?	पुत्रस्य पिता इव, सख्युः सखा इव, **प्रियायाः** प्रियः इव च सोढुम् अर्हसि ।

तात्पर्यम् - प्रभो ! तस्मात् नमस्कृत्य शरीरं नम्रं कृत्वा स्तुत्यं प्रभुं त्वामहं प्रसादयामि । पुत्रस्य अपराधं पिता इव, सख्युः सखा इव, प्रियायाः प्रियः इव सोढुम् अर्हसि ।

अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ।
तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास ॥११.४५॥

पदच्छेदः - अदृष्टपूर्वम्, हृषितः, अस्मि, दृष्ट्वा, भयेन, च, प्रव्यथितम्, मनः, मे ।
तत्, एव, मे, दर्शय, देव, रूपम्, प्रसीद, देवेश, जगन्निवास ॥

अन्वयः - देवेश जगन्निवास ! प्रसीद । अदृष्टपूर्वं दृष्ट्वा हृषितः अस्मि । देव ! मे मनः प्रव्यथितं च । तत् रूपम् एव मे दर्शय ।

पदार्थः - देवेश = सुराधिप, जगन्निवास = लोकनिकेतन ! प्रसीद = प्रसन्नो भव । अदृष्टपूर्वम् = पूर्वम् अनवलोकितम्, दृष्ट्वा = विलोक्य, हृषितः = सन्तुष्टः, अस्मि = भवामि, देव = प्रभो, मे मनः = मम चित्तम्, प्रव्यथितं च = व्याकुलं च, तत् = पूर्वं दृष्टं रूपम् एव, मे दर्शय = मां प्रदर्शय ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
देवेश	अ. पुं. सम्बो. एक.	जगन्निवास	अ. पुं. सम्बो. एक.
प्रसीद	प्र + सद् (षद्लृ - विशरणगत्यवसादनेषु) पर. लोट्. मपु. एक.	अदृष्टपूर्वम्	अ. नपुं. द्वि. एक.
दृष्ट्वा	क्त्वान्तम् अव्ययम्	हृषितः	अ. पुं. प्र. एक. (विशेषणम्)
अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.	देव	अ. पुं. सम्बो. एक.
मे	अस्मद्- द. सर्व. ष. एक.	मनः	मनस्- सका. नपुं. प्र. एक. (विशेष्यम्)
प्रव्यथितम्	अ. नपुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	रूपम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
एव	अव्ययम्	दर्शय	दृश् (दृशिर् - प्रेक्षणे) णिच्. आत्म. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः हृषितोऽस्मि — हृषितः + अस्मि — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।

(ख) समासः
- अदृष्टम् — न दृष्टम् अदृष्टम् - नञ्तत्पुरुषः ।
- अदृष्टपूर्वम् — अदृष्टः पूर्वं यः सः अदृष्टपूर्वः, तम् - बहुव्रीहिः ।
- देवेश — देवानाम् ईशः देवेशः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः ।
- जगन्निवास — जगतः निवासः जगन्निवासः, तत्सम्बुद्धौ जगन्निवास - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः
- हृषितः — हृष् (हृष - तुष्टौ) + क्त (कर्तरि) ।
- दृष्ट्वा — दृश् (दृशिर् - प्रेक्षणे) + क्त्वा ।
- प्रव्यथितम् — प्र + व्यथ् (व्यथ भयसञ्चलनयोः) कर्तरि ।

भावस्पष्टीकरणम् -

अस्मि ।	
कीदृशः अस्मि ?	**हृषितः** अस्मि ।
किं कृत्वा हृषितः अस्मि ?	**दृष्ट्वा** हृषितः अस्मि ।
किं दृष्ट्वा हृषितः अस्मि ?	**अदृष्टपूर्वं** दृष्ट्वा हृषितः अस्मि ।
अदृष्टपूर्वं दृष्ट्वा हृषितः अस्मि । **अतः किम् ?**	अदृष्टपूर्वं दृष्ट्वा हृषितः अस्मि । **(अतः) प्रसीद ।**
अदृष्टपूर्वं दृष्ट्वा हृषितः अस्मि । (अतः) प्रसीद । **अपि च किम् ?**	अदृष्टपूर्वं दृष्ट्वा हृषितः अस्मि । (अतः) प्रसीद । **प्रव्यथितं च ।**
अदृष्टपूर्वं दृष्ट्वा हृषितः अस्मि । (अतः) प्रसीद । **किं** प्रव्यथितं च ?	अदृष्टपूर्वं दृष्ट्वा हृषितः अस्मि । (अतः) प्रसीद । **मनः** प्रव्यथितं च ।
अदृष्टपूर्वं दृष्ट्वा हृषितः अस्मि । (अतः) प्रसीद । **कस्य** मनः प्रव्यथितं च ?	अदृष्टपूर्वं दृष्ट्वा हृषितः अस्मि । (अतः) प्रसीद । **मे** मनः प्रव्यथितं च ।
दर्शय ।	
कस्मै दर्शय ?	**मे** दर्शय ।
किम् एव मे दर्शय ?	**रूपम्** एव मे दर्शय ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**देवेश, जगन्निवास !**

तात्पर्यम् - हे भगवन् ! अद्य यावत् अदृष्टपूर्वं त्वदीयं रूपं दृष्ट्वा अतीव हर्षं प्राप्नोमि । देव ! भीत्या व्यथामपि अहम् अनुभवन् अस्मि । हे देवेश, लोकाधार ! तदेव रूपं मे दर्शय यत् पूर्वं किरीटादिमत्त्वेन सौम्यं रूपं प्रदर्शितम् ।

किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते॥११.४६॥

पदच्छेदः - किरीटिनम्, गदिनम्, चक्रहस्तम्, इच्छामि, त्वाम्, द्रष्टुम्, अहम्, तथा, एव।
तेन, एव, रूपेण, चतुर्भुजेन, सहस्रबाहो, भव, विश्वमूर्ते॥

अन्वयः - विश्वमूर्ते अहं किरीटिनं गदिनं चक्रहस्तं त्वां तथा एव द्रष्टुम् इच्छामि। सहस्रबाहो ! चतुर्भुजेन तेन रूपेण एव (उपलक्षितः) भव।

पदार्थः - विश्वमूर्ते = विश्वाकार !, अहं किरीटिनम् = अहं मुकुटधारिणम्, गदिनम् = गदाधरम्, चक्रहस्तम् = चक्रपाणिम्, त्वाम् = त्वाम्, तथा एव = तेन एव प्रकारेण, द्रष्टुम् = विलोकितुम् इच्छामि = अभिलषामि, सहस्रबाहो = सहस्रहस्त ! चतुर्भुजेन = चतुर्हस्तेन, तेन रूपेण एव (उपलक्षितः) = आकारेण एव विशिष्टः, भव = वर्तस्व।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विश्वमूर्ते	इ. पुं. सम्बो. एक.	अहम्	अस्मद्- द. सर्व. प्र. एक.
किरीटिनम्	किरीटिन्- न. पुं. द्वि. एक. (विशेषणम्)	गदिनम्	गदिन्- न. पुं. द्वि. एक. (विशेषणम्)
चक्रहस्तम्	अ. पुं. द्वि. एक. (विशेषणम्)	त्वाम्	युष्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)
तथा	अव्ययम्	एव	अव्ययम्
द्रष्टुम्	तुमुन्नन्तम् अव्ययम्	इच्छामि	इच्छ् (इषु - इच्छायाम्) पर. कर्तरि लट्. उपु. एक.
चतुर्भुजेन	अ. पुं. तृ. एक. (विशेषणम्)	तेन	तद्- द. सर्व. पुं. तृ. एक. (विशेषणम्)
रूपेण	अ. नपुं. तृ. एक. (विशेष्यम्)	भव	भू (भू - सत्तायाम्) पर. कर्तरि. लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः
तथैव — तथा + एव — वृद्धिसन्धिः।
तेनैव — तेन + एव — वृद्धिसन्धिः।

(ख) समासः
चक्रहस्तम् — चक्रं हस्ते यस्य सः चक्रहस्तः, तम् - बहुव्रीहिः।
चतुर्भुजेन — चत्वारः भुजाः यस्य सः चतुर्भुजः, तेन - बहुव्रीहिः।
सहस्रबाहो — सहस्रं बाहवः यस्य सः सहस्रबाहुः, तत्सम्बुद्धौ - बहुव्रीहिः।
विश्वमूर्ते — विश्वम् एव मूर्तिः विश्वमूर्तिः, तत्सम्बुद्धौ - बहुव्रीहिः।

(ग) कृदन्तः द्रष्टुम् दृश् (दृशिर् - प्रेक्षणे) + तुमुन् ।

(घ) तद्धितान्तः किरीटिनम् किरीट + इनि (मतुबर्थे) तम्, किरीटम् अस्य अस्मिन् वा अस्ति ।

गदिनम् गदिन् + इनि (मतुबर्थे) तम्, गदा अस्य अस्मिन् वा अस्ति ।

भावस्पष्टीकरणम् -

अहम् इच्छामि ।	
किं कर्तुम् अहम् इच्छामि ?	**द्रष्टुम्** अहम् इच्छामि ।
कथं द्रष्टुम् अहम् इच्छामि ?	**तथैव** द्रष्टुम् अहम् इच्छामि ।
कं तथैव द्रष्टुम् अहम् इच्छामि ?	**त्वां** तथैव द्रष्टुम् अहम् इच्छामि ।
कीदृशं त्वां तथैव द्रष्टुम् इच्छामि ?	**किरीटिनं** त्वां तथैव द्रष्टुम् इच्छामि ।
किरीटिनं **पुनश्च कीदृशं** त्वां तथैव द्रष्टुम् अहम् इच्छामि ?	किरीटिनं **गदिनं** त्वां तथैव द्रष्टुम् अहम् इच्छामि ।
किरीटिनं गदिनं **पुनश्च कीदृशं** त्वां तथैव द्रष्टुम् अहम् इच्छामि ?	किरीटिनं गदिनं **चक्रहस्तं** त्वां तथैव द्रष्टुम् अहम् इच्छामि ।
अहं किरीटिनं गदिनं चक्रहस्तं त्वां तथैव द्रष्टुम् अहम् इच्छामि । **अतः किम् ?**	अहं किरीटिनं गदिनं चक्रहस्तं त्वां तथैव द्रष्टुम् अहम् इच्छामि । **अतः** (उपलक्षितः) **भव ।**
अहं किरीटिनं गदिनं चक्रहस्तं त्वां तथैव द्रष्टुम् अहम् इच्छामि । अतः **केन रूपेण** (उपलक्षितः) भव ?	अहं किरीटिनं गदिनं चक्रहस्तं त्वां तथैव द्रष्टुम् अहम् इच्छामि । **तेन रूपेण एव** (उपलक्षितः) भव ।
अहं किरीटिनं गदिनं चक्रहस्तं त्वां तथैव द्रष्टुम् अहम् इच्छामि । **कीदृशेन** तेन रूपेण एव (उपलक्षितः) भव ?	अहं किरीटिनं गदिनं चक्रहस्तं त्वां तथा एव अहम् द्रष्टुम् इच्छामि । **चतुर्भुजेन** तेन रूपेण एव (उपलक्षितः) भव ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**विश्वमूर्ते ! सहस्रबाहो !**

तात्पर्यम् - विश्वाकार ! किरीटं धृत्वा, गदां स्वीकृत्य, चक्रं धृत्वा च यत् सौम्यं रूपं मां प्रदर्शितवान् असि तदेव रूपं सम्प्रति द्रष्टुम् इच्छामि । हे सहस्रबाहो ! तेनैव रूपेण आविर्भव ।

श्रीभगवानुवाच - **मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितमात्मयोगात् ।**
तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वम् ॥११.४७॥

पदच्छेदः -

श्रीभगवान्, उवाच - मया, प्रसन्नेन, तव, अर्जुन, इदम्, रूपम्, परम्, दर्शितम्, आत्मयोगात् ।
तेजोमयम्, विश्वम्, अनन्तम्, आद्यम्, यत्, मे, त्वत्, अन्येन, न, दृष्टपूर्वम् ॥

अन्वयः - अर्जुन ! प्रसन्नेन मया आत्मयोगात् तेजोमयं विश्वम् अनन्तम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम् ।

पदार्थः - अर्जुन = हे अर्जुन ! प्रसन्नेन = प्रशान्तेन, मया आत्मयोगात् = मया स्वसामर्थ्यात्, तेजोमयम् = कान्तिमयम्, विश्वम् = जगत्, अनन्तम् = अन्तशून्यम्, आद्यम् = प्रथमम्, यत् मे = यत् मम, त्वदन्येन = भवदितरेण, न दृष्टपूर्वम् = पूर्वम् अनवलोकितम्, इदम् = तादृशम् एतत्, परम् = उत्कृष्टम्, रूपम् = स्वरूपम्, तव = ते, दर्शितम् = प्रदर्शितम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	प्रसन्नेन	अ. पुं. तृ. एक. (विशेषणम्)
मया	अस्मद्- द. सर्व. तृ. एक. (विशेष्यम्)	आत्मयोगात्	अ. पुं. पं. एक.
तेजोमयम्	अ. नपुं. प्र. एक. (विशेषणम्)	विश्वम्	अ. नपुं. प्र. एक. (विशेषणम्)
अनन्तम्	अ. नपुं. प्र. एक. (विशेषणम्)	आद्यम्	अ. नपुं. प्र. एक. (विशेषणम्)
यत्	यद्- द. सर्व. प्र. एक. (विशेषणम्)	मे	अस्मद्- द. सर्व. ष. एक.
त्वत्	युष्मद्- द. सर्व. पं. एक.	अन्येन	अ. सर्व. पुं. तृ. एक.
न	अव्ययम्	दृष्टपूर्वम्	अ. नपुं. प्र. एक. (विशेषणम्)
इदम्	इदम्- म. सर्व. नपुं. प्र. एक. (विशेषणम्)	परम्	अ. नपुं. प्र. एक. (विशेषणम्)
रूपम्	अ. नपुं. प्र. एक. (विशेष्यम्)	तव	युष्मद्- द. सर्व. ष. एक.
दर्शितम्	अ. नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः

तवार्जुन	तव + अर्जुन	सवर्णदीर्घसन्धिः ।
यन्मे	यत् + मे	अनुनासिकसन्धिः ।
त्वदन्येन	त्वत् + अन्येन	जश्त्वसन्धिः ।

(ख) समासः

आत्मयोगात्	आत्मनो योगः, आत्मयोगः, तस्मात् - षष्ठीतत्पुरुषः ।
अनन्तम्	न अन्तः यस्य सः अनन्तः, तम् - नञ्तत्पुरुषः ।
दृष्टपूर्वम्	पूर्वं दृष्टः दृष्टपूर्वम् - सुप्समासः ।

(ग) कृदन्तः

प्रसन्नेन	प्र + सद् (षद्लृ - विशरणगत्यवसादनेषु) क्त, तेन (कर्मणि) ।
दर्शितम्	दृश् (दृशिर् - प्रेक्षणे) + क्त (कर्मणि) ।

(घ) तद्धितान्तः तेजोमयम् — तेजस् + मयट्, तेजः शब्दात् प्रचुरार्थे मयट्, तेजोमयम् - तेजोबहुलमित्यर्थः।

आद्यम् — आदि + यत्।

भावस्पष्टीकरणम् -

दर्शितम्।	
किं दर्शितम्।	**रूपं** दर्शितम्।
रूपं **कस्य** दर्शितम्?	रूपं **तव** दर्शितम्।
कीदृशं रूपं तव दर्शितम्?	**परं** रूपं तव दर्शितम्।
किं परं रूपं तव दर्शितम्?	**इदं** परं रूपं तव दर्शितम्।
कीदृशम् इदं परं रूपं तव दर्शितम्?	**न दृष्टपूर्वम्** इदं परं रूपं तव दर्शितम्।
केन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्?	**त्वदन्येन** न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्।
तत् किं त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्?	**यत् मे** त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्।
कीदृशं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्	**आद्यं** यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्।
पुनश्च कीदृशम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्?	**अनन्तम्** आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्।
किम् अनन्तम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्?	**विश्वम्** अनन्तम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्।
कीदृशं विश्वम् अनन्तम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्?	**तेजोमयं** विश्वम् अनन्तम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्।
कस्मात् तेजोमयं विश्वम् अनन्तम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्?	**आत्मयोगात्** तेजोमयं विश्वम् अनन्तम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्।
केन आत्मयोगात् तेजोमयं विश्वम् अनन्तम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्?	**मया** आत्मयोगात् तेजोमयं विश्वम् अनन्तम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्।
कीदृशेन मया आत्मयोगात् तेजोमयं विश्वम् अनन्तम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्?	**प्रसन्नेन** मया आत्मयोगात् तेजोमयं विश्वम् अनन्तम् आद्यं यत् मे त्वदन्येन न दृष्टपूर्वम् इदं परं रूपं तव दर्शितम्।
अस्मिन् श्लोके सम्बोधनपदं किम्?	**अर्जुन!**

तात्पर्यम् - हे अर्जुन ! अनुग्रहबुद्धिना मया स्वसामर्थ्यात् कान्तिमयं समस्तम् अन्तशून्यं प्रथमम् एतत् उत्कृष्टं स्वरूपं ते प्रदर्शितम्। मम एतत् रूपं भवदितरेण न कदापि पूर्वं दृष्टम्।

न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः।
एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥११.४८॥

पदच्छेदः - न, वेदयज्ञाध्ययनैः, न, दानैः, न, च, क्रियाभिः, न, तपोभिः, उग्रैः।
एवंरूपः, शक्यः, अहम्, नृलोके, द्रष्टुम्, त्वदन्येन, कुरुप्रवीर ॥

अन्वयः - कुरुप्रवीर ! नृलोके वेदयज्ञाध्ययनैः एवंरूपः अहं त्वदन्येन द्रष्टुं न शक्यः दानैः न क्रियाभिः न उग्रैः तपोभिः न।

पदार्थः - कुरुप्रवीर = कुरुश्रेष्ठ ! नृलोके = मनुष्यलोके, वेदयज्ञाध्ययनैः = निगमयागस्वाध्यायैः, एवंरूपः अहम् = ईदृशविशिष्टस्वरूपवान् अहम्, त्वदन्येन = भवदितरेण, द्रष्टुम् = वीक्षितुम्, न शक्यः = न अर्हः, दानैः = वितरणैः, न क्रियाभिः = न कर्मभिः, न उग्रैः = न तीव्रैः, तपोभिः न = तपश्चर्यादिभिः अपि न।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कुरुप्रवीर	अ. पुं. सम्बो. एक.	नृलोके	अ. पुं. स. एक.
वेदयज्ञाध्ययनैः	अ. नपुं. तृ. बहु.	एवंरूपः	अ. पुं. प्र. एक. (विशेषणम्)
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	त्वदन्येन	अ. पुं. तृ. एक.
द्रष्टुम्	तुमुन्नन्तम् अव्ययम्	न	अव्ययम्
शक्यः	अ. पुं. प्र. एक. (विशेषणम्)	दानैः	अ. नपुं. तृ. बहु.
क्रियाभिः	आ. स्त्री. तृ. बहु.	उग्रैः	अ. नपुं. तृ. बहु. (विशेषणम्)
तपोभिः	तपस्- सका. नपुं. तृ. बहु. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः	वेदयज्ञाध्ययनैर्न	वेदयज्ञाध्ययनैः + न	विसर्गसन्धिः (रेफः)।
	दानैर्न	दानैः + न	विसर्गसन्धिः (रेफः)।
	क्रियाभिर्न	क्रियाभिः + न	विसर्गसन्धिः (रेफः)।
	तपोभिरुग्रैः	तपोभिः + उग्रैः	विसर्गसन्धिः (रेफः)।
(ख) समासः	वेदयज्ञाः	वेदाश्च यज्ञाश्च वेदयज्ञाः - द्वन्द्वः।	
	वेदयज्ञाध्ययनैः	वेदयज्ञानाम् अध्ययनानि वेदयज्ञाध्ययनानि, तैः - षष्ठीतत्पुरुषः।	

	नृलोके	नृणां लोकः नृलोकः, तस्मिन् - षष्ठीतत्पुरुषः ।
	एवंरूपः	एवं रूपं यस्य सः एवंरूपः - बहुव्रीहिः ।
	कुरुप्रवीर	कुरुषु प्रवीरः कुरुप्रवीरः, तत्सम्बुद्धौ - सप्तमीतत्पुरुषः ।
(ग) कृदन्तः	अध्ययनैः	अधि + इ (इङ् - अध्ययने) + ल्युट्, तैः ।
	दानैः	दा (डुदाञ् - दाने) + ल्युट् ।
	द्रष्टुम्	दृश् (दृशिर् - प्रेक्षणे) + तुमुन् ।

भावस्पष्टीकरणम् -

न शक्यः ।	
किं कर्तुं न शक्यः ?	**द्रष्टुं** न शक्यः ।
केन द्रष्टुं न शक्यः ?	**त्वदन्येन** द्रष्टुं न शक्यः ।
कः त्वदन्येन द्रष्टुं न शक्यः ?	**अहं** त्वदन्येन द्रष्टुं न शक्यः ।
कीदृशः अहं त्वदन्येन द्रष्टुं न शक्यः ?	**एवंरूपः** अहं त्वदन्येन द्रष्टुं न शक्यः ।
कैः एवंरूपः अहं त्वदन्येन द्रष्टुं न शक्यः ?	**वेदयज्ञाध्ययनैः** एवंरूपः अहं त्वदन्येन द्रष्टुं न शक्यः ।
कुत्र वेदयज्ञाध्ययनैः एवंरूपः अहं त्वदन्येन द्रष्टुं न शक्यः ?	**नृलोके** वेदयज्ञाध्ययनैः एवंरूपः अहं त्वदन्येन द्रष्टुं न शक्यः ।
नृलोके वेदयज्ञाध्ययनैः एवंरूपः अहं त्वदन्येन द्रष्टुं न शक्यः । **पुनश्च काभिः (द्रष्टुं न शक्यः)** ?	नृलोके वेदयज्ञाध्ययनैः एवंरूपः अहं त्वदन्येन द्रष्टुं न शक्यः । **दानैः (द्रष्टुं न शक्यः)** ।
नृलोके वेदयज्ञाध्ययनैः एवंरूपः अहं त्वदन्येन द्रष्टुं न शक्यः । दानैः न **पुनश्च कैः** (द्रष्टुं न शक्यः) ?	नृलोके वेदयज्ञाध्ययनैः एवंरूपः अहं त्वदन्येन द्रष्टुं न शक्यः । दानैः, **क्रियाभिः** (द्रष्टुं न शक्यः) ।
नृलोके वेदयज्ञाध्ययनैः एवंरूपः अहं त्वदन्येन द्रष्टुं न शक्यः । दानैः न, क्रियाभिः न, **पुनश्च कैः** (द्रष्टुं न शक्यः) ?	नृलोके वेदयज्ञाध्ययनैः एवंरूपः अहं त्वदन्येन द्रष्टुं न शक्यः । दानैः, क्रियाभिः, **उग्रैः तपोभिः (अपि)** (द्रष्टुं न शक्यः) ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कुरुप्रवीर !**

तात्पर्यम् - कुरुश्रेष्ठ ! मृत्युलोके माम् एतादृशरूपं जनाः वेदानां कल्पसूत्रादीनां वा अध्ययनेन द्रष्टुं न शक्नुवन्ति । न दानेन, न कर्मणा नापि तीव्रेण तपसा । केवलं भवान् माम् ईदृशं दृष्टवान् ।

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदम्।
व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपमिदं प्रपश्य॥११.४९॥

पदच्छेदः - मा, ते, व्यथा, मा, च, विमूढभावः, दृष्ट्वा, रूपम्, घोरम्, इदृक्, मम, इदम्।
व्यपेतभीः, प्रीतमनाः, पुनः, त्वम्, तत्, एव, मे, रूपम्, इदम्, प्रपश्य॥

अन्वयः - घोरम् ईदृङ् मम रूपं दृष्ट्वा ते व्यथा मा, विमूढभावः च मा। त्वं व्यपेतभीः प्रीतमनाः मे तत् एव इदं रूपं पुनः प्रपश्य।

पदार्थः - घोरम् = भयङ्करम्, इदृक् = ईदृशम्, मम एतत् रूपम् = मम एतद्रूपम्, दृष्ट्वा = अवलोक्य, ते = तव, व्यथा मा = भयं मास्तु, विमूढभावः च मा = मूढचित्तत्वं च मास्तु, त्वम् = भवान्, व्यपेतभीः = अपगतभयः, प्रीतमनाः = सन्तुष्टचित्तः, मे तत् एव इदम् = मम स्थितपूर्वमेव तत्, रूपम् पुनः प्रपश्य।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
घोरम्	अ. पुं. द्वि. एक.	ईदृक्	ईदृश्- श. नपुं. द्वि. एक. (विशेषणम्)
मम	अस्मद्- द. सर्व. ष. एक.	रूपम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
दृष्ट्वा	क्त्वान्तम् अव्ययम्	ते	युष्मद्- द. सर्व. ष. एक.
व्यथा	आ. स्त्री. प्र. एक.	मा	अव्ययम्
विमूढभावः	अ. पुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
त्वम्	युष्मद् - द. सर्व. प्र. एक.	व्यपेतभीः	ई. पुं. प्र. एक.
प्रीतमनाः	प्रीतमनस् - सका. पुं. प्र. एक.	मे	अस्मद् - द. सर्व. ष. एक.
तद्	तद् - त. सर्व. प्र. एक. (विशेषणम्)	एव	अव्ययम्
इदम्	इदम् - म. सर्व. नपुं. प्र. एक. (विशेषणम्)	पुनः	अव्ययम्
प्रपश्य	प्र + पश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	विमूढभावो दृष्ट्वा	विमूढभावः + दृष्ट्वा	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	इदृङ्मम	इदृक् + मम	अनुनासिकसन्धिः।
	ममेदम्	मम + इदम्	गुणसन्धिः।
	पुनस्त्वम्	पुनः + त्वम्	विसर्गसन्धिः (सकारः)।

(ख) समासः व्यपेतभीः — व्यपेता भीः यस्मात् सः व्यपेतभीः - बहुव्रीहिः ।
प्रीतमनाः — प्रीतं मनः यस्य सः प्रीतमनाः - बहुव्रीहिः ।
विमूढभावः — विमूढस्य भावः विमूढभावः - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः विमूढः — वि + मुह् (मुह - वैचित्ये) + क्तः (कर्तरि) ।
दृष्ट्वा — दृश् (दृशिर् - प्रेक्षणे) + क्त्वा ।

भावस्पष्टीकरणम् -

प्रपश्य ।	
कदा प्रपश्य ?	**पुनः** प्रपश्य ।
किं पुनः प्रपश्य ?	**रूपं** पुनः प्रपश्य ।
किं रूपं पुनः प्रपश्य ?	**इदं** रूपं पुनः प्रपश्य ।
कः तत् एव इदं रूपं पुनः प्रपश्य ?	**त्वं** तत् एव इदं रूपं पुनः प्रपश्य ।
कीदृशः त्वं **मे** तत् एव इदं रूपं पुनः प्रपश्य ?	**प्रीतमनाः** त्वं मे तत् एव इदं रूपं पुनः प्रपश्य ।
पुनश्च कीदृशः प्रीतमनाः त्वं मे तत् एव इदं रूपं पुनः प्रपश्य ?	**व्यपेतभीः** प्रीतमनाः त्वं मे तत् एव इदं रूपं पुनः प्रपश्य ।
मा अस्तु ।	
का मा अस्तु ?	**व्यथा** मा अस्तु ।
व्यथा **पुनश्च कः** मा अस्तु ?	व्यथा **विमूढभावः** च मा अस्तु ।
कस्य व्यथा विमूढभावः च मा अस्तु ?	**ते** व्यथा विमूढभावः च मा अस्तु ।
किं कृत्वा ते व्यथा विमूढभावः च मा अस्तु ?	**दृष्ट्वा** ते व्यथा विमूढभावः च मा अस्तु ।
किं दृष्ट्वा ते व्यथा विमूढभावः च मा अस्तु ?	**रूपं** दृष्ट्वा ते व्यथा विमूढभावः च मा अस्तु ।
कस्य रूपं दृष्ट्वा ते व्यथा विमूढभावः च मा अस्तु ?	**मम** रूपं दृष्ट्वा ते व्यथा विमूढभावः च मा अस्तु ।
कीदृक् मम रूपं दृष्ट्वा ते व्यथा विमूढभावः च मा अस्तु ?	**इदृङ्** मम रूपं दृष्ट्वा ते व्यथा विमूढभावः च मा अस्तु ।
पुनश्च कीदृशम् इदृङ् मम रूपं दृष्ट्वा ते व्यथा विमूढभावः च मा अस्तु ।	**घोरम्** इदृङ् मम रूपं दृष्ट्वा ते व्यथा विमूढभावः च मा अस्तु ।

तात्पर्यम् - भयङ्करम् ईदृशं मम इदं स्वरूपम् अवलोक्य तव भयं मास्तु । त्वम् अपगतभयः सन्तुष्टचित्तः मम स्थितपूर्वं तदेव स्वरूपं पुनः पश्य ।

सञ्जय उवाच - **इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयामास भूयः।**
आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्महात्मा ॥११.५०॥

पदच्छेदः -

सञ्जयः, उवाच - इति, अर्जुनम्, वासुदेवः, तथा, उक्त्वा, स्वकम्, रूपम्, दर्शयामास, भूयः।
आश्वासयामास, च, भीतम्, एनम्, भूत्वा, पुनः, सौम्यवपुः, महात्मा ॥

अन्वयः - वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। महात्मा सौम्यवपुः पुनः भूत्वा भीतम् एनम् आश्वासयामास च।

पदार्थः - वासुदेवः = श्रीकृष्णः, इति = एवम्, अर्जुनम् = पार्थम्, तथा उक्त्वा = तेन प्रकारेण कथयित्वा, स्वकं रूपम् = स्वीयं रूपम्, भूयः दर्शयामास = पुनः दर्शितवान्। महात्मा पुनः = भगवान् पुनः, सौम्यवपुः भूत्वा = सौम्यशरीरः भूत्वा, भीतम् एनम् = भयग्रस्तम् एतम्, आश्वासयामास च = सान्त्वयामास च।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
वासुदेवः	अ. पुं. प्र. एक.	इति	अव्ययम्
अर्जुनम्	अ. पुं. द्वि. एक.	तथा	अव्ययम्
उक्त्वा	अव्ययम्	स्वकम्	अ. नपुं. द्वि. एक. (विशेषणम्)
रूपम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	दर्शयामास	दृश् (दृशिर् - प्रेक्षणे) णिच्. पर. कर्तरि लिट्. प्रपु. एक.
महात्मा	महात्मन्- न. पुं. प्र. एक. (विशेष्यम्)	सौम्यवपुः	सौम्यवपुस्- सका. पुं. प्र. एक. (विशेषणम्)
पुनः	अव्ययम्	भूत्वा	अव्ययम्
भीतम्	अ. पुं. द्वि. एक. (विशेषणम्)	एनम्	एतद्- द. पुं. द्वि. एक. (विशेषणम्)
आश्वासयामास	आ + श्वस् (श्वस - प्राणने) णिच्. पर. कर्तरि लिट्. प्रपु. एक.	च	अव्ययम्

व्याकरणम् -

(क) सन्धिः

इत्यर्जुनम्	इति + अर्जुनम्	यण्सन्धिः।
वासुदेवस्तथा	वासुदेवः + तथा	विसर्गसन्धिः (सकारः)।
तथोक्त्वा	तथा + उक्त्वा	गुणसन्धिः।
सौम्यवपुर्महात्मा	सौम्यवपुः + महात्मा	विसर्गसन्धिः (रेफः)।

(ख) समासः	सौम्यवपुः	सौम्यं वपुः यस्य सः सौम्यवपुः - बहुव्रीहिः।
	महात्मा	महान् आत्मा यस्य सः महात्मा - बहुव्रीहिः।
(ग) कृदन्तः	उक्त्वा	वच् (वच - परिभाषणे) + क्त्वा।
	भीतम्	भी (ञि भी - भये) + क्त (कर्तरि), तम्।
	भूत्वा	भू (भू - सत्तायाम्) + क्त्वा।
(घ) तद्धितान्तः	वासुदेवः	वसुदेव + अण् (अपत्यार्थे) वसुदेवस्य अपत्यं पुमान्।

भावस्पष्टीकरणम् -

दर्शयामास।	
किं दर्शयामास ?	**रूपं** दर्शयामास।
किं रूपं दर्शयामास ?	**स्वकं** रूपं दर्शयामास।
किं कृत्वा स्वकं रूपं दर्शयामास ?	**उक्त्वा** स्वकं रूपं दर्शयामास।
कम् उक्त्वा स्वकं रूपं दर्शयामास ?	**अर्जुनं तथा** उक्त्वा स्वकं रूपं दर्शयामास।
कः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास ?	**वासुदेवः इति** अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास।
वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। **किं कृतवान् च ?**	वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। **आश्वासयामास च।**
वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। **कम्** आश्वासयामास च ?	वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। **एनम्** आश्वासयामास च।
वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। **कीदृशम्** एनम् आश्वासयामास च ?	वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। **भीतम्** एनम् आश्वासयामास च।
वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। **किं कृत्वा** भीतम् एनम् आश्वासयामास च ?	वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। **पुनः भूत्वा** भीतम् एनम् आश्वासयामास च।
वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। **कीदृशः** भूत्वा भीतम् एनम् आश्वासयामास च ?	वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। **सौम्यवपुः** पुनः भूत्वा भीतम् एनम् आश्वासयामास च।
वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। **कः** सौम्यवपुः पुनः भूत्वा भीतम् एनम् आश्वासयामास च ?	वासुदेवः इति अर्जुनं तथा उक्त्वा स्वकं रूपं दर्शयामास। **महात्मा** सौम्यवपुः पुनः भूत्वा भीतम् एनम् आश्वासयामास च।

तात्पर्यम् - श्रीकृष्णः एवम् अर्जुनं पूर्वोक्तप्रकारेण कथयित्वा स्वीयं रूपं पुनः दर्शयामास। ततश्च महानुभावः सः सौम्यशरीरः सन् भयग्रस्तम् एनम् अर्जुनं सान्त्वयामास।

अर्जुन उवाच - दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन।
इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥११.५१॥

पदच्छेदः -

अर्जुनः, उवाच - दृष्ट्वा इदं मानुषं रूपं तव सौम्यं जनार्दन।
इदानीम् अस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥

अन्वयः - जनार्दन ! सौम्यं मानुषम् इदं तव रूपं दृष्ट्वा इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि।

पदार्थः - जनार्दन = श्रीकृष्ण ! सौम्यम् = प्रसन्नम्, मानुषम् = मानवीयम्, इदम् = एतत्, तव रूपम् = ते रूपम्, दृष्ट्वा = अवलोक्य, इदानीम् = अधुना, प्रकृतिम् = पूर्वावस्थाम्, गतः = प्राप्तः, सचेताः = प्रसन्नमनाः, संवृत्तः = सञ्जातः, अस्मि = भवामि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
जनार्दन	अ. पुं. सम्बो. एक.	सौम्यम्	अ. नपुं. द्वि. एक. (विशेषणम्)
मानुषम्	अ. नपुं. द्वि. एक. (विशेषणम्)	इदम्	इदम् - म. नपुं. द्वि. एक. (विशेषणम्)
तव	युष्मद्- द. सर्व. ष. एक.	रूपम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
दृष्ट्वा	क्त्वान्तम् अव्ययम्	इदानीम्	अव्ययम्
प्रकृतिम्	इ. स्त्री. द्वि. एक.	गतः	अ पुं. प्र. एक. (विशेषणम्)
सचेताः	सचेतस्- सका. पुं. प्र. एक. (विशेष्यम्)	संवृत्तः	अ पुं. प्र. एक. (विशेषणम्)
अस्मि	अस् (अस - भुवि) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः दृष्ट्वेदम् दृष्ट्वा + इदम् गुणसन्धिः।

(ख) समासः सचेताः चेतसा सह विद्यमानः सचेताः अव्ययीभावः।

(ग) कृदन्तः दृष्ट्वा दृश् (दृशिर् - प्रेक्षणे) + क्त्वा।
संवृत्तः सम् + वृत् (वृतु - वर्तने) + क्त (कर्तरि)।
प्रकृतिम् प्र + कृ (डुकृञ् - करणे) + क्तिन्, ताम्।

	गतः	गम् (गम्लृ - गतौ) + क्त (कर्तरि) ।
(घ) तद्धितान्तः	मानुषम्	मनु + षुक् + अञ् (मनोः जातः) ।

भावस्पष्टीकरणम् -

संवृत्तः अस्मि ।	
कीदृशः संवृत्तः अस्मि ?	**सचेताः** संवृत्तः अस्मि ।
कां गतः सचेताः संवृत्तः अस्मि ?	**प्रकृतिं** गतः सचेताः संवृत्तः अस्मि ।
कदा प्रकृतिं गतः सचेताः संवृत्तः अस्मि ?	**इदानीं** प्रकृतिं गतः सचेताः संवृत्तः अस्मि ।
किं कृत्वा इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि ?	**दृष्ट्वा** इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि ।
किं दृष्ट्वा इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि ?	**रूपं** दृष्ट्वा इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि ।
कस्य रूपं दृष्ट्वा इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि ?	**तव** रूपं दृष्ट्वा इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि ।
किं तव रूपं दृष्ट्वा इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि ?	**इदं** तव रूपं दृष्ट्वा इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि ।
कीदृशम् इदं तव रूपं दृष्ट्वा इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि ?	**मानुषम्** इदं तव रूपं दृष्ट्वा इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि ।
कीदृशं मानुषम् इदं तव रूपं दृष्ट्वा इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि ?	**सौम्यं** मानुषम् इदं तव रूपं दृष्ट्वा इदानीं प्रकृतिं गतः सचेताः संवृत्तः अस्मि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**जनार्दन !**

तात्पर्यम् - श्रीकृष्ण ! प्रसन्नं मानवीयम् एतत् तव रूपं दृष्ट्वा अधुना प्रसन्नमनाः प्रकृतिस्थः च सञ्जातः अस्मि ।

श्रीभगवानुवाच - **सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।**
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥११.५२॥

पदच्छेदः -

श्रीभगवान्, उवाच - सुदुर्दर्शम्, इदम्, रूपम्, दृष्टवान्, असि, यत्, मम ।
देवाः, अपि, अस्य, रूपस्य, नित्यम्, दर्शनकाङ्क्षिणः ॥

अन्वयः - सुदुर्दर्शं मम यत् इदं रूपं दृष्टवान् असि अस्य रूपस्य देवाः अपि नित्यं दर्शनकाङ्क्षिणः ।

पदार्थः - सुदुर्दर्शम् = द्रष्टुं कठिनम्, मम यत् इदम् = मे यत् एतत्, रूपम् = स्वरूपम्, दृष्टवान् असि = अवलोकितवान् असि, अस्य = एतस्य, रूपस्य = आकारस्य, देवाः अपि = सुराः अपि, नित्यम् = सततम्, दर्शनकाङ्क्षिणः = दर्शनाभिलाषिणः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सुदुर्दर्शम्	अ. नपुं. द्वि. एक. (विशेषणम्)	मम	अस्मद्- द. सर्व. ष. एक.
यत्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	इदम्	इदम्- म. सर्व. नपुं. द्वि. एक. (विशेषणम्)
रूपम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	दृष्टवान्	दृष्टवत्- त. पुं. प्र. एक.
असि	अस् (अस - भुवि) पर. कर्तरि. लट्. मपु. एक.	अस्य	इदम्- म. सर्व. नपुं. ष. एक. (विशेषणम्)
रूपस्य	अ. नपुं. ष. एक. (विशेष्यम्)	देवाः	अ. पुं. प्र. बहु. (विशेष्यम्)
अपि	अव्ययम्	नित्यम्	अ. नपुं. द्वि. एक. क्रियावि.
दर्शनकाङ्क्षिणः	दर्शनकाङ्क्षिन्- न. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः
- यन्मम — यत् + मम — अनुनासिकसन्धिः।
- देवा अपि — देवाः + अपि — विसर्गसन्धिः (लोपः)।
- अप्यस्य — अपि + अस्य — यण्सन्धिः।

(ख) समासः
- दर्शनकाङ्क्षिणः — दर्शनं काङ्क्षन्ति इति दर्शनकाङ्क्षिणः - तच्छीलीके कर्तरि णिनिः उपपदसमासश्च।

(ग) कृदन्तः
- दृष्टवान् — दृश् (दृशिर् - प्रेक्षणे) + क्तवतु।
- सुदुर्दर्शम् — सु + दुर् + दृश् (दृशिर् - प्रेक्षणे) + खल् (कर्मणि)।
- काङ्क्षिणः — काङ्क्ष् (काक्षि - काङ्क्षायाम्) + कर्तरि णिनिः।

भावस्पष्टीकरणम् -

असि।	
किं कृतवान् असि ?	दृष्टवान् असि।
किं दृष्टवान् असि ?	रूपं दृष्टवान् असि।

किं रूपं दृष्टवान् असि ?	**यत् इदं रूपं** दृष्टवान् असि ।
कस्य यत् इदं रूपं दृष्टवान् असि ?	**मम** यत् इदं रूपं दृष्टवान् असि ।
कीदृशं मम यत् इदं रूपं दृष्टवान् असि ?	**सुदुर्दर्शं** मम यत् इदं रूपं दृष्टवान् असि ।
सुदुर्दर्शं मम यत् इदं रूपं दृष्टवान् असि । **तस्य किम् ?**	सुदुर्दर्शं मम यत् इदं रूपं दृष्टवान् असि। **तस्य दर्शनकाङ्क्षिणः (भवन्ति) ।**
सुदुर्दर्शं मम यत् इदं रूपं दृष्टवान् असि। **कस्य** दर्शनकाङ्क्षिणः (भवन्ति) ?	सुदुर्दर्शं मम यत् इदं रूपं दृष्टवान् असि। **अस्य** दर्शनकाङ्क्षिणः (भवन्ति) ।
सुदुर्दर्शं मम यत् इदं रूपं दृष्टवान् असि । अस्य **कस्य** दर्शनकाङ्क्षिणः (भवन्ति) ?	सुदुर्दर्शं मम यत् इदं रूपं दृष्टवान् असि । अस्य **रूपस्य** दर्शनकाङ्क्षिणः (भवन्ति) ।
सुदुर्दर्शं मम यत् इदं रूपं दृष्टवान् असि । अस्य रूपस्य **के** दर्शनकाङ्क्षिणः (भवन्ति) ?	सुदुर्दर्शं मम यत् इदं रूपं दृष्टवान् असि । अस्य रूपस्य **देवाः** अपि दर्शनकाङ्क्षिणः (भवन्ति) ।
सुदुर्दर्शं मम यत् इदं रूपं दृष्टवान् असि । अस्य रूपस्य देवाः अपि **कदा** दर्शनकाङ्क्षिणः (भवन्ति) ?	सुदुर्दर्शं मम यत् इदं रूपं दृष्टवान् असि । अस्य रूपस्य **नित्यं** देवाः अपि दर्शनकाङ्क्षिणः (भवन्ति) ।

तात्पर्यम् - मम यद् रूपं दृष्टवान् असि एतत् अतीव द्रष्टुं कठिनम् । मदीयम् एतत् रूपं द्रष्टुं देवाः अपि सर्वदा इच्छुकाः भवन्ति ।

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥११.५३॥

पदच्छेदः - न, अहम्, वेदैः, न, तपसा, न, दानेन, न, च, इज्यया ।
शक्यः, एवंविधः, द्रष्टुम्, दृष्टवान्, असि, माम्, यथा ॥

अन्वयः - अहम् एवंविधः वेदैः न, तपसा न, दानेन न, इज्यया च न द्रष्टुं शक्यः यथा मां दृष्टवान् असि ।

पदार्थः - अहम् = अहम्, एवंविधः = एवंप्रकारः, वेदैः = निगमैः, न तपसा = तपश्चर्यया न, दानेन न = वितरणेन न, इज्यया च न = यज्ञेन च न, द्रष्टुम् = अवलोकितुम्, न शक्य = अर्हः न, यथा = येन प्रकारेण, माम् = माम्, दृष्टवान् असि = विलोकितवान् असि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	एवंविधः	अ. पुं. प्र. एक. (विशेषणम्)
वेदैः	अ. पुं. तृ. बहु.	न	अव्ययम्

तपसा	तपस्- सका. नपुं. तृ. एक.	दानेन	अ. नपुं. तृ. एक.
च	अव्ययम्	इज्यया	आ. स्त्री. तृ. एक.
द्रष्टुम्	तुमुन्नन्तम् अव्ययम्	शक्यः	अ. पुं. प्र. एक. (विशेषणम्)
यथा	अव्ययम्	माम्	अस्मद्- द. सर्व. द्वि. एक.
दृष्टवान्	दृष्टवत्- त. पुं. प्र. एक. (विशेषणम्)	असि	अस् (अस - भुवि) पर. कर्तरि लट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	नाहम्	न + अहम्	सवर्णदीर्घसन्धिः।
	वेदैर्न	वेदैः + न	विसर्गसन्धिः (रेफः)।
	चेज्यया	च + इज्यया	गुणसन्धिः।
	एवंविधो द्रष्टुम्	एवंविधः + द्रष्टुम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	एवंविधः	एवं विधा यस्य सः एवंविधः - बहुव्रीहिः।	
(ग) कृदन्तः	दानम्	दा (डुदाञ् - दाने) + ल्युट्।	
	द्रष्टुम्	दृश् (दृशिर् - प्रेक्षणे) + तुमुन्।	
	शक्यः	शक् (शक्लृ - शक्तौ) + यत्।	

भावस्पष्टीकरणम् -

असि।	
किं कृतवान् असि ?	**दृष्टवान्** असि।
कं दृष्टवान् असि ?	**मां** दृष्टवान् असि।
कथं मां दृष्टवान् असि ?	**यथा** मां दृष्टवान् असि।
यथा मां दृष्टवान् असि **तथा किम् ?**	यथा मां दृष्टवान् असि **तथा न शक्यः।**
यथा मां दृष्टवान् असि तथा **किं कर्तुं** न शक्यः ?	यथा मां दृष्टवान् असि **तथा द्रष्टुं** न शक्यः।
कया न द्रष्टुं शक्यः यथा मां दृष्टवान् असि ?	**इज्यया** न द्रष्टुं शक्यः यथा मां दृष्टवान् असि।
केन च न इज्यया न द्रष्टुं शक्यः यथा मां दृष्टवान् असि ?	**दानेन** न च इज्यया न द्रष्टुं शक्यः यथा मां दृष्टवान् असि।
पुनश्च केन च न दानेन न च इज्यया न द्रष्टुं शक्यः यथा मां दृष्टवान् असि ?	**तपसा** न, दानेन न, च इज्यया न द्रष्टुं शक्यः यथा मां दृष्टवान् असि।
पुनश्च कैः न, तपसा न, दानेन न, च इज्यया न द्रष्टुं शक्यः यथा मां दृष्टवान् असि ?	**वेदैः न,** तपसा न, दानेन न, च इज्यया न द्रष्टुं शक्यः यथा मां दृष्टवान् असि।

कः वेदैः न, तपसा न, दानेन न, च इज्यया न द्रष्टुं शक्यः यथा मां दृष्टवान् असि ?	**अहं** वेदैः न, तपसा न, दानेन न, च इज्यया न द्रष्टुं शक्यः यथा मां दृष्टवान् असि ।
अहं **कीदृशः** वेदैः न, तपसा न, दानेन न, च इज्यया न द्रष्टुं शक्यः यथा मां दृष्टवान् असि ?	अहम् **एवंविधः** वेदैः न, तपसा न, दानेन न, च इज्यया न द्रष्टुं शक्यः यथा मां दृष्टवान् असि ।

तात्पर्यम् - अहम् एवंप्रकारः निगमैः तपसा वितरणेन यज्ञेन च द्रष्टुं न शक्यः येन प्रकारेण मां दृष्टवान् असि ।

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥११.५४॥

पदच्छेदः - भक्त्या, तु, अनन्यया, शक्यः, अहम्, एवंविधः, अर्जुन ।
ज्ञातुम्, द्रष्टुम्, च, तत्त्वेन, प्रवेष्टुम्, च, परन्तप ॥

अन्वयः - परन्तप, अर्जुन ! अहम् अनन्यया भक्त्या तु एवंविधः तत्त्वेन ज्ञातुं द्रष्टुं च प्रवेष्टुं च शक्यः ।

पदार्थः - परन्तप = शत्रुतापन, अर्जुन = पार्थ ! अहम् = अहम्, अनन्यया = परमया, भक्त्या तु = प्रेम्णा तु, एवंविधः = एवंप्रकारः, तत्त्वेन = परमार्थतः, ज्ञातुम् = वेदितुम्, द्रष्टुम् = अवलोकितुम्, प्रवेष्टुं च = प्राप्तुं च, शक्यः = अर्हः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
परन्तप	अ. पुं. सम्बो. एक.	अर्जुन	अ. पुं. सम्बो. एक.
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	अनन्यया	आ. स्त्री. तृ. एक. (विशेषणम्)
भक्त्या	इ. स्त्री. तृ. एक. (विशेष्यम्)	तु	अव्ययम्
एवंविधः	अ. पुं. प्र. एक. (विशेषणम्)	तत्त्वेन	अ. पुं. तृ. एक.
ज्ञातुम्	तुमुन्नन्तम् अव्ययम्	द्रष्टुम्	तुमुन्नन्तम् अव्ययम्
च	अव्ययम्	प्रवेष्टुम्	तुमुन्नन्तम् अव्ययम्
शक्यः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	त्वनन्यया	तु + अनन्यया	यण्सन्धिः ।
	एवंविधोऽर्जुन	एवंविधः + अर्जुन	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।

(ख) समासः	एवंविधः	एवं विधा यस्य सः एवंविधः - बहुव्रीहिः ।
	अनन्यया	न अन्या अनन्या, तया - नञ्तत्पुरुषः ।
(ग) कृदन्तः	भक्त्या	भज् (भज - सेवायाम्) + क्तिन्, तया ।
	शक्यः	शक् (शक्लृ - शक्तौ) + यत् ।
	ज्ञातुम्	ज्ञा (ज्ञा अवबोधने) + तुमुन् ।
	द्रष्टुम्	दृश् (दृशिर् - प्रेक्षणे) + तुमुन् ।
	प्रवेष्टुम्	प्र + विश् (विश - प्रवेशने) + तुमुन् ।

भावस्पष्टीकरणम् -

शक्यः ।	
कः शक्यः ?	**अहं** शक्यः ।
अहं **किं कर्तुं** शक्यः ?	अहं **ज्ञातुं** शक्यः ।
अहं ज्ञातुं **पुनश्च किं** कर्तुं शक्यः ?	अहं ज्ञातुं **द्रष्टुं** च शक्यः ।
अहं ज्ञातुं द्रष्टुं **पुनश्च किं कर्तुं** च शक्यः ?	अहं ज्ञातुं द्रष्टुं **प्रवेष्टुं** च शक्यः ।
अहं **कया** ज्ञातुं द्रष्टुं पुनश्च प्रवेष्टुं च शक्यः ?	अहं **भक्त्या** ज्ञातुं द्रष्टुं प्रवेष्टुं च शक्यः ।
अहं **कीदृश्या** भक्त्या ज्ञातुं द्रष्टुं प्रवेष्टुं च शक्यः ?	अहम् **अनन्यया** भक्त्या ज्ञातुं द्रष्टुं प्रवेष्टुं च शक्यः ।
अहम् अनन्यया भक्त्या **कथंविधः** ज्ञातुं द्रष्टुं प्रवेष्टुं च शक्यः ?	अहम् अनन्यया भक्त्या **एवंविधः** ज्ञातुं द्रष्टुं प्रवेष्टुं च शक्यः ।
अहम् अनन्यया भक्त्या एवंविधः **केन** ज्ञातुं द्रष्टुं प्रवेष्टुं च शक्यः ?	अहम् अनन्यया भक्त्या एवंविधः **तत्त्वेन** ज्ञातुं द्रष्टुं प्रवेष्टुं च शक्यः ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**परन्तप, अर्जुन !**

तात्पर्यम् - शत्रुतापन ! अर्जुन ! अहं परमया भक्त्या तु एवंप्रकारः तत्त्वतः वेदितुं द्रष्टुं प्राप्तुं च शक्यः, नान्येन उपायेन ।

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥११.५५॥

पदच्छेदः - मत्कर्मकृत्, मत्परमः, मद्भक्तः, सङ्गवर्जितः ।
निर्वैरः, सर्वभूतेषु, यः, सः, माम्, एति, पाण्डव ॥

अन्वयः - पाण्डव ! यः मत्कर्मकृत् मत्परमः मद्भक्तः सङ्गवर्जितः सर्वभूतेषु निर्वैरः सः माम् एति ।

पदार्थः - पाण्डव = अर्जुन, यः मत्कर्मकृत् = यः मम कृते कर्म करोति, मत्परमः = मन्निष्ठः, मद्भक्तः = मम सेवकः, सङ्गवर्जितः = विषयसङ्गरहितः, सर्वभूतेषु = सर्वप्राणिषु, निर्वैरः = द्वेषरहितः, सः = सः जनः, माम् एति = माम् उपगच्छति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पाण्डव	अ. पुं. सम्बो. एक.	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
मत्कर्मकृत्	मत्कर्मकृत्- त. पुं. प्र. एक. (विशेषणम्)	मत्परमः	अ. पुं. प्र. एक. (विशेषणम्)
मद्भक्तः	अ. पुं. प्र. एक. (विशेषणम्)	सङ्गवर्जितः	अ. पुं. प्र. एक. (विशेषणम्)
सर्वभूतेषु	अ. पुं. स. बहु.	निर्वैरः	अ. पुं. प्र. एक. (विशेषणम्)
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	माम्	अस्मद्- द. सर्व. द्वि. एक.
एति	इ (इण् - गतौ) - पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः मत्कर्मकृन्मत्परमः — मत्कर्मकृत् + मत्परमः — परसवर्णसन्धिः ।

(ख) समासः
- मत्कर्मकृत् — मम कर्म मत्कर्म - षष्ठीतत्पुरुषः ।
  मत्कर्म करोति इति मत्कर्मकृत् - कर्तरि क्विप् उपपदसमासश्च ।
- मत्परमः — अहमेव परमः यस्य सः मत्परमः - बहुव्रीहिः ।
- मद्भक्तः — मम भक्तः मद्भक्तः - षष्ठीतत्पुरुषः ।
- सङ्गवर्जितः — सङ्गेन वर्जितः सङ्गवर्जितः - तृतीयातत्पुरुषः ।
- निर्वैरः — निर्गतं वैरं यस्मात् सः निर्वैरः - बहुव्रीहिः ।
- सर्वभूतेषु — सर्वाणि भूतानि सर्वभूतानि, तेषु - कर्मधारयः ।

(ग) तद्धितान्तः पाण्डव — पाण्डु + अण्, (अपत्यार्थे), तत्सम्बुद्धौ, पाण्डोः अपत्यं पुमान् ।

भावस्पष्टीकरणम् -

एति ।	
कम् एति ?	**माम्** एति ।
कः माम् एति ?	**सः** माम् एति ।
कीदृशः सः माम् एति ?	यः मत्कर्मकृत् सः माम् एति ।
यः मत्कर्मकृत् **पुनश्च कीदृशः** सः माम् एति ?	यः मत्कर्मकृत् **मत्परमः** सः माम् एति ।

यः मत्कर्मकृत् मत्परमः **पुनश्च कीदृशः** सः माम् एति ?	यः मत्कर्मकृत् मत्परमः **मद्भक्तः** सः माम् एति ।
यः मत्कर्मकृत् मत्परमः मद्भक्तः **पुनश्च कीदृशः** सः माम् एति ?	यः मत्कर्मकृत् मत्परमः मद्भक्तः **सङ्गवर्जितः** सः माम् एति ।
यः मत्कर्मकृत् मत्परमः मद्भक्तः सङ्गवर्जितः **पुनश्च कीदृशः** सः माम् एति ?	यः मत्कर्मकृत् मत्परमः मद्भक्तः सङ्गवर्जितः **निर्वैरः** सः माम् एति ।
यः मत्कर्मकृत् मत्परमः मद्भक्तः सङ्गवर्जितः **केषु** निर्वैरः सः माम् एति ?	यः मत्कर्मकृत् मत्परमः मद्भक्तः सङ्गवर्जितः **सर्वभूतेषु** निर्वैरः सः माम् एति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पाण्डव !**

तात्पर्यम् - अर्जुन ! यः जनः मम कृते कर्म करोति, मम कृते निष्ठावान् च अस्ति, मम सेवकः अस्ति, विषयसङ्गरहितः सर्वप्राणिषु द्वेषरहितः च भवति सः माम् उपगच्छति ।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनयोगो नाम एकादशोऽध्यायः ॥११॥

एकादशाध्यायस्य सारः

भगवतः विभूतीनां वर्णनं श्रुत्वा अपगतसम्भ्रमः अर्जुनः वदति - "आत्मानं भवान् येन प्रकारेण वदति तादृशमेव तव ऐश्वर्ययुक्तं स्वरूपं द्रष्टुम् अभिलषामि। तत् रूपं मया अवलोकितुं शक्यम् इति यदि चिन्तयसि तर्हि त्वं तत् अनश्वरं रूपं मां दर्शय" इति।

तदा श्रीकृष्णः अर्जुनं स्वस्य विभूतीः दर्शयन् कथितवान् - "मम बहुप्रकाराणि दिव्यानि नाना-आकारकाणि च रूपाणि पश्य। पूर्वम् अनवलोकितानि नानासङ्ख्याकानि अद्भुतानि अत्र पश्य। इदानीम् एकत्रैव वर्तमानं स्थावरजङ्गमसहितं समग्रमपि भुवनं पश्य" इति।

तदनन्तरं श्रीकृष्णः अर्जुनाय दिव्यदृष्टिं यच्छति। ततः स्वीयम् ऐश्वरं रूपं दर्शयति। तच्च रूपम् अत्यन्तं विस्मयकारकम् आसीत्। आकाशे युगपत् उत्थितानां सहस्रसूर्याणां तेजः तत्र आसीत्। तत् दृष्ट्वा विस्मितः अर्जुनः शिरसा देवं प्रणम्य एवम् अभाषत - "हे देव ! तव शरीरे सकलान् देवान् तथा स्थावरजङ्गमात्मकभूतविशेषसमुदायान्, ब्रह्माणम्, ईश्वरम्, सकलान् ऋषि-मुनीन्, सर्पान् च पश्यामि। तव मूलं मध्यम् अन्तं वा ज्ञातुं न शक्नोमि। त्वं किरीटवान् गदाधरः चक्रपाणिः तेजस्वी दीप्तिमान् द्रष्टुम् अशक्यः, कान्त्या अग्नेः सूर्यस्य च समानः वर्तसे। त्वम् उत्कृष्टं ब्रह्म, अस्य जगतः आधारः, शाश्वतः पुरुषोत्तमः। तव पराक्रमः परिच्छेत्तुं न शक्यः। तव अनन्ताः हस्ताः सन्ति, सूर्यचन्द्रौ तव नयने स्तः। तव मुखेषु जाज्वल्यमानः अग्निः भासते। त्वं स्वस्य तेजसा समग्रं जगत् तापयन् वर्तसे। भूम्यन्तरिक्षयोः मध्ये वर्तमानः सर्वोऽपि अवकाशः भवता एकेन परिव्याप्तः अस्ति। सर्वाः दिशः अपि त्वयैव व्याप्ताः। तव इदं स्वरूपं दृष्ट्वा भुवनत्रयमपि किं भविष्यतीति चिन्ताकुलम् अस्ति। देवसमूहाः त्वां प्रविशन्ति। केचित् भीताः मुकुलितहस्ताः त्वां स्तुवन्ति। मुनयः सिद्धाश्च स्तोत्रैः त्वां प्रशंसन्ति। रुद्राः आदित्याः वसवः साध्याः विश्वेदेवाः देवभिषजौ अश्विनीकुमारौ मरुद्गणाः पितृगणाः गन्धर्वाः यक्षाः असुराः सिद्धाः सर्वेऽपि आश्चर्यान्विताः त्वां पश्यन्ति। तव आकारः अत्यन्तं विचित्रः। तत्र बहूनि मुखानि लोचनानि च सन्ति। बहवः हस्ताः ऊरवः पादाश्च सन्ति। बहूनि उदराणि सन्ति। बहुभिः दन्तैः भयानकः दृश्यसे। एतादृशस्य आकारस्य दर्शनात् एव सर्वे जनाः चिन्ताम् उपगताः, तथा अहम्। बहुभिः दन्तैः भयानकः दृश्यसे। त्वं गगनचुम्बी, नानावर्णोपेतः, उद्घाटितवदनः, ज्वलितविस्तृत-लोचनश्च भासि। तत् दृष्ट्वा मम चित्तं प्रकम्पते। भयानकानि प्रलयाग्निसदृशानि च तव वदनानि दृष्ट्वा एव दिशः न जानामि। धैर्यं शान्तिं च कथमपि न प्राप्नोमि। प्रसन्नो भव। एते सर्वे अपि कौरवाः अन्यैः नृपैः सह तव मुखानि त्वरया प्रविशन्तः सन्ति। तैः सह भीष्मः द्रोणः कर्णः तथा अस्मत्पक्षीयाः बहवो योधमुख्याः प्रविशन्तः सन्ति। तव मुखानि दंष्ट्राभिः अत्यन्तं घोराणि भयानकानि च सन्ति। तानि प्रविष्टवत्सु एतेषु केचन दन्तानां मध्ये विलग्नाः दृश्यन्ते। तेषां शिरांसि चूर्णितानि दृश्यन्ते। यथा स्रोतसां प्रवाहाः सागरं प्रविशन्ति तथा एते शूराः तव मुखानि प्रविशन्ति। यथा पतङ्गाः अग्निम् आत्मविनाशाय प्रविशन्ति तथा एते तव मुखानि प्रविशन्ति। त्वं प्रकाशमानैः आननैः सर्वतः समग्रान् लोकान् समन्तात् ग्रसमानः लेलिह्यसे। तव तीक्ष्णाः किरणाः कान्तिभिः समस्तं जगत् सम्पूर्य नितरां तापयन्ति।"

"तव प्रवृत्तिं न जानामि। प्रथमं त्वां वेदितुम् इच्छामि। अनुगृहाण" - इति अर्जुनः यदा भगवन्तं प्रार्थयते तदा सः स्वरूपं स्पष्टीकरोति - "अहं सर्वान् लोकान् संहर्तुं प्रवृद्धः कालोऽस्मि। अधुना भीष्मद्रोणप्रभृतीन् योधान् न मारयसि

चेदपि अवश्यं मया ते मारिताः भविष्यन्ति। उत्तिष्ठ, कीर्तिं प्राप्नुहि। अरीन् विजित्य निष्कण्टकम् आधिपत्यम् अनुभव। एते मया इतः पूर्वमेव विनाशिताः। अतः त्वं निमित्तमात्रं भव। मया निहतानेव नाशय। व्यथां मा कुरु। युद्धे प्रवर्तस्व। रणे शत्रून् जेष्यसि।"

श्रीकृष्णस्य वाक्यं श्रुत्वा अर्जुनः कम्पमानः भीतश्च सन् तं पुनरपि प्रणम्य उक्तवान् - "तव सङ्कीर्तनेन जगत् सन्तुष्यति, त्वयि अनुरक्तं च भवति। राक्षसाः भीताः सन्तः पलायन्ते। सर्वे सिद्धसमुदायाः प्रणमन्ति। त्वं ब्रह्मणोऽपि जनकः। आदिदेवः, प्राचीनः पुरुषः। त्वम् एतस्य जगतः परमाश्रयः। त्वं ज्ञाता असि। ज्ञेयं च असि। प्रकृष्टं पदमपि असि। जगत् भवता व्याप्तम्। त्वं वायुः, यमः, अग्निः, वरुणः, शशाङ्कः, प्रजापतिः, प्रपितामहः च। ते सहस्रकृत्वः नमः। पुरतः, पश्चात्, परितः तुभ्यं नमः। त्वं सर्वं व्याप्नोषि। तस्मात् सकलः त्वमेव असि। तवेदं माहात्म्यम् अनवगच्छन् अहं पूर्वम् अनवधानेन प्रणयेन वा साधारणपुरुषधिया "हे कृष्ण! हे यादव! हे सखे!" इत्यादिना शब्देन भवन्तं सम्बोधितवान् तथा विहारे शयने उपवेशने भोजने च मित्राणां पुरतः पृष्ठतो वा त्वाम् अवहासार्थं तिरस्कृतवान् यत् तत्सर्वं क्षाम्यतु। भवान् स्थावरजङ्गमस्य अस्य लोकस्य जनकः। अर्च्यः, आचार्यः, गुरुतरः च। भुवनत्रये अपि भवत्सदृशः न विद्यते। कथं पुनः भवतः अत्यधिकः? त्वां नमस्कृत्य प्रसादयामि। पुत्रस्य अपराधं पिता इव, सख्युः सखा इव, प्रियायाः प्रियः इव मम अपराधं सोढुम् अर्हसि। अद्य यावत् अदृष्टपूर्वं त्वदीयं रूपं दृष्ट्वा अतीव हर्षं प्राप्नोमि। भीत्या व्यथामपि अनुभवन् अस्मि।" एतैः वचनैः स्वभीतिं व्यञ्जयन् अर्जुनः - "देव! पूर्वं यत् सौम्यं रूपं प्रदर्शितम्, तदेव रूपं मह्यं पुनः दर्शय"- इति प्रार्थयते।

श्रीकृष्णः तं समाश्वासयन् - "अनुग्रहबुद्धिना मया एतत् उत्कृष्टं स्वरूपं तुभ्यं प्रदर्शितम्। एतत् रूपं भवदितरेण कदापि पूर्वं न दृष्टम्। एतादृशरूपं मां जनाः वेदानां कल्पसूत्रादीनां वा अध्ययनेन द्रष्टुं न शक्नुवन्ति। न दानेन, न कर्मणा नापि तीव्रेण तपसा। केवलं भवान् माम् ईदृशं दृष्टवान्। मम इदं भयङ्करं स्वरूपम् अवलोक्य तव भयं मास्तु। तदेव मम पूर्वं स्वरूपं पुनः पश्य" - इति उक्त्वा अर्जुनं स्वीयं रूपं पुनः दर्शयामास। ततश्च तं सान्त्वयामास। तदा अर्जुनः - "प्रसन्नम् एतत् रूपं दृष्ट्वा अधुना प्रसन्नमनाः प्रकृतिस्थः च सञ्जातः अस्मि" इति कथितवान्।

अन्ते पुनः कृष्णः वदति - "मम यद् रूपं दृष्टवान् असि एतत् अतीव दुर्लभम्। एतत् द्रष्टुं देवाः अपि सर्वदा इच्छुकाः भवन्ति। अहं परमया भक्त्या तु एवंप्रकारः द्रष्टुं शक्यः, नान्येन उपायेन" इति।

एतेन वर्णनेन ज्ञायते यत् अस्मिन् अध्याये भगवान् स्वस्य विश्वव्यापि विराट्स्वरूपम् अर्जुनाय दर्शितवान् इति कारणेन अस्य अध्यायस्य नाम 'विश्वरूपदर्शनयोगः' इति अस्ति।

****

अथ द्वादशोऽध्यायः

१२

भक्तियोगः

अर्जुन उवाच - एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१२.१॥

पदच्छेदः -

अर्जुनः, उवाच - एवम्, सततयुक्ताः, ये, भक्ताः, त्वाम्, पर्युपासते।
ये, च, अपि, अक्षरम्, अव्यक्तम्, तेषाम्, के, योगवित्तमाः ॥

अन्वयः - ये भक्ताः एवं सततयुक्ताः त्वां पर्युपासते, ये च अपि अक्षरम् अव्यक्तं तेषां के योगवित्तमाः ?

पदार्थः - ये भक्ताः = ये आराधकाः, एवम् = सर्वकर्मार्पणादिना, सततयुक्ताः = नित्यसमाहिताः (समाधौ रताः), त्वां पर्युपासते = त्वां सेवन्ते ये च अपि = ये अपि पुनः, अक्षरम् = अविनाशि, अव्यक्तम् = अतीन्द्रियम्, तेषां = तेषु उभयेषु, के योगवित्तमाः = के अतिशयेन योगज्ञाः ?

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ये	यद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)	भक्ताः	अ. पुं. प्र. बहु. (विशेष्यम्)
एवम्	अव्ययम्	सततयुक्ताः	अ. पुं. प्र. बहु. (विशेषणम्)
त्वाम्	युष्मद्- द. सर्व. द्वि. एक.	पर्युपासते	परि + उप + आस् (आस उपवेशने) आत्म. कर्तरि लट्. प्रपु. बहु.
ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	च	अव्ययम्
अपि	अव्ययम्	अक्षरम्	अ. पुं. द्वि. एक. (विशेष्यम्)
अव्यक्तम्	अ. पुं. द्वि. एक. (विशेषणम्)	तेषाम्	युष्मद्- द. सर्व. ष. बहु. (विशेषणम्)
के	किम् - म. सर्व. प्र. बहु. (विशेषणम्)	योगवित्तमाः	अ. पुं. प्र. बहु. (विशेष्यम्)

व्याकरणम् -

(क) सन्धिः

सततयुक्ता ये	सततयुक्ताः + ये	विसर्गसन्धिः लोपः।
भक्तास्त्वाम्	भक्ताः + त्वाम्	विसर्गसन्धिः सकारः।
चापि	च + अपि	सवर्णदीर्घसन्धिः।
अप्यक्षरम्	अपि + अक्षरम्	यण्सन्धिः।

(ख) समासः

सततयुक्ताः	सततं युक्ताः सततयुक्ताः - सुप्सुपासमासः।
अक्षरम्	न क्षरम् अक्षरम्, तम् - नञ्तत्पुरुषः।
अव्यक्तम्	न व्यक्तम्, अव्यक्तम् - नञ्तत्पुरुषः।

(ग) तद्धितान्तः योगवित्तमाः - अतिशयेन योगविदः योगवित्तमाः - अतिशयार्थे तमप्-प्रत्ययः।

भावस्पष्टीकरणम् -

पर्युपासते ।	
कं पर्युपासते ?	**त्वां** पर्युपासते ।
के त्वां पर्युपासते ?	**सततयुक्ताः** त्वां पर्युपासते ।
कथं सततयुक्ताः त्वां पर्युपासते ?	**एवं** सततयुक्ताः त्वां पर्युपासते ।
के एवं सततयुक्ताः त्वां पर्युपासते ?	**भक्ताः** एवं सततयुक्ताः त्वां पर्युपासते ।
के भक्ताः एवं सततयुक्ताः त्वां पर्युपासते ?	**ये** भक्ताः एवं सततयुक्ताः त्वां पर्युपासते ।
ये भक्ताः एवं सततयुक्ताः त्वां पर्युपासते । **अपि च किम् ?**	ये भक्ताः एवं सततयुक्ताः त्वां पर्युपासते । **अपि च ये अव्यक्तं (पर्युपासते) ।**
ये भक्ताः एवं सततयुक्ताः त्वां पर्युपासते । **अपि च ये कीदृशम् अव्यक्तं (पर्युपासते) ?**	ये भक्ताः एवं सततयुक्ताः त्वां पर्युपासते । **अपि च ये अक्षरम् अव्यक्तं (पर्युपासते) ।**
ये भक्ताः एवं सततयुक्ताः त्वां पर्युपासते, **तेषां किम् ?**	ये भक्ताः एवं सततयुक्ताः त्वां पर्युपासते, **तेषां के योगवित्तमाः** ?

तात्पर्यम् - ये भक्ताः सर्वाणि कार्याणि समर्प्य नित्यसमाहिताः विश्वरूपं सर्वज्ञं त्वां सेवन्ते, ये पुनः अविनाशि अतीन्द्रियं निर्विशेषं तत्त्वं पर्युपासते तेषु उभयेषु के भक्ताः अतिशयेन योगज्ञाः ?

श्रीभगवानुवाच - **मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।**
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥१२.२॥

पदच्छेदः -

श्रीभगवान्, उवाच - मयि, आवेश्य, मनः, ये, माम्, नित्ययुक्ताः, उपासते ।
श्रद्धया, परया, उपेताः, ते, मे, युक्ततमा, मताः ॥

अन्वयः - ये मनः मयि आवेश्य नित्ययुक्ताः परया श्रद्धया उपेताः माम् उपासते ते मे युक्ततमा मताः ।

पदार्थः - ये = जनाः, मनः = चित्तम्, मयि = परमात्मनि, आवेश्य = प्रवेश्य, नित्ययुक्ताः = सततसमाहिताः, परया = प्रकृष्टया, श्रद्धया = आसक्त्या, उपेताः = समन्विताः, माम् उपासते = मां भजन्ते, ते = ते, मे = मम, युक्ततमा = योगिश्रेष्ठाः, मताः = सम्मताः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ये	यद् - द. सर्व. प्र. बहु. (विशेषणम्)	जनाः	अ. पुं. प्र. बहु. (विशेष्यम्)

मनः	मनस् - सका. नपुं. द्वि. एक.	मयि	अस्मद् - द. सर्व. स. एक.
आवेश्य	ल्यबन्तम् अव्ययम्	नित्ययुक्ताः	अ. पुं. प्र. बहु. (विशेषणम्)
परया	आ. स्त्री. तृ. एक. (विशेषणम्)	श्रद्धया	आ. स्त्री. तृ. एक. (विशेष्यम्)
उपेताः	अ. पुं. प्र. बहु. (विशेषणम्)	माम्	अस्मद् - द. सर्व. द्वि. एक.
उपासते	उप + आस् (आस उपवेशने) आत्म. कर्तरि लट्. प्रपु. बहु.	ते	तद् - द. सर्व. पुं. प्र. बहु.
मे	अस्मद् - द. सर्व. ष. एक.	युक्ततमाः	अ. पुं. प्र. बहु. (विशेषणम्)
मताः	अ. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	मय्यावेश्य	मयि + आवेश्य	यण्सन्धिः।
	मनो ये	मनः + ये	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	नित्ययुक्ता उपासते	नित्ययुक्ताः + उपासते	विसर्गसन्धिः, लोपः।
	परयोपेताः	परया + उपेताः	गुणसन्धिः।
	उपेतास्ते	उपेताः + ते	विसर्गसन्धिः (सकारः)।
	युक्ततमा मताः	युक्ततमाः + मताः	विसर्गसन्धिः, लोपः।
(ख) समासः	नित्ययुक्ताः	नित्यं युक्ताः नित्ययुक्ताः - सुप्समासः।	
(ग) कृदन्तः	आवेश्य	आ + विश् (विश + प्रवेशने) + ल्यप्।	
	युक्तः	युज् (युजिर् योगे) + क्तः (कर्मणि)।	
	मताः	मन् (मन ज्ञाने) + क्तः (कर्मणि), ते।	
(घ) तद्धितान्तः	युक्ततमाः	युक्त + तमप् (अतिशयेन युक्ततमाः इत्यर्थः)।	

भावस्पष्टीकरणम् -

ये उपासते।	
ये **कम्** उपासते ?	ये **माम्** उपासते।
ये **किं कृत्वा** माम् उपासते ?	ये **आवेश्य** माम् उपासते।
ये **किम्** आवेश्य माम् उपासते	ये **मनः** आवेश्य माम् उपासते।
ये मनः **कस्मिन्** आवेश्य माम् उपासते ?	ये मनः **मयि** आवेश्य माम् उपासते।
ये मनः मयि आवेश्य **कीदृशाः** माम् उपासते ?	ये मनः मयि आवेश्य **नित्ययुक्ताः** माम् उपासते।

ये मनः मयि आवेश्य नित्ययुक्ताः पुनश्च **कीदृशाः** माम् उपासते ?	ये मनः मयि आवेश्य नित्ययुक्ताः **उपेताः** माम् उपासते।
ये मनः मयि आवेश्य नित्ययुक्ताः **कया** उपेताः माम् उपासते ?	ये मनः मयि आवेश्य नित्ययुक्ताः **श्रद्धया** उपेताः माम् उपासते।
ये मनः मयि आवेश्य नित्ययुक्ताः **कीदृश्या** श्रद्धया उपेताः माम् उपासते ?	ये मनः मयि आवेश्य नित्ययुक्ताः **परया** श्रद्धया उपेताः माम् उपासते।
ये मनः मयि आवेश्य नित्ययुक्ताः परया श्रद्धया उपेताः माम् उपासते, **तेषां किम् ?**	ये परया श्रद्धया उपेताः माम् उपासते, **ते मताः।**
ये मनः मयि आवेश्य नित्ययुक्ताः परया श्रद्धया उपेताः माम् उपासते, ते **कीदृशाः** मताः ?	ये मनः मयि आवेश्य नित्ययुक्ताः परया श्रद्धया उपेताः माम् उपासते, ते **युक्ततमाः** मताः।
ये मनः मयि आवेश्य नित्ययुक्ताः परया श्रद्धया उपेताः माम् उपासते, ते **कस्य** युक्ततमाः मताः ?	ये मनः मयि आवेश्य नित्ययुक्ताः परया श्रद्धया उपेताः माम् उपासते, ते **मे** युक्ततमाः मताः।

तात्पर्यम् - ये जनाः चित्तं मयि निवेश्य सततसमाहिताः प्रकृष्टया श्रद्धया समन्विताः सन्तः मां भजन्ते ते जनाः मम योगिश्रेष्ठाः मताः।

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्॥१२.३॥
सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥१२.४॥

पदच्छेदः - ये, तु, अक्षरम्, अनिर्देश्यम्, अव्यक्तम्, पर्युपासते।
सर्वत्रगम्, अचिन्त्यम्, च, कूटस्थम्, अचलम्, ध्रुवम्॥
सन्नियम्य, इन्द्रियग्रामम्, सर्वत्र, समबुद्धयः।
ते, प्राप्नुवन्ति, माम्, एव, सर्वभूतहिते, रताः॥

अन्वयः - ये तु इन्द्रियग्रामं सन्नियम्य सर्वत्र समबुद्धयः अनिर्देश्यम् अव्यक्तम् सर्वत्रगम् अचिन्त्यम् कूटस्थम् अचलं ध्रुवं च अक्षरं पर्युपास्यते सर्वभूतहिते रताः ते माम् एव प्राप्नुवन्ति।

पदार्थः - ये तु = ये मानवाः तु, इन्द्रियग्रामम् = करणसमुदायम्, सन्नियम्य = उपसंहृत्य, सर्वत्र = सर्वस्मिन् काले, समबुद्धयः = समानबुद्धयः, अनिर्देश्यम् = अवर्णनीयम्, अव्यक्तम् = इन्द्रियागोचरम्, सर्वत्रगम् = सर्वव्यापिनम्, अचिन्त्यम् = अप्रमेयम्, कूटस्थम् = निर्विकारम्, अचलम् = अकम्प्यम्, ध्रुवं च = नित्यं

च, अक्षरम् = ब्रह्म, पर्युपासते = सेवन्ते, सर्वभूतहिते = सकलप्राणिहिते, रताः = आसक्ताः ते = ते जनाः, माम् एव प्राप्नुवन्ति = माम् एव प्राप्नुवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ये	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	तु	अव्ययम्
इन्द्रियग्रामम्	अ. पुं. द्वि. एक.	सन्नियम्य	अव्ययम्
सर्वत्र	अव्ययम्	समबुद्धयः	इ. पुं. प्र. बहु. (विशेषणम्)
अनिर्देश्यम्	अ. पुं. द्वि. एक. (विशेषणम्)	अव्यक्तम्	अ. पुं. द्वि. एक. (विशेषणम्)
सर्वत्रगम्	अ. पुं. द्वि. एक. (विशेषणम्)	अचिन्त्यम्	अ. पुं. द्वि. एक. (विशेषणम्)
कूटस्थम्	अ. पुं. द्वि. एक. (विशेषणम्)	अचलम्	अ. पुं. द्वि. एक. (विशेषणम्)
ध्रुवम्	अ. पुं. द्वि. एक. (विशेषणम्)	च	अव्ययम्
अक्षरम्	अ. पुं. द्वि. एक. (विशेषणम्)	पर्युपासते	परि + उप + आस् (आस उपवेशने) पर. कर्तरि लट्. प्रपु. बहु.
सर्वभूतहिते	अ. पुं. स. एक.	रताः	अ. पुं. प्र.बहु. (विशेषणम्)
ते	तद् - द. सर्व. पुं. प्र.बहु. (विशेषणम्)	माम्	अस्मद् - द. सर्व.द्वि. एक.
एव	अव्ययम्	प्राप्नुवन्ति	प्र + आप् (आप्लृ व्याप्तौ) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः

त्वक्षरम्	तु + अक्षरम्	यण्सन्धिः ।
सन्नियम्येन्द्रियग्रामम्	सन्नियम्य + इन्द्रियग्रामम्	गुणसन्धिः ।

(ख) समासः

अक्षरम्	न क्षरः, अक्षरः तम् - नञ्तत्पुरुषः ।
अनिर्देश्यम्	न निर्देश्यः अनिर्देश्यः, तम् - नञ्तत्पुरुषः ।
अव्यक्तम्	न व्यक्तः अव्यक्तः, तम् - नञ्तत्पुरुषः ।
सर्वत्रगम्	सर्वत्र गच्छति इति सर्वत्रगः, तम् - कर्तरि डः उपपदसमासः ।
अचिन्त्यम्	न चिन्त्यः अचिन्त्यः, तम् - नञ्तत्पुरुषः ।
इन्द्रियग्रामम्	इन्द्रियाणां ग्रामः इन्द्रियग्रामः - षष्ठीतत्पुरुषः।
समबुद्धयः	समाना बुद्धिः येषां ते समबुद्धयः - बहुव्रीहिः ।
सर्वभूतानि	सर्वाणि भूतानि सर्वभूतानि - कर्मधारयः ।

	सर्वभूतहिते	सर्वभूतेभ्यः हितम् सर्वभूतहितम्, तस्मिन् - चतुर्थीतत्पुरुषः।
(ग) कृदन्तः	निर्देश्यम्	निर् + दिश् (दिश अतिसर्जने) + ण्यत्
	व्यक्तम्	वि + (अञ्जू व्यक्तिमर्षणकान्तिगतिषु) + क्त कर्तरि।
	चिन्त्यम्	चिन्त् (चिति स्मृत्याम्) + यत्।
	कूटस्थम्	कूट + स्था (ष्ठा गतिनिवृत्तौ) + क। कूटवत् तिष्ठति इत्यर्थः।
	रताः	रम् (रमु क्रीडायाम्) + क्त कर्तरि।

भावस्पष्टीकरणम् -

पर्युपासते।	
के पर्युपासते ?	**ये** पर्युपासते।
ये **कीदृशं** पर्युपासते ?	ये **अनिर्देश्यं** पर्युपासते।
ये अनिर्देश्यं **पुनश्च कीदृशं** पर्युपासते ?	ये अनिर्देश्यम् **अव्यक्तं** पर्युपासते।
ये अनिर्देश्यम् अव्यक्तं **पुनश्च कीदृशं** पर्युपासते ?	ये अनिर्देश्यम् अव्यक्तं **सर्वत्रगं** पर्युपासते।
ये अनिर्देश्यम् अव्यक्तं सर्वत्रगं **पुनश्च कीदृशं** पर्युपासते ?	ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् **अचिन्त्यं** पर्युपासते।
ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं **पुनश्च कीदृशं** पर्युपासते ?	ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं **कूटस्थं** पर्युपासते।
ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थं **पुनश्च कीदृशं** पर्युपासते ?	ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् **अचलं** पर्युपासते।
ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् अचलं **पुनश्च कीदृशं** पर्युपासते ?	ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् अचलं **ध्रुवं** पर्युपासते।
ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् अचलं ध्रुवं **पुनश्च कीदृशं** पर्युपासते ?	ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् अचलं ध्रुवम् **अक्षरं** पर्युपासते।
ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् अचलं ध्रुवम् अक्षरं पर्युपासते, **तेषां किम् ?**	ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् अचलं ध्रुवम् अक्षरं पर्युपासते, **ते प्राप्नुवन्ति।**
ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् अचलं ध्रुवम् अक्षरं पर्युपासते, ते **कं** प्राप्नुवन्ति ?	ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् अचलं ध्रुवम् अक्षरं पर्युपासते, ते **माम् एव** प्राप्नुवन्ति।

ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् अचलं ध्रुवम् अक्षरं पर्युपासते, **कीदृशाः** ते माम् एव प्राप्नुवन्ति ?	ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् अचलं ध्रुवम् अक्षरं पर्युपासते, **रताः** ते माम् एव प्राप्नुवन्ति।
ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् अचलं ध्रुवम् अक्षरं पर्युपासते। **कस्मिन्** रताः ते माम् एव प्राप्नुवन्ति ?	ये अनिर्देश्यम् अव्यक्तं सर्वत्रगम् अचिन्त्यं कूटस्थम् अचलं ध्रुवम् अक्षरं पर्युपासते। **सर्वभूतहिते** रताः ते माम् एव प्राप्नुवन्ति।

तात्पर्यम् - ये पुरुषाः इन्द्रियसमूहस्य नियन्त्रणं कृत्वा सर्वस्मिन् काले समानचित्ताः भूत्वा अनिर्वचनीयम् इन्द्रियाणाम् अगोचरं सर्वव्यापिनम् अप्रमेयं मायाध्यक्षम् अकम्प्यं स्थिरं च परमात्मानं सेवन्ते, सकलप्राणिहिते आसक्ताः ते जनाः माम् एव लभन्ते।

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥१२.५॥

पदच्छेदः - क्लेशः, अधिकतरः, तेषाम्, अव्यक्तासक्तचेतसाम्।
अव्यक्ता, हि, गतिः, दुःखम्, देहवद्भिः, अवाप्यते ॥

अन्वयः - अव्यक्तासक्तचेतसां तेषां क्लेशः अधिकतरः। देहवद्भिः अव्यक्ता गतिः हि दुःखम् अवाप्यते।

पदार्थः - अव्यक्तासक्तचेतसाम् = अव्यक्तनिविष्टचित्तानाम्, तेषाम् = तेषाम्, क्लेशः = दुःखम्, अधिकतरः = नितराम् अ[illegible] म्, देहवद्भिः= शरीरधारिभिः, अव्यक्ता = निर्विशेषम्, गतिः = स्थानम्, हि दुःखम् = क्लेशेन, अव[illegible] = प्राप्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अव्यक्तासक्तचेतसाम्	अव्यक्तासक्तचेतस् - सका. पुं. ष. बहु. (विशेष्यम्)	तेषाम्	तद् - द. सर्व. पुं. ष. बहु. (विशेषणम्)
क्लेशः	अ. पुं. प्र. एक. (विशेष्यम्)	अधिकतरः	अ. पुं. प्र. एक. (विशेषणम्)
देहवद्भिः	देहवत् - त. पुं. तृ. बहु.	अव्यक्ता	आ. स्त्री. प्र. एक. (विशेषणम्)
गतिः	इ. स्त्री. प्र. एक. (विशेष्यम्)	हि	अव्ययम्
दुःखम्	अ. नपुं. प्र. एक.	अवाप्यते	अव + आप् (आप्लृ व्याप्तौ) आप. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	क्लेशोऽधिकतरः	क्लेशः + अधिकतरः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	गतिर्दुःखम्	गतिः + दुःखम्	विसर्गसन्धिः (रेफः)।
	देहवद्भिरवाप्यते	देहवद्भिः + अवाप्यते	विसर्गसन्धिः (रेफः)।
(ख) समासः	अव्यक्तासक्तम्	अव्यक्ते आसक्तम् अव्यक्तासक्तम् - सप्तमीतत्पुरुषः।	
	अव्यक्तासक्तचेतसाम्	अव्यक्तासक्तं चेतः येषां ते अव्यक्तासक्तचेतसः, तेषाम् - बहुव्रीहिः।	
	अव्यक्ता	न व्यक्ता अव्यक्ता - नञ्तत्पुरुषः।	
(ग) कृदन्तः	क्लेशः	क्लिश् (क्लिश उपतापे) + घञ्।	
	व्यक्ता	वि + (अञ्जू व्यक्तिमर्षणकान्तिगतिषु) + क्त कर्तरि, स्त्रीत्वे टाप्।	
	गतिः	गम् (गम्लृ गतौ) + क्तिन्।	
(घ) तद्धितान्तः	अधिकतरः	अधिक + तरप् द्वयोः अन्यस्मिन् अतिशये तरप्।	
	देहवन्तः	देह + मतुप् (देहः एषाम् एषु वा अस्तीति)।	

भावस्पष्टीकरणम् -

अधिकतरः (भवति)।	
कः अधिकतरः (भवति)?	**क्लेशः** अधिकतरः (भवति)।
केषां क्लेशः अधिकतरः (भवति)?	**तेषां** क्लेशः अधिकतरः (भवति)।
कीदृशानां तेषां क्लेशः अधिकतरः (भवति)?	**अव्यक्तासक्तचेतसां** तेषां क्लेशः अधिकतरः (भवति)।
अवाप्यते।	
का अवाप्यते?	**गतिः** हि अवाप्यते।
कीदृशी गतिः हि अवाप्यते?	**अव्यक्ता** गतिः अवाप्यते।
कैः अव्यक्ता गतिः अवाप्यते?	**देहवद्भिः** अव्यक्ता गतिः अवाप्यते।
देहवद्भिः अव्यक्ता गतिः **कथं** हि अवाप्यते?	देहवद्भिः अव्यक्ता गतिः **दुःखं** हि अवाप्यते।

तात्पर्यम् - निर्विशेषे ब्रह्मणि येषां मनः प्रवृत्तं तेषाम् अत्यन्तं क्लेशः सम्भवति। येषां देहे ममता वर्तते तेषाम् इदं निर्विशेषं ब्रह्म सर्वथा न प्राप्यते।

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते॥१२.६॥

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ॥१२.७॥

पदच्छेदः - ये, तु, सर्वाणि, कर्माणि, मयि, संन्यस्य, मत्पराः ।
अनन्येन, एव, योगेन, माम्, ध्यायन्तः, उपासते ॥
तेषाम्, अहम्, समुद्धर्ता, मृत्युसंसारसागरात् ।
भवामि, नचिरात्, पार्थ, मयि, आवेशितचेतसाम् ॥

अन्वयः - ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्तः उपासते पार्थ ! अहं नचिरात् मयि आवेशितचेतसां तेषां मृत्युसंसारसागरात् समुद्धर्ता भवामि ।

पदार्थः - ये तु = ये जनाः तु, सर्वाणि = सकलानि, कर्माणि = कर्माणि, मयि = वासुदेवे, संन्यस्य = समर्प्य, मत्पराः = मन्मनसः, अनन्येन = अनितरेण, योगेन = समाधिना, माम् एव ध्यायन्त = माम् एव चिन्तयन्तः, उपासते = भजन्ते, पार्थ = अर्जुन ! अहं नचिरात् = अहं शीघ्रम्, मयि = वासुदेवे, आवेशितचेतसाम् = प्रवेशितचित्तानाम्, तेषाम् = जनानाम्, मृत्युसंसारसागरात् = मरणसंसारसमुद्रात्, समुद्धर्ता = उद्धारकः, भवामि = भवामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ये	यद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)	तु	अव्ययम्
सर्वाणि	अ. सर्व. नपुं. द्वि. बहु. (विशेषणम्)	कर्माणि	कर्मन् - न. नपुं. द्वि. बहु. (विशेष्यम्)
मयि	अस्मद् - द. सर्व. स. एक.	संन्यस्य	ल्यबन्तम् अव्ययम्
मत्पराः	अ. पुं. प्र. बहु. (विशेषणम्)	अनन्येन	अ. पुं. तृ. एक. (विशेषणम्)
एव	अव्ययम्	योगेन	अ. पुं. तृ. एक. (विशेष्यम्)
माम्	अस्मद् - द. सर्व. द्वि. एक.	ध्यायन्तः	ध्यायत् - त. पुं. प्र. बहु. (विशेषणम्)
उपासते	उप + आस् (आस उपवेशने) आत्म. कर्तरि लट्. प्रपु. बहु.	पार्थ	अ. पुं. सम्बो. एक.
अहम्	अस्मद् - द. सर्व. प्र. एक.	नचिरात्	अव्ययम्
मयि	अस्मद् - द. सर्व. स. एक.	आवेशितचेतसाम्	आवेशितचेतस् - सका. पुं. ष. बहु. (विशेष्यम्)

तेषाम्	तद् - द. सर्व. पुं. ष. बहु. (विशेषणम्)	मृत्युसंसारसागरात्	अ. पुं. पं. एक.
समुद्धर्ता	ऋ. पुं. प्र. एक.	भवामि	भू (भू सत्तायाम्) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः अनन्येनैव — अनन्येन + एव — वृद्धिसन्धिः ।
ध्यायन्त उपासते — ध्यायन्तः + उपासते — विसर्गसन्धिः (लोपः) ।

(ख) समासः मत्पराः — अहमेव परः येषां ते मत्पराः - बहुव्रीहिः ।
अनन्येन — न विद्यते अन्यः यस्मिन् सः अनन्यः, तेन - नञ्बहुव्रीहिः ।
संसारसागरः — संसारः एव सागरः संसारसागरः - कर्मधारयः ।
मृत्युसंसारसागरात् — मृत्युसंसारः एव सागरःमृत्युसंसारसागरः, तस्मात् - कर्मधारयः ।
नचिरात् — न चिरात् नचिरात् - नञ्तत्पुरुषः ।
आवेशितचेतसाम् — आवेशितं चेतः यैः ते आवेशितचेतसः, तेषाम् - बहुव्रीहिः ।

(ग) कृदन्तः सन्न्यस्य — सम् + नि + अस् (असु क्षेपणे) + ल्यप् ।
ध्यायन्तः — ध्या (ध्यै चिन्तायाम्) + शतृ, ते ।
समुद्धर्ता — सम् + उद् + धृ (धृ धरणे) + तृच् ।

(घ) तद्धितान्तः पार्थ — पृथा + अण् (अपत्यार्थे) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ ।

भावस्पष्टीकरणम् -

उपासते ।	
किं कुर्वन्तः उपासते ।	**ध्यायन्तः** उपासते ।
कं ध्यायन्तः उपासते ?	**मां** ध्यायन्तः उपासते ।
केन मां ध्यायन्तः उपासते ?	**योगेन** मां ध्यायन्तः उपासते ।
कीदृशेन योगेन मां ध्यायन्तः उपासते ?	**अनन्येन** एव योगेन मां ध्यायन्तः उपासते ।
कीदृशाः अनन्येन एव योगेन मां ध्यायन्तः उपासते ?	**मत्पराः** अनन्येन एव योगेन मां ध्यायन्तः उपासते ।
किं कृत्वा मत्पराः अनन्येन एव योगेन मां ध्यायन्तः उपासते ?	**संन्यस्य** मत्पराः अनन्येन एव योगेन मां ध्यायन्तः उपासते ।
कस्मिन् संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्तः उपासते ?	**मयि** संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्तः उपासते ।

कानि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्तः उपासते ?	**सर्वाणि कर्माणि** मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्तः उपासते ।
के सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्तः उपासते ?	**ये तु** सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्तः उपासते ।
ये तु सर्वाणि कर्माणि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्तः उपासते, **तेषां किम्** ?	ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, **तेषां भवामि** ।
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, **तेषां कः भवामि** ?	ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, **तेषां समुद्धर्ता भवामि** ।
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, तेषां **कस्मात्** समुद्धर्ता भवा़मि ?	ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, तेषां **मृत्युसंसारसागरात्** समुद्धर्ता भवामि ।
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, **कीदृशानां** तेषां मृत्युसंसारसागरात् समुद्धर्ता भवामि ?	ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, **आवेशितचेतसां** तेषां मृत्युसंसारसागरात् समुद्धर्ता भवामि ।
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, **कस्मिन्** आवेशितचेतसां तेषां मृत्युसंसारसागरात् समुद्धर्ता भवामि ?	ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, **मयि** आवेशितचेतसां तेषां मृत्युसंसारसागरात् समुद्धर्ता भवामि ।
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, मयि आवेशित-चेतसां तेषां मृत्युसंसारसागरात् **कथं** समुद्धर्ता भवामि ?	ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, मयि आवेशित-चेतसां तेषां मृत्युसंसारसागरात् **नचिरात्** समुद्धर्ता भवामि ।
ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, **कः** मयि आवेशित-चेतसां तेषां मृत्युसंसारसागरात् नचिरात् समुद्धर्ता भवति ?	ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः अनन्येन एव योगेन मां ध्यायन्त उपासते, **अहं** मयि आवेशितचेतसां तेषां मृत्युसंसारसागरात् नचिरात् समुद्धर्ता भवामि ।

तात्पर्यम् - पार्थ ! ये जनाः तु सर्वाणि आचरणानि मयि वासुदेवे समर्प्य मन्मनसः अनन्येन समाधिना एव मां चिन्तयन्तः भजन्ते, मयि प्रवेशितचित्तानां तेषां जनानां मरणादियुक्तात् संसारसमुद्रात् अहं शीघ्रम् उद्धारकः भवामि ।

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥१२.८॥

पदच्छेदः - मयि, एव, मन, आधत्स्व, मयि, बुद्धिम्, निवेशय।
निवसिष्यसि, मयि, एव, अत, ऊर्ध्वम्, न, संशयः ॥

अन्वयः - मयि एव मन आधत्स्व। मयि बुद्धिं निवेशय। अत ऊर्ध्वं मयि एव निवसिष्यसि, न संशयः।

पदार्थः - मयि एव = परमात्मनि मयि, मनः = चित्तम्, आधत्स्व = आनय। मयि बुद्धिम् = मयि मतिम्, निवेशय = योजय। अत = ततः, ऊर्ध्वम् = परम्, मयि एव निवसिष्यसि = मयि एव वसिष्यसि, न संशयः = सन्देहः न विद्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मयि	अस्मद् - द. सर्व. स. एक.	एव	अव्ययम्
मनः	मनस् - सका. नपुं. द्वि. एक.	आधत्स्व	आ + धा (डुधाञ् धारणपोषणयोः) आत्म. कर्तरि लोट्. मपु. एक.
बुद्धिम्	इ. स्त्री. द्वि. एक.	निवेशय	नि + विश् (विश प्रवेशने) णिच्. पर. कर्तरि लोट्. मपु. एक.
अतः	अव्ययम्	ऊर्ध्वम्	अव्ययम्
निवसिष्यसि (निवत्स्यसि)	नि + वस् (वस निवासे)[1] पर. कर्तरि लृट्. मपु. एक.	न	अव्ययम्
संशयः	अ. पुं. प्र. एक.		

व्याकरणम् -

(क) सन्धिः मय्येव — मयि + एव — यण्सन्धिः।
अत ऊर्ध्वम् — अतः + ऊर्ध्वम् — विसर्गसन्धिः (लोपः)।

(ख) कृदन्तः बुद्धिम् — बुध् (बुध ज्ञाने) + क्तिन्, ताम्।

भावस्पष्टीकरणम् -

आधत्स्व।	
किम् आधत्स्व ?	**मनः आधत्स्व।**

1 अत्र निवसिष्यसि इति आर्षप्रयोगः।

कस्मिन् मनः आधत्स्व ?	**मयि** एव मनः आधत्स्व ।
मयि एव मनः आधत्स्व । **अपि च किम् ?**	**निवेशय ।**
कां निवेशय ?	**बुद्धिं** निवेशय ।
कस्मिन् बुद्धिं निवेशय ?	**मयि** बुद्धिं निवेशय ।
मयि बुद्धिं निवेशय । **ततः किम् ?**	**निवसिष्यसि ।**
कस्मिन् निवसिष्यसि ?	**मयि एव** निवसिष्यसि ।
मयि एव निवसिष्यसि । **ततः किम् ?**	**अत उर्ध्वं मयि एव निवसिष्यसि, न संशयः ।**

तात्पर्यम् - परमात्मनि मयि चित्तं स्थापय । मयि एव मतिं योजय । ततः परं मयि एव वत्स्यसि । अत्र सन्देहः न वर्तते ।

अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।
अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥१२.९॥

पदच्छेदः - अथ, चित्तम्, समाधातुं, न, शक्नोषि, मयि, स्थिरम् ।
अभ्यासयोगेन, ततः, माम्, इच्छ, आप्तुम्, धनञ्जय ॥

अन्वयः - धनञ्जय ! अथ मयि चित्तं स्थिरं समाधातुं न शक्नोषि ततः माम् अभ्यासयोगेन आप्तुम् इच्छ ।

पदार्थः - धनञ्जय = अर्जुन ! अथ = यदि, मयि = मयि, चित्तम् = चेतः, स्थिरम् = निश्चलम्, समाधातुं = स्थापयितुम्, न शक्नोषि = न प्रभवसि, ततः = तर्हि, माम् = माम्, अभ्यासयोगेन = चित्तस्य पुनः पुनः स्थापनेन, आप्तुम् = लब्धुम्, इच्छ = अभिलष ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
धनञ्जय	अ. पुं. सम्बो. एक.	अथ	अव्ययम्
मयि	अस्मद् - द. सर्व. स. एक.	चित्तम्	अ. नपुं. द्वि. एक. (विशेषणम्)
स्थिरम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	समाधातुम्	तुमुन्नन्तम् अव्ययम्
न	अव्ययम्	शक्नोषि	शक् (शक्लृ शक्तौ) पर. कर्तरि लट्. मपु. एक.
ततः	अव्ययम्	माम्	अस्मद् - द. सर्व. द्वि. एक.

अभ्यासयोगेन	अ. पुं. तृ. एक.	आप्तुम्	तुमुन्नन्तम् अव्ययम्
इच्छ	इच्छ (इषु इच्छायाम्) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः इच्छाप्तुम् — इच्छ + आप्तुम् — सवर्णदीर्घसन्धिः।

(ख) समासः अभ्यासयोगेन — अभ्यासपूर्वकः योगः अभ्यासयोगः, तेन - मध्यमपदलोपी समासः।

धनञ्जय — धनं जयति इति धनञ्जयः, तत्सम्बुद्धौ - उपपदसमासः।

(ग) कृदन्तः समाधातुम् — सम् + आ + धा (डुधाञ् धारणपोषणयोः) + तुमुन्।

आप्तुम् — आप् (आप्लृ व्याप्तौ) + तुमुन्।

भावस्पष्टीकरणम् -

अथ न शक्नोषि।	
अथ **किं कर्तुं** न शक्नोषि ?	अथ **समाधातुं** न शक्नोषि।
अथ **कथं** समाधातुं न शक्नोषि ?	अथ **स्थिरं** समाधातुं न शक्नोषि।
अथ **किं** स्थिरं समाधातुं न शक्नोषि ?	अथ **चित्तं** स्थिरं समाधातुं न शक्नोषि।
अथ **कस्मिन्** चित्तं स्थिरं समाधातुं न शक्नोषि ?	अथ **मयि** चित्तं स्थिरं समाधातुं न शक्नोषि।
अथ मयि चित्तं स्थिरं समाधातुं न शक्नोषि, **ततः किम्** ?	अथ मयि चित्तं स्थिरं समाधातुं न शक्नोषि, **ततः इच्छ**।
अथ मयि चित्तं स्थिरं समाधातुं न शक्नोषि, ततः **किं कर्तुम्** इच्छ ?	अथ मयि चित्तं स्थिरं समाधातुं न शक्नोषि, **ततः आप्तुम् इच्छ**।
अथ मयि चित्तं स्थिरं समाधातुं न शक्नोषि, ततः **केन** आप्तुम् इच्छ ?	अथ मयि चित्तं स्थिरं समाधातुं न शक्नोषि, ततः **अभ्यासयोगेन** आप्तुम् इच्छ।
अथ मयि चित्तं स्थिरं समाधातुं न शक्नोषि, ततः **कम्** अभ्यासयोगेन आप्तुम् इच्छ ?	अथ मयि चित्तं स्थिरं समाधातुं न शक्नोषि, ततः **माम्** अभ्यासयोगेन आप्तुम् इच्छ।

तात्पर्यम् - धनञ्जय ! यदि मयि चेतः निश्चलं स्थापयितुं न शक्नोषि तर्हि मां चित्तस्य पुनः पुनः स्थापनेन लब्धुं यतस्व।

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।
मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥१२.१०॥

पदच्छेदः - अभ्यासे, अपि, असमर्थः, असि, मत्कर्मपरमः, भव ।
मदर्थम्, अपि, कर्माणि, कुर्वन्, सिद्धिम्, अवाप्स्यसि ॥

अन्वयः - अभ्यासे अपि असमर्थः असि मत्कर्मपरमः भव । मदर्थं कर्माणि कुर्वन् अपि सिद्धिम् अवाप्स्यसि ।

पदार्थः - अभ्यासे अपि = अभ्यासयोगे अपि, असमर्थः असि = अशक्तः भवसि, मत्कर्मपरमः = मम कृते कर्म कृतवान्, भव = भवतु, मदर्थम् = माम् उद्दिश्य, कर्माणि = क्रियाः, कुर्वन् अपि = आचरन् अपि, सिद्धिम् अवाप्स्यसि = सिद्धिं प्राप्नोषि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अभ्यासे	अ. पुं. स. एक.	अपि	अव्ययम्
असमर्थः	अ. पुं. प्र. एक. (विशेषणम्)	असि	अस् (अस भुवि) पर. लट्. कर्तरि. मपु. एक.
मत्कर्मपरमः	अ. पुं. प्र. एक. (विशेषणम्)	भव	भू (भू सत्तायाम्) पर. कर्तरि लोट्. मपु. एक.
मदर्थम्	अ. नपुं. प्र. एक.	कर्माणि	कर्मन् - न. सर्व. नपुं. द्वि. बहु.
कुर्वन्	कुर्वत् - त. पुं. प्र. एक. (विशेषणम्)	सिद्धिम्	इ. स्त्री. द्वि. एक.
अवाप्स्यसि	अव + आप् (आप्लृ व्याप्तौ) पर. लृट्. कर्तरि. मपु. एक.		

व्याकरणम् -

(क) सन्धिः

अभ्यासेऽपि	अभ्यासे + अपि	पूर्वरूपसन्धिः ।
अप्यसमर्थः	अपि + असमर्थः	यण्सन्धिः ।
असमर्थोऽसि	असमर्थः + असि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
मत्कर्मपरमो भव	मत्कर्मपरमः + भव	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः

असमर्थः	न समर्थः असमर्थः - नञ्तत्पुरुषः ।
मत्कर्म	मम कर्माणि मत्कर्माणि - षष्ठीतत्पुरुषः ।
मत्कर्मपरमः	मत्कर्माणि एव परमाणि यस्य सः मत्कर्मपरमः - बहुव्रीहिः ।

	मदर्थम्	मह्यम् इदं मदर्थम् - चतुर्थीतत्पुरुषः।
(ग) कृदन्तः	अभ्यासे	अभि + आ + अस् (असु क्षेपणे) + घञ्, तस्मिन्।
	सिद्धिम्	सिध् (षिध गत्याम्) + क्तिन्, ताम्।

भावस्पष्टीकरणम् -

असि।	
कीदृशः असि ?	**असमर्थः** असि।
कस्मिन् अपि असमर्थः असि ?	**अभ्यासे** अपि असमर्थः असि। तर्हि किम् ?
अभ्यासे अपि असमर्थः असि। (तर्हि) भव।	
अभ्यासे अपि असमर्थः असि। **(तर्हि) कीदृशः भव ?**	अभ्यासे अपि असमर्थः असि। **(तर्हि) मत्कर्मपरमः भव।**
तेन किम् ?	**अवाप्स्यसि।**
काम् अवाप्स्यसि ?	**सिद्धिम्** अवाप्स्यसि।
किं कुर्वन् अपि सिद्धिम् अवाप्स्यसि ?	**कर्माणि** कुर्वन् अपि सिद्धिम् अवाप्स्यसि।
कस्मै कर्माणि कुर्वन् अपि सिद्धिम् अवाप्स्यसि ?	**मदर्थं** कर्माणि कुर्वन् अपि सिद्धिम् अवाप्स्यसि।

तात्पर्यम् - अभ्यासयोगे अपि अशक्तः भवसि चेत् सर्वदा माम् उद्दिश्य कर्माणि आचर। मदर्थं कर्माणि आचरन् अपि चित्तशुद्धिं समाप्नोषि।

अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥१२.११॥

पदच्छेदः - अथ, एतत्, अपि, अशक्तः, असि, कर्तुम्, मद्योगम्, आश्रितः, ।
सर्वकर्मफलत्यागम्, ततः, कुरु, यतात्मवान्॥

अन्वयः - अथ एतत् अपि कर्तुम् अशक्तः असि ततः मद्योगम् आश्रितः यतात्मवान् सर्वकर्मफलत्यागं कुरु।

पदार्थः - अथ = यदि, एतत् अपि = इदम् अपि, कर्तुम् = आचरितुम्, अशक्तः असि = असमर्थः असि, ततः = तर्हि, मद्योगम् = सर्वकर्मसमर्पणम्, आश्रितः = अवलम्बितः, यतात्मवान् = नियतचित्तः, सर्वकर्मफलत्यागम् = सकलकर्मपरित्यागम्, कुरु = विधेहि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अथ	अव्ययम्	एतत्	एतद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
अपि	अव्ययम्	कर्तुम्	तुमुन्नन्तम् अव्ययम्
अशक्तः	अ. पुं. प्र. एक. (विशेषणम्)	असि	अस् (अस भुवि) पर. लट्. कर्तरि. मपु. एक.
ततः	अव्ययम्	मद्योगम्	अ. पुं. द्वि. एक.
आश्रितः	अ. पुं. प्र. एक. (विशेषणम्)	यतात्मवान्	यतात्मवत् - त. पुं. प्र. एक. (विशेषणम्)
सर्वकर्मफलत्यागम्	अ. पुं. द्वि. एक.	कुरु	कृ (डुकृञ् करणे) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः
- अथैतत् — अथ + एतत् — वृद्धिसन्धिः ।
- अप्यशक्तः — अपि + अशक्तः — यण्सन्धिः ।
- अशक्तोऽसि — अशक्तः + असि — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः
- अशक्तः — न शक्तः अशक्तः - नञ्तत्पुरुषः ।
- सर्वकर्म — सर्वं च तत् कर्म सर्वकर्म - कर्मधारयः ।
- सर्वकर्मफलम् — सर्वकर्मणां फलं सर्वकर्मफलम् - षष्ठीतत्पुरुषः ।
- सर्वकर्मफलत्यागम् — सर्वकर्मफलस्य त्यागः सर्वकर्मफलत्यागः, तम् - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः
- शक्तः — शक्(शक्लृ शक्तौ) + क्त (कर्तरि) ।
- कर्तुम् — कृ (डुकृञ् करणे) + तुमुन् ।
- आश्रितः — आ + श्रि (श्रिञ् सेवायाम्) + क्त (कर्तरि) ।
- त्यागः — त्यज् (त्यज् हानौ) + घञ् ।

(घ) तद्धितान्तः
- आत्मवान् — आत्मन् + मतुप् (आत्मा अस्य अस्मिन् वा अस्ति इत्यर्थः) ।

भावस्पष्टीकरणम् -

अथ असि ।	
अथ **कीदृशः** असि ?	अथ **अशक्तः** असि ।
अथ **किमर्थम्** अशक्तः असि ?	अथ **कर्तुम्** अशक्तः असि ।
अथ **किं** कर्तुम् अशक्तः असि ?	अथ **एतत् अपि** कर्तुम् अशक्तः असि ।

अथ एतत् अपि कर्तुम् अशक्तः असि, **ततः किम् ?**	अथ एतत् अपि कर्तुम् अशक्तः असि, **कुरु ।**
अथ एतत् अपि कर्तुम् अशक्तः असि, **किं कुरु ?**	अथ एतत् अपि कर्तुम् अशक्तः असि, **सर्वकर्मफलत्यागं कुरु ।**
अथ एतत् अपि कर्तुम् अशक्तः असि, **कीदृशः** सर्वकर्मफलत्यागं कुरु ?	अथ एतत् अपि कर्तुम् अशक्तः असि, **यतात्मवान्** सर्वकर्मफलत्यागं कुरु ।
अथ एतत् अपि कर्तुम् अशक्तः असि, **पुनश्च कीदृशः** यतात्मवान् सर्वकर्मफलत्यागं कुरु ?	अथ एतत् अपि कर्तुम् अशक्तः असि, **आश्रितः** यतात्मवान् सर्वकर्मफलत्यागं कुरु ।
अथ एतत् अपि कर्तुम् अशक्तः असि, **कम्** आश्रितः यतात्मवान् सर्वकर्मफलत्यागं कुरु ?	अथ एतत् अपि कर्तुम् अशक्तः असि **ततः मद्योगम्** आश्रितः यतात्मवान् सर्वकर्मफलत्यागं कुरु ।

तात्पर्यम् - यदि चित्तं विषयेषु आकृष्टम् अस्तीति कारणेन उपासनाव्रतादीनि कर्माणि अपि आचरितुम् असमर्थः असि तर्हि चित्तस्य नियमनं कृत्वा सर्वेषां कर्मणां फलम् अविचारयन् मह्यं समर्पय ।

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानात् ध्यानं विशिष्यते ।
ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥१२.१२॥

पदच्छेदः - श्रेयः, हि, ज्ञानम्, अभ्यासात्, ज्ञानात्, ध्यानम्, विशिष्यते ।
ध्यानात्, कर्मफलत्यागः, त्यागात्, शान्तिः, अनन्तरम् ॥

अन्वयः - अभ्यासात् हि ज्ञानं श्रेयः ज्ञानात् ध्यानं विशिष्यते । ध्यानात् कर्मफलत्यागः, त्यागात् अनन्तरं शान्तिः ।

पदार्थः - अभ्यासात् हि = अभ्यासयोगात् हि, ज्ञानम् = विवेकः, श्रेयः = प्रशस्यतरः, ज्ञानात् = विवेकात्, ध्यानम् = चिन्तनम्, विशिष्यते = अतिशेते, ध्यानात् = चिन्तनात् अपि, कर्मफलत्यागः = कर्मणः फलस्य त्यागः, त्यागात् = त्यागकरणात्, अनन्तरम् = अनुपदम्, शान्तिः = संसारस्य उपशमः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अभ्यासात्	अ. पुं. पं. एक.	हि	अव्ययम्
ज्ञानम्	अ. नपुं. प्र. एक. (विशेष्यम्)	श्रेयः	श्रेयस् - सका. नपुं. प्र. एक. (विशेषणम्)
ज्ञानात्	अ. नपुं. पं. एक.	ध्यानम्	अ. नपुं. प्र. एक.
विशिष्यते	वि + शिष् (शिष्लृ विशेषणे) पर. कर्मकर्तरि लट्. प्रपु. एक.	ध्यानात्	अ. नपुं. पं. एक.

कर्मफलत्यागः	अ. पुं. प्र. एक.	त्यागात्	अ. पुं. पं. एक.
अनन्तरम्	अव्ययम्	शान्तिः	इ. स्त्री. प्र. एक.

व्याकरणम् -

(क) सन्धिः	श्रेयो हि	श्रेयो हि	विसर्गसन्धिः, (सकारः), रेफः, उकारः, गुणः।
	अभ्यासाज्ज्ञानात्	अभ्यासात् + ज्ञानात्	श्चुत्वसन्धिः।
	कर्मफलत्यागस्त्यागात्	कर्मफलत्यागः + त्यागात्	विसर्गसन्धिः, सकारः।
	त्यागाच्छान्तिः	त्यागात् + शान्तिः	श्चुत्वसन्धिः, छत्वसन्धिः।
	शान्तिरनन्तरम्	शान्तिः + अनन्तरम्	विसर्गसन्धिः, रेफः।
(ख) समासः	कर्मफलम्	कर्मणः फलम् कर्मफलम् - षष्ठीतत्पुरुषः।	
	कर्मफलत्यागः	कर्मफलस्य त्यागः कर्मफलत्यागः - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट् (करणे)।	
	ध्यानम्	ध्या (ध्यै चिन्तायाम्) + ल्युट् (करणे)।	
	शान्तिः	शम् (शमु उपशमने) + क्तिन्।	
(घ) तद्धितान्तः	श्रेयः	प्रशस्य + ईयसुन् - श्र इति आदेशः (अतिशयार्थे तरप्)।	

भावस्पष्टीकरणम्-

अस्ति।	
किम् अस्ति ?	**ज्ञानम्** अस्ति।
ज्ञानं **कीदृशम्** अस्ति ?	ज्ञानं **श्रेयः** अस्ति।
कस्मात् हि ज्ञानं श्रेयः अस्ति ?	**अभ्यासात्** ज्ञानं श्रेयः अस्ति।
विशिष्यते।	
किं विशिष्यते ?	**ध्यानं** विशिष्यते।
कस्मात् ध्यानं विशिष्यते ?	**ज्ञानात्** ध्यानं विशिष्यते।
भवति।	
कः भवति ?	**कर्मफलत्यागः** भवति।
कस्मात् कर्मफलत्यागः भवति ?	**ध्यानात्** कर्मफलत्यागः भवति।
भवति।	
पुनश्च का भवति ?	**शान्तिः** भवति।

कस्मात् शान्तिः भवति ?	**त्यागात्** शान्तिः भवति ।
त्यागात् शान्तिः **कदा** भवति ?	त्यागात् शान्तिः **अनन्तरं** भवति ।

तात्पर्यम् - अभ्यासात् विवेकः प्रशस्ततरः । विवेकात् चिन्तनं विशिष्यते । चिन्तनात् अपि कर्मप्रयोजनपरित्यागः विशिष्यते । त्यागात् बन्धनस्य संसारस्य नाशः भवति ।

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥१२.१३॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥१२.१४॥

पदच्छेदः - अद्वेष्टा, सर्वभूतानाम्, मैत्रः, करुणः, एव, च ।
निर्ममः, निरहङ्कारः, समदुःखसुखः, क्षमी ॥
सन्तुष्टः, सततम्, योगी, यतात्मा, दृढनिश्चयः ।
मयि, अर्पितमनोबुद्धिः, यः, मद्भक्तः, सः, मे, प्रियः ॥

अन्वयः - यः सर्वभूतानाम् अद्वेष्टा मैत्रः करुणः एव च निर्ममः निरहङ्कारः समदुःखसुखः क्षमी सततं सन्तुष्टः योगी दृढनिश्चयः मयि अर्पितमनोबुद्धिः मद्भक्तः स मे प्रियः ।

पदार्थः - यः सर्वभूतानाम् = यः सर्वजन्तूनाम्, अद्वेष्टा = अवैरी, मैत्रः = स्निग्धः, करुणः एव च = दयालुः च, निर्ममः = ममताशून्यः, निरहङ्कारः = अहङ्काररहितः, समदुःखसुखः = क्लेशसन्तोषयोः समानः, क्षमी = क्षमावान्, सततम् = सदा, सन्तुष्टः = सन्तृप्तः, योगी = दृढनिश्चयः, मयि अर्पितमनोबुद्धिः = मयि निवेशितचित्तः, मद्भक्तः = भगवद्भक्तः, यः = यः, सः = सः जनः, मे प्रियः = मम इष्टः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	सर्वभूतानाम्	अ. पुं. ष. बहु.
अद्वेष्टा	ऋ. पुं. प्र. एक. (विशेषणम्)	मैत्रः	अ. पुं. प्र. एक. (विशेषणम्)
करुणः	अ. पुं. प्र. एक.	एव	अव्ययम्
च	अव्ययम्	निर्ममः	अ. पुं. प्र. एक. (विशेषणम्)
निरहङ्कारः	अ. पुं. प्र. एक. (विशेषणम्)	समदुःखसुखः	अ. पुं. प्र. एक. (विशेषणम्)
क्षमी	क्षमिन् - न. पुं. प्र. एक. (विशेषणम्)	सततम्	अव्ययम्

सन्तुष्टः	अ. पुं. प्र. एक. (विशेषणम्)	योगी	योगिन् - न. पुं. प्र. एक. (विशेष्यम्)
दृढनिश्चयः	अ. पुं. प्र. एक. (विशेषणम्)	मयि	अस्मद् - द. सर्व. स. एक.
अर्पितमनोबुद्धिः	इ. पुं. प्र. एक. (विशेषणम्)	मद्भक्तः	अ. पुं. प्र. एक. (विशेषणम्)
सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	मे	अस्मद् - द. सर्व. ष. एक.
प्रियः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	करुणः एव	करुण + एव	विसर्गसन्धिः (लोपः) ।
	निर्ममो निरहङ्कारः	निर्ममो + निरहङ्कारः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	मय्यर्पितमनोबुद्धिः	मयि + अर्पित...	यण्सन्धिः।
	मनो बुद्धिः	मनः + बुद्धिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	बुद्धिर्यः	बुद्धिः + यः	विसर्गसन्धिः(रेफः) ।
	यो मद्भक्तः	यः + मद्भक्तः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	स मे	स + मे	विसर्गसन्धिः (लोपः) ।

(ख) समासः	अद्वेष्टा	न द्वेष्टा अद्वेष्टा - नञ्तत्पुरुषः ।
	सर्वभूतानाम्	सर्वाणि च तानि भूतानि सर्वभूतानि, तेषाम् - कर्मधारयः ।
	निर्ममः	निर्गतः ममः यस्मात् सः निर्ममः - बहुव्रीहिः ।
	निरहङ्[illegible]	निर्गतः अहङ्कारः यस्मात् सः निरहङ्कारः - बहुव्रीहिः ।
	समदुःखसुखः	दुःखं सुखं च दुःखसुखे - द्वन्द्वः ।
		समे दुःखसुखे यस्य सः समदुःखसुखः - बहुव्रीहिः ।
	यतात्मा	यतः आत्मा यस्य सः यतात्मा - बहुव्रीहिः ।
	दृढनिश्चयः	दृढः निश्चयः यस्य सः दृढनिश्चयः- बहुव्रीहिः ।
	अर्पितमनोबुद्धिः	मनश्च बुद्धिश्च मनोबुद्धी - द्वन्द्वः ।
		अर्पिते मनोबुद्धी येन सः अर्पितमनोबुद्धिः - बहुव्रीहिः ।
	मद्भक्तः	मम भक्तः मद्भक्तः - षष्ठीतत्पुरुषः ।
(ग) कृदन्तः	द्वेष्टा	द्विष् (द्विष अप्रीतौ) + तृच् ।
	सन्तुष्टः	सम् + तुष् (तुष प्रीतौ) + क्तः ।
	निश्चयः	निस् + चि (चिञ् चयने) + अच् ।
	अर्पितः	अर्प (ऋ गतिप्रापणयोः) + क्त ।
	बुद्धिः	बुध् (बुध अवगमने) + क्तिन् ।

	भक्तः	भज् (भज सेवायाम्) + क्त ।
(घ) तद्धितान्तः	मैत्रः	मित्र + अण् (भावार्थे) ।
	क्षमी	क्षमा + इनि (क्षमा अस्य अस्मिन् एव अस्तीति क्षमिन् ।)
	योगी	योग + इनि (योगः अस्य अस्मिन् एव अस्तीति योगिन् ।)

भावस्पष्टीकरणम् -

प्रियः अस्ति ।	
कः प्रियः अस्ति ?	**सः** प्रियः अस्ति ।
सः **कस्य** प्रियः अस्ति ?	सः **मे** प्रियः अस्ति ।
कीदृशः सः मे प्रियः ?	**यः मद्भक्तः** सः मे प्रियः ।
कीदृशः मद्भक्तः सः मे प्रियः ?	**अद्वेष्टा** मद्भक्तः सः मे प्रियः ।
अद्वेष्टा **पुनश्च कीदृशः** मद्भक्तः सः मे प्रियः ?	अद्वेष्टा **मैत्रः च** मद्भक्तः सः मे प्रियः ।
अद्वेष्टा मैत्रः **पुनश्च कीदृशः** च मद्भक्तः सः मे प्रियः ?	अद्वेष्टा मैत्रः **करुणः एव च** मद्भक्तः सः मे प्रियः ।
अद्वेष्टा मैत्रः करुणः एव **पुनश्च कीदृशः** मद्भक्तः सः मे प्रियः ?	अद्वेष्टा मैत्रः करुणः **निर्ममः** एव च मद्भक्तः सः मे प्रियः ।
अद्वेष्टा मैत्रः करुणः निर्ममः एव च **पुनश्च कीदृशः** मद्भक्तः सः मे प्रियः ?	अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः एव च **मद्भक्तः** सः मे प्रियः ।
अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः **पुनश्च कीदृशः** एव च मद्भक्तः सः मे प्रियः ?	अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः **समदुःखसुखः** एव च मद्भक्तः सः मे प्रियः ।
अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः समदुःखसुखः **पुनश्च कीदृशः** एव च मद्भक्तः सः मे प्रियः ?	अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः समदुःखसुखः **क्षमी** एव च मद्भक्तः सः मे प्रियः ।
अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः समदुःखसुखः क्षमी **पुनश्च कीदृशः** एव च मद्भक्तः सः मे प्रियः ?	अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः समदुःखसुखः क्षमी **सततं सन्तुष्टः** एव च मद्भक्तः सः मे प्रियः ।
अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः समदुःखसुखः क्षमी सततं सन्तुष्टः **पुनश्च कीदृशः** एव च मद्भक्तः सः मे प्रियः ?	अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः समदुःखसुखः क्षमी सततं सन्तुष्टः **योगी** एव च मद्भक्तः सः मे प्रियः ।

अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः समदुःखसुखः क्षमी सततं सन्तुष्टः योगी **पुनश्च कीदृशः** एव च मद्भक्तः सः मे प्रियः ?	अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः समदुःखसुखः क्षमी सततं सन्तुष्टः योगी **दृढनिश्चयः** एव च मद्भक्तः सः मे प्रियः ।
अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः समदुःखसुखः क्षमी सततं सन्तुष्टः योगी दृढनिश्चयः **पुनश्च कीदृशः** एव च मद्भक्तः सः मे प्रियः ?	अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः समदुःखसुखः क्षमी सततं सन्तुष्टः योगी दृढनिश्चयः **अर्पितमनोबुद्धिः** एव च मद्भक्तः सः मे प्रियः ।
अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः समदुःखसुखः क्षमी सततं सन्तुष्टः योगी दृढनिश्चयः **कस्मिन्** अर्पितमनोबुद्धिः एव च मद्भक्तः सः मे प्रियः ?	अद्वेष्टा मैत्रः करुणः निर्ममः निरहङ्कारः समदुःखसुखः क्षमी सततं सन्तुष्टः योगी दृढनिश्चयः **मयि** अर्पितमनोबुद्धिः एव च मद्भक्तः सः मे प्रियः ।

तात्पर्यम् - यः सर्वजन्तुषु अवैरी, स्निग्धः, दयालुः, ममताशून्यः, अहङ्कारवर्जितः, क्लेशसन्तोषयोः समानः, तितिक्षुः, सदा सन्तृप्तः, समाहितचित्तः, नियतमनस्कः, निश्चलबुद्धिः, मयि निवेशितचित्तवृत्तिः, भक्तः सः जनः मम इष्टः । (सङ्कल्पात्मकं मनः, अध्यवसायात्मिका बुद्धिः)

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१२.१५॥

पदच्छेदः - यस्मात्, न, उद्विजते, लोकः, लोकात्, न, उद्विजते, च, यः ।
हर्षामर्षभयोद्वेगैः, मुक्तः, यः, सः, च, मे, प्रियः ॥

अन्वयः - यस्मात् लोकः न उद्विजते, यः च लोकात् न उद्विजते, यः हर्षामर्षभयोद्वेगैः मुक्तः स च मे प्रियः ।

पदार्थः - यस्मात् = यस्मात् पुरुषात्, लोकः = जनः, न उद्विजते = उद्वेगं न गच्छति, यः च = यः पुरुषः, लोकात्=भुवनात्, न उद्विजते=उद्वेगं न गच्छति, यः=यः जनः, हर्षामर्षभयोद्वेगैः=सन्तोषासूयात्रासक्षोभैः, मुक्तः = रहितः, सः च = सः पुरुषः, मे प्रियः = मम अभिमतः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यस्मात्	यद् - द. सर्व. पुं. पं. एक. (विशेषणम्)	लोकः	अ. पुं. प्र. एक.
न	अव्ययम्	उद्विजते	विज् (ओ विजि चलने) आत्म. कर्तरि लट्. प्रपु. एक.

यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
लोकात्	अ. पुं. पं. एक.	हर्षामर्षभयोद्वेगैः	अ. पुं. तृ. बहु.
मुक्तः	अ. पुं. प्र. एक. (विशेषणम्)	मे	अस्मद् - द. सर्व. ष. एक.
प्रियः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	यस्मान्न	यस्मात् + न	परसवर्णसन्धिः।
	लोकान्न	लोकात् + न	परसवर्णसन्धिः।
	नोद्विजते	न + उद्विजते	गुणसन्धिः।
	हर्षामर्षभयोद्वेगैर्मुक्तः	हर्षामर्षभयोद्वेगैः + मुक्तः	विसर्गसन्धिः (रेफः)।
	स च	सः + च	विसर्गसन्धिः (लोपः)।
(ख) समासः	अमर्षः	न मर्षः अमर्षः - नञ्तत्पुरुषः।	
	हर्षामर्षभयोद्वेगैर्मुक्तः	हर्षश्च, अमर्षश्च, भयं च, उद्वेगश्च हर्षामर्षभयोद्वेगाः, तैः - द्वन्द्वः।	
(ग) कृदन्तः	लोकः	लोक (लोकृ दर्शने) + घञ्।	
	हर्षः	हृष् (हृष तुष्टौ) + घञ्।	
	भयम्	भी (ञिभी भये) + अच्।	
	उद्वेगैः	उत् + विज् (ओ विजि भयचलनयोः) + घञ्, तैः।	
	मुक्तः	मुच् (मुच्लृ मोक्षणे) + क्त (कर्मणि)।	

भावस्पष्टीकरणम् -

प्रियः (अस्ति)।	
कः प्रियः अस्ति ?	सः **प्रियः** अस्ति।
सः **कस्य** प्रियः अस्ति ?	सः **मे** प्रियः अस्ति।
कीदृशः सः मे प्रियः अस्ति ?	**यः मुक्तः** सः मे प्रियः अस्ति।
यः **कैः** मुक्तः सः मे प्रियः अस्ति ?	यः **हर्षामर्षभयोद्वेगैः** मुक्तः सः मे प्रियः अस्ति।
अपि च **कः** सः मे प्रियः अस्ति ?	**यः न उद्विजते** सः मे प्रियः अस्ति।
यः **कस्मात्** न उद्विजते, सः मे प्रियः अस्ति ?	यः **लोकात्** न उद्विजते सः मे प्रियः अस्ति।
यः लोकात् न उद्विजते **इतोऽपि कः** सः मे प्रियः अस्ति ?	यः लोकात् न उद्विजते **यस्मात् च लोकः न उद्विजते** सः मे प्रियः अस्ति।

तात्पर्यम् - यस्मात् पुरुषात्, लोकः उद्वेगं न गच्छति, यः च पुरुषः लोकात् उद्वेगं न प्राप्नोति, यः जनः सन्तोषासूयात्रासक्षोभैः रहितः सः पुरुषः, मम प्रियः ।

अनपेक्षः शुचिर्दक्षः उदासीनो गतव्यथः ।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥१२.१६॥

पदच्छेदः - अनपेक्षः शुचिः दक्षः उदासीनः गतव्यथः ।
सर्वारम्भपरित्यागी यः मद्भक्तः सः मे प्रियः ॥

अन्वयः - यः अनपेक्षः शुचिः दक्षः उदासीनः गतव्यथः सर्वारम्भपरित्यागी मद्भक्तः स मे प्रियः ।

पदार्थः - यः = यः पुरुषः, अनपेक्षः = निःस्पृहः, शुचिः = शुद्धः, दक्षः = चतुरः, उदासीनः = तटस्थः, गतव्यथः = अपगतभयः, सर्वारम्भपरित्यागी = सकामकर्मानुष्ठानत्यागी, मद्भक्तः = भगवद्भक्तः, स मे प्रियः = सः मम अभीष्टः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	अनपेक्षः	अ. पुं. प्र. एक. (विशेषणम्)
शुचिः	इ. पुं. प्र. एक. (विशेषणम्)	दक्षः	अ. पुं. प्र. एक. (विशेषणम्)
उदासीनः	अ. पुं. प्र. एक. (विशेषणम्)	गतव्यथः	अ. पुं. प्र. एक. (विशेषणम्)
सर्वारम्भपरित्यागी	सर्वारम्भपरित्यागिन् - न. पुं. प्र. एक. (विशेषणम्)	मद्भक्तः	अ. पुं. प्र. एक. (विशेषणम्)
सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	मे	अस्मद् - द. सर्व. ष. एक.
प्रियः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः

शुचिर्दक्षः	शुचिः + दक्षः	विसर्गसन्धिः (रेफः) ।
दक्ष उदासीनः	दक्षः + उदासीनः	विसर्गसन्धिः (लोपः) ।
उदासीनो गतव्यथः	उदासीनः + गतव्यथः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
यो मद्भक्तः	यः + मद्भक्तः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
स मे	स + मे	विसर्गसन्धिः (लोपः) ।

(ख) समासः

अनपेक्षः	न विद्यते अपेक्षा यस्य सः अनपेक्षः - बहुव्रीहिः ।
गतव्यथः	गता व्यथा यस्मात् सः गतव्यथः - बहुव्रीहिः ।

	सर्वारम्भपरित्यागी	सर्वे आरम्भाः सर्वारम्भाः - कर्मधारयः । सर्वारम्भाणां परित्यागी सर्वारम्भपरित्यागी - षष्ठीतत्पुरुषः ।
	मद्भक्तः	मम भक्तः मद्भक्तः - षष्ठीतत्पुरुषः ।
(ग) कृदन्तः	दक्षः	दक्ष (दक्ष वृद्धौ शीघ्रार्थे च) + अच् ।
	उदासीनः	उद् + आस (आस उपवेशने) + शानच् ।
	गतः	गम् (गम्लृ गतौ) + क्त (कर्तरि) ।
	आरम्भ	आ + रभ् (रभ राभस्ये) + घञ् ।
	भक्तः	भज् (भज सेवायाम्) + क्त (कर्तरि) ।

भावस्पष्टीकरणम् -

प्रियः (अस्ति) ।	
कः प्रियः (अस्ति) ?	**सः** प्रियः (अस्ति) ।
सः **कस्य** प्रियः (अस्ति) ?	सः **मे** प्रियः (अस्ति) ।
कीदृशः सः मे प्रियः (अस्ति) ?	**यः मद्भक्तः** सः मे प्रियः (अस्ति) ।
कीदृशः मद्भक्तः सः मे प्रियः (अस्ति) ?	**यः अनपेक्षः** मद्भक्तः सः मे प्रियः (अस्ति) ।
अनपेक्षः **पुनश्च कीदृशः** मद्भक्तः सः मे प्रियः (अस्ति) ?	अनपेक्षः **शुचिः** मद्भक्तः सः मे प्रियः (अस्ति) ।
अनपेक्षः शुचिः **पुनश्च कीदृशः** मद्भक्तः सः मे प्रियः (अस्ति) ?	अनपेक्षः शुचिः **दक्षः** मद्भक्तः सः मे प्रियः (अस्ति) ।
अनपेक्षः शुचिः दक्षः **पुनश्च कीदृशः** मद्भक्तः सः मे प्रियः (अस्ति) ?	अनपेक्षः शुचिः दक्षः **उदासीनः** मद्भक्तः सः मे प्रियः (अस्ति) ।
अनपेक्षः शुचिः दक्षः उदासीनः **पुनश्च कीदृशः** मद्भक्तः सः मे प्रियः (अस्ति) ?	अनपेक्षः शुचिः दक्षः उदासीनः **गतव्यथः** मद्भक्तः सः मे प्रियः (अस्ति) ।

तात्पर्यम् - यः पुरुषः निःस्पृहः, शुद्धः चतुरः तटस्थः अपगतभयः सकामकर्मानुष्ठानत्यागी च अस्ति सः मद्भक्तः मे प्रियः ।

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥१२.१७॥

पदच्छेदः - यः, न, हृष्यति, न, द्वेष्टि, न, शोचति, न, काङ्क्षति ।
शुभाशुभपरित्यागी, भक्तिमान्, यः, स, च, मे, प्रियः ॥

अन्वयः - यः न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति शुभाशुभपरित्यागी भक्तिमान् सः च मे प्रियः ॥

पदार्थः - यः न हृष्यति = यः इष्टप्राप्तौ न मोदते, न द्वेष्टि = अनिष्टप्राप्तौ द्वेषं न करोति, न शोचति = प्रियवियोगे दुःखं न अनुभवति, न काङ्क्षति = अप्राप्तं न अभिलषति, शुभाशुभपरित्यागी = इष्टानिष्टपरित्यागी, भक्तिमान् = भक्तियुक्तः, सः च मे प्रियः = सः मम अभिलषितः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	न	अव्ययम्
हृष्यति	हृष् (हृष तुष्टौ) पर. लट्. कर्तरि. प्रपु. एक.	द्वेष्टि	द्विष् (द्विष अप्रीतौ) पर. लट्. कर्तरि. प्रपु. एक.
शोचति	शुच् (शुच शोके) पर. लट्. कर्तरि. प्रपु. एक.	काङ्क्षति	काङ्क्ष् (काक्षि काङ्क्षायाम्) पर. लट्. कर्तरि. प्रपु. एक.
शुभाशुभपरित्यागी	शुभाशुभपरित्यागिन् - न. पुं. प्र. एक. (विशेषणम्)	भक्तिमान्	भक्तिमत् - त. पुं. प्र. एक. (विशेषणम्)
सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	मे	अस्मद् - द. सर्व. ष. एक.
प्रियः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः यो न — यः + न — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
स मे — सः + मे — विसर्गसन्धिः (लोपः) ।

(ख) समासः शुभाशुभे — शुभं च अशुभं च शुभाशुभे - द्वन्द्वः ।
शुभाशुभपरित्यागी — शुभाशुभयोः परित्यागी शुभाशुभपरित्यागी - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः भक्तिः — भज् (भज सेवायाम्) + क्तिन् ।

(घ) तद्धितान्तः भक्तिमान् — भक्ति + मतुप् (भक्तिः अस्य अस्मिन् वा अस्तीति भक्तिमान् ।)

भावस्पष्टीकरणम् -

प्रियः (अस्ति) ।	
कः प्रियः (अस्ति) ?	**सः** प्रियः (अस्ति) ।
सः **कस्य** प्रियः (अस्ति) ?	सः **मे** प्रियः (अस्ति) ।
कीदृशः सः मे प्रियः (अस्ति) ?	यः न हृष्यति सः मे प्रियः (अस्ति) ।
यः न हृष्यति **पुनश्च कीदृशः** सः मे प्रियः (अस्ति) ?	यः न हृष्यति **न द्वेष्टि** सः मे प्रियः (अस्ति) ।
यः न हृष्यति न द्वेष्टि **पुनश्च कीदृशः** सः मे प्रियः (अस्ति) ?	यः न हृष्यति न द्वेष्टि **न शोचति** सः मे प्रियः (अस्ति) ।
यः न हृष्यति न द्वेष्टि न शोचति **पुनश्च कीदृशः** सः मे प्रियः (अस्ति) ?	यः न हृष्यति न द्वेष्टि न शोचति **न काङ्क्षति** सः मे प्रियः (अस्ति) ।
यः न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति **पुनश्च कीदृशः** सः मे प्रियः (अस्ति) ?	यः न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति **शुभाशुभपरित्यागी** सः मे प्रियः (अस्ति) ।
यः न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति शुभाशुभपरित्यागी **पुनश्च कीदृशः** सः मे प्रियः (अस्ति) ?	यः न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति शुभाशुभपरित्यागी **भक्तिमान्** सः च मे प्रियः ।

तात्पर्यम् - यः इष्टप्राप्तौ न मोदते, अनिष्टप्राप्तौ द्वेषं न करोति प्रियवियोगे दुःखं न अनुभवति अप्राप्तं न अभिलषति इष्टानिष्टपरित्यागी भक्तियुक्तः च अस्ति सः मम प्रियः ।

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥१२.१८॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥१२.१९॥

पदच्छेदः - समः, शत्रौ, च, मित्रे, च, तथा, मानापमानयोः ।
शीतोष्णसुखदुःखेषु, समः, सङ्गविवर्जितः ॥
तुल्यनिन्दास्तुतिः, मौनी, सन्तुष्टः, येन, केनचित् ।
अनिकेतः, स्थिरमतिः, भक्तिमान्, मे, प्रियः नरः ॥

अन्वयः - शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः मौनी येन केनचित् सन्तुष्टः अनिकेतः स्थिरमतिः भक्तिमान् नरः मे प्रियः ।

पदार्थः - शत्रौ च = अरौ च, मित्रे च = वयस्ये च, समः = समानः, तथा = एवम्, मानापमानयोः = पूजातिरस्कारयोः, शीतोष्णसुखदुःखेषु = द्वन्द्वेषु, समः = समानः, सङ्गविवर्जितः = विषयसङ्गरहितः, तुल्यनिन्दास्तुतिः = दूषणश्लाघनयोः समानः, मौनी = नियतवाक्, येन केनचित् = येन केनापि लाभेन, सन्तुष्टः = सन्तृप्तः, अनिकेतः = अनिवासः, स्थिरमतिः = निश्चलमनस्कः, भक्तिमान् नरः = भक्तः, मे प्रियः = मम इष्टः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
शत्रौ	उ. पुं. स. एक.	च	अव्ययम्
मित्रे	अ. नपुं. स. एक.	समः	अ. पुं. प्र. एक.
तथा	अव्ययम्	मानापमानयोः	अ. पुं. स. द्विव.
शीतोष्णसुखदुःखेषु	अ. नपुं. स. बहु.	समः	अ. पुं. प्र. एक.
सङ्गविवर्जितः	अ. पुं. प्र. एक. (विशेषणम्)	तुल्यनिन्दास्तुतिः	इ. पुं. प्र. एक. (विशेषणम्)
मौनी	मौनिन् - न. पुं. प्र. एक. (विशेषणम्)	येन	यत् - त. सर्व. पुं. तृ. एक. (विशेषणम्)
केनचित्	अव्ययम्	स्थिरमतिः	इ. पुं. प्र. एक. (विशेषणम्)
भक्तिमान्	भक्तिमत् - त. पुं. प्र. एक. (विशेषणम्)	नरः	अ. पुं. प्र. एक. (विशेष्यम्)
मे	अस्मद् - द. सर्व. ष. एक.	प्रियः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः

	तुल्यनिन्दास्तुतिर्मौनी	तुल्यनिन्दास्तुतिः + मौनी	विसर्गसन्धिः (रेफः) ।
	सन्तुष्टो येन	सन्तुष्टः + येन	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	स्थिरमतिर्भक्तिमान्	स्थिरमतिः + भक्तिमान्	विसर्गसन्धिः (रेफः) ।
	प्रियो नरः	प्रियः + नरः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः

	मानापमानयोः	मानश्च अपमानश्च मानापमानौ, तयोः - द्वन्द्वः ।
	शीतोष्णम्	शीतं च तत् उष्णं च अनयोः समाहारः शीतोष्णम् - द्वन्द्वः ।
	सुखदुःखे	सुखं च तत् दुःखं च अनयोः समाहारः सुखदुःखे - द्वन्द्वः ।
	शीतोष्णसुखदुःखेषु	शीतं च उष्णं च सुखं च दुःखं च शीतोष्णसुखदुःखानि, तेषु - द्वन्द्वः ।

	सङ्गविवर्जितः	सङ्गेन विवर्जितः सङ्गविवर्जितः - तृतीयातत्पुरुषः ।
	तुल्यनिन्दास्तुतिः	निन्दा च स्तुतिः च निन्दास्तुती - द्वन्द्वः ।
		तुल्ये निन्दास्तुती यस्य सः तुल्यनिन्दास्तुतिः - बहुव्रीहिः ।
	स्थिरमतिः	स्थिरा मतिः यस्य सः स्थिरमतिः - बहुव्रीहिः ।
(ग) कृदन्तः	सङ्गः	सञ्ज् (षञ्ज सङ्गे) + घञ् ।
	विवर्जितः	वि + वृज् (वृजी वर्जने) + क्त (कर्तरि) ।
	स्तुतिः	स्तु (ष्टुञ् स्तुतौ) + क्तिन् ।
	सन्तुष्टः	सम् + तुष् (तुष तुष्टौ) + क्त (कर्तरि) ।
(घ) तद्धितान्तः	मौनी	मौन + इनि (मौनम् अस्य अस्मिन् वा अस्ति इति ।)
	भक्तिमान्	भक्ति + मतुप् (भक्तिः अस्य अस्मिन् वा अस्ति इति ।)

भावस्पष्टीकरणम् -

प्रियः (अस्ति) ।	
कः प्रियः (अस्ति) ?	**सः** प्रियः (अस्ति) ।
सः **कस्य** प्रियः (अस्ति) ?	सः **मे** प्रियः (अस्ति) ।
केषु समः नरः सः मे प्रियः (अस्ति) ?	**शत्रौ च मित्रे च** समः नरः सः मे प्रियः (अस्ति) ।
शत्रौ च मित्रे च समः तथा **पुनश्च कयोः** समः नरः सः मे प्रियः (अस्ति) ? समः नरः सः मे प्रियः (अस्ति) ।	शत्रौ च मित्रे च समः तथा **मानापमानयोः**
शत्रौ च मित्रे च समः तथा मानापमानयोः **पुनश्च केषु** समः नरः सः मे प्रियः (अस्ति) ?	शत्रौ च मित्रे च समः तथा मानापमानयोः **शीतोष्णसुखदुःखेषु** समः नरः सः मे प्रियः (अस्ति) ।
शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः **पुनश्च कीदृशः** नरः सः मे प्रियः (अस्ति) ?	शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः **सङ्गविवर्जितः** समः नरः सः मे प्रियः (अस्ति) ।
शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः **पुनश्च कीदृशः** नरः सः मे प्रियः (अस्ति) ?	शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः **तुल्यनिन्दास्तुतिः** नरः सः मे प्रियः (अस्ति) ।

शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः **पुनश्च कीदृशः** नरः सः मे प्रियः (अस्ति) ?	शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः **मौनी** नरः सः मे प्रियः (अस्ति)।
शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः मौनी नरः **पुनश्च कीदृशः** सः मे प्रियः (अस्ति) ?	शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः मौनी **सन्तुष्टः** नरः सः मे प्रियः (अस्ति)।
शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः मौनी **केन** सन्तुष्टः नरः सः मे प्रियः (अस्ति) ?	शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः मौनी **येन केनचित्** सन्तुष्टः नरः सः मे प्रियः (अस्ति)।
शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः मौनी येन केनचित् सन्तुष्टः **पुनश्च कीदृशः** नरः सः मे प्रियः (अस्ति) ?	शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः मौनी येन केनचित् सन्तुष्टः **अनिकेतः** नरः सः मे प्रियः (अस्ति)।
शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः मौनी येन केनचित् सन्तुष्टः अनिकेतः **पुनश्च कीदृशः** नरः सः मे प्रियः (अस्ति) ?	शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः मौनी येन केनचित् सन्तुष्टः अनिकेतः **स्थिरमतिः** नरः सः मे प्रियः (अस्ति)।
शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः मौनी येन केनचित् सन्तुष्टः अनिकेतः स्थिरमतिः **पुनश्च कीदृशः** नरः मे प्रियः ?	शत्रौ च मित्रे च समः तथा मानापमानयोः शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः तुल्यनिन्दास्तुतिः मौनी येन केनचित् सन्तुष्टः अनिकेतः स्थिरमतिः **भक्तिमान्** नरः मे प्रियः।

तात्पर्यम् - अरौ च वयस्ये च समानः तथा पूजातिरस्कारयोः, शीतोष्णयोः सुखदुःखयोः च समानः विषयसङ्गरहितः दूषणश्लाघनयोः समानः नियतवाक्, येन केनापि लाभेन सन्तृप्तः, अनिवासः, निश्चलमनस्कः भक्तः मम इष्टः।

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥१२.२०॥

पदच्छेदः - ये, तु, धर्म्यामृतम्, इदम्, यथोक्तम्, पर्युपासते।
श्रद्दधानाः, मत्परमाः, भक्ताः, ते, अतीव, मे, प्रियाः ॥

अन्वयः - ये तु भक्ताः श्रद्दधाना मत्परमाः यथोक्तम् इदं धर्म्यामृतं पर्युपासते ते अतीव मे प्रियाः।

पदार्थः - ये तु = ये पुनः, भक्ताः = भक्तिमन्तः, श्रद्दधाना = विश्वासयुक्ताः, मत्परमाः = मन्निष्ठाः, यथोक्तम् = यथाप्रतिपादितम्, इदम् = एतत्, धर्म्यामृतम् = सुधासदृशं धर्मयुक्तम्, पर्युपासते = सेवन्ते, ते = ते, अतीव = अत्यन्तम्, मे = मम, प्रियाः = अभीष्टाः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	तु	अव्ययम्
भक्ताः	अ. पुं. प्र. बहु. (विशेष्यम्)	श्रद्दधानाः	अ. पुं. प्र. बहु. (विशेषणम्)
मत्परमाः	अ. पुं. प्र. बहु. (विशेषणम्)	यथोक्तम्	अव्ययम्
इदम्	इदम् - म. सर्व. नपुं. प्र. एक. (विशेषणम्)	धर्म्यामृतम्	अ. नपुं. प्र. एक. (विशेष्यम्)
पर्युपासते	परि + उप + आस् (आस उपवेशने) आत्म. कर्तरि लट्. प्रपु. बहु.	ते	तद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)
अतीव	अव्ययम्	मे	अस्मद् - द. सर्व. ष. एक.
प्रियाः	अ. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) समासः धर्म्यामृतम् — न मृतम् - नञ्तत्पुरुषः।
धर्म्यं च तत् अमृतं च धर्म्यामृतम् - कर्मधारयः।
यथोक्तम् — उक्तम् अनतिक्रम्य यथोक्तम् - अव्ययीभावः।
मत्परमाः — अहं परमः येषां ते, मत्परमाः - बहुव्रीहिः।

(ख) कृदन्तः मृतम् — मृ (मृङ् प्राणत्यागे) + क्त (कर्तरि)।
उक्तम् — वच् (वच परिभाषणे) + क्त (कर्मणि)।
श्रद्दधानाः — श्रत् + धा (डुधाञ् धारणपोषणयोः) + शानच्।

(ग) तद्धितान्तः धर्म्यम् — धर्म + यत् (धर्मात् अनपेतम् इत्यर्थः)।

भावस्पष्टीकरणम् -

ये पर्युपासते ।	
किं पर्युपासते ?	**धर्म्यामृतं** पर्युपासते ।
किं धर्म्यामृतं पर्युपासते ?	**इदं** धर्म्यामृतं पर्युपासते ।
कीदृशम् इदं धर्म्यामृतं पर्युपासते ?	**यथोक्तम्** इदं धर्म्यामृतं पर्युपासते ।
के यथोक्तम् इदं धर्म्यामृतं पर्युपासते ?	**ये तु भक्ताः** यथोक्तम् इदं धर्म्यामृतं पर्युपासते ।
कीदृशाः भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते ?	**श्रद्दधानाः** भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते ।
श्रद्दधानाः **पुनश्च कीदृशाः** भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते ?	श्रद्दधानाः **मत्परमाः** भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते ।
श्रद्दधानाः मत्परमाः भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते, **तेषां किम् ?**	श्रद्दधानाः मत्परमाः भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते, **ते प्रियाः ।**
श्रद्दधानाः मत्परमाः भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते, ते **कथं** प्रियाः ?	श्रद्दधानाः मत्परमाः भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते, ते **अतीव** प्रियाः ।
श्रद्दधानाः मत्परमाः भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते, ते **कस्य** अतीव प्रियाः ?	श्रद्दधानाः मत्परमाः भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते, ते **मे** अतीव प्रियाः ।

तात्पर्यम् - ये तु भक्तिमन्तः विश्वासयुक्ताः, मन्निष्ठाः, यथाप्रतिपादितम्, एतत्, सुधासदृशं धर्मयुक्तम्, आचरन्ति ते पुरुषाः मम अत्यन्तम् अभीष्टाः ।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियोगो नाम द्वादशोऽध्यायः ॥१२॥

द्वादशाध्यायस्य सारः

श्रीमद्भगवद्गीतायां यथा साङ्ख्ययोगः कर्मयोगश्च प्रतिपादितः तथैव भक्तियोगोऽपि प्रतिपादितः अस्ति । द्वादशाध्याये भक्तियोगः विस्तरेण कथितः अस्ति। तत्र च प्रामुख्येन भक्तिः कथं करणीया ? भगवतः प्रियभक्तश्च कः ? इति विषयः वर्णितः अस्ति।

एकादशे अध्याये अर्जुनः भगवतः विश्वरूपस्य दर्शनं कृतवान्। तस्य अन्ते ''अनन्यया भक्त्या मां ज्ञातुं द्रष्टुं च शक्नोषि, सङ्गवर्जितः मद्भक्तः मां याति'' इति भगवता उपदिष्टम्। तत् श्रुत्वा भक्तेषु निर्गुणोपासकः भक्तः श्रेष्ठः, उत सगुणोपासकः ? इति प्रश्नः अर्जुनस्य मनसि उदेति। अतः सः ''तेषां के योगवित्तमाः ?'' इति पृच्छति। तदा कृष्णः एवम् उत्तरयति -

"ये जनाः चित्तं मयि निवेश्य सततसमाहिताः, प्रकृष्टया श्रद्धया समन्विताः सन्तः मां भजन्ते ते उत्तमभक्ताः। ये इन्द्रियाणि नियन्त्र्य सर्वस्मिन् काले समानचित्ताः भूत्वा अनिर्वचनीयम्, इन्द्रियाणाम् अगोचरं, सर्वव्यापिनम्, अप्रमेयं स्थिरं च परमात्मानं सेवन्ते ते जनाः माम् एव लभन्ते। निर्विशेषे ब्रह्मणि येषां मनः प्रवृत्तं तेषाम् अत्यन्तं क्लेशः सम्भवति। यतः तैः अव्यक्ततत्त्वस्य चिन्तनं कृत्वा तस्य उपासना करणीया भवति। सा च व्यक्तोपासनायाः अपेक्षया कठिना । ये जनाः तु सर्वाणि कर्माणि मयि समर्प्य मन्मनसः अनन्येन समाधिना मां भजन्ते, तेषां मरणादियुक्तात् संसारसमुद्रात् अहं शीघ्रम् उद्धारं करोमि।"

एवं प्रतिपाद्य भगवान् अर्जुनं पुनः भक्तेः उपायान् उपदिशति - "मयि एव चित्तं स्थापय, बुद्धिं निवेशय। तथा कृतं चेत् मयि निवत्स्यसि। यदि मयि निश्चलं चित्तं स्थापयितुं न शक्नोषि तर्हि अभ्यासं कृत्वा मां प्राप्तुं प्रयतस्व। तदपि यदि न शक्नोषि तर्हि सर्वदा माम् उद्दिश्य सर्वाणि कर्माणि आचर। तादृशं कर्माचरणम् अपि यदि कठिनं मन्यसे तर्हि सर्वकर्मफलत्यागं कुरु। यतो हि अभ्यासात् विवेकः प्रशस्ततरः। विवेकात् चिन्तनं विशिष्यते। चिन्तनात् अपि कर्मफलत्यागः विशिष्यते। त्यागात् संसारबन्धस्य नाशः भवति। अतः सर्वकर्मफलत्यागं कुरु" इति।

कर्मफलापेक्षारहितस्य प्रियभक्तस्य लक्षणानि अग्रिमश्लोकेषु भगवता उपदिष्टानि। तानि यथा - "यः सर्वजन्तुषु अवैरी, स्निग्धः, दयालुः, ममताशून्यः, अहङ्कारवर्जितः, क्लेशसन्तोषयोः समानः, तितिक्षुः, सदा सन्तृप्तः, समाहितचित्तः, नियतमनस्कः, निश्चलबुद्धिः, मयि निवेशितचित्तवृत्तिः, भक्तः सः जनः मम इष्टः। यस्मात् पुरुषात् लोकः उद्वेगं न गच्छति, यः च लोकात् उद्वेगं न प्राप्नोति, यः सन्तोष-असूया-त्रास-क्षोभैः रहितः सः पुरुषः मम प्रियः। यः निःस्पृहः, शुद्धः, चतुरः, तटस्थः, अपगतभयः, सकामकर्मानुष्ठानत्यागी च सः मद्भक्तः मे प्रियः। यः इष्टप्राप्तौ न मोदते, अनिष्टप्राप्तौ द्वेषं न करोति, प्रियवियोगे दुःखं न अनुभवति, अप्राप्तं न अभिलषति, इष्टानिष्टपरित्यागी, भक्तियुक्तः च अस्ति सः मम प्रियः। शत्रौ च मित्रे च समानः तथा पूजातिरस्कारयोः, शीतोष्णयोः सुखदुःखयोः च समानः, विषयसङ्गरहितः, दूषणश्लाघनयोः समानः, नियतवाक्, येन केनापि लाभेन सन्तृप्तः, अनिवासः, निश्चलमनस्कः च भक्तः मम इष्टः। ये तु श्रद्धावन्तः मत्परमाः भक्ताः उपर्युक्तं धर्म्यामृतं सेवन्ते ते पुरुषाः मम अत्यन्तम् अभीष्टाः भवन्ति" इति।

अथ त्रयोदशोऽध्यायः

१३

क्षेत्रक्षेत्रज्ञविभागयोगः

श्रीभगवानुवाच - इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥१३.१॥

पदच्छेदः -

श्रीभगवान्, उवाच - इदम्, शरीरम्, कौन्तेय, क्षेत्रम्, इति, अभिधीयते।
एतत्, यः, वेत्ति, तम्, प्राहुः, क्षेत्रज्ञः, इति, तद्विदः ॥

अन्वयः - कौन्तेय ! इदं शरीरं क्षेत्रम् इति अभिधीयते। एतत् यः वेत्ति तं क्षेत्रज्ञः इति तद्विदः प्राहुः।

पदार्थः - कौन्तेय = अर्जुन ! इदम् = एतत्, शरीरम् = वपुः, क्षेत्रम् = कर्मफलनिष्पत्तेः आधारत्वात् क्षेत्रम् इति, अभिधीयते = कथ्यते, एतत् = इदम्, यः = यः पुरुषः, वेत्ति = जानाति, तम् = तं पुरुषम्, क्षेत्रज्ञः = क्षेत्रवित् इति, तद्विदः = क्षेत्रक्षेत्रज्ञयोः वेत्तारः, प्राहुः = वदन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	इदम्	इदम्- म. सर्व. नपुं. प्र. एक. (विशेषणम्)
शरीरम्	अ. नपुं. प्र. एक. (विशेष्यम्)	क्षेत्रम्	अ. नपुं. प्र. एक.
इति	अव्ययम्	अभिधीयते	अभि + धा (डुधाञ् - धारणपोषणयोः) आत्म. कर्मणि लट्. प्रपु. एक.
एतत्	एतद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
वेत्ति	विद् (विद - ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.	तम्	तद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)
क्षेत्रज्ञः	अ. पुं. प्र. एक.	तद्विदः	तद्विद् - द. पुं. प्र. बहु.
प्राहुः	प्र + ब्रू (ब्रूञ् - व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	इत्यभिधीयते	इति + अभिधीयते	यण्सन्धिः।
	एतद्यः	एतत् + यः	जश्त्वसन्धिः।
	यो वेत्ति	यः + वेत्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	क्षेत्रज्ञ इति	क्षेत्रज्ञः + इति	विसर्गसन्धिः (लोपः)।

(ख) समासः	क्षेत्रज्ञः	क्षेत्रं जानाति इति क्षेत्रज्ञः - कर्तरि कः उपपदसमासश्च ।
	तद्विदः	तत् विदन्ति इति तद्विदः - कर्तरि क्विप् उपपदसमासश्च ।
(ग) कृदन्तः	क्षेत्रम्	क्षि (क्षि - निवासगत्योः) + ष्ट्रन् ।
(घ) तद्धितान्तः	कौन्तेय	कुन्ती + ढक् (अपत्यार्थे) तत्सम्बुद्धौ, कुन्त्याः अपत्यं पुमान् ।

भावस्पष्टीकरणम् -

अभिधीयते ।	
किम् इति अभिधीयते ?	**क्षेत्रम्** इति अभिधीयते ।
किं क्षेत्रम् इति अभिधीयते ?	**शरीरं** क्षेत्रम् इति अभिधीयते ।
किं शरीरं क्षेत्रम् इति अभिधीयते ?	**इदं** शरीरं क्षेत्रम् इति अभिधीयते ।
प्राहुः ।	
के प्राहुः ?	**तद्विदः** प्राहुः ।
किम् इति तद्विदः प्राहुः ?	**क्षेत्रज्ञः** इति तद्विदः प्राहुः ।
कं क्षेत्रज्ञः इति तद्विदः प्राहुः ?	**तं** क्षेत्रज्ञः इति तद्विदः प्राहुः ।
किं करोति तं क्षेत्रज्ञः इति तद्विदः प्राहुः ?	**यः वेत्ति** तं क्षेत्रज्ञः इति तद्विदः प्राहुः ।
किं यः वेत्ति तं क्षेत्रज्ञः इति तद्विदः प्राहुः ?	**एतत्** यः वेत्ति तं क्षेत्रज्ञः इति तद्विदः प्राहुः ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय !**

तात्पर्यम् - अर्जुन ! एतत् वपुः कर्मफलनिष्पत्तेः आधारत्वात् क्षेत्रम् इति कथ्यते । यः पुरुषः इदं वेत्ति तं पुरुषं क्षेत्रवित् इति क्षेत्रक्षेत्रज्ञयोः वेत्तारः वदन्ति ।

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥१३.२॥

पदच्छेदः - क्षेत्रज्ञम्, च, अपि, माम्, विद्धि, सर्वक्षेत्रेषु, भारत ।
क्षेत्रक्षेत्रज्ञयोः, ज्ञानम्, यत्, तत्, ज्ञानम्, मतम्, मम ॥

अन्वयः - भारत ! सर्वक्षेत्रेषु क्षेत्रज्ञं च अपि मां विद्धि यत् क्षेत्रक्षेत्रज्ञयोः ज्ञानं तत् ज्ञानं मतं मम ।

पदार्थः - भारत = अर्जुन ! सर्वक्षेत्रेषु = सकलशरीरेषु, क्षेत्रज्ञम् = क्षेत्रविदम्, च अपि माम् = च अपि माम्, विद्धि = जानीहि, क्षेत्रक्षेत्रज्ञयोः = शरीरतद्विदोः, यत् ज्ञानम् = यः बोधः, तत् ज्ञानम् = सः बोधः, मम मतम् = मम अभिमतः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	सर्वक्षेत्रेषु	अ. नपुं. स. बहु.
क्षेत्रज्ञम्	अ. नपुं. द्वि. एक. (विशेषणम्)	च	अव्ययम्
अपि	अव्ययम्	माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)
विद्धि	विद् (विद - ज्ञाने) पर. कर्तरि लोट्. मपु. एक.	यत्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)
क्षेत्रक्षेत्रज्ञयोः	अ. पुं. ष. द्विव.	ज्ञानम्	अ. नपुं. प्र. एक. (विशेष्यम्)
तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	मतम्	अ. नपुं. प्र. एक. (विशेषणम्)
मम	अस्मद्- द. सर्व. ष. एक.		

व्याकरणम् -

(क) सन्धिः	क्षेत्रक्षेत्रज्ञयोर्ज्ञानम्	क्षेत्रक्षेत्रज्ञयोः + ज्ञानम्	विसर्गसन्धिः (रेफः)।
	तज्ज्ञानम्	तत् + ज्ञानम्	जश्त्वसन्धिः।
(ख) समासः	क्षेत्रज्ञम्	क्षेत्रं जानाति इति क्षेत्रज्ञः, तम् - कर्तरि कः उपपदसमासः च।	
	सर्वक्षेत्रेषु	सर्वाणि क्षेत्राणि सर्वक्षेत्राणि, तेषु - कर्मधारयः।	
(ग) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् (भावे)।	
	मतम्	मन् (मनु - अवबोधने) + क्त (कर्मणि)।	
(घ) तद्धितान्तः	भारत	भरत + अण् (अपत्यार्थे) भरतस्य अपत्यं पुमान्।	

भावस्पष्टीकरणम् -

विद्धि।	
कं विद्धि ?	**मां** विद्धि।
कीदृशं च मां विद्धि ?	**क्षेत्रज्ञं** च अपि मां विद्धि।
केषु क्षेत्रज्ञं च अपि मां विद्धि ?	**सर्वक्षेत्रेषु** क्षेत्रज्ञं च अपि मां विद्धि।
सर्वक्षेत्रेषु क्षेत्रज्ञं च अपि मां विद्धि। **तस्य किम्** ?	सर्वक्षेत्रेषु क्षेत्रज्ञं च अपि मां विद्धि। **मतम्**।
सर्वक्षेत्रेषु क्षेत्रज्ञं च अपि मां विद्धि। मतं **कस्य** ?	सर्वक्षेत्रेषु क्षेत्रज्ञं च अपि मां विद्धि। मतं **मम**।
सर्वक्षेत्रेषु क्षेत्रज्ञं च अपि मां विद्धि। **किं** मतं मम ?	सर्वक्षेत्रेषु क्षेत्रज्ञं च अपि मां विद्धि। **ज्ञानं** मतं मम।
सर्वक्षेत्रेषु क्षेत्रज्ञं च अपि मां विद्धि। **किं** ज्ञानं मतं मम ?	सर्वक्षेत्रेषु क्षेत्रज्ञं च अपि मां विद्धि। **तत्** ज्ञानं मतं मम।

सर्वक्षेत्रेषु क्षेत्रज्ञं च अपि मां विद्धि। **कयोः** तत् ज्ञानं मतं मम ?	सर्वक्षेत्रेषु क्षेत्रज्ञं च अपि मां विद्धि। **क्षेत्रक्षेत्रज्ञयोः** ज्ञानं तत् ज्ञानं मतं मम।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - भारत ! सकलशरीरेषु क्षेत्रविदम् अपि मां जानीहि। शरीरतद्विदोः बोधः एव बोधः इति मम अभिमतम्।

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत्।
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥१३.३॥

पदच्छेदः - तत्, क्षेत्रम्, यत्, च, यादृक्, च, यद्विकारि, यतः, च, यत्।
सः, च, यः, यत्प्रभावः, च, तत्समासेन, मे, शृणु ॥

अन्वयः - तत् क्षेत्रं यत् च यादृक् च यद्विकारि यतः च यत्। सः च यः यत्प्रभावः च तत्समासेन मे शृणु।

पदार्थः - तत् क्षेत्रम् = तत् शरीरम्, यत् च = यत्स्वरूपम्, यादृक् च = यद्धर्मविशिष्टं च, यद्विकारि = यैः विकारैः युक्तम्, यतः च = यादृशात् हेतोः जायते, यत् = यत्, सः च = सः च क्षेत्रज्ञः, यः = यत्स्वरूपः, यत्प्रभावः = यादृशप्रभावविशिष्टः च, तत्समासेन = तत्संक्षेपेण, मे शृणु = मत्तः शृणु।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	क्षेत्रम्	अ. नपुं. प्र. एक. (विशेष्यम्)
यत्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
यादृक्	यादृश्- श. नपुं. प्र. एक.	यद्विकारि	यद्विकारिन्- न. नपुं. प्र. एक.
यतः	अव्ययम्	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	यत्प्रभावः	अ. पुं. प्र. एक. (विशेषणम्)
तत्समासेन	अ. पुं. तृ. एक.	मे	अस्मद्- द. सर्व. पं. एक.
शृणु	श्रु (श्रु - श्रवणे) पर. कर्तरि.लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	यच्च	यत् + च	श्चुत्वसन्धिः।
	यतश्च	यतः + च	विसर्गसन्धिः (सकारः) श्चुत्वसन्धिः।

	यो यत्प्रभावः	यः + यत्प्रभावः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	प्रभावश्च	प्रभावः + च	विसर्गसन्धिः (सकारः) श्चुत्वसन्धिः।
(ख) समासः	यद्विकारि	यैः विकारि यद्विकारि - तृतीयातत्पुरुषः।	
	यत्प्रभावः	यः प्रभावः यस्य सः यत्प्रभावः - बहुव्रीहिः।	
(ग) तद्धितान्तः	विकारि	विकार + इनि (मतुबर्थे) (विकारः अस्य अस्मिन् वा अस्तीति।)	

भावस्पष्टीकरणम् -

शृणु।	
कस्य शृणु ?	**मे** शृणु।
केन मे शृणु ?	**तत्समासेन** मे शृणु।
कीदृशः च तत्समासेन मे शृणु ?	**यत्प्रभावः** च तत्समासेन मे शृणु।
कः यत्प्रभावः च तत्समासेन मे शृणु ?	**सः** च यः यत्प्रभावः च तत्समासेन मे शृणु।
कुतः च तत् सः च यः यत्प्रभावः च तत्समासेन मे शृणु ?	**यतः च यत्** सः च यः यत्प्रभावः च तत्समासेन मे शृणु।
कीदृशं यतः च यत् सः च यः यत्प्रभावः च तत्समासेन मे शृणु ?	**यद्विकारि** यतः च यत् सः च यः यत्प्रभावः च तत्समासेन मे शृणु।
कीदृक् च यद्विकारि यतः च यत् सः च यः यत्प्रभावः च तत्समासेन मे शृणु ?	**यादृक्** च यद्विकारि यतः च यत् सः च यः यत्प्रभावः च तत्समासेन मे शृणु।
किं तत् यादृक् च यद्विकारि यतः च यत् सः च यः यत्प्रभावः च तत्समासेन मे शृणु ?	**तत्** क्षेत्रं यत् च यादृक् च यद्विकारि यतः च यत् सः च यः यत्प्रभावः च तत्समासेन मे शृणु।

तात्पर्यम् - क्षेत्रस्य किं स्वरूपम् ? कीदृशाश्च धर्माः तत्र सन्ति ? विकारकारणीभूताः अंशाः के ? कस्मात् इदं जायते तथा अस्य क्षेत्रस्य किं स्वरूपम् ? कीदृशाश्च धर्माः तस्मिन् सन्ति ? तददिदं सर्वमपि संक्षपेण कथयामि, शृणु।

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥१३.४॥

पदच्छेदः - ऋषिभिः, बहुधा, गीतम्, छन्दोभिः, विविधैः, पृथक्।
ब्रह्मसूत्रपदैः, च, एव, हेतुमद्भिः, विनिश्चितैः ॥

अन्वयः - (तदिदम्) विविधैः छन्दोभिः ऋषिभिः हेतुमद्भिः विनिश्चितैः ब्रह्मसूत्रपदैः च एव बहुधा पृथक् गीतम्।

पदार्थः - (तदिदम्) विविधैः = नानाविधैः, छन्दोभिः = वेदैः, ऋषिभिः = वसिष्ठादिभिः, हेतुमद्भिः = युक्तियुक्तैः, विनिश्चितैः = निर्णीतैः, ब्रह्मसूत्रपदैः च एव = उपनिषद्वाक्यैः च एव, बहुधा = बहुप्रकारैः ध्यानधारणादिविषयत्वेन, पृथक् = पार्थक्येन, गीतम् = प्रतिपादितम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विविधैः	अ. नपुं. तृ. बहु. (विशेषणम्)	छन्दोभिः	छन्दस्- सका. नपुं. तृ. बहु. (विशेष्यम्)
ऋषिभिः	इ. पुं. तृ. बहु. (विशेष्यम्)	हेतुमद्भिः	हेतुमत्- त. नपुं. तृ. बहु. (विशेषणम्)
विनिश्चितैः	अ. नपुं. तृ. बहु. (विशेषणम्)	ब्रह्मसूत्रपदैः	अ. नपुं. तृ. बहु. (विशेष्यम्)
च	अव्ययम्	एव	अव्ययम्
बहुधा	अव्ययम्	पृथक्	अव्ययम्
गीतम्	अ. नपुं. प्र. एक.		

व्याकरणम् -

(क) सन्धिः	ऋषिभिर्बहुधा	ऋषिभिः + बहुधा	विसर्गसन्धिः (रेफः)।
	छन्दोभिर्विविधैः	छन्दोभिः + विविधैः	विसर्गसन्धिः (रेफः)।
	ब्रह्मसूत्रपदैश्च	ब्रह्मसूत्रपदैः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	चैव	च + एव	वृद्धिसन्धिः।
	हेतुमद्भिर्विनिश्चितैः	हेतुमद्भिः + विनिश्चितैः	विसर्गसन्धिः (रेफः)।
(ख) समासः	ब्रह्मसूत्रपदैः	ब्रह्मसूत्राणां पदानि ब्रह्मसूत्रपदानि, तै - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	गीतम्	गै (गै - शब्दे) + क्त (कर्मणि)।	
(घ) तद्धितान्तः	हेतुमद्भिः	हेतुः + मतुप्, तैः (हेतुः एषाम् एषु वा अस्ति इति।)	

भावस्पष्टीकरणम् -

गीतम्।	
कथं गीतम्?	**पृथक्** गीतम्।
कतिधा पृथक् गीतम्?	**बहुधा** पृथक् गीतम्।
कैः बहुधा पृथक् गीतम्?	**ब्रह्मसूत्रपदैः** च एव बहुधा पृथक् गीतम्।
ब्रह्मसूत्रपदैः **पुनश्च कैः** च एव बहुधा पृथक् गीतम्?	ब्रह्मसूत्रपदैः **विनिश्चितैः** च एव बहुधा पृथक् गीतम्।

पुनश्च कैः विनिश्चितैः ब्रह्मसूत्रपदैः च एव बहुधा पृथक् गीतम् ?	**हेतुमद्भिः** विनिश्चितैः ब्रह्मसूत्रपदैः च एव बहुधा पृथक् गीतम् ।
पुनश्च कैः हेतुमद्भिः विनिश्चितैः ब्रह्मसूत्रपदैः च एव बहुधा पृथक् गीतम् ?	**ऋषिभिः** हेतुमद्भिः विनिश्चितैः ब्रह्मसूत्रपदैः च एव बहुधा पृथक् गीतम् ।
पुनश्च कैः ऋषिभिः हेतुमद्भिः विनिश्चितैः ब्रह्मसूत्रपदैः च एव बहुधा पृथक् गीतम् ?	**छन्दोभिः** ऋषिभिः हेतुमद्भिः विनिश्चितैः ब्रह्मसूत्रपदैः च एव बहुधा पृथक् गीतम् ।
कतिविधैः छन्दोभिः ऋषिभिः हेतुमद्भिः विनिश्चितैः ब्रह्मसूत्रपदैः च एव बहुधा पृथक् गीतम् ?	**विविधैः** छन्दोभिः ऋषिभिः हेतुमद्भिः विनिश्चितैः ब्रह्मसूत्रपदैः च एव बहुधा पृथक् गीतम् ।

तात्पर्यम् - सोऽयं क्षेत्रसम्बन्धी क्षेत्रज्ञसम्बन्धी च विषयः यद्यपि वसिष्ठादिभिः ऋषिभिः, नित्य-नैमित्तिककाम्यकर्मप्रतिपादकैः वेदैः, युक्तियुक्तैः उपक्रमोपसंहारपर्यालोचनेन एकार्थ-कत्वेन निर्णीतैः ब्रह्मसूत्रैः, उपनिषद्वाक्यैः च ध्यानधारणादिविषयत्वेन पृथक् पृथक् एव निरूपितः, तथापि संक्षेपेण कथयामि ।

महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥१३.५॥
इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः ।
एतत्क्षेत्रं समासेन सविकारमुदाहृतम् ॥१३.६॥

पदच्छेदः - महाभूतानि, अहङ्कारः, बुद्धिः, अव्यक्तम्, एव, च ।
इन्द्रियाणि, दश, एकम्, च, पञ्च, च, इन्द्रियगोचराः ॥
इच्छा, द्वेषः, सुखम्, दुःखम्, सङ्घातः, चेतना, धृतिः ।
एतत्, क्षेत्रम्, समासेन, सविकारम्, उदाहृतम् ॥

अन्वयः - महाभूतानि अहङ्कारः बुद्धिः अव्यक्तम् एव च इन्द्रियाणि पञ्च इन्द्रियगोचराः च इच्छा द्वेषः सुखं दुःखं सङ्घातः चेतना धृतिः च एतत् सविकारं समासेन क्षेत्रम् उदाहृतम् ।

पदार्थः - महाभूतानि = पृथिव्यादीनि पञ्च, अहङ्कारः = अहम्भावः, बुद्धिः = महत्तत्त्वम्, अव्यक्तम् = मूलप्रकृतिः, एव च इन्द्रियाणि = नेत्रादीनि, पञ्च इन्द्रियगोचराः च = इन्द्रियविषयाः शब्दादयः, इच्छा = अभिलाषः, द्वेषः = तिरस्कारः, सुखम् = सुखम्, दुःखम् = दुःखम्, सङ्घातः = शरीरम्, चेतना = ज्ञानम्, धृतिः च = धैर्यं च, एतत् सविकारम् = विकारसहितम्, समासेन = संक्षेपेण, क्षेत्रम् = क्षेत्रम् उदाहृतम् = क्षेत्रपदवाच्यम् उक्तम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाभूतानि	अ. नपुं. प्र. बहु.	अहङ्कारः	अ. पुं. प्र. एक.
बुद्धिः	इ. स्त्री. प्र. एक.	अव्यक्तम्	अ. नपुं. प्र. एक.
एव	अव्ययम्	च	अव्ययम्
इन्द्रियाणि	अ. नपुं. प्र. बहु.	पञ्च	पञ्चन् - न. पुं. प्र. एक.
इन्द्रियगोचराः	अ. पुं. प्र. बहु.	इच्छा	आ. स्त्री. प्र. एक.
द्वेषः	अ. पुं. प्र. एक.	सुखम्	अ. नपुं. प्र. एक.
दुःखम्	अ. नपुं. प्र. एक.	सङ्घातः	अ. पुं. प्र. एक.
चेतना	आ. स्त्री. प्र. एक.	धृतिः	इ. स्त्री. प्र. एक.
एतत्	एतद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	सविकारम्	अ. नपुं. प्र. एक. (विशेष्यम्)
समासेन	अ. पुं. तृ. एक.	क्षेत्रम्	अ. नपुं. प्र. एक. (विशेष्यम्)
उदाहृतम्	अ. नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	महाभूतान्यहङ्कारः	महाभूतानि + अहङ्कारः	यण्सन्धिः।
	अहङ्कारो बुद्धिः	अहङ्कारः + बुद्धिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	बुद्धिरव्यक्तम्	बुद्धिः + अव्यक्तम्	विसर्गसन्धिः (रेफः)।
	दशैकम्	दश + एकम्	वृद्धिसन्धिः।
	चेन्द्रियगोचराः	च + इन्द्रियगोचराः	गुणसन्धिः।
	सङ्घातश्चेतना	सङ्घातः + चेतना	विसर्गसन्धिः (सकारः) श्चुत्वम्।

(ख) समासः	महाभूतानि	महन्ति भूतानि महाभूतानि - कर्मधारयः।
	अव्यक्तम्	न व्यक्तम् अव्यक्तम् - नञ्तत्पुरुषः।
	इन्द्रियगोचराः	इन्द्रियाणां गोचराः इन्द्रियगोचराः - षष्ठीतत्पुरुषः।
	सविकारम्	विकारेण सहितं वर्तते इति सविकारम् - बहुव्रीहिः।
(ग) कृदन्तः	भूतानि	भू (भू - सत्तायाम्) + क्त, तानि।
	बुद्धिः	बुध् (बुध - अवगमने) + क्तिन्।
	व्यक्तम्	वि + अञ्ज् (अञ्जू - व्यक्तिम्रक्षणकान्तिगतिषु) + क्त (कर्मणि)।
	सङ्घातः	सम् + हन् (हन - हिंसागत्योः) + क्त (कर्तरि)।

चेतना	चित् (चिती - संज्ञाने) + ल्युट्, स्त्रीत्वे टाप्।
धृतिः	धृ (धृञ् - धारणे) + क्तिन्।
उदाहृतम्	उद् + आ + हृ (हृञ् - हरणे) + क्त (कर्मणि)।

भावस्पष्टीकरणम् -

उदाहृतम्।	
किम् उदाहृतम्?	क्षेत्रम् उदाहृतम्।
कथं क्षेत्रम् उदाहृतम्?	**समासेन** क्षेत्रम् उदाहृतम्।
कीदृशं समासेन क्षेत्रम् उदाहृतम्?	**सविकारं** समासेन क्षेत्रम् उदाहृतम्।
सविकारं समासेन **किं** क्षेत्रम् उदाहृतम्?	सविकारं समासेन एतत् क्षेत्रम् उदाहृतम्।
किं च एतत् सविकारं समासेन क्षेत्रम् उदाहृतम्?	**महाभूतानि अहङ्कारः बुद्धिः अव्यक्तम् एव च इन्द्रियाणि पञ्च इन्द्रियगोचराः च इच्छा द्वेषः सुखं दुःखं सङ्घातः चेतना धृतिः** च एतत् सविकारं समासेन क्षेत्रम् उदाहृतम्।

तात्पर्यम् - पृथिवी, जलम्, तेजः, वायुः, आकाशः, चेति, पञ्चभूतानि, अहङ्कारः, महन्नामिका बुद्धिः, प्रकृतिः, श्रोत्रं, त्वक्, चक्षुः, रसना, घ्राणं चेति ज्ञानेन्द्रियाणि, वाक्, पाणिः पादः पायुः उपस्थश्चेति पञ्च कर्मेन्द्रियाणि, शब्दः, स्पर्शः, रूपं, रसः गन्धश्चेति पञ्च तन्मात्राः, इच्छादयः च सप्त - एतेषां समूहः विकारविशिष्टो भवति। तत् क्षेत्रमिति कथ्यते।

अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥१३.७॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥१३.८॥
असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।
नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥१३.९॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥१३.१०॥

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥१३.११॥

पदच्छेदः - अमानित्वम्, अदम्भित्वम्, अहिंसा, क्षान्तिः, आर्जवम् ।
आचार्योपासनम्, शौचम्, स्थैर्यम्, आत्मविनिग्रहः ॥
इन्द्रियार्थेषु, वैराग्यम्, अनहङ्कारः, एव, च ।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥
असक्तिः, अनभिष्वङ्गः, पुत्रदारगृहादिषु ।
नित्यम्, च, समचित्तत्वम्, इष्टानिष्टोपपत्तिषु ॥
मयि, च, अनन्ययोगेन, भक्तिः, अव्यभिचारिणी ।
विविक्तदेशसेवित्वम्, अरतिर्जनसंसदि ॥
अध्यात्मज्ञाननित्यत्वम्, तत्त्वज्ञानार्थदर्शनम् ।
एतत्, ज्ञानम्, इति, प्रोक्तम्, अज्ञानम्, यत्, अतः, अन्यथा ॥

अन्वयः - अमानित्वम्, अदम्भित्वम्, अहिंसा, क्षान्तिः, आर्जवम्, आचार्योपासनं, शौचं, स्थैर्यम्, आत्मविनिग्रहः, इन्द्रियार्थेषु वैराग्यम्, अनहङ्कारः एव च, जन्ममृत्युजराव्याधिदुःख-दोषानुदर्शनम्, असक्तिः, पुत्रदारगृहादिषु अनभिष्वङ्गः, इष्टानिष्टोपपत्तिषु नित्यं समचित्तत्वं च, मयि अनन्ययोगेन अव्यभिचारिणी भक्तिः च, विविक्तदेशसेवित्वं, जनसंसदि अरतिः, अध्यात्मज्ञाननित्यत्वं, तत्त्वज्ञानार्थदर्शनम् एतत् ज्ञानम् इति प्रोक्तम् । अतः अन्यथा यत् तत् अज्ञानम् ।

पदार्थः - अमानित्वम् = आत्मश्लाघाराहित्यम्, अदम्भित्वम् = दम्भाभावः, अहिंसा = अपीडनम्, क्षान्तिः = सहनम्, आर्जवम् = अवक्रत्वम्, आचार्योपासनम् = गुरुसेवा, शौचम् = शुद्धिः, स्थैर्यम् = स्थितिः, आत्मविनिग्रहः = आत्मनियन्त्रणम्, इन्द्रियार्थेषु = इन्द्रियविषयेषु, वैराग्यम् = अप्रीतिः, अनहङ्कारः = अभिमानशून्यत्वम्, एव च = एव च, जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् = जननमरणवृद्धत्वरोगदुःखेषु दोषावलोकनम्, असक्तिः = अनासक्तिः, पुत्रदारगृहादिषु = तनयभार्यानिवासादिषु, अनभिष्वङ्गः = अनभिनिवेशः, इष्टानिष्टोपपत्तिषु = अभीष्टद्विष्टवस्तुप्राप्तिषु, नित्यम् = नित्यम्, समचित्तत्वं च = समानमनस्कत्वं च, मयि = परमात्मनि, अनन्ययोगेन = एकाग्रचित्तेन, अव्यभिचारिणी भक्तिः च = अनपायिनी भक्तिः च, विविक्तदेशसेवित्वम् = एकान्तदेशसेवनम्, जनसंसदि = जनसमवाये, अरतिः = अप्रीतिः, अध्यात्मज्ञाननित्यत्वम् = सर्वदा आत्मविषयकं चिन्तनम्, तत्त्वज्ञानार्थदर्शनम् = सत्यज्ञानफलविचारणम्, एतत् ज्ञानम् = इदं ज्ञानसाधनम्, इति प्रोक्तम् = इति कथितम् । अतः = तस्मात्, अन्यथा = विपर्ययेण, यत् = ज्ञानम् (भवति), तत् अज्ञानम् = अज्ञानम् अस्ति इति मन्तव्यम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अमानित्वम्	अ. नपुं. प्र. एक.	अदम्भित्वम्	अ. नपुं. प्र. एक.
अहिंसा	आ. स्त्री. प्र. एक.	क्षान्तिः	इ. स्त्री. प्र. एक.
आर्जवम्	अ. नपुं. प्र. एक.	आचार्योपासनम्	अ. नपुं. प्र. एक.
शौचम्	अ. नपुं. प्र. एक.	स्थैर्यम्	अ. नपुं. प्र. एक.
आत्मविनिग्रहः	अ. पुं. प्र. एक.	इन्द्रियार्थेषु	अ. पुं. स. बहु.
वैराग्यम्	अ. नपुं. प्र. एक.	अनहङ्कारः	अ. पुं. प्र. एक.
एव	अव्ययम्	च	अव्ययम्
जन्ममृत्युजराव्याधि दुःखदोषानुदर्शनम्	अ. नपुं. प्र. एक.	असक्तिः	इ. स्त्री. प्र. एक.
अनभिष्वङ्गः	अ. पुं. प्र. एक.	पुत्रदारगृहादिषु	इ. पुं. स. बहु.
इष्टानिष्टोपपत्तिषु	इ. स्त्री. स. बहु.	नित्यम्	अ. नपुं. द्वि. एक. क्रियावि.
समचित्तत्वम्	अ. नपुं. प्र. एक.	मयि	अस्मद्- द. सर्व. स. एक.
अनन्ययोगेन	अ. पुं. तृ. एक.	अव्यभिचारिणी	अव्यभिचारिन्- न. स्त्री. प्र. एक. (विशेषणम्)
भक्तिः	इ. स्त्री. प्र. एक. (विशेष्यम्)	विविक्तदेशसेवित्वम्	अ. नपुं. प्र. एक.
जनसंसदि	जनसंसद्- द. स्त्री. स. एक.	अरतिः	इ. स्त्री. प्र. एक.
अध्यात्मज्ञान-नित्यत्वम्	अ. नपुं. प्र. एक. (विशेषणम्)	तत्त्वज्ञानार्थदर्शनम्	अ. नपुं. प्र. एक. (विशेषणम्)
एतत्	एतद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	ज्ञानम्	अ. नपुं. प्र. एक. (विशेष्यम्)
इति	अव्ययम्	प्रोक्तम्	अ. नपुं. प्र. एक. (विशेषणम्)
अतः	अव्ययम्	अन्यथा	अव्ययम्
यत्	अव्ययम्	तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)
अज्ञानम्	अ. नपुं. प्र. एक. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः	क्षान्तिरार्जवम्	क्षान्तिः + आर्जवम्	विसर्गसन्धिः (रेफः)।
	असक्तिरनभिष्वङ्गः	असक्तिः + अनभिष्वङ्गः	विसर्गसन्धिः (रेफः)।
	चानन्ययोगेन	च + अनन्ययोगेन	सवर्णदीर्घसन्धिः।
	भक्तिरव्यभिचारिणी	भक्तिः + अव्यभिचारिणी	विसर्गसन्धिः (रेफः)।
	अरतिर्जनसंसदि	अरतिः + जनसंसदि	विसर्गसन्धिः (रेफः)।
	एतज्ज्ञानम्	एतत् + ज्ञानम्	जश्त्वसन्धिः।
	अतोऽन्यथा	अतः + अन्यथा	विसर्गसन्धिः (सकार) रेफः, उकारः, गुणः पूर्वरूपं च।

(ख) समासः	अमानी	न मानी अमानी - नञ्तत्पुरुषः।
	अदम्भी	न दम्भी अदम्भी - नञ्तत्पुरुषः।
	अहिंसा	न हिंसा अहिंसा - नञ्तत्पुरुषः।
	आचार्योपासनम्	आचार्यस्य उपासनम् आचार्योपासनम् - षष्ठीतत्पुरुषः।
	आत्मविनिग्रहः	आत्मनः विनिग्रहः - षष्ठीतत्पुरुषः।
	इन्द्रियार्थेषु	इन्द्रियाणाम् अर्थाः इन्द्रियार्थाः, तेषु - षष्ठीतत्पुरुषः।
	अनहङ्कारः	न अहङ्कारः अनहङ्कारः - नञ्तत्पुरुषः।
		जन्ममृत्युजराव्याधिदुःखदोषा-नुदर्शनम् जन्म च मृत्युश्च जरा च व्याधिश्च दुःखं च जन्ममृत्युजराव्याधिदुःखानि - द्वन्द्वः।
		दोषस्य अनुदर्शनं दोषानुदर्शनम् - षष्ठीतत्पुरुषः।
		जन्ममृत्युजराव्याधिदुःखेषु दोषानुदर्शनम् - सप्तमीतत्पुरुषः।
	असक्तिः	न सक्तिः असक्तिः - नञ्तत्पुरुषः।
	अनभिष्वङ्गः	न अभिष्वङ्गः अनभिष्वङ्गः - नञ्तत्पुरुषः।
	पुत्रदारगृहादिषु	पुत्रदारगृहाणि आदिः येषां ते पुत्रदारगृहादयः, तेषु - बहुव्रीहिः।
	समचित्ताः	समं चित्तं येषां ते समचित्ताः - बहुव्रीहिः।
	इष्टानिष्टोपपत्तिषु	इष्टानिष्टयोः उपपत्तयः इष्टानिष्टोपपत्तयः, तासु - षष्ठीतत्पुरुषः।
	अन्ययोगः	अन्यस्मिन् योगः - सप्तमीतत्पुरुषः।
	अनन्ययोगेन	न अन्ययोगः अनन्ययोगः, तेन - नञ्तत्पुरुषः।
	अव्यभिचारिणी	न व्यभिचारिणी अव्यभिचारिणी - नञ्तत्पुरुषः।
	अरतिः	न रतिः अरतिः - नञ्तत्पुरुषः।
	जनसंसदि	जनानां संसत् जनसंसत्, तस्याम् - षष्ठीतत्पुरुषः।
	अध्यात्मज्ञाननित्यत्वम्	आत्मनि इति अध्यात्मम् - अव्ययीभावः।

		अध्यात्मं ज्ञानम् अध्यात्मज्ञानम् - सप्तमीतत्पुरुषः ।
		अध्यात्मज्ञाने नित्यत्वम् अध्यात्मज्ञाननित्यत्वम् - सप्तमीतत्पुरुषः ।
	तत्त्वज्ञानार्थदर्शनम्	तत्त्वस्य ज्ञानं तत्त्वज्ञानम् - षष्ठीतत्पुरुषः ।
		तत्त्वज्ञानाय इदं तत्त्वज्ञानार्थम् - चतुर्थीतत्पुरुषः ।
		तत्त्वज्ञानार्थं दर्शनम्, तत्त्वज्ञानार्थदर्शनम् - कर्मधारयः ।
	अज्ञानम्	न ज्ञानम् अज्ञानम् - नञ्तत्पुरुषः ।
(ग) कृदन्तः	क्षान्तिः	क्षम् (क्षमु - सहने) + क्तिन् ।
	सक्तिः	सज् (षञ्ज - सङ्गे) + क्तिन् ।
	उपासनम्	उप + आस् (आस - उपवेशने) + ल्युट् ।
	इष्टम्	इष् इच्छ् (इषु - इच्छायाम्) + क्त ।
	उपपत्तिः	उप + (पत्लृ - गतौ) + क्तिन् ।
	भक्तिः	भज् (भज - सेवायाम्) + क्तिन् ।
	विविक्तम्	वि + विच् (विचिर् - पृथग्भावे) + क्त (कर्मणि) ।
	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।
	प्रोक्तम्	प्र + वच् (वच - परिभाषणे) + क्त (कर्मणि) ।
(घ) तद्धितान्तः	मानी	मान + इनि (मतुबर्थे) (मानः अस्य अस्मिन् वा अस्ति इति) ।
	मानित्वम्	मानिन् + त्व (भावार्थे) ।
	दम्भी	दम्भ + इनि (मतुबर्थे) (दम्भः अस्य अस्मिन् वा अस्ति इति) ।
	दम्भित्वम्	दम्भिन् + त्व (भावार्थे) ।
	आर्जवम्	ऋजु + अण् (भावार्थे) ।
	शौचम्	शुच + अण् (भावार्थे) ।
	स्थैर्यम्	स्थिर + ष्यञ् (भावार्थे) ।
	वैराग्यम्	विराग + ष्यञ् (भावार्थे) ।
	समचित्तत्वम्	समचित्त + त्व (भावार्थे) ।
	सेवी	सेवा + इनि (मतुबर्थे) (सेवा अस्य अस्मिन् वा अस्ति इति) ।
	सेवित्वम्	सेविन् + त्व (भावार्थे) ।
	नित्यत्वम्	नित्य + त्व (भावार्थे) ।

भावस्पष्टीकरणम् -

इति प्रोक्तम् ।	
किम् इति प्रोक्तम् ?	**ज्ञानम् इति प्रोक्तम् ।**

किं ज्ञानम् इति प्रोक्तम् ?	**अमानित्वम्, अदम्भित्वम्, अहिंसा, क्षान्तिः, आर्जवम्, आचार्योपासनम्, शौचम्, स्थैर्यम्, आत्मविनिग्रहः, इन्द्रियार्थेषु वैराग्यम्, अनहङ्कारः एव च, जन्ममृत्युजराव्याधि-दुःखदोषानुदर्शनम्, असक्तिः, पुत्रदारगृहादिषु अनभिष्वङ्गः, इष्टानिष्टोपपत्तिषु नित्यं समचित्तत्वम् च, मयि अनन्ययोगेन अव्यभिचारिणी भक्तिः च, विविक्तदेश-सेवित्वम्, जनसंसदि अरतिः, अध्यात्मज्ञान-नित्यत्वम्, तत्त्वज्ञानार्थदर्शनम् एतत् ज्ञानम् इति प्रोक्तम् ।**
अतः यत् अन्यथा तत् किम् ?	**अतः यत् अन्यथा तत् अज्ञानम् ।**

तात्पर्यम् - आत्मश्लाघाराहित्यम्, दम्भाभावः, अपीडनम्, सहनम्, अवक्रत्वम्, गुरुसेवा, शुद्धिः, स्थितिः, आत्मनियन्त्रणम्, इन्द्रियविषयेषु अप्रीतिः, जननमरणवृद्धत्वरोगदुःखेषु दोषावलोकनम्, अनासक्तिः, तनयभार्यानिवासादिषु, अनभिनिवेशः, अभीष्टद्विष्टवस्तु-प्राप्तिषु, नित्यम्, समानमनस्कत्वम्, परमात्मनि एकाग्रचित्तेन अनपायिनी भक्तिः, एकान्तदेशसेवनम्, जनसमवाये अरतिः, सर्वदा आत्मविषयकं चिन्तनम्, सत्यज्ञानफल-विचारणम्, एतत् ज्ञानसाधनम् इति कथितम् । अस्मात् अन्यत् यत् तत् ज्ञानसाधनं न इति मन्तव्यम् ।

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥१३.१२॥

पदच्छेदः - ज्ञेयम्, यत्, तत्, प्रवक्ष्यामि, यत्, ज्ञात्वा, अमृतम्, अश्नुते ।
अनादिमत्, परम्, ब्रह्म, न, सत्, तत्, न, असत्, उच्यते ॥

अन्वयः - यत् ज्ञेयं तत् प्रवक्ष्यामि यत् ज्ञात्वा अमृतम् अश्नुते अनादिमत् परं ब्रह्म न सत् । तत् न असत् उच्यते ।

पदार्थः - यत् ज्ञेयम् = यत् ज्ञातव्यम्, तत् प्रवक्ष्यामि = तत् विस्तरशः कथयामि, यत् ज्ञात्वा = यत् अवबुध्य, अमृतम् = मोक्षम्, अश्नुते = अनुभवति । अनादिमत् = आदिरहितः, परम् = उत्तमम्, ब्रह्म न सत् = ब्रह्म न सत् उच्यते । तत् = ब्रह्म, न असत् = न असत् उच्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यत्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	ज्ञेयम्	अ. नपुं. प्र. एक. (विशेषणम्)

तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	प्रवक्ष्यामि	वच् (वच - परिभाषणे) पर. कर्तरि लृट्. उपु. एक.
ज्ञात्वा	क्त्वान्तम् अव्ययम्	अमृतम्	अ. नपुं. प्र. एक.
अश्नुते	अश् (अशू - व्याप्तौ सङ्घाते च) आत्म. कर्तरि लट्. प्रपु. एक.	अनादिमत्	अनादिमत्- त. नपुं. प्र. एक. (विशेषणम्)
परम्	अ. नपुं. प्र. एक. (विशेषणम्)	ब्रह्म	ब्रह्मन्- न. नपुं. प्र. एक. (विशेष्यम्)
न	अव्ययम्	सत्	सत्- त. सर्व. नपुं. प्र. एक. (विशेषणम्)
असत्	असत् - त. नपुं. प्र. एक. (विशेषणम्)	उच्यते	वच् (वच - परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	यज्ज्ञात्वा	यत् + ज्ञात्वा	जश्त्वसन्धिः।
	ज्ञात्वामृतम्	ज्ञात्वा + अमृतम्	सवर्णदीर्घसन्धिः।
	तन्न	तत् + न	परसवर्णसन्धिः।
	नासत्	न + असत्	सवर्णदीर्घसन्धिः।
	असदुच्यते	असत् + उच्यते	जश्त्वसन्धिः।
(ख) समासः	अमृतम्	न मृतम् अमृतम् - नञ्तत्पुरुषः।	
	अनादि	न आदिः अनादिः - नञ्तत्पुरुषः।	
	असत्	न सत् असत् - नञ्तत्पुरुषः।	
(ग) कृदन्तः	ज्ञेयम्	ज्ञा (ज्ञा - अवबोधने) + यत् (कर्मणि)।	
	ज्ञात्वा	ज्ञा (ज्ञा - अवबोधने) + क्त्वा।	
	मृतम्	मृ (मृङ् - प्राणत्यागे) + क्त (कर्तरि)।	
	सत्	अस् (अस - भुवि) + शतृ (कर्तरि)।	
(घ) तद्धितान्तः	अनादिमत्	अनादि + मतुप्, अनादिः अस्य अस्मिन् वा अस्ति इति।	

भावस्पष्टीकरणम् -

अश्नुते।	
किम् अश्नुते ?	**अमृतम् अश्नुते।**
किं कृत्वा अमृतम् अश्नुते ?	**ज्ञात्वा अमृतम् अश्नुते।**
किं ज्ञात्वा अमृतम् अश्नुते ?	**यत् ज्ञात्वा अमृतम् अश्नुते।**

यत् ज्ञात्वा अमृतम् अश्नुते । **तत् किम्** ?	यत् ज्ञात्वा अमृतम् अश्नुते । **सत् न भवति** ।
किं सत् न भवति ?	**ब्रह्म** सत् न भवति ।
कीदृशं ब्रह्म सत् न भवति ?	**परं** ब्रह्म सत् न भवति ।
कीदृशं परं ब्रह्म सत् न भवति ?	**अनादिमत्** परं ब्रह्म सत् न भवति ।
अनादिमत् परं ब्रह्म सत् न भवति । तत् **किं** न उच्यते ?	अनादिमत् परं ब्रह्म सत् न भवति । तत् **असत्** न उच्यते ।

तात्पर्यम् - यत् ज्ञातव्यं तत् विस्तरशः कथयामि यत् अवबुध्य मोक्षम् अनुभवति । परं ब्रह्म आदिरहितम् । न सत् तत् ब्रह्म विधिमुखेन प्रमाणविषयो न भवति, निषेधमुखेनापि प्रमाणविषयो न भवति ।

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१३.१३॥

पदच्छेदः - सर्वतः, पाणिपादम्, तत्, सर्वतः, अक्षिशिरोमुखम् ।
सर्वतः, श्रुतिमत्, लोके, सर्वम्, आवृत्य, तिष्ठति ॥

अन्वयः - सर्वतः पाणिपादं सर्वतः अक्षिशिरोमुखम्, सर्वतः श्रुतिमत् तत् लोके सर्वम् आवृत्य तिष्ठति ।

पदार्थः - सर्वतः पाणिपादम् = सर्वतः यस्य चरणानि दृश्यन्ते तत् ब्रह्म, सर्वतोऽक्षिशिरोमुखम् = सर्वत्र नेत्रशीर्षवदनैः युक्तम्, सर्वतः श्रुतिमत् = सर्वत्र श्रोत्रेण युक्तम्, तत् लोके = तत् जगति, सर्वम् आवृत्य = सर्वं व्याप्य, तिष्ठति = वसति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वतः	अव्ययम्	पाणिपादम्	अ. नपुं. प्र. एक. (विशेषणम्)
अक्षिशिरोमुखम्	अ. नपुं. प्र. एक. (विशेषणम्)	श्रुतिमत्	श्रुतिमत्- त. नपुं. प्र. एक. (विशेषणम्)
तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	लोके	अ. पुं. स. एक.
सर्वम्	अ. सर्व. नपुं. द्वि. एक. (विशेषणम्)	आवृत्य	ल्यबन्तम् अव्ययम्
तिष्ठति	तिष्ठ (ष्ठा - गतिनिवृत्तौ) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः सर्वतोऽक्षिशिरोमुखम् — सर्वतः + अक्षिशिरोमुखम् — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

श्रुतिमल्लोके — श्रुतिमत् + लोके — परसवर्णसन्धिः ।

(ख) समासः सर्वतःपाणिपादम् — पाणयश्च पादाश्च एतेषां समाहारः पाणिपादम् - द्वन्द्वः ।
सर्वतः पाणिपादं यस्य तत् सर्वतःपाणिपादम् - बहुव्रीहिः ।

सर्वतोऽक्षिशिरोमुखम् — अक्षीणि च शिरांसि च मुखानि च एतेषां समाहारः अक्षिशिरोमुखम् - द्वन्द्वः ।
सर्वतः अक्षिशिरोमुखं यस्य तत् सर्वतोऽक्षिशिरोमुखम् - बहुव्रीहिः ।

(ग) कृदन्तः श्रुतिः — श्रु (श्रु - श्रवणे) + क्तिन् ।

लोके — लोक् (लोकृ - दर्शने) + घञ्, तस्मिन् ।

आवृत्य — आ + वृ (वृतु - वर्तने) + ल्यप् ।

(घ) तद्धितान्तः श्रुतिमत् — श्रुति + मतुप् (श्रुतिः अस्य अस्मिन् वा अस्ति इति ।)

भावस्पष्टीकरणम् -

तिष्ठति ।	
किं कृत्वा तिष्ठति ?	**आवृत्य** तिष्ठति ।
किम् आवृत्य तिष्ठति ?	**सर्वम्** आवृत्य तिष्ठति ।
कुत्र सर्वम् आवृत्य तिष्ठति ?	**लोके** सर्वम् आवृत्य तिष्ठति ।
किं लोके सर्वम् आवृत्य तिष्ठति	**तत्** लोके सर्वम् आवृत्य तिष्ठति ।
कीदृशं तत् लोके सर्वम् आवृत्य तिष्ठति ?	**सर्वतः श्रुतिमत्** तत् लोके सर्वम् आवृत्य तिष्ठति ।
कीदृशं च सर्वतः श्रुतिमत् तत् लोके सर्वम् आवृत्य तिष्ठति ?	**सर्वतोऽक्षिशिरोमुखं**, सर्वतः श्रुतिमत्, तत् लोके सर्वम् आवृत्य तिष्ठति ।
पुनश्च कीदृशं सर्वतोऽक्षिशिरोमुखं सर्वतः श्रुतिमत् तत् लोके सर्वम् आवृत्य तिष्ठति ?	**सर्वतः पाणिपादम्**, सर्वतोऽक्षिशिरोमुखम्, सर्वतः श्रुतिमत् तत् लोके सर्वम् आवृत्य तिष्ठति ।

तात्पर्यम् - तस्य ब्रह्मणः सर्वत्र हस्ताः पादाः नेत्राणि शिरांसि मुखानि श्रोत्राणि च सन्ति । तत् सकलं जगत् व्याप्य वर्तते ।

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥१३.१४॥
बहिरन्तश्च भूतानामचरं चरमेव च।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥१३.१५॥
अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥१३.१६॥
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥१३.१७॥

पदच्छेदः - सर्वेन्द्रियगुणाभासम्, सर्वेन्द्रियविवर्जितम्।
असक्तम्, सर्वभृत्, च, एव, निर्गुणम्, गुणभोक्तृ, च ॥
बहिः, अन्तः, च, भूतानाम्, अचरम्, चरम्, एव, च।
सूक्ष्मत्वात्, तत्, अविज्ञेयम्, दूरस्थम्, च, अन्तिके, च, तत् ॥
अविभक्तम्, च, भूतेषु, विभक्तम्, इव, च, स्थितम्।
भूतभर्तृ, च, तत्, ज्ञेयम्, ग्रसिष्णु, प्रभविष्णु,च ॥
ज्योतिषाम्, अपि, तत्, ज्योतिः, तमसः, परमुच्यते।
ज्ञानम्, ज्ञेयम्, ज्ञानगम्यम्, हृदि, सर्वस्य, विष्ठितम् ॥

अन्वयः - तत् सर्वेन्द्रियगुणाभासम्, सर्वेन्द्रियविवर्जितम्, असक्तम्, सर्वभृत् च एव, निर्गुणम्, गुणभोक्तृ च, भूतानां बहिः अन्तः च, अचरम्, चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम्, दूरस्थं च, अन्तिके च, भूतेषु अविभक्तं च, विभक्तम् इव च स्थितम्, भूतभर्तृ च, ग्रसिष्णु प्रभविष्णु च, ज्ञेयम्, ज्योतिषाम् अपि ज्योतिः तमसः परमुच्यते। ज्ञानम्, ज्ञेयम्, ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्।

पदार्थः - सर्वेन्द्रियगुणाभासम् = इन्द्रियविषयप्रकाशकम्, सर्वेन्द्रियविवर्जितम् = सकलेन्द्रियरहितम्, असक्तम् = सङ्गरहितम्, सर्वभृत् च एव = यत् सर्वाणि बिभर्ति तत्, निर्गुणम् = गुणरहितम्, गुणभोक्तृ = गुणानां पालकं च, भूतानाम् = जन्तूनां च, बहिः = बहिर्भूतम्, अन्तः = अन्तर्भागे स्थितं च, अचरम् = अचलम्, चरम् एव च = चलम् एव च, सूक्ष्मत्वात् = सूक्ष्मरूपत्वात्, तत् = ब्रह्म, अविज्ञेयम् = अबोध्यम्, दूरस्थम् = दूरे स्थितम् च, अन्तिके च = समीपे स्थितं च, भूतेषु अविभक्तं च = जन्तुषु एकीभूतं च, विभक्तम् इव च = विभागयुक्तम् इव च, स्थितम् = विद्यमानम्, भूतभर्तृ च = जीवानाम् आधारः, ग्रसिष्णु = ग्रसनशीलम्, प्रभविष्णु च =प्रभवशीलं च, ज्योतिषाम् अपि = अर्चिषाम् अपि, ज्योतिः = अर्चिः, तमसः = अन्धकारात्, परम् = अन्यत्, उच्यते = कथ्यते, ज्ञानम् = बोधरूपम्, ज्ञेयम् = बोध्यम्, ज्ञानगम्यम् = बोधफलम्, हृदि = हृदये, सर्वस्य = सकलस्य, विष्ठितम् = स्थितम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वेन्द्रिय-गुणाभासम्	अ. नपुं. प्र. एक. (विशेषणम्)	सर्वेन्द्रिय-विवर्जितम्	अ. नपुं. प्र. एक. (विशेषणम्)
असक्तम्	अ. नपुं. प्र. एक. (विशेषणम्)	सर्वभृत्	सर्वभृत् - त. नपुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	एव	अव्ययम्
निर्गुणम्	अ. नपुं. प्र. एक. (विशेषणम्)	गुणभोक्तृ	ऋ. नपुं. प्र. एक. (विशेषणम्)
भूतानाम्	अ. नपुं. ष. बहु.	बहिः	अव्ययम्
अन्तः	अव्ययम्	अचरम्	अ. नपुं. प्र. एक. (विशेषणम्)
चरम्	अ. नपुं. प्र. एक. (विशेषणम्)	सूक्ष्मत्वात्	अ. नपुं. पं. एक.
अविज्ञेयम्	अ. नपुं. प्र. एक. (विशेषणम्)	दूरस्थम्	अ. नपुं. प्र. एक. (विशेषणम्)
अन्तिके	अ. नपुं. स. एक.	भूतेषु	अ. नपुं. स. बहु.
अविभक्तम्	अ. नपुं. प्र. एक. (विशेषणम्)	विभक्तम्	अ. नपुं. प्र. एक. (विशेषणम्)
इव	अव्ययम्	स्थितम्	अ. नपुं. प्र. एक. (विशेषणम्)
भूतभर्तृ	ऋ. नपुं. प्र. एक. (विशेषणम्)	ग्रसिष्णु	उ. नपुं. प्र. एक. (विशेषणम्)
प्रभविष्णु	उ. नपुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
ज्ञेयम्	अ. नपुं. प्र. एक. (विशेषणम्)	ज्योतिषाम्	ज्योतिस्- सका. नपुं. ष. बहु.
अपि	अव्ययम्	ज्योतिः	ज्योतिस्- सका. नपुं. प्र. एक. (विशेषणम्)
तमसः	अ. नपुं. पं. एक.	परम्	अ. नपुं. प्र. एक. (विशेषणम्)
उच्यते	वच् (वच - परिभाषणे) आत्म. कर्मणि लट्. प्रपु. एक.	ज्ञानम्	अ. नपुं. प्र. एक. (विशेष्यम्)
ज्ञेयम्	अ. नपुं. प्र. एक. (विशेषणम्)	ज्ञानगम्यम्	अ. नपुं. प्र. एंक. (विशेषणम्)
हृदि	हृद्- द. नपुं. स. एक.	सर्वस्य	अ. सर्व. नपुं. ष. एक. (विशेषणम्)
विष्ठितम्	अ. नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	सर्वभृच्च	सर्वभृत् + च	श्चुत्वसन्धिः।
	चैव	च + एव	वृद्धिसन्धिः।

बहिरन्तः	बहिः + अन्तः	विसर्गसन्धिः (रेफः)।
अन्तश्च	अन्तः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
चान्तिके	च + अन्तिके	सवर्णदीर्घसन्धिः।
तज्ज्ञेयम्	तत् + ज्ञेयम्	जश्त्वसन्धिः श्चुत्वं च।
तज्ज्योतिः	तत् + ज्योतिः	जश्त्वसन्धिः श्चुत्वं च।
ज्योतिस्तमसः	ज्योतिः + तमसः	विसर्गसन्धिः (सकारः)।

(ख) समासः

सर्वेन्द्रियगुणाभासम्	सर्वाणि इन्द्रियाणि सर्वेन्द्रियाणि - कर्मधारयः।
	सर्वेन्द्रियाणां गुणाः, सर्वेन्द्रियगुणाः - षष्ठीतत्पुरुषः।
	सर्वेन्द्रियगुणानाम् आभासं सर्वेन्द्रियगुणाभासम् - षष्ठीतत्पुरुषः।
सर्वेन्द्रियविवर्जितम्	सर्वेन्द्रियैः विवर्जितम् - सर्वेन्द्रियविवर्जितम् - तृतीयातत्पुरुषः।
असक्तम्	न सक्तम् असक्तम् - नञ्तत्पुरुषः।
सर्वभृत्	सर्वाणि बिभर्ति इति सर्वभृत् - कर्तरि क्विप् उपपदसमासश्च।
निर्गुणम्	निर्गताः गुणाः यस्मात् तत् निर्गुणम् - बहुव्रीहिः।
गुणभोक्तृ	गुणानां भोक्तृ गुणभोक्तृ - षष्ठीतत्पुरुषः।
अचरम्	न चरम् अचरम् - नञ्तत्पुरुषः।
दूरस्थम्	दूरे तिष्ठति इति दूरस्थम् - कर्तरि कः उपपदसमासश्च।
अविभक्तम्	न विभक्तम् अविभक्तम् - नञ्तत्पुरुषः।
भूतभर्तृ	भूतानां भर्तृ भूतभर्तृ - षष्ठीतत्पुरुषः।
ज्ञानगम्यम्	ज्ञानेन गम्यं ज्ञानगम्यम् - तृतीयातत्पुरुषः।

(ग) कृदन्तः

विवर्जितम्	वि + (वृजी - वर्जने) + क्त (कर्मणि)।
सक्तम्	सज् (षञ्ज - सङ्गे) क्त (कर्मणि)।
भूतानाम्	भू (भू - सत्तायाम्) + क्त (कर्तरि), तेषाम्।
विज्ञेयम्	वि + ज्ञा (ज्ञा अवबोधने) + यत् (कर्मणि)।
गम्यम्	गम् (गम्लृ - गतौ) + यत् (कर्मणि)।
विभक्तम्	वि + भज् (भज - सेवायाम्) + क्त (कर्मणि)।
स्थितम्	स्था (ष्ठा - गतिनिवृत्तौ) + क्त (कर्मणि)।
विष्ठितम्	वि + स्था (ष्ठा - गतिनिवृत्तौ) + क्त (कर्मणि)।

(घ) तद्धितान्तः सूक्ष्मत्वात् — सूक्ष्म + त्व (भावार्थे), तस्मात्।

भावस्पष्टीकरणम् -

उच्यते।	
कीदृशम् उच्यते ?	परम् उच्यते।

कस्मात् परम् उच्यते ?	**तमसः** परम् उच्यते ।
किं तमसः परम् उच्यते ?	**ज्योतिः** तमसः परम् उच्यते ।
केषां ज्योतिः तमसः परम् उच्यते ?	**ज्योतिषाम्** अपि ज्योतिः तमसः परम् उच्यते ।
ज्ञेयम् ।	
कीदृशं ज्ञेयम् ?	**प्रभविष्णु** च ज्ञेयम् ।
पुनश्च कीदृशं ज्ञेयम् ?	**ग्रसिष्णु** प्रभविष्णु च ज्ञेयम् ।
पुनश्च कीदृशं ज्ञेयम् ?	**भूतभर्तृ** ग्रसिष्णु प्रभविष्णु च ज्ञेयम् ।
पुनश्च कीदृशं ज्ञेयम् ?	**स्थितं** भूतभर्तृ ग्रसिष्णु प्रभविष्णु च ज्ञेयम् ।
किम् इव स्थितम् ?	**विभक्तम् इव च** स्थितं भूतभर्तृ ग्रसिष्णु प्रभविष्णु च ज्ञेयम् ।
कीदृशं च विभक्तम् इव च स्थितं भूतभर्तृ ग्रसिष्णु प्रभविष्णु च ज्ञेयम् ?	**अविभक्तं च** विभक्तम् इव च स्थितं भूतभर्तृ ग्रसिष्णु प्रभविष्णु च ज्ञेयम् ।
केषु अविभक्तं च विभक्तम् इव च स्थितं भूतभर्तृ ग्रसिष्णु प्रभविष्णु च ज्ञेयम् ?	**भूतेषु** अविभक्तं च विभक्तम् इव च स्थितं भूतभर्तृ ग्रसिष्णु प्रभविष्णु च ज्ञेयम् ।
पुनश्च कुत्र स्थितम् ?	**दूरस्थं च अन्तिके च** भूतेषु अविभक्तं च विभक्तम् इव च स्थितं भूतभर्तृ ग्रसिष्णु प्रभविष्णु च ज्ञेयम् ।
अविज्ञेयम् ।	
किम् अविज्ञेयम् ?	**तत्** अविज्ञेयम् ।
कस्मात् तत् अविज्ञेयम् ?	**सूक्ष्मत्वात्** तत् अविज्ञेयम् ।
पुनश्च कीदृशं सूक्ष्मत्वात् तत् अविज्ञेयम् ?	**अचरं चरम् एव च**, सूक्ष्मत्वात् तत् अविज्ञेयम् ।
कुत्र अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ?	**बहिः अन्तः च**, अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ।
केषां बहिः अन्तः च, अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ?	**भूतानां** बहिः अन्तः च, अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ।
पुनश्च कीदृशं भूतानां बहिः अन्तः च, अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ?	**निर्गुणं गुणभोक्तृ** च भूतानां बहिः अन्तः च, अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ।

पुनश्च कीदृशं निर्गुणं गुणभोक्तृ च भूतानां बहिः अन्तः च, अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ?	**सर्वभृत्** च निर्गुणं गुणभोक्तृ च भूतानां बहिः अन्तः च, अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ।
पुनश्च कीदृशं सर्वभृत् निर्गुणं गुणभोक्तृ च भूतानां बहिः अन्तः च, अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ?	**असक्तं** सर्वभृत् निर्गुणं गुणभोक्तृ च भूतानां बहिः अन्तः च, अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ।
पुनश्च कीदृशम् असक्तम् सर्वभृत् निर्गुणं गुणभोक्तृ च भूतानां बहिः अन्तः च, अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ?	**सर्वेन्द्रियविवर्जितम्** असक्तम् सर्वभृत् निर्गुणं गुणभोक्तृ च भूतानां बहिः अन्तः च, अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ।
पुनश्च कीदृशं सर्वेन्द्रियविवर्जितम् असक्तं सर्वभृत् निर्गुणं गुणभोक्तृ च भूतानां बहिः अन्तः च, अचरं चरम् एव च, सूक्ष्मत्वात् तत् अविज्ञेयम् ?	**सर्वेन्द्रियगुणाभासं** सर्वेन्द्रियविवर्जितम् असक्तं सर्वभृत् निर्गुणं गुणभोक्तृ च भूतानां बहिः अन्तः च, अचरं चरम् एव च, सूक्ष्मत्वात् तत् । अविज्ञेयम् ।

तात्पर्यम् - तत् ब्रह्म इन्द्रियविषयाणां शब्दादीनां प्रकाशकम्, इन्द्रियशून्यम्, विषयेषु असम्बद्धम्, सर्वेषां पदार्थानां धारकम्, गुणशून्यम्, गुणरक्षकं च वर्तते ।

तत् ब्रह्म भूतानां बहिः अन्तः च वर्तमानम्, अचलं चलमिव भासमानं, गूढत्वात् आयासेन बोध्यं, दूरे वर्तमानम्, अन्तिके च वर्तमानमिव अस्ति ।

तत् ब्रह्म भूतेषु अविभक्तमपि विभक्तम् इव स्थितं, पृथिव्यादीनां भूतानां धारकं पदार्थग्रसनशीलं, सर्वथा समर्थम् ।

तत् ब्रह्म प्रकाशकानां ज्योतिषामपि प्रकाशकम्, अन्धकारम् अतीत्य वर्तमानम्, अमानित्वादिभिः ज्ञानसाधनैः अवगम्यं, सर्वेषां हृदये वर्तमानं च ।

इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥१३.१८॥

पदच्छेदः - इति, क्षेत्रम्, तथा, ज्ञानम्, ज्ञेयम्, च, उक्तम्, समासतः ।
मद्भक्तः, एतत्, विज्ञाय, मद्भावाय, उपपद्यते ॥

अन्वयः - इति क्षेत्रं तथा ज्ञानं ज्ञेयं च समासतः उक्तम् । मद्भक्तः एतत् विज्ञाय मद्भावाय उपपद्यते ।

पदार्थः - इति क्षेत्रम् = इति (पूर्वोक्तं सर्वम्) क्षेत्रशब्दवाच्यम्, तथा ज्ञानं ज्ञेयं च = तथा ज्ञानकरणं ज्ञातव्यम्, समासतः = सङ्ग्रहेण, उक्तम् = कथितम्, मद्भक्तः = मम भक्तः, एतत् विज्ञाय = एतत् ज्ञात्वा, मद्भावाय = ममस्वरूपाय, उपपद्यते = कल्पते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
इति	अव्ययम्	क्षेत्रम्	अ. नपुं. प्र. एक.
तथा	अव्ययम्	ज्ञानम्	अ. नपुं. प्र. एक. (विशेष्यम्)
ज्ञेयम्	अ. नपुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
समासतः	अव्ययम्	उक्तम्	अ. नपुं. प्र. एक. (विशेषणम्)
मद्भक्तः	अ. पुं. प्र. एक.	एतत्	एतद्- द. नपुं. प्र. एक. (विशेषणम्)
विज्ञाय	ल्यबन्तम् अव्ययम्	मद्भावाय	अ. पुं. च. एक.
उपपद्यते	उप + पद् (पद - गतौ) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	चोक्तम्	च + उक्तम्	गुणसन्धिः ।
	मद्भक्त एतत्	मद्भक्तः + एतत्	विसर्गसन्धिः, लोपः।
	एतद्विज्ञाय	एतत् + विज्ञाय	जश्त्वसन्धिः ।
	मद्भावायोपपद्यते	मद्भावाय + उपपद्यते	गुणसन्धिः ।
(ख) समासः	मद्भक्तः	मम भक्तः मद्भक्तः - षष्ठीतत्पुरुषः ।	
	मद्भावाय	मम भावः मद्भावः, तस्मै - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् (भावे) ।	
	उक्तम्	वच् (वच - परिभाषणे) + क्त ।	
	विज्ञाय	वि + ज्ञा (ज्ञा - अवबोधने) + ल्यप् ।	
	ज्ञेयम्	ज्ञा (ज्ञा - अवबोधने) + यत् (कर्मणि) ।	
(घ) तद्धितान्तः	समासतः	समास + तसिल् ।	

भावस्पष्टीकरणम् -

इति उक्तम् ।	
किम् इति उक्तम् ?	**क्षेत्रम् इति उक्तम् ।**
कथम् उक्तम् ?	**समासतः उक्तम् ।**
किं किं च समासतः उक्तम् ?	**ज्ञानं ज्ञेयं च समासतः उक्तम् ।**

उपपद्यते।	
कस्मै उपपद्यते ?	**मद्भावाय** उपपद्यते।
किं कृत्वा मद्भावाय उपपद्यते ?	**विज्ञाय** मद्भावाय उपपद्यते।
किं विज्ञाय मद्भावाय उपपद्यते ?	**एतत्** विज्ञाय मद्भावाय उपपद्यते।
कः एतत् विज्ञाय मद्भावाय उपपद्यते ?	**मद्भक्तः** एतत् विज्ञाय मद्भावाय उपपद्यते।

तात्पर्यम् - एतत् क्षेत्रं ज्ञानं ज्ञेयं च इति त्रयमपि सङ्ग्रहेण कथितम्। परमात्मभक्तः इदं ज्ञात्वा मद्रूपत्वं प्राप्नोति।

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्॥१३.१९॥

पदच्छेदः - प्रकृतिम्, पुरुषम्, च, एव, विद्धि, अनादी, उभौ, अपि।
विकारान्, च, गुणान्, च, एव, विद्धि, प्रकृतिसम्भवान्॥

अन्वयः - प्रकृतिं पुरुषं च एव उभौ अपि अनादी विद्धि। विकारान् च गुणान् च एव प्रकृतिसम्भवान् विद्धि।

पदार्थः - प्रकृतिम् = अव्यक्तम्, पुरुषं च एव = जीवम्, उभौ अपि = द्वावपि, अनादी = आदिरहितौ, विद्धि = जानीहि, विकारान् = देहेन्द्रियादीन् च, गुणान् च एव = सुखदुःखादीन्, प्रकृतिसम्भवान् = प्रकृतिजनितान्, विद्धि = जानीहि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
प्रकृतिम्	इ. स्त्री. द्वि. एक.	पुरुषम्	अ. पुं. द्वि. एक.
च	अव्ययम्	एव	अव्ययम्
उभौ	अ. सर्व. पुं. द्वि. द्विव.	अपि	अव्ययम्
अनादी	इ. पुं. द्वि. द्विव.	विद्धि	विद् (विद - ज्ञाने) पर. कर्तरि लोट्. मपु. एक.
विकारान्	अ. पुं. द्वि. बहु. (विशेषणम्)	गुणान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
प्रकृतिसम्भवान्	अ. पुं. द्वि. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः चैव — च + एव — वृद्धिसन्धिः।

विद्ध्यनादी	विद्धि + अनादी	यण्सन्धिः ।
उभावपि	उभौ + अपि	यान्तवान्तादेशसन्धिः ।
विकारांश्च	विकारान् + च	सत्वसन्धिः (रुत्वम्, अनुस्वारागमः, सत्वं श्चुत्वं च ।)
गुणांश्च	गुणान् + च	सत्वसन्धिः (रुत्वम्, अनुस्वारागमः, सत्वं श्चुत्वं च ।)

(ख) समासः प्रकृतिसम्भवान् — प्रकृतेः सम्भवाः प्रकृतिसम्भवाः, तान् - पञ्चमीतत्पुरुषः ।
अनादी — न विद्यते आदिः ययोः तौ अनादी - नञ्बहुव्रीहिः ।

(ग) कृदन्तः प्रकृतिम् — प्र + कृ (डुकृञ् - करणे) + क्तिन्, ताम् ।
सम्भवान् — सम् + भू (भू - सत्तायाम्) + अप् (भावार्थे), तान् ।

भावस्पष्टीकरणम् -

विद्धि ।	
कीदृशौ विद्धि ?	**अनादी** विद्धि ।
कौ अनादी विद्धि ?	**उभौ अपि** अनादी विद्धि ।
कौ उभौ अपि अनादी विद्धि ?	**प्रकृतिं पुरुषं च** एव उभौ अपि अनादी विद्धि ।
विद्धि ।	
कीदृशान् विद्धि ?	**प्रकृतिसम्भवान्** विद्धि ।
कान् कान् च प्रकृतिसम्भवान् विद्धि ?	**विकारान् च गुणान् च** एव प्रकृतिसम्भवान् विद्धि ।

तात्पर्यम् - देहेन्द्रियादयः प्रकृतेः जन्याः विकाराः, सुखदुःखादयश्च सत्त्वादिगुणानां परिणामाः इति जानीहि ।

कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥१३.२०॥

पदच्छेदः - कार्यकारणकर्तृत्वे, हेतुः, प्रकृतिः, उच्यते ।
पुरुषः, सुखदुःखानाम्, भोक्तृत्वे, हेतुः, उच्यते ॥

अन्वयः - कार्यकारणकर्तृत्वे हेतुः प्रकृतिः उच्यते । पुरुषः सुखदुःखानां भोक्तृत्वे हेतुः उच्यते ।

पदार्थः - कार्यकारणकर्तृत्वे = देहेन्द्रियकर्तृत्वे, हेतुः = कारणम्, प्रकृतिः = प्रधानम्, उच्यते = कथ्यते, पुरुषः = जीवः, सुखदुःखानाम् = सुखादिगुणानाम्, भोक्तृत्वे = अनुभवे, हेतुः = कारणम्, उच्यते = कथ्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कार्यकारणकर्तृत्वे	अ. नपुं. स. एक.	हेतुः	उ. पुं. प्र. एक.
प्रकृतिः	इ. स्त्री. प्र. एक.	उच्यते	वच् (वच - परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.
पुरुषः	अ. पुं. प्र. एक.	सुखदुःखानाम्	अ. नपुं. ष. बहु.
भोक्तृत्वे	अ. नपुं. स. एक.		

व्याकरणम् -

(क) सन्धिः प्रकृतिरुच्यते — प्रकृतिः + उच्यते — विसर्गसन्धिः (रेफः)।
हेतुरुच्यते — हेतुः + उच्यते — विसर्गसन्धिः (रेफः)।

(ख) समासः कार्यकारणकर्तृत्वे — कार्यं च कारणं च कार्यकारणे - द्वन्द्वः।
कार्यकारणयोः कर्ता कार्यकारणकर्ता - षष्ठीतत्पुरुषः।
कार्यकारणकर्तुः भावः कार्यकारणकर्तृत्वम्, तस्मिन् - षष्ठीतत्पुरुषः।
सुखदुःखानाम् — सुखानि च दुःखानि च सुखदुःखानि, तेषाम् - द्वन्द्वः।

(ग) कृदन्तः प्रकृतिः — प्र + कृ (डुकृञ् - करणे) + क्तिन्।
कारणम् — कृ (डुकृञ् - करणे) + णिच् + ल्युट्।

(घ) तद्धितान्तः भोक्तृत्वे — भोक्तृ + त्व (भावार्थे), तस्मिन्।
कर्तृत्वे — कर्तृ + त्व (भावार्थे), तस्मिन्।

भावस्पष्टीकरणम् -

उच्यते।	
का उच्यते ?	**प्रकृतिः** उच्यते।
कः प्रकृतिः उच्यते ?	**हेतुः** प्रकृतिः उच्यते।
कस्मिन् हेतुः प्रकृतिः उच्यते ?	**कार्यकारणकर्तृत्वे** हेतुः प्रकृतिः उच्यते।
उच्यते।	
कः उच्यते ?	**हेतुः** उच्यते।
कः हेतुः उच्यते ?	**पुरुषः** हेतुः उच्यते।
पुरुषः **कस्मिन्** हेतुः उच्यते ?	पुरुषः **भोक्तृत्वे** हेतुः उच्यते।
पुरुषः **केषां** भोक्तृत्वे हेतुः उच्यते ?	पुरुषः **सुखदुःखानां** भोक्तृत्वे हेतुः उच्यते।

तात्पर्यम् - इयं प्रकृतिः कार्यरूपस्य शरीरस्य कारणभूतस्य च इन्द्रियस्य तदाकारेण परिणामे हेतुः भवति। यद्यपि प्रकृतिः जडा इति हेतोः तस्यां हेतुत्वं न सम्भवति जडस्य क्रियाजनकत्वाभावात् तथापि पुरुषस्य सन्निधानात् जडेऽपि पदार्थे क्रियाजनकत्वं सम्भवतीति नास्ति असङ्गतिः। पुरुषः प्रकृतिजन्यानां सुखदुःखादीनां गुणानां भोक्तृत्वे हेतुः। यद्यपि अयम् असङ्गः निर्लेपश्च तथापि प्रकृतिसन्निधानात् इदं भोक्तृत्वं सम्भवतीति बोध्यम्।

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥१३.२१॥

पदच्छेदः - पुरुषः, प्रकृतिस्थः, हि, भुङ्क्ते, प्रकृतिजान्, गुणान्।
कारणम्, गुणसङ्गः, अस्य, सदसद्योनिजन्मसु ॥

अन्वयः - पुरुषः हि प्रकृतिस्थः प्रकृतिजान् गुणान् भुङ्क्ते अस्य सदसद्योनिजन्मसु गुणसङ्गः कारणम्।

पदार्थः - पुरुषः = जीवः, हि प्रकृतिस्थः = प्रकृतिपरिणामे देहे स्थितः, प्रकृतिजान् = प्रकृतिसम्भवान्, गुणान् = सुखदुःखादीन्, भुङ्क्ते = अनुभवति, अस्य = अनुभवस्य, सदसद्योनिजन्मसु = साध्वसाधुयोनिजननेषु, गुणसङ्गः = शब्दादिषु विषयेषु तज्ज्ञानसाधनेषु, कारणम् = हेतुः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पुरुषः	अ. पुं. प्र. एक. (विशेष्यम्)	हि	अव्ययम्
प्रकृतिस्थः	अ. पुं. प्र. एक. (विशेषणम्)	प्रकृतिजान्	अ. पुं. द्वि. बहु. (विशेषणम्)
गुणान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	भुङ्क्ते	भुज् (भुज - पालनाभ्यवहारयोः) आत्म. कर्तरि लट्. प्रपु. एक.
अस्य	इदम्- म. सर्व. पुं. ष. एक. (विशेषणम्)	सदसद्योनिजन्मसु	सदसद्योनिजन्मन्- न. नपुं. स. बहु.
गुणसङ्गः	अ. पुं. प्र. एक.	कारणम्	अ. नपुं. प्र. एक.

व्याकरणम् -

(क) सन्धिः	प्रकृतिस्थो हि	प्रकृतिस्थः + हि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	गुणसङ्गोऽस्य	गुणसङ्गः + अस्य	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।

	सदसत्	सत् + असत् जश्त्वसन्धिः ।
	असद्योनिजन्मसु	असत् + योनिजन्मसु जश्त्वसन्धिः ।
(ख) समासः	प्रकृतिस्थः	प्रकृतौ तिष्ठतीति प्रकृतिस्थः - कर्तरि कः उपपदसमासः च ।
	प्रकृतिजान्	प्रकृतेः जायन्ते इति प्रकृतिजाः, तान् - कर्तरि डप्रत्ययः उपपदसमासः ।
	गुणसङ्गः	गुणेषु सङ्गः गुणसङ्गः - सप्तमीतत्पुरुषः।
	सदसद्योनिजन्मसु	सती च असती च सदसती - द्वन्द्वः ।
		सदसती योनी सदसद्योनी - कर्मधारयः ।
		सदसद्योन्योः जन्मानि सदसद्योनिजन्मानि, तेषु - सप्तमीतत्पुरुषः ।
(ग) कृदन्तः	प्रकृतिः	प्र + कृ (डुकृञ् करणे) + क्तिन् ।
	कारणम्	कृ (डुकृञ् करणे) + णिच् + ल्युट् ।

भावस्पष्टीकरणम् -

भुङ्क्ते ।	
कान् भुङ्क्ते ?	**गुणान्** भुङ्क्ते ।
कीदृशान् गुणान् भुङ्क्ते ?	**प्रकृतिजान्** गुणान् भुङ्क्ते ।
कीदृशः प्रकृतिजान् गुणान् भुङ्क्ते ?	**प्रकृतिस्थः** प्रकृतिजान् गुणान् भुङ्क्ते ।
कः प्रकृतिस्थः प्रकृतिजान् गुणान् भुङ्क्ते ?	**पुरुषः हि** प्रकृतिस्थः प्रकृतिजान् गुणान् भुङ्क्ते ।
हेतुः ।	
कः हेतुः ?	**गुणसङ्गः** हेतुः ।
केषु गुणसङ्गः हेतुः ?	**सदसद्योनिजन्मसु** गुणसङ्गः हेतुः ।
कस्य गुणसङ्गः हेतुः ?	**अस्य** गुणसङ्गः हेतुः ।

तात्पर्यम् - शरीरं प्रकृतेः परिणामः। तदभिन्नतया स्थितः पुरुषः प्रकृतिस्थसत्त्वादिगुणानां कार्यभूतान् सुखादीन् अनुभवति। सः कदाचित् देवादिषु साधुयोनिषु जातः सत्त्वगुणस्य फलं सुखम् अनुभवति। कदाचित् पश्वादिषु असाधुयोनिषु जातः तमोगुणस्य फलं दुःखम् अनुभवति। कदाचित् साध्वसाधुयोनिषु मनुष्येषु जातः रजोगुणफलं सुखदुःखमिश्रम् अनुभवति। एवं सत्त्वादिगुणस्य सुखदुःखमोहानाम् अनुभवे कारणं तस्य पुरुषस्य शब्दादिषु विषयेषु तेषां ज्ञानसाधनभूतेषु विषयेषु वा इन्द्रियेषु आसक्तिः। सा आसक्तिः अत्र गुणसङ्गशब्देन उच्यते।

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥१३.२२॥

पदच्छेदः - उपद्रष्टा, अनुमन्ता, च, भर्ता, भोक्ता, महेश्वरः ।
परमात्मा, इति, च, अपि, उक्तः, देहे, अस्मिन्, पुरुषः, परः ॥

अन्वयः - उपद्रष्टा अनुमन्ता च भर्ता भोक्ता महेश्वरः च परमात्मा इति च अपि उक्तः अस्मिन् देहे पुरुषः परः ।

पदार्थः - उपद्रष्टा = समीपे स्थित्वा समीक्षिता, अनुमन्ता च = अनुमोदकः च, भर्ता = धारकः, भोक्ता = अनुभविता, महेश्वरः च = महाप्रभुः च, परमात्मा इति च अपि = परब्रह्म इति च अपि, उक्तः = कथितः, अस्मिन् देहे = एतस्मिन् शरीरे, पुरुषः = अक्षरः, परः = अन्यः (उत्तमः) ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
उपद्रष्टा	ऋ. पुं. प्र. एक.	अनुमन्ता	ऋ. पुं. प्र. एक.
च	अव्ययम्	भर्ता	ऋ. पुं. प्र. एक.
भोक्ता	ऋ. पुं. प्र. एक.	महेश्वरः	अ. पुं. प्र. एक.
परमात्मा	परमात्मन्- न. पुं. प्र. एक.	इति	अव्ययम्
अपि	अव्ययम्	उक्तः	अ. पुं. प्र. एक. (विशेषणम्)
अस्मिन्	अस्मद्- द. सर्व. पुं. स. एक. (विशेषणम्)	देहे	अ. पुं. स. एक. (विशेष्यम्)
पुरुषः	अ. पुं. प्र. एक. (विशेष्यम्)	परः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	उपद्रष्टानुमन्ता	उपद्रष्टा + अनुमन्ता	सवर्णदीर्घसन्धिः ।
	परमात्मेति	परमात्मा + इति	गुणसन्धिः ।
	चापि	च + अपि	सवर्णदीर्घसन्धिः ।
	अप्युक्तः	अपि + उक्तः	यण्सन्धिः ।
	उक्तो देहे	उक्तः + देहे	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	देहेऽस्मिन्	देहे + अस्मिन्	पूर्वरूपसन्धिः ।

(ख) समासः	महेश्वरः	महान् च असौ ईश्वरश्च महेश्वरः - कर्मधारयः ।
	परमात्मा	परमश्च असौ आत्मा च परमात्मा - कर्मधारयः ।
(ग) कृदन्तः	उपद्रष्टा	उप + दृश् (दृशिर् प्रेक्षणे) + तृच् ।
	अनुमन्ता	अनु + मन् (मनु - अवबोधने) + तृच् ।

भर्ता भृ (भृञ् - भरणे) + तृच्।

भोक्ता भुज् (भुज - पालनाभ्यवहारयोः) + तृच्।

भावस्पष्टीकरणम् -

उक्तः।	
कः इति उक्तः ?	**उपद्रष्टा इति** उक्तः।
उपद्रष्टा **पुनश्च कः** इति उक्तः ?	उपद्रष्टा **अनुमन्ता** च इति उक्तः।
उपद्रष्टा अनुमन्ता **पुनश्च कः** इति उक्तः ?	उपद्रष्टा अनुमन्ता **भर्ता** च इति उक्तः।
उपद्रष्टा अनुमन्ता च भर्ता **पुनश्च कः** इति उक्तः ?	उपद्रष्टा अनुमन्ता च भर्ता **भोक्ता** च इति उक्तः।
उपद्रष्टा अनुमन्ता च भर्ता भोक्ता **पुनश्च कः** इति उक्तः ?	उपद्रष्टा अनुमन्ता च भर्ता भोक्ता **महेश्वरः** च इति उक्तः।
उपद्रष्टा अनुमन्ता च भर्ता भोक्ता महेश्वरः **पुनश्च कः** इति उक्तः ?	उपद्रष्टा अनुमन्ता च भर्ता भोक्ता महेश्वरः **परमात्मा** इति चापि उक्तः।
उपद्रष्टा अनुमन्ता च भर्ता भोक्ता महेश्वरः परमात्मा इति चापि उक्तः। **(सः) कः ?**	उपद्रष्टा अनुमन्ता भर्ता भोक्ता महेश्वरः परमात्मा इति चापि उक्तः। **(सः) पुरुषः।**
उपद्रष्टा अनुमन्ता च भर्ता भोक्ता महेश्वरः परमात्मा इति चापि उक्तः। सः पुरुषः **कीदृशः ?**	उपद्रष्टा अनुमन्ता च भर्ता भोक्ता महेश्वरः परमात्मा इति चापि उक्तः। सः पुरुषः **परः** (उच्यते)।
उपद्रष्टा अनुमन्ता च भर्ता भोक्ता महेश्वरः परमात्मा इति चापि उक्तः। सः पुरुषः **कुत्र** परः (उच्यते) ?	उपद्रष्टा अनुमन्ता च भर्ता भोक्ता महेश्वरः परमात्मा इति च अपि उक्तः। सः पुरुषः **अस्मिन् देहे** पुरुषः परः (उच्यते)।

तात्पर्यम् - शरीरे स्थितः यः समीपे स्थित्वा सर्वं पश्यन्निव अस्ति, यः सन्निधिमात्रेण अनुग्राहक इव वर्तते, यः शरीरादिकं धारयन् इव भासते, यः सुखदुःखादीन् अनुभवति, यः स्वतन्त्रत्वात् महान् ईश्वरः सः परमात्मा इति शब्देन श्रुतौ प्रतिपादितः।

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते॥१३.२३॥

पदच्छेदः - यः, एवम्, वेत्ति, पुरुषम्, प्रकृतिम्, च, गुणैः, सह।
सर्वथा, वर्तमानः, अपि, न, सः, भूयः, अभिजायते॥

अन्वयः - यः एवं गुणैः सह पुरुषं प्रकृतिं च वेत्ति सः सर्वथा वर्तमानः अपि भूयः न अभिजायते।

पदार्थः - यः एवम् = यः पुरुषः, गुणैः सह = गुणैः साकम्, पुरुषम् = जीवम्, प्रकृतिं च = प्रधानम् अपि, वेत्ति = जानाति, सः सर्वथा = सर्वप्रकारेण, वर्तमानः = विद्यमानः अपि, भूयः न = पुनः न, अभिजायते = उत्पद्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	एवम्	अव्ययम्
गुणैः	अ. पुं. तृ. बहु.	सह	अव्ययम्
पुरुषम्	अ. पुं. द्वि. एक.	प्रकृतिम्	इ. स्त्री. द्वि. एक.
वेत्ति	विद् (विद - ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
सर्वथा	अव्ययम्	वर्तमानः	अ. पुं. प्र. एक. (विशेषणम्)
भूयः	अव्ययम्	न	अव्ययम्
अभिजायते	अभि + जन् (जनी - प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	य एवम्	यः + एवम्	विसर्गसन्धिः (लोपः)।
	वर्तमानोऽपि	वर्तमानः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	स भूयः	सः + भूयः	विसर्गसन्धिः (लोपः)।
	भूयोऽभिजायते	भूयः + अभिजायते	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
(ख) कृदन्तः	वर्तमानः	वृत् (वृतु - वर्तने) + शानच्।	
	प्रकृतिम्	प्र + कृ (डुकृञ् - करणे) + क्तिन्, ताम्।	

भावस्पष्टीकरणम् -

वेत्ति।	
कथं वेत्ति ?	**एवं वेत्ति।**
कः एवं वेत्ति ?	**यः एवं वेत्ति।**

यः एवं **कैः** सह वेत्ति ?	यः एवं **गुणैः** सह वेत्ति।
यः एवं गुणैः सह **कं** वेत्ति ?	यः एवं गुणैः सह **पुरुषं** वेत्ति।
यः एवं गुणैः सह पुरुषं **पुनश्च कं** वेत्ति ?	यः एवं गुणैः सह पुरुषं **प्रकृतिं** वेत्ति।
न अभिजायते।	
कदा न अभिजायते ?	**भूयः** न अभिजायते।
कीदृशः भूयः न अभिजायते ?	**वर्तमानः अपि** भूयः न अभिजायते।
कथं वर्तमानः अपि भूयः न अभिजायते ?	**सर्वथा** वर्तमानः अपि भूयः न अभिजायते।
कः सर्वथा वर्तमानः अपि भूयः न अभिजायते ?	**सः** सर्वथा वर्तमानः अपि भूयः न अभिजायते।

तात्पर्यम् - यः पुरुषः पूर्वोक्तप्रकारेण क्रमेण गुणान्, जीवम्, प्रकृतिं च जानाति सः देहे सम्प्रति वर्तमानोऽपि पुनः देहं न प्राप्नोति।

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे॥१३.२४॥

पदच्छेदः - ध्यानेन, आत्मनि, पश्यन्ति, केचित्, आत्मानम्, आत्मना।
अन्ये, साङ्ख्येन, योगेन, कर्मयोगेन, च, अपरे॥

अन्वयः - केचित् ध्यानेन आत्मनि आत्मना आत्मानं पश्यन्ति। अन्ये साङ्ख्येन योगेन, अपरे कर्मयोगेन।

पदार्थः - केचित् = केचित् जनाः, ध्यानेन = आत्माकारप्रत्ययावर्तनेन, आत्मनि = देहे, आत्मना = अन्तःकरणेन, आत्मानम् = सर्वात्मानम्, पश्यन्ति = अवलोकयन्ति, अन्ये = अपरे, साङ्ख्येन योगेन = प्रकृतिपुरुषविवेकरूपेण ज्ञानयोगेन, अपरे कर्मयोगेन = अन्ये फलनिरपेक्षकर्मणा।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
केचित्	अव्ययम्	ध्यानेन	अ. पुं. तृ. एक.
आत्मनि	आत्मन्- न. पुं. स. एक.	आत्मना	आत्मन्- न. पुं. तृ. एक.
आत्मानम्	आत्मन्- न. पुं. द्वि. एक.	पश्यन्ति	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लट्. प्रपु. बहु.

अन्ये	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	साङ्ख्येन	अ. पुं. तृ. एक. (विशेषणम्)
योगेन	अ. पुं. तृ. एक. (विशेष्यम्)	अपरे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
कर्मयोगेन	अ. पुं. तृ. एक.		

व्याकरणम् -

(क) सन्धिः	ध्यानेनात्मनि	ध्यानेन + आत्मनि	सवर्णदीर्घसन्धिः ।
	केचिदात्मानम्	केचित् + आत्मानम्	जश्त्वसन्धिः ।
	चापरे	च + अपरे	सवर्णदीर्घसन्धिः ।
(ख) समासः	कर्मयोगेन	कर्मणः योगः कर्मयोगः, तेन - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	ध्यानेन	ध्यै (ध्यै - चिन्तायाम्) + ल्युट्, तेन ।	
(घ) तद्धितान्तः	साङ्ख्येन	सङ्ख्या + अण् (भावार्थे), तेन ।	

भावस्पष्टीकरणम् -

पश्यन्ति ।	
कं पश्यन्ति ?	**आत्मानं** पश्यन्ति ।
केन आत्मानं पश्यन्ति ?	**आत्मना** आत्मानं पश्यन्ति ।
कस्मिन् आत्मना आत्मानं पश्यन्ति ?	**आत्मनि** आत्मना आत्मानं पश्यन्ति ।
केन आत्मनि आत्मना आत्मानं पश्यन्ति ?	**ध्यानेन** आत्मनि आत्मना आत्मानं पश्यन्ति ।
के ध्यानेन आत्मनि आत्मना आत्मानं पश्यन्ति ?	**केचित्** ध्यानेन आत्मनि आत्मना आत्मानं पश्यन्ति ।
अन्ये **कथं** पश्यन्ति ?	अन्ये **साङ्ख्येन योगेन** पश्यन्ति ।
पुनश्च अपरे कथं पश्यन्ति ?	अन्ये साङ्ख्येन योगेन, **अपरे कर्मयोगेन** पश्यन्ति ।

तात्पर्यम् - केचन आत्माकारप्रत्ययावर्तनरूपेण ध्यानेन देहे वर्तमानम् आत्मानं मनसा पश्यन्ति। अपरे प्रकृतिपुरुषविवेकरूपेण ज्ञानयोगेन अन्ये पुनः निष्कामकर्माचरणरूपेण कर्मयोगेन पश्यन्ति ।

अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥१३.२५॥

पदच्छेदः - अन्ये, तु, एवम्, अजानन्तः, श्रुत्वा, अन्येभ्यः, उपासते ।
ते, अपि, च, अतितरन्ति, एव, मृत्युम्, श्रुतिपरायणाः ॥

अन्वयः - अन्ये तु एवम् अजानन्तः अन्येभ्यः श्रुत्वा उपासते। श्रुतिपरायणाः ते अपि च मृत्युम् अतितरन्ति एव।

पदार्थः - अन्ये = अपरे, तु = हि, एवम् अजानन्तः = एवम् अविदन्तः, अन्येभ्यः = आचार्येभ्यः, श्रुत्वा = आकर्ण्य, उपासते = ध्यायन्ति। श्रुतिपरायणाः = श्रवणासक्ताः, ते अपि च = जनाः अपि च, मृत्युम् = मरणम्, अतितरन्ति एव = लङ्घयन्ति एव।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अन्ये	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	तु	अव्ययम्
एवम्	अव्ययम्	अजानन्तः	अजानत्- त. पुं. प्र. बहु. (विशेषणम्)
अन्येभ्यः	अ. सर्व. पुं. पं. बहु. (विशेषणम्)	श्रुत्वा	क्त्वान्तम् अव्ययम्
उपासते	उप + आस् (आस - उपवेशने) आत्म. कर्तरि लट्. प्रपु. बहु.	श्रुतिपरायणाः	अ. पुं. प्र. बहु. (विशेषणम्)
ते	तद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	अपि	अव्ययम्
च	अव्ययम्	मृत्युम्	उ. पुं. द्वि. एक.
अतितरन्ति	अति + तॄ (तॄ - प्लवनसन्तरणयोः) पर. कर्तरि लट्. प्रपु. बहु.	एव	अव्ययम्

व्याकरणम् -

(क) सन्धिः

त्वेवम्	तु + एवम्	यण्सन्धिः।
श्रुत्वान्येभ्यः	श्रुत्वा + अन्येभ्यः	सवर्णदीर्घसन्धिः।
अन्येभ्य उपासते	अन्येभ्यः + उपासते	विसर्गसन्धिः (लोपः)।
तेऽपि	ते + अपि	पूर्वरूपसन्धिः।
चातितरन्ति	च + अतितरन्ति	सवर्णदीर्घसन्धिः।
अतितरन्त्येव	अतितरन्ति + एव	यण्सन्धिः।

(ख) समासः

अज्ञानन्तः	न जानन्तः अजानन्तः - नञ्तत्पुरुषः।
श्रुतिपरायणाः	श्रुतौ परायणाः श्रुतिपरायणाः - सप्तमीतत्पुरुषः।

(ग) कृदन्तः

जानन्तः	ज्ञा (ज्ञा - अवबोधने) + शतृ (कर्तरि), ते।
श्रुत्वा	श्रु (श्रु - श्रवणे) + क्त्वा।

भावस्पष्टीकरणम् -

उपासते।	
किं कृत्वा उपासते ?	**श्रुत्वा** उपासते।
केभ्यः श्रुत्वा उपासते ?	**अन्येभ्यः** श्रुत्वा उपासते।
किं कुर्वन्तः अन्येभ्यः श्रुत्वा उपासते ?	**अजानन्तः** अन्येभ्यः श्रुत्वा उपासते।
कथम् अजानन्तः अन्येभ्यः श्रुत्वा उपासते ?	**एवम्** अजानन्तः अन्येभ्यः श्रुत्वा उपासते।
के एवम् अजानन्तः अन्येभ्यः श्रुत्वा उपासते ?	**अन्ये** तु एवम् अजानन्तः अन्येभ्यः श्रुत्वा उपासते।
अन्ये तु एवम् अजानन्तः अन्येभ्यः श्रुत्वा उपासते। तेषां **किं** भवति ?	अन्ये तु एवम् अजानन्तः अन्येभ्यः श्रुत्वा उपासते। **ते अपि अतितरन्ति एव।**
अन्ये तु एवम् अजानन्तः अन्येभ्यः श्रुत्वा उपासते। ते अपि **कम्** अतितरन्ति एव ?	अन्ये तु एवम् अजानन्तः अन्येभ्यः श्रुत्वा उपासते। ते अपि **मृत्युम्** अतितरन्ति एव।
अन्ये तु एवम् अजानन्तः अन्येभ्यः श्रुत्वा उपासते। **कीदृशाः** ते अपि मृत्युम् अतितरन्ति एव ?	अन्ये तु एवम् अजानन्तः अन्येभ्यः श्रुत्वा उपासते। **श्रुतिपरायणाः** ते अपि च मृत्युम् अतितरन्ति एव।

तात्पर्यम् - अन्ये तु गुणान् जीवं प्रकृतिं च पूर्वोक्तरीत्या ज्ञातुम् अशक्नुवन्तः अपि आचार्येभ्यः तत् विज्ञाय तदुपदेशस्य श्रवणे नितरामासक्ताः मृत्युरूपमिमं संसारं शनैः शनैः तरन्ति, न शीघ्रम्।

यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम्।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥१३.२६॥

पदच्छेदः - यावत्, सञ्जायते, किञ्चित्, सत्त्वम्, स्थावरजङ्गमम्।
क्षेत्रक्षेत्रज्ञसंयोगात्, तत्, विद्धि, भरतर्षभ ॥

अन्वयः - भरतर्षभ ! स्थावरजङ्गमं किञ्चित् सत्त्वं यावत् सञ्जायते तत् क्षेत्रक्षेत्रज्ञसंयोगात् विद्धि।

पदार्थः - भरतर्षभ = भरतश्रेष्ठ ! स्थावरजङ्गमम् = चरम् अचरं च, किञ्चित् सत्त्वम् = किञ्चित् वस्तु, यावत् = यदा, सञ्जायते = उत्पद्यते, तत् क्षेत्रक्षेत्रज्ञसंयोगात् = तत् जीवशरीर-सम्बन्धात्, विद्धि = जानीहि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भरतर्षभ	अ. पुं. सम्बो. एक.	स्थावरजङ्गमम्	अ. नपुं. प्र. एक.
किञ्चित्	अव्ययम्	सत्त्वम्	अ. नपुं. प्र. एक.

यावत्	अव्ययम्	सञ्जायते	सम् + जन् (जनी - प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.
तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	क्षेत्रक्षेत्रज्ञसंयोगात्	अ. पुं. पं. एक.
विद्धि	विद् (विद - ज्ञाने) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः तद्विद्धि तत् + विद्धि जश्त्वसन्धिः ।

(ख) समासः स्थावरजङ्गमम् स्थावरं च जङ्गमं च अनयोः समाहारः स्थावरजङ्गमम् - द्वन्द्वः ।

क्षेत्रक्षेत्रज्ञसंयोगात् क्षेत्रं च क्षेत्रज्ञश्च क्षेत्रक्षेत्रज्ञौ - द्वन्द्वः ।

भरतर्षभ भरतः एव ऋषभः भरतर्षभः, तत्सम्बुद्धौ - कर्मधारयः ।

(ग) तद्धितान्तः सत्त्वम् सत् + त्व (भावार्थे) ।

भावस्पष्टीकरणम् -

विद्धि ।	
कस्मात् विद्धि ?	**क्षेत्रक्षेत्रज्ञसंयोगात्** विद्धि ।
किं क्षेत्रक्षेत्रज्ञसंयोगात् विद्धि ?	**तत्** क्षेत्रक्षेत्रज्ञसंयोगात् विद्धि ।
किं तत् क्षेत्रक्षेत्रज्ञसंयोगात् विद्धि ?	**यत् सञ्जायते** तत् क्षेत्रक्षेत्रज्ञसंयोगात् विद्धि ।
कदा सञ्जायते तत् क्षेत्रक्षेत्रज्ञसंयोगात् विद्धि ?	**यावत्** सञ्जायते तत् क्षेत्रक्षेत्रज्ञसंयोगात् विद्धि ।
किं यावत् सञ्जायते तत् क्षेत्रक्षेत्रज्ञसंयोगात् विद्धि ?	**किञ्चित् सत्त्वं** यावत् सञ्जायते तत् क्षेत्रक्षेत्रज्ञसंयोगात् विद्धि ।
कीदृशं किञ्चित् सत्त्वं यावत् सञ्जायते तत् क्षेत्रक्षेत्रज्ञसंयोगात् विद्धि ?	**स्थावरजङ्गमं** किञ्चित् सत्त्वं यावत् सञ्जायते तत् क्षेत्रक्षेत्रज्ञसंयोगात् विद्धि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भरतर्षभ !**

तात्पर्यम् - भरतश्रेष्ठ ! स्थावरं जङ्गमं वा यत्किञ्चित् वस्तु अत्र यत् सम्भवति तत् शरीरपुरुष-सम्बन्धात् सम्भवतीति जानीहि ।

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥१३.२७॥

पदच्छेदः - समम्, सर्वेषु, भूतेषु, तिष्ठन्तम्, परमेश्वरम् ।
विनश्यत्सु, अविनश्यन्तम्, यः, पश्यति, सः, पश्यति ॥

अन्वयः - सर्वेषु भूतेषु समं तिष्ठन्तं विनश्यत्सु अविनश्यन्तं परमेश्वरं यः पश्यति स पश्यति ।

पदार्थः - सर्वेषु भूतेषु = सर्वेषु प्राणिषु, समम् = समानम्, तिष्ठन्तम् = विद्यमानम्, विनश्यत्सु अविनश्यन्तम् = म्रियमाणेषु अपि अम्रियमाणम्, परमेश्वरम् = परमात्मानम्, यः पश्यति = यः वीक्षते, स पश्यति = स एव सम्यक् जानाति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वेषु	अ. सर्व. नपुं. स. बहु. (विशेषणम्)	भूतेषु	अ. नपुं. स. बहु. (विशेष्यम्)
समम्	अ. पुं. द्वि. एक. (विशेषणम्)	तिष्ठन्तम्	तिष्ठत्- त. पुं. द्वि. एक. (विशेषणम्)
विनश्यत्सु	विनश्यत्- त. पुं. स. बहु. (विशेषणम्)	अविनश्यन्तम्	अविनश्यत्- त. पुं. द्वि. एक. (विशेषणम्)
परमेश्वरम्	अ. पुं. द्वि. एक. (विशेष्यम्)	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
पश्यति	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लट्. प्रपु. एक.	सः	तत्- द. सर्व. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	विनश्यत्स्वविनश्यन्तम्	विनश्यत्सु + अविनश्यन्तम्	यण्सन्धिः ।
	स पश्यति	सः + पश्यति	विसर्गसन्धिः (लोपः) ।
(ख) समासः	परमेश्वरम्	परमश्च असौ ईश्वरः परमेश्वरः, तम् - कर्मधारयः ।	
	अविनश्यन्तम्	न विनश्यन् अविनश्यन्, तम् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	भूतेषु	भू (भू - सत्तायाम्) + क्त (कर्तरि), तेषु ।	
	तिष्ठन्तम्	तिष्ठ (ष्ठा - गतिनिवृत्तौ) + शतृ (कर्तरि), तम् ।	
	विनश्यत्	वि + नश् (णश - अदर्शने) + शतृ (कर्तरि), तम् ।	

भावस्पष्टीकरणम् -

पश्यति ।	
कः पश्यति ?	**यः** पश्यति ।

कं यः पश्यति **स पश्यति** ?	**परमेश्वरं** यः पश्यति **स पश्यति** ।
कीदृशं परमेश्वरं यः पश्यति स पश्यति ?	**अविनश्यन्तं** परमेश्वरं यः पश्यति स पश्यति ।
केषु अविनश्यन्तं परमेश्वरं यः पश्यति स पश्यति ?	**विनश्यत्सु** अविनश्यन्तं परमेश्वरं यः पश्यति स पश्यति ।
किं कुर्वन्तं विनश्यत्सु अविनश्यन्तं परमेश्वरं यः पश्यति स पश्यति ?	**तिष्ठन्तं** विनश्यत्सु अविनश्यन्तं परमेश्वरं यः पश्यति स पश्यति ।
कथं तिष्ठन्तं विनश्यत्सु अविनश्यन्तं परमेश्वरं यः पश्यति स पश्यति ?	**समं** तिष्ठन्तं विनश्यत्सु अविनश्यन्तं परमेश्वरं यः पश्यति स पश्यति ।
केषु समं तिष्ठन्तं विनश्यत्सु अविनश्यन्तं परमेश्वरं यः पश्यति स पश्यति ?	**सर्वेषु** भूतेषु समं तिष्ठन्तं विनश्यत्सु अविनश्यन्तं परमेश्वरं यः पश्यति स पश्यति ।

तात्पर्यम् - निखिलेषु प्राणिषु अविशेषेण विद्यमानम्, प्राणिषु म्रियमाणेषु अपि अम्रियमाणं परमात्मानं यः मानवः पश्यति सः एव सम्यक् पश्यति । स एव ज्ञानी, नान्यः ।

समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥१३.२८॥

पदच्छेदः - समम्, पश्यन्, हि, सर्वत्र, समवस्थितम्, ईश्वरम् ।
न, हिनस्ति, आत्मना, आत्मानम्, ततः, याति, पराम्, गतिम् ॥

अन्वयः - सर्वत्र समवस्थितम् ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति ततः याति परां गतिम् ।

पदार्थः - सर्वत्र समवस्थितम् = सर्वेषु स्थानेषु विद्यमानम्, ईश्वरम् = परमात्मानम्, समम् = समानम्, पश्यन् हि = अवलोकयन् हि, आत्मना = स्वेन, आत्मानम् = स्वम्, न हिनस्ति = न पीडयति, ततः = तदनन्तरम्, पराम् = प्रकृष्टाम्, गतिम् = स्थितिम्, याति = गच्छति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वत्र	अव्ययम्	समवस्थितम्	अ. पुं. द्वि. एक. (विशेषणम्)
ईश्वरम्	अ. पुं. द्वि. एक. (विशेष्यम्)	समम्	अ. पुं. द्वि. एक.
पश्यन्	पश्यत्- त. पुं. प्र. एक. (विशेषणम्)	हि	अव्ययम्
आत्मना	आत्मन्- न. पुं. तृ. एक.	आत्मानम्	आत्मन्- न. पुं. द्वि. एक.

न	अव्ययम्	हिनस्ति	हिस् (हिसि - हिंसायाम्) पर. कर्तरि लट्. प्रपु. एक.
ततः	अव्ययम्	याति	या (या - प्रापणे) पर. कर्तरि लट्. प्रपु. एक.
पराम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	गतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)

व्याकरणम् -

(क) सन्धिः हिनस्त्यात्मना — हिनस्ति + आत्मना — यण्सन्धिः।
ततो याति — ततः + याति — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

(ख) कृदन्तः पश्यन् — पश्य (दृशिर् - प्रेक्षणे) + शतृ (कर्तरि)।
समवस्थितम् — सम् + अव + स्था (ष्ठा - गतिनिवृत्तौ) + क्त (कर्मणि)।
गतिम् — गम् (गम्लृ - गतौ) + क्तिन्, ताम्।

भावस्पष्टीकरणम् -

न हिनस्ति।	
कं न हिनस्ति ?	**आत्मानं** न हिनस्ति।
केन आत्मानं न हिनस्ति ?	**आत्मना** आत्मानं न हिनस्ति।
किं कुर्वन् हि आत्मना आत्मानं न हिनस्ति ?	**पश्यन् हि** आत्मना आत्मानं न हिनस्ति।
कीदृशं पश्यन् हि आत्मना आत्मानं न हिनस्ति	**समं** पश्यन् हि आत्मना आत्मानं न हिनस्ति।
कं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति ?	**ईश्वरं** समं पश्यन् हि आत्मना आत्मानं न हिनस्ति।
कीदृशम् ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति ?	**समवस्थितम्** ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति।
कुत्र समवस्थितम् ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति ?	**सर्वत्र** समवस्थितम् ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति।
सर्वत्र समवस्थितम् ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति। **सः किं करोति ?**	सर्वत्र समवस्थितम् ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति। **याति।**
सर्वत्र समवस्थितम् ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति। **कां** याति ?	सर्वत्र समवस्थितम् ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति। **गतिं** याति।

सर्वत्र समवस्थितम् ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति। **कीदृशीं** गतिं याति ?	सर्वत्र समवस्थितम् ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति। **परां** गतिं याति।
सर्वत्र समवस्थितम् ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति। **कुतः** परां गतिं याति ?	सर्वत्र समवस्थितम् ईश्वरं समं पश्यन् हि आत्मना आत्मानं न हिनस्ति। **ततः** परां गतिं याति।

तात्पर्यम् - सर्वेषु प्राणिषु वर्तमानम् इमं परमात्मानं यः समभावेन पश्यति सः नहि आत्मना आत्मानं हिंसितुं प्रभवति, भेदाभावात्। तादृशः भेदज्ञानरहितः मुक्तिं प्राप्नोति।

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः।
यः पश्यति तथात्मानमकर्तारं स पश्यति॥१३.२९॥

पदच्छेदः - प्रकृत्या, एव, च, कर्माणि, क्रियमाणानि, सर्वशः।
यः, पश्यति, तथा, आत्मानम्, अकर्तारम्, सः, पश्यति॥

अन्वयः - यः कर्माणि प्रकृत्या एव च क्रियमाणानि पश्यति तथा आत्मानम् अकर्तारं स पश्यति।

पदार्थः - यः = यः जनः, कर्माणि = कार्याणि, प्रकृत्या एव च = मायया एव च, क्रियमाणानि = निवर्त्यमानानि, पश्यति = अवलोकयति, तथा आत्मानम् = तथा स्वम्, अकर्तारम् = अकर्ता इति, सः = सः जनः, पश्यति = अवलोकयति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	कर्माणि	कर्मन्- न. नपुं. प्र. बहु. (विशेष्यम्)
प्रकृत्या	इ. स्त्री. तृ. एक.	एव	अव्ययम्
च	अव्ययम्	क्रियमाणानि	अ. नपुं. प्र. बहु. (विशेषणम्)
पश्यति	पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लट्. प्रपु. एक.	तथा	अव्ययम्
आत्मानम्	आत्मन्- न. पुं. द्वि. एक. (विशेष्यम्)	अकर्तारम्	ऋ. पुं. द्वि. एक. (विशेषणम्)
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	प्रकृत्यैव	प्रकृत्या + एव	वृद्धिसन्धिः।
	तथात्मानम्	तथा + आत्मानम्	सवर्णदीर्घसन्धिः।

	स पश्यति	सः + पश्यति	विसर्गसन्धिः (लोपः)।
(ख) समासः	अकर्तारम्	न कर्ता अकर्ता, तम् - नञ्तत्पुरुषः।	
(ग) कृदन्तः	प्रकृतिः	प्र + कृ (डुकृञ् - करणे) + क्तिन्।	
	क्रियमाणानि	कृ (डुकृञ् - करणे) + शानच्, तानि।	
	कर्तारम्	कृ (डुकृञ् - करणे) + तृच्, तम्।	
(घ) तद्धितान्तः	सर्वशः	सर्व + शस्।	

भावस्पष्टीकरणम् -

पश्यति।	
कानि पश्यति?	**क्रियमाणानि** पश्यति।
कया च क्रियमाणानि पश्यति?	**प्रकृत्या एव च** क्रियमाणानि पश्यति।
कानि प्रकृत्या एव च क्रियमाणानि पश्यति?	**कर्माणि** प्रकृत्या एव च क्रियमाणानि पश्यति।
कः कर्माणि प्रकृत्या एव च क्रियमाणानि पश्यति?	**यः** कर्माणि प्रकृत्या एव च क्रियमाणानि पश्यति।
यः कर्माणि प्रकृत्या एव च क्रियमाणानि पश्यति। **तथा किम्?**	यः कर्माणि प्रकृत्या एव च क्रियमाणानि पश्यति। **तथा पश्यति।**
यः कर्माणि प्रकृत्या एव च क्रियमाणानि पश्यति। तथा **कः** पश्यति?	यः कर्माणि प्रकृत्या एव च क्रियमाणानि पश्यति। तथा **सः** पश्यति।
यः कर्माणि प्रकृत्या एव च क्रियमाणानि पश्यति। तथा **कं** सः पश्यति?	यः कर्माणि प्रकृत्या एव च क्रियमाणानि पश्यति। तथा **आत्मानं** सः पश्यति।
यः कर्माणि प्रकृत्या एव च क्रियमाणानि पश्यति। तथा आत्मानं **कीदृशं** सः पश्यति?	यः कर्माणि प्रकृत्या एव च क्रियमाणानि पश्यति। तथा आत्मानम् **अकर्तारं** सः पश्यति।

तात्पर्यम् - प्रकृतिद्वारा एव क्रियामाणानि सर्वाणि कर्माणि सन्ति इति यः जानाति यः च आत्मानम् अकर्तारं जानाति सः एव ब्रह्म प्राप्नोति।

यदा भूतपृथग्भावमेकस्थमनुपश्यति।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा॥१३.३०॥

पदच्छेदः - यदा, भूतपृथग्भावम्, एकस्थम्, अनुपश्यति।
ततः, एव, च, विस्तारम्, ब्रह्म, सम्पद्यते, तदा॥

अन्वयः - यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति ततः एव च तदा विस्तारं ब्रह्म सम्पद्यते।

पदार्थः - यदा = यस्मिन् समये, भूतपृथग्भावम् = भूतभेदम्, एकस्थम् = एकत्र वर्तमानम्, अनुपश्यति = सम्यक् पश्यति, ततः एव च = तदनन्तरम् एव च, तदा = तस्मिन् समये, विस्तारम् = विकासम्, ब्रह्म = परमात्मा, सम्पद्यते = सम्भवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यदा	अव्ययम्	भूतपृथग्भावम्	अ. पुं. द्वि. एक. (विशेष्यम्)
एकस्थम्	अ. पुं. द्वि. एक. (विशेषणम्)	अनुपश्यति	अनु + पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लट्. प्रपु. एक.
ततः	अव्ययम्	एव	अव्ययम्
च	अव्ययम्	तदा	अव्ययम्
विस्तारम्	अ. नपुं. द्वि. एक. (विशेषणम्)	ब्रह्म	ब्रह्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)
सम्पद्यते	सम् (पद - गतौ) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	तत एव	ततः + एव	विसर्गसन्धिः (लोपः) ।
(ख) समासः	भूतपृथग्भावम्	भूतानां पृथग्भावः भूतपृथग्भावः, तम् - षष्ठीतत्पुरुषः ।	
	एकस्थम्	एकस्मिन् तिष्ठति इति एकस्थः, तम् - कर्तरि कप्रत्ययः उपपदसमासः ।	
(ग) कृदन्तः	भूतः	भू (भू - सत्तायाम्) + क्त (कर्तरि) ।	
	भावः	भू (भू - सत्तायाम्) + घञ् ।	
	विस्तारः	वि + स्तॄ (स्तॄञ् - आच्छादने) + घञ् ।	

भावस्पष्टीकरणम् -

अनुपश्यति ।	
कीदृशम् अनुपश्यति ?	**एकस्थम्** अनुपश्यति ।
पुनश्च कीदृशम् एकस्थम् अनुपश्यति ?	**भूतपृथग्भावम्** एकस्थम् अनुपश्यति ।
कदा भूतपृथग्भावम् एकस्थम् अनुपश्यति ?	**यदा** भूतपृथग्भावम् एकस्थम् अनुपश्यति ।
यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति । **ततः किम् ?**	यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति । **ततः एव च सम्पद्यते ।**

यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति। ततः एव च **किं** सम्पद्यते ?	यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति। ततः एव च **ब्रह्म** सम्पद्यते।
यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति। ततः एव च **कीदृशं** ब्रह्म सम्पद्यते ?	यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति। ततः एव च **विस्तारं** ब्रह्म सम्पद्यते।
यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति। ततः एव च **कदा** विस्तारं ब्रह्म सम्पद्यते ?	यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति ततः एव च **तदा** विस्तारं ब्रह्म सम्पद्यते।

तात्पर्यम् - यदा पुरुषः भिन्नत्वेन दृश्यमानान् स्थावरजङ्गमान् सर्वान् प्रलयकाले एकस्यामेव प्रकृतौ तिष्ठन्तीति पर्यालोचयति, यदा च सृष्टिकाले पुनः तस्या एव प्रकृतेः एते भिन्नाः स्थावरजङ्गमाः सम्भवन्ति इत्यपि पर्यालोचयति तदा स अहं प्रकृतितः अतिरिक्तः इति जानन् ब्रह्मत्वं प्राप्नोति।

अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥१३.३१॥

पदच्छेदः - अनादित्वात्, निर्गुणत्वात्, परमात्मा, अयम्, अव्ययः।
शरीरस्थः, अपि, कौन्तेय, न, करोति, न, लिप्यते॥

अन्वयः - कौन्तेय ! अयम् अव्ययः परमात्मा शरीरस्थः अपि अनादित्वात् निर्गुणत्वात् न करोति न लिप्यते।

पदार्थः - कौन्तेय = अर्जुन ! अयम् = एषः, अव्ययः = नाशरहितः, परमात्मा = ईश्वरः, शरीरस्थः = क्षेत्रस्थः (भूत्वा) अपि, अनादित्वात् = अमूलत्वात्, निर्गुणत्वात् = गुणराहित्यात्, न करोति = न आचरति, न लिप्यते = न लिप्तो भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	अयम्	इदम् - म. सर्व. पुं. प्र. एक. (विशेषणम्)
अव्ययः	अ. पुं. प्र. एक. (विशेषणम्)	परमात्मा	परमात्मन्- न. पुं. प्र. एक. (विशेष्यम्)
शरीरस्थः	अ. पुं. प्र. एक. (विशेषणम्)	अपि	अव्ययम्
अनादित्वात्	अ. नपुं. पं. एक.	निर्गुणत्वात्	अ. नपुं. पं. एक.
न	अव्ययम्	करोति	कृ (डुकृञ् - करणे) पर. कर्तरि लट्. प्रपु. एक.
लिप्यते	लिप् (लिप - उपदेहे) पर. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	अनादित्वान्निर्गुणत्वात्	अनादित्वात् + निर्गुणत्वात्	अनुनासिकसन्धिः ।
	परमात्मायम्	परमात्मा + अयम्	सवर्णदीर्घसन्धिः ।
	शरीरस्थोऽपि	शरीरस्थः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः	अनादिः	न विद्यते आदिः यस्य सः अनादिः - बहुव्रीहिः ।
	निर्गुणत्वात्	निर्गताः गुणाः यस्मात् सः निर्गुणः, तस्मात् - पञ्चमीतत्पुरुषः ।
	परमात्मा	परमश्च असौ आत्मा परमात्मा - कर्मधारयः ।
	अव्ययः	न विद्यते व्ययः यस्य सः अव्ययः - बहुव्रीहिः ।
	शरीरस्थः	शरीरे तिष्ठति इति शरीरस्थः - कर्तरि कः उपपदसमासः ।
(ग) तद्धितान्तः	कौन्तेय	कुन्ती + ढक् (अपत्यार्थे) (एय इति आदेशः), तत्सम्बुद्धौ, कुन्त्याः अपत्यं पुमान् ।

भावस्पष्टीकरणम् -

न करोति ।	
कस्मात् न करोति ?	**अनादित्वात्** न करोति ।
अनादित्वात् **पुनश्च कस्मात्** न करोति ?	अनादित्वात् **निर्गुणत्वात्** न करोति ।
कः अनादित्वात् निर्गुणत्वात् न करोति ?	**परमात्मा** अनादित्वात् निर्गुणत्वात् न करोति ।
परमात्मा **कीदृशः** चेदपि अनादित्वात् निर्गुणत्वात् न करोति ?	परमात्मा **शरीरस्थः** अपि अनादित्वात् निर्गुणत्वात् न करोति ।
कीदृशः परमात्मा शरीरस्थः अपि अनादित्वात् निर्गुणत्वात् न करोति ?	**अव्ययः** परमात्मा शरीरस्थः अपि अनादित्वात् निर्गुणत्वात् न करोति ।
कः अव्ययः परमात्मा शरीरस्थः अपि अनादित्वात् निर्गुणत्वात् न करोति ?	**अयम्** अव्ययः परमात्मा शरीरस्थः अपि अनादित्वात् निर्गुणत्वात् न करोति ।
अयम् अव्ययः परमात्मा शरीरस्थः अपि अनादित्वात् निर्गुणत्वात् न करोति । **इतोऽपि किम् ?**	अयम् अव्ययः परमात्मा शरीरस्थः अपि अनादित्वात् निर्गुणत्वात् न करोति, **न लिप्यते** ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय** !

तात्पर्यम् - अर्जुन ! एषः अविनाशी परमात्मा शरीरे वर्तमानः प्रकृतिसम्बन्धात् कर्म कुर्वन्निव भाति, कर्मफलानि च अनुभवन्निव। किन्तु अयम् अनादिः निर्गुणश्च इति हेतोः तस्मिन् कर्मकर्तृत्वं न सम्भवति, नापि कर्मफलभोक्तृत्वम्। तत् केवलम् अस्य सन्निधानात् प्रकृतौ एव।

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते॥१३.३२॥

पदच्छेदः - यथा, सर्वगतम्, सौक्ष्म्यात्, आकाशम्, न, उपलिप्यते।
सर्वत्र, अवस्थितः, देहे, तथा, आत्मा, न, उपलिप्यते॥

अन्वयः - यथा सर्वगतम् आकाशं सौक्ष्म्यात् न उपलिप्यते तथा सर्वत्र देहे अवस्थितः आत्मा न उपलिप्यते।

पदार्थः - यथा = यादृशः, सर्वगतम् = सर्वव्यापि, आकाशम् = खम्, सौक्ष्म्यात् = असम्बन्धत्वात्, न उपलिप्यते = लिप्तो न भवति, तथा = तादृशः, सर्वत्र देहे = सर्वेषु अवयवेषु, अवस्थितः = स्थितः, आत्मा = चैतन्यम्, न उपलिप्यते = लिप्तो न भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यथा	अव्ययम्	सर्वगतम्	अ. पुं. द्वि. एक. (विशेषणम्)
आकाशम्	अ. पुं. द्वि. एक. (विशेष्यम्)	सौक्ष्म्यात्	अ. नपुं. पं. एक.
न	अव्ययम्	उपलिप्यते	उप + लिप् (लिप - उपदेहे) पर. कर्मणि लट्. प्रपु. एक.
तथा	अव्ययम्	सर्वत्र	अव्ययम्
देहे	अ. पुं. स. एक	अवस्थितः	अ. पुं. प्र. एक. (विशेषणम्)
आत्मा	आत्मन्- न. पुं. प्र. एक. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः	सौक्ष्म्यादाकाशम्	सौक्ष्म्यात् + आकाशम्	जश्त्वसन्धिः।
	नोपलिप्यते	न + उपलिप्यते	गुणसन्धिः।
	सर्वत्रावस्थितः	सर्वत्र + अवस्थितः	सवर्णदीर्घसन्धिः।
	अवस्थितो देहे	अवस्थितः + देहे	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	तथात्मा	तथा + आत्मा	सवर्णदीर्घसन्धिः।
(ख) समासः	सर्वगतम्	सर्वं गतः सर्वगतः, तम् - द्वितीयातत्पुरुषः।	

(ग) कृदन्तः	अवस्थितः	अव + स्था (ष्ठा - गतिनिवृत्तौ) + क्त (कर्तरि)।
	देहे	दिह् (दिह - उपचये) + घञ् (भावार्थे), तस्मिन्।
(घ) तद्धितान्तः	सौक्ष्म्यात्	सूक्ष्म + ष्यञ् (भावार्थे) सूक्ष्मस्य भावः, तस्मात्।

भावस्पष्टीकरणम् -

यथा न उपलिप्यते।	
यथा **कं** न उपलिप्यते ?	यथा **आकाशं** न उपलिप्यते।
यथा **कस्मात्** आकाशं न उपलिप्यते ?	यथा **सौक्ष्म्यात्** आकाशं न उपलिप्यते।
यथा सौक्ष्म्यात् **कीदृशम्** आकाशं न उपलिप्यते ?	यथा सौक्ष्म्यात् **सर्वगतम्** आकाशं न उपलिप्यते।
यथा सौक्ष्म्यात् सर्वगतम् आकाशं न उपलिप्यते। **तथा किम् ?**	यथा सौक्ष्म्यात् सर्वगतम् आकाशं न उपलिप्यते। **तथा न उपलिप्यते।**
यथा सौक्ष्म्यात् सर्वगतम् आकाशं न उपलिप्यते। तथा **कः** न उपलिप्यते ?	यथा सौक्ष्म्यात् सर्वगतम् आकाशं न उपलिप्यते। तथा **आत्मा** न उपलिप्यते।
यथा सौक्ष्म्यात् सर्वगतम् आकाशं न उपलिप्यते। तथा आत्मा **कुत्र** न उपलिप्यते ?	यथा सौक्ष्म्यात् सर्वगतम् आकाशं न उपलिप्यते। तथा आत्मा **देहे** न उपलिप्यते।
यथा सर्वगतं सौक्ष्म्यात् आकाशं न उपलिप्यते।तथा **कीदृशः** आत्मा देहे न उपलिप्यते ?	यथा सर्वगतं सौक्ष्म्यात् आकाशं न उपलिप्यते। तथा **सर्वत्रावस्थितः** आत्मा देहे न उपलिप्यते।

तात्पर्यम् - यथा आकाशः पङ्कादिषु पुष्पादिषु च वर्तमानः असङ्गत्वात् न तद्गतेन दोषेण गुणेन वा सम्बध्यते तथा आत्मा अपि प्रकृष्टे निकृष्टे वा शरीरे वर्तमानः न तद्गतेन दोषेण गुणेन वा सम्बध्यते।

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥१३.३३॥

पदच्छेदः - यथा, क्षेत्री, प्रकाशयति, एकः, कृत्स्नम्, लोकम्, इमम्, रविः।
क्षेत्रम्, क्षेत्री, तथा, कृत्स्नम्, प्रकाशयति, भारत॥

अन्वयः - भारत ! एकः रविः कृत्स्नम् इमं लोकं यथा प्रकाशयति तथा क्षेत्री कृत्स्नं क्षेत्रं प्रकाशयति।

पदार्थः - भारत = अर्जुन ! एकः रविः = एकलः आदित्यः, कृत्स्नम् = समग्रम्, इमं लोकम् = एतं भुवनम्, यथा = यादृशः, प्रकाशयति = प्रकाशमयं करोति, तथा = तादृशः, क्षेत्री = आत्मा, कृत्स्नम् = समग्रम्, क्षेत्रम् = शरीरम्, प्रकाशयति = प्रकाशमयं करोति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. द्वि. एक.	एकः	अ. सर्व. पुं. प्र. एक. (विशेषणम्)
रविः	इ. पुं. प्र. एक. (विशेष्यम्)	कृत्स्नम्	अ. पुं. द्वि. एक. (विशेषणम्)
इमम्	इदम्- म. सर्व. पुं. द्वि. एक. (विशेषणम्)	लोकम्	अ. पुं. द्वि. एक. (विशेष्यम्)
यथा	अव्ययम्	प्रकाशयति	प्र + काश् (काशृ - दीप्तौ) णिच्. पर. कर्तरि लट्. प्रपु. एक.
तथा	अव्ययम्	क्षेत्री	क्षेत्रिन्- न. पुं. प्र. एक.
क्षेत्रम्	अ. नपुं. द्वि. एक.		

व्याकरणम् -

(क) सन्धिः	प्रकाशयत्येकः	प्रकाशयति + एकः	यण्सन्धिः।
(ख) कृदन्तः	लोकः	लोक् (लोकृ - दर्शने) + घञ् (भावार्थे)।	
	क्षेत्रम्	क्षि (क्षि - क्षये) + ष्ट्रन्।	
(ग) तद्धितान्तः	भारत	भरत + अण् (अपत्यार्थे) तत्सम्बुद्धौ, भरतस्य अपत्यं पुमान्।	
	क्षेत्री	क्षेत्र + इनि (मतुबर्थे) क्षेत्रम् अस्य अस्मिन् वा अस्ति इति।	

भावस्पष्टीकरणम् -

यथा प्रकाशयति।	
यथा **कः** प्रकाशयति ?	**रविः** प्रकाशयति।
यथा रविः **कं** प्रकाशयति ?	यथा रविः **लोकं** प्रकाशयति।
यथा रविः **कं लोकं** प्रकाशयति ?	यथा रविः **इमं लोकं** प्रकाशयति।
यथा रविः **कीदृशम्** इमं लोकं प्रकाशयति ?	यथा रविः **कृत्स्नम्** इमं लोकं प्रकाशयति।
यथा **कीदृशः** रविः कृत्स्नम् इमं लोकं प्रकाशयति ?	यथा **एकः** रविः कृत्स्नम् इमं लोकं प्रकाशयति।
यथा एकः रविः कृत्स्नम् इमं लोकं प्रकांशयति, **तथा किम् ?**	यथा एकः रविः कृत्स्नम् इमं लोकं प्रकाशयति, **तथा प्रकाशयति।**
यथा एकः रविः कृत्स्नम् इमं लोकं प्रकाशयति, तथा **कः** प्रकाशयति ?	यथा एकः रविः कृत्स्नम् इमं लोकं प्रकाशयति, तथा **क्षेत्री** प्रकाशयति।

यथा एकः रविः कृत्स्नम् इमं लोकं प्रकाशयति, तथा क्षेत्री **किं** प्रकाशयति ?	यथा एकः रविः कृत्स्नम् इमं लोकं प्रकाशयति, तथा क्षेत्री **क्षेत्रं** प्रकाशयति।
यथा एकः रविः कृत्स्नम् इमं लोकं प्रकाशयति, तथा क्षेत्री **कीदृशं** क्षेत्रं प्रकाशयति ?	यथा एकः रविः कृत्स्नम् इमं लोकं प्रकाशयति, तथा क्षेत्री **कृत्स्नं** क्षेत्रं प्रकाशयति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - अर्जुन ! यथा एकः रविः जगद्गतानि नानाविधानि वस्तूनि प्रकाशयति प्रकाशयन् च न तद्भेदेन भेदं गच्छति। तथा अयम् आत्मा अपि नानाविधानि शरीराणि प्रकाशयति, प्रकाशयन् च न भेदं गच्छति।

क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा।
भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्॥१३.३४॥

पदच्छेदः - क्षेत्रक्षेत्रज्ञयोः, एवम्, अन्तरम्, ज्ञानचक्षुषा।
भूतप्रकृतिमोक्षम्, च, ये, विदुः, यान्ति, ते, परम्॥

अन्वयः - एवं ज्ञानचक्षुषा क्षेत्रक्षेत्रज्ञयोः अन्तरं भूतप्रकृतिमोक्षं च ये विदुः ते परं यान्ति।

पदार्थः - एवम् = एतेन प्रकारेण, ज्ञानचक्षुषा = ज्ञाननेत्रेण, क्षेत्रक्षेत्रज्ञयोः = शरीरात्मनोः, अन्तरम् = वैलक्षण्यम्, भूतप्रकृतिमोक्षं च = अविद्यानाशं च, ये विदुः = ये विदन्ति, ते = ते जनाः परम् = परं ब्रह्म, यान्ति = उपयान्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
एवम्	अव्ययम्	ज्ञानचक्षुषा	ज्ञानचक्षुस्- सका. नपुं. तृ. एक.
क्षेत्रक्षेत्रज्ञयोः	अ. पुं. ष. द्विव.	अन्तरम्	अ. पुं. द्वि. एक.
भूतप्रकृतिमोक्षम्	अ. पुं. द्वि. एक.	च	अव्ययम्
ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	विदुः	विद् (विद - ज्ञाने) पर. कर्तरि लट्. प्रपु. बहु.
ते	तद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	परम्	सर्व. नपुं. द्वि. एक. (विशेषणम्)
यान्ति	या (या - प्रापणे) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः क्षेत्रक्षेत्रज्ञयोरेवम् क्षेत्रक्षेत्रज्ञयोः + एवम् विसर्गसन्धिः (रेफः)।
विदुर्यान्ति विदुः + यान्ति विसर्गसन्धिः (रेफः)।

(ख) समासः क्षेत्रक्षेत्रज्ञयोः क्षेत्रं जानाति इति क्षेत्रज्ञः, तम् - कर्तरि कः उपपदसमासः।
क्षेत्रं च क्षेत्रज्ञश्च क्षेत्रक्षेत्रज्ञौ, तयोः - द्वन्द्वः।
ज्ञानचक्षुषा ज्ञानम् एव चक्षुः ज्ञानचक्षुः, तेन - कर्मधारयः।
भूतप्रकृतिमोक्षम् भूतं च प्रकृतिः च मोक्षः च तेषां समाहारः भूतप्रकृतिमोक्षम्- द्वन्द्वः।

(ग) कृदन्तः भूतम् भू (भू - सत्तायाम्) + क्त (कर्तरि)।
प्रकृतिः प्र + कृ (डुकृञ् - करणे) + क्तिन्।

(घ) तद्धितान्तः मोक्षः मोक्ष् (मोक्ष - क्षेपे) + घञ् (भावार्थे)।

भावस्पष्टीकरणम् -

ये विदुः।	
ये **कं** विदुः ?	ये **अन्तरं** विदुः।
ये **कयोः** अन्तरं विदुः ?	ये **क्षेत्रक्षेत्रज्ञयोः** अन्तरं च विदुः।
ये क्षेत्रक्षेत्रज्ञयोः अन्तरं **पुनश्च किं** च विदुः ?	ये क्षेत्रक्षेत्रज्ञयोः अन्तरं **भूतप्रकृतिमोक्षं** च विदुः।
ये **केन** क्षेत्रक्षेत्रज्ञयोः भूतप्रकृतिमोक्षं च अन्तरं च विदुः ?	ये **ज्ञानचक्षुषा** क्षेत्रक्षेत्रज्ञयोः भूतप्रकृतिमोक्षं च अन्तरं च विदुः।
ये ज्ञानचक्षुषा क्षेत्रक्षेत्रज्ञयोः भूतप्रकृतिमोक्षं च अन्तरं च विदुः, **ते किं कुर्युः** ?	ये ज्ञानचक्षुषा क्षेत्रक्षेत्रज्ञयोः भूतप्रकृतिमोक्षं च अन्तरं च विदुः, **ते विदुः**।
ये ज्ञानचक्षुषा क्षेत्रक्षेत्रज्ञयोः भूतप्रकृतिमोक्षं च अन्तरं च विदुः, ते **कीदृशं** विदुः ?	ये ज्ञानचक्षुषा क्षेत्रक्षेत्रज्ञयोः भूतप्रकृतिमोक्षं च अन्तरं च विदुः, ते **परं** विदुः।

तात्पर्यम् - एवं शरीरात्मनोः भेदं ज्ञाननेत्रेण ये विदन्ति, या इयं भूतानां प्रकृतिः ततः मोक्षं च ये विदन्ति ते परं ब्रह्म उपयान्ति।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः ॥१३॥

त्रयोदशाध्यायस्य सारः

परमात्मनः यथार्थज्ञानार्थं बाह्यसृष्टेः ज्ञानेन सहैव मनुष्यस्य शरीरात्मनोः अथवा क्षराक्षरयोः ज्ञानमपि परमावश्यकं भवति। परमेश्वरः समग्रं विश्वं व्याप्नोति। सः एव परमेश्वरः शरीरे अथवा क्षेत्रे आत्मरूपेण तिष्ठति। अस्य आत्मनः अर्थात् क्षेत्रज्ञस्य यत् ज्ञानं तदेव परमात्मनः अपि इति विचारः क्षेत्रक्षेत्रज्ञविभागयोगनामके अस्मिन् अध्याये स्पष्टीकृतः अस्ति। तत्र च आदौ परब्रह्मणः वर्णनं, प्रकृतिपुरुषयोः विवरणम्, तदनन्तरं तयोः भेदज्ञानेन मनुष्यः कथं मुच्यते इति च कथितम् अस्ति।

एतत् शरीरं क्षेत्रम् इति कथ्यते। यः पुरुषः एतत् जानाति सः क्षेत्रवित् इति उच्यते। पृथिवी, जलम्, तेजः, वायुः, आकाशः, चेति पञ्चभूतानि, अहङ्कारः, महन्नामिका बुद्धिः, प्रकृतिः, श्रोत्रं त्वक्, चक्षुः, रसना, घ्राणं चेति पञ्च ज्ञानेन्द्रियाणि, वाक्, पाणिः पादः पायुः उपस्थश्चेति पञ्च कर्मेन्द्रियाणि, शब्दः स्पर्शः रूपं रसः गन्धश्चेति पञ्च तन्मात्राः, इच्छादयः च सप्त - एतेषां समूहः विकारविशिष्टो भवति। तत् क्षेत्रमिति कथ्यते। आत्मश्लाघाराहित्यम्, दम्भाभावः, अपीडनम्, सहनम्, अवक्रत्वम्, गुरुसेवा, शुद्धिः, स्थितिः, आत्मनियन्त्रणम्, इन्द्रियविषयेषु अप्रीतिः, जनन-मरणवृद्धत्वरोगदुःखेषु दोषावलोकनम्, अनासक्तिः, तनयभार्यानिवासादिषु अनभिनिवेशः, अभीष्टद्विष्टवस्तुप्राप्तिषु समानमनस्कत्वम्, परमात्मनि एकाग्रचित्तेन अनपायिनी भक्तिः, एकान्तदेशसेवनम्, जनसमवाये अरतिः, सर्वदा आत्मविषयकं चिन्तनम्, सत्यज्ञानफल-विचारणम् - एतत् ज्ञानसाधनम् इति कथितम्।

ज्ञेयं यत् परं ब्रह्म तत् आदिरहितम्, न सत् न वा असत्। तत् विधिमुखेन वा निषेधमुखेनापि प्रमाणविषयो न भवति। तस्य ब्रह्मणः सर्वत्र हस्ताः, पादाः, नेत्राणि, शिरांसि, मुखानि, श्रोत्राणि च सन्ति। तत् सकलं जगत् व्याप्य वर्तते। तत् इन्द्रियविषयाणां शब्दादीनां प्रकाशकम्, इन्द्रियशून्यम्, विषयेषु असम्बद्धम्, सर्वेषां पदार्थानां धारकम्, गुणशून्यम्, गुणरक्षकं च वर्तते। तत् ब्रह्म भूतानां बहिः अन्तः च वर्तमानम्, अचलम् चलमिव भासमानम्, गूढत्वात् प्रयत्नेन बोध्यम्, दूरे अन्तिके च वर्तमानमिव अस्ति। तत् भूतेषु अविभक्तमपि विभक्तम् इव तिष्ठति, पृथिव्यादीनां भूतानां धारकम् पदार्थग्रसनशीलम्, सर्वथा समर्थम्। तत् ज्योतिषामपि प्रकाशकम्, अन्धकारम् अतीत्य वर्तमानम्, अमानित्वादिभिः ज्ञानसाधनैः अवगम्यम्, सर्वेषां हृदये वर्तमानं च अस्ति। एवं क्षेत्रं ज्ञानं ज्ञेयं च इति त्रयमपि सङ्ग्रहेण कथितम्। परमात्मभक्तः इदं ज्ञात्वा भगवद्रूपत्वं प्राप्नोति।

देहेन्द्रियादयः प्रकृतेः जन्याः विकाराः, सुखदुःखादयश्च सत्त्वादिगुणानां परिणामाः इति ज्ञातव्यम्। इयं प्रकृतिः कार्यरूपस्य शरीरस्य कारणभूतस्य इन्द्रियस्य तदाकारेण परिणामे हेतुः भवति। यद्यपि प्रकृतिः जडा इति हेतोः तस्यां हेतुत्वं न सम्भवति तथापि पुरुषस्य सान्निध्यात् जडेऽपि पदार्थे क्रियाजनकत्वं सम्भवति। पुरुषः प्रकृतिजन्यानां सुखदुःखादीनां गुणानां भोक्तृत्वे हेतुः। यद्यपि अयम् असङ्गः निर्लेपश्च तथापि प्रकृतिसन्निधानात् इदं भोक्तृत्वं सम्भवतीति बोध्यम्। शरीरं प्रकृतेः परिणामः। तदभिन्नतया स्थितः पुरुषः प्रकृतिस्थसत्त्वादिगुणानां कार्यभूतान् सुखादीन् अनुभवति। सः कदाचित् देवादिषु साधुयोनिषु जातः सत्त्वगुणस्य फलं सुखम् अनुभवति। कदाचित् पश्वादिषु असाधुयोनिषु जातः तमोगुणस्य फलं दुःखम् अनुभवति। कदाचित् साध्वसाधुयोनिषु मनुष्येषु जातः रजोगुणफलं सुखदुःखमिश्रम् अनुभवति। शरीरे स्थितः यः सर्वं पश्यन्निव अस्ति, यः सन्निधिमात्रेण अनुग्राहक इव वर्तते, यः

शरीरादिकं धारयन् इव भासते, यः सुखदुःखादीन् अनुभवति, यः स्वतन्त्रत्वात् महान् ईश्वरः सः परमात्मा इति शब्देन श्रुतौ प्रतिपादितः ।

यः पुरुषः पूर्वोक्तप्रकारेण क्रमेण गुणान्, जीवम्, प्रकृतिं च जानाति सः देहे वर्तमानोऽपि पुनः देहं न प्राप्नोति। केचन ध्यानेन देहे वर्तमानम् आत्मानं मनसा पश्यन्ति। अपरे प्रकृतिपुरुषविवेकरूपेण ज्ञानयोगेन, अन्ये पुनः निष्कामकर्माचरणरूपेण कर्मयोगेन पश्यन्ति। अन्ये तु गुणान् जीवं प्रकृतिं च पूर्वोक्तरीत्या ज्ञातुम् अशक्नुवन्तः अपि आचार्येभ्यः तत् विज्ञाय तदुपदेशस्य श्रवणे नितरामासक्ताः मृत्युरूपमिमं संसारं शनैः शनैः तरन्ति ।

स्थावरं जङ्गमं वा यत्किञ्चित् वस्तु शरीरपुरुषसम्बन्धात् अत्र सम्भवति। निखिलेषु प्राणिषु अविशेषेण विद्यमानम्, तेषु म्रियमाणेषु अपि अम्रियमाणं परमात्मानं यः पश्यति सः एव सम्यक् जानाति । सः एव ज्ञानी । यदा पुरुषः भिन्नत्वेन दृश्यमानान् स्थावरजङ्गमान् सर्वान् प्रलयकाले एकस्यामेव प्रकृतौ तिष्ठन्तीति पर्यालोचयति, सृष्टिकाले पुनः तस्या एव प्रकृतेः एते भिन्नाः भवन्ति इत्यपि जानाति तदा सः 'अहं प्रकृतितः अतिरिक्तः' इति जानन् ब्रह्मत्वं प्राप्नोति । अयम् परमात्मा अनादिः निर्गुणश्च इति हेतोः तस्मिन् कर्मकर्तृत्वं कर्मफलभोक्तृत्वं वा न सम्भवति । तत् केवलं प्रकृतौ एव सम्भवति । यथा आकाशः पङ्कादिषु पुष्पादिषु च वर्तमानः असङ्गत्वात् न तद्गतेन दोषेण गुणेन वा सम्बध्यते तथा आत्मा अपि प्रकृष्टे निकृष्टे वा शरीरे वर्तमानः न तद्गतेन दोषेण गुणेन वा सम्बध्यते । यथा एकः रविः जगद्गतानि नानाविधानि वस्तूनि प्रकाशयति प्रकाशयन् च तद्भेदेन भेदं न प्राप्नोति तथा अयम् आत्मा अपि नानाविधानि शरीराणि प्रकाशयति, प्रकाशयन् च भेदं न प्राप्नोति । एवं शरीरात्मनोः भेदं ज्ञाननेत्रेण ये विदन्ति ते परं ब्रह्म उपयान्ति ।

****

सम्पूर्ण-श्रीमद्भगवद्गीतायाः अकारादिक्रमेण पादानुक्रमणिका

ॐ तत्सदिति निर्देशः ॥१७.२३॥
अकर्तारं स पश्यति ॥१३.२९॥
अकर्मणश्च बोद्धव्यम् ॥४.१७॥
अकर्मणि च कर्म यः ॥४.१८॥
अकीर्तिं चापि भूतानि ॥२.३४॥
अकीर्तिकरमर्जुन ॥२.२॥
अक्लेद्योऽशोष्य एव च ॥२.२४॥
अक्षरं ब्रह्म परमम् ॥८.३॥
अक्षराणामकारोऽस्मि ॥१०.३३॥
अक्षरादपि चोत्तमः ॥१५.१८॥
अग्निर्ज्योतिरहः शुक्लः ॥८.२४॥
अघायुरिन्द्रियारामः ॥३.१६॥
अचरं चरमेव च ॥१३.१५॥
अचलोऽयं सनातनः ॥२.२४॥
अचिरेणाधिगच्छति ॥४.३९॥
अच्छेद्योऽयमदाह्योऽयम् ॥२.२४॥
अजानता महिमानं तवेदम् ॥११.४१॥
अजो नित्यः शाश्वतोऽयं पुराणः ॥२.२०॥
अजोऽपि सन्नव्ययात्मा ॥४.६॥
अज्ञश्चाश्रद्दधानश्च ॥४.४०॥
अज्ञानं चाभिजातस्य ॥१६.४॥
अज्ञानं तमसः फलम् ॥१४.१६॥
अज्ञानं यदतोऽन्यथा ॥१३.११॥
अज्ञानां कर्मसङ्गिनाम् ॥३.२६॥
अज्ञानेनावृतं ज्ञानम् ॥५.१५॥
अणोरणीयांसमनुस्मरेद्यः ॥८.९॥
अत ऊर्ध्वं न संशयः ॥१२.८॥
अतत्त्वार्थवदल्पं च ॥१८.२२॥
अतीतो भवति प्रभो ॥१४.२१॥
अतोऽस्मि लोके वेदे च ॥१५.१८॥
अत्यन्तं सुखमश्नुते ॥६.२८॥
अत्येति तत्सर्वमिदं विदित्वा ॥८.२८॥
अत्र शूरा महेष्वासाः ॥१.४॥
अथ केन प्रयुक्तोऽयम् ॥३.३६॥
अथ चित्तं समाधातुम् ॥१२.९॥
अथ चेत्त्वमहङ्कारात् ॥१८.५८॥
अथ चेत्त्वमिमं धर्म्यम् ॥२.३३॥
अथ चैनं नित्यजातम् ॥२.२६॥
अथ व्यवस्थितान् दृष्ट्वा ॥१.२०॥
अथवा बहुनैतेन ॥१०.४२॥
अथवा योगिनामेव ॥६.४२ ॥
अथैतदप्यशक्तोऽसि ॥१२.११॥
अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा ॥११.४५॥
अदेशकाले यद्दानम् ॥१७.२२॥
अद्भुतं रोमहर्षणम् ॥१८.७४॥
अद्रोहो नातिमानिता ॥१६.३॥
अद्वेष्टा सर्वभूतानाम् ॥१२.१३॥
अधर्मं धर्ममिति या ॥१८.३२॥
अधर्माभिभवात् कृष्ण ॥१.४१॥
अधर्मोऽभिभवत्युत ॥१.४०॥
अधश्च मूलान्यनुसन्ततानि ॥१५.२॥
अधश्चोर्ध्वं प्रसृतास्तस्य शाखा ॥१५.२॥
अधिदैवं किमुच्यते ॥८.१॥
अधिभूतं क्षरो भावः ॥८.४॥
अधिभूतं च किं प्रोक्तम् ॥८.१॥
अधियज्ञः कथं कोऽत्र ॥८.२॥
अधियज्ञोऽहमेवात्र ॥८.४॥
अधिष्ठानं तथा कर्ता ॥१८.१४॥
अधिष्ठाय मनश्चायम् ॥१५.९॥
अधो गच्छन्ति तामसाः ॥१४.१८॥
अध्यात्मं कर्म चाखिलम् ॥७.२९॥
अध्यात्मज्ञाननित्यत्वम् ॥१३.११॥
अध्यात्मनित्या विनिवृत्तकामाः ॥१५.५॥
अध्यात्मविद्या विद्यानाम् ॥१०.३२॥
अध्येष्यते च य इमम् ॥१८.७०॥
अनन्त देवेश जगन्निवास ॥११.३७॥
अनन्तं विश्वतोमुखम् ॥११.११॥
अनन्तबाहुं शशिसूर्यनेत्रम् ॥११.१९॥
अनन्तविजयं राजा ॥१.१६॥
अनन्तवीर्यामितविक्रमस्त्वम् ॥११.४०॥
अनन्तश्चास्मि नागानाम् ॥१०.२९॥
अनन्यचेताः सततम् ॥८.१४॥
अनन्याश्चिन्तयन्तो माम् ॥९.२२॥
अनन्येनैव योगेन ॥१२.६॥
अनपेक्षः शुचिर्दक्षः ॥१२.१६॥
अनवेक्ष्य च पौरुषम् ॥१८.२५॥
अनहङ्कार एव च ॥१३.८॥
अनात्मनस्तु शत्रुत्वे ॥६.६ ॥
अनादित्वान्निर्गुणत्वात् ॥१३.३१॥
अनादिमत्परं ब्रह्म ॥१३.१२॥
अनादिमध्यान्तमनन्तवीर्यम् ॥११.१९॥
अनार्यजुष्टमस्वर्ग्यम् ॥२.२॥
अनाशिनोऽप्रमेयस्य ॥२.१८॥
अनाश्रितः कर्मफलम् ॥६.१॥
अनिकेतः स्थिरमतिः ॥१२.१९॥
अनिच्छन्नपि वार्ष्णेय ॥३.३६॥
अनित्यमसुखं लोकम् ॥९.३३॥
अनिष्टमिष्टं मिश्रं च ॥१८.१२॥
अनुतिष्ठन्ति मानवाः ॥३.३१॥
अनुद्वेगकरं वाक्यम् ॥१७.१५॥
अनुबन्धं क्षयं हिंसाम् ॥१८.२५॥
अनेकचित्तविभ्रान्ताः ॥१६.१६॥
अनेकजन्मसंसिद्धः ॥६.४५॥
अनेकदिव्याभरणम् ॥११.१०॥
अनेकबाहूदरवक्त्रनेत्रम् ॥११.१६॥
अनेकवक्त्रनयनम् ॥११.१०॥
अनेकाद्भुतदर्शनम् ॥११.१०॥
अनेन प्रसविष्यध्वम् ॥३.१०॥
अनेनैव स्वचक्षुषा ॥११.८॥
अन्तकाले च मामेव ॥८.५॥
अन्तरं ज्ञानचक्षुषा ॥१३.३४॥
अन्तवत्तु फलं तेषाम् ॥७.२३॥
अन्तवन्त इमे देहाः ॥२.१८॥
अन्नाद्भवन्ति भूतानि ॥३.१४॥
अन्यः प्रियतरो भुवि ॥१८.६९॥
अन्ययावर्तते पुनः ॥८.२६॥
अन्यानि संयाति नवानि देही ॥२.२२॥
अन्यायेनार्थसञ्चयान् ॥१६.१२॥
अन्ये च बहवः शूराः ॥१.९॥
अन्ये त्वेवमजानन्तः ॥१३.२५॥
अन्ये साङ्ख्येन योगेन ॥१३.२४॥
अपरं भवतो जन्म ॥४.४॥
अपरस्परसम्भूतम् ॥१६.८॥
अपरे नियताहाराः ॥४.३०॥
अपरेयमितस्त्वन्याम् ॥७.५॥
अपर्याप्तं तदस्माकम् ॥१.१०॥
अपश्यद्देवदेवस्य ॥११.१३॥
अपात्रेभ्यश्च दीयते ॥१७.२२॥
अपाने जुह्वति प्राणम् ॥४.२९॥
अपि चेत्सुदुराचारः ॥९.३०॥
अपि चेदसि पापेभ्यः ॥४.३६॥
अपि त्रैलोक्यराज्यस्य ॥१.३५॥
अप्रकाशोऽप्रवृत्तिश्च ॥१४.१३॥

अप्रतिष्ठो महाबाहो ॥६.३८॥
अप्राप्य मां निवर्तन्ते ॥९.३॥
अप्राप्य योगसंसिद्धिम् ॥६.३७॥
अफलप्रेप्सुना कर्म ॥१८.२३॥
अफलाकाङ्क्षिभिर्यज्ञः ॥१७.११॥
अफलाकाङ्क्षिभिर्युक्तैः ॥१७.१७॥
अभयं सत्त्वसंशुद्धिः ॥१६.१॥
अभिजातस्य भारत ॥१६.३॥
अभिजातोऽसि पाण्डव ॥१६.५॥
अभितो ब्रह्मनिर्वाणम् ॥५.२६॥
अभिसन्धाय तु फलम् ॥१७.१२॥
अभ्यासयोगयुक्तेन ॥८.८॥
अभ्यासयोगेन ततः ॥१२.९॥
अभ्यासाद्रमते यत्र ॥१८.३६॥
अभ्यासेऽप्यसमर्थोऽसि ॥१२.१०॥
अभ्यासेन तु कौन्तेय ॥६.३५॥
अभ्युत्थानमधर्मस्य ॥४.७॥
अमलान्प्रतिपद्यते ॥१४.१४॥
अमानित्वमदम्भित्वम् ॥१३.७॥
अमी च त्वां धृतराष्ट्रस्य पुत्राः ॥११.२६॥
अमी हि त्वां सुरसङ्घा विशन्ति ॥११.२१॥
अमृतं चैव मृत्युश्च ॥९.१९॥
अमृतस्याव्ययस्य च ॥१४.२७॥
अयतिः श्रद्धयोपेतः ॥६.३७॥
अयथावत्प्रजानाति ॥१८.३१॥
अयनेषु च सर्वेषु ॥१.११॥
अयुक्तः कामकारेण ॥५.१२॥
अयुक्तः प्राकृतः स्तब्धः ॥१८.२८॥
अरतिर्जनसंसदि ॥१३.१०॥
अरागद्वेषतः कृतम् ॥१८.२३॥
अवजानन्ति मां मूढाः ॥९.११॥
अवशं प्रकृतेर्वशात् ॥९.८॥
अवाच्यवादांश्च बहून् ॥२.३६॥
अवाप्य भूमावसपत्नमृद्धम् ॥२.८॥
अविकार्योऽयमुच्यते ॥२.२५॥
अविनाशि तु तद्विद्धि ॥२.१७॥
अविभक्तं च भूतेषु ॥१३.१६॥
अविभक्तं विभक्तेषु ॥१८.२०॥
अव्यक्तं पर्युपासते ॥१२.३॥
अव्यक्तं व्यक्तिमापन्नम् ॥७.२४॥
अव्यक्तनिधनान्येव ॥२.२८॥
अव्यक्ता हि गतिर्दुःखम् ॥१२.५॥
अव्यक्तादीनि भूतानि ॥२.२८॥
अव्यक्ताद् व्यक्तयः सर्वाः ॥८.१८॥
अव्यक्तासक्तचेतसाम् ॥१२.५॥
अव्यक्तोऽक्षर इत्युक्तः ॥८.२१॥
अव्यक्तोऽयमचिन्त्योऽयम् ॥२.२५॥
अव्यक्तोऽव्यक्तात्सनातनः ॥८.२०॥
अशस्त्रं शस्त्रपाणयः ॥१.४६॥
अशान्तस्य कुतः सुखम् ॥२.६६॥
अशास्त्रविहितं घोरम् ॥१७.५॥
अशोच्यानन्वशोचस्त्वम् ॥२.११॥
अश्नन्गच्छन्स्वपञ्श्वसन् ॥५.८॥
अश्नन्ति दिव्यान्दिवि देवभोगान् ॥९.२०॥
अश्नामि प्रयतात्मनः ॥९.२६॥
अश्रद्दधानाः पुरुषाः ॥९.३॥
अश्रद्धया हुतं दत्तम् ॥१७.२८॥
अश्रुपूर्णाकुलेक्षणम् ॥२.१॥
अश्वत्थं प्राहुरव्ययम् ॥१५.१॥
अश्वत्थः सर्ववृक्षाणाम् ॥१०.२६॥
अश्वत्थमेनं सुविरूढमूलम् ॥१५.३॥
अश्वत्थामा विकर्णश्च ॥१.८॥
अश्विनौ मरुतस्तथा ॥११.६॥
असंयतात्मना योगः ॥६.३६॥
असंशयं महाबाहो ॥६.३५॥
असंशयं समग्रं माम् ॥७.१॥
असक्तं तेषु कर्मसु ॥९.९॥
असक्तं सर्वभृच्चैव ॥१३.१४॥
असक्तः स विशिष्यते ॥३.७॥
असक्तबुद्धिः सर्वत्र ॥१८.४९॥
असक्तिरनभिष्वङ्गः ॥१३.९॥
असक्तो ह्याचरन् कर्म ॥३.१९॥
असङ्गशस्त्रेण दृढेन छित्त्वा ॥१५.३॥
असत्कृतमवज्ञातम् ॥१७.२२॥
असत्यमप्रतिष्ठं ते ॥१६.८॥
असदित्युच्यते पार्थ ॥१७.२८॥
असम्मूढः स मर्त्येषु ॥१०.३॥
असितो देवलो व्यासः ॥१०.१३॥
असौ मया हतः शत्रुः ॥१६.१४॥
अस्माकं तु विशिष्टा ये ॥१.७॥
अस्मिन् रणसमुद्यमे ॥१.२२॥
अस्याधिष्ठानमुच्यते ॥३.४०॥
अहं कृत्स्नस्य जगतः ॥७.६॥
अहं क्रतुरहं यज्ञः ॥९.१६॥
अहं त्वा सर्वपापेभ्यः ॥१८.६६॥
अहं बीजप्रदः पिता ॥१४.४॥
अहं वैश्वानरो भूत्वा ॥१५.१४॥
अहं स च मम प्रियः ॥७.१७॥
अहं सर्वस्य प्रभवः ॥१०.८॥
अहं हि सर्वयज्ञानाम् ॥९.२४॥
अहङ्कार इतीयं मे ॥७.४॥
अहङ्कारं बलं दर्पम् ॥१६.१८॥
अहङ्कारं बलं दर्पम् ॥१८.५३॥
अहङ्कारविमूढात्मा ॥३.२७॥
अहमग्निरहं हुतम् ॥९.१६॥
अहमज्ञानजं तमः ॥१०.११॥
अहमात्मा गुडाकेश ॥१०.२०॥
अहमादिर्हि देवानाम् ॥१०.२॥
अहमादिश्च मध्यं च ॥१०.२०॥
अहमेवंविधोऽर्जुन ॥११.५४॥
अहमेवाक्षयः कालः ॥१०.३३॥
अहर्यद्ब्रह्मणो विदुः ॥८.१७॥
अहिंसा क्षान्तिरार्जवम् ॥१३.७॥
अहिंसा सत्यमक्रोधः ॥१६.२॥
अहिंसा समता तुष्टिः ॥१०.५॥
अहो बत महत्पापम् ॥१.४५॥
आकाशं नोपलिप्यते ॥१३.३२॥
आख्याहि मे को भवानुग्ररूपः ॥११.३१॥
आगमापायिनोऽनित्याः ॥२.१४॥
आचरत्यात्मनः श्रेयः ॥१६.२२॥
आचार्य महतीं चमूम् ॥१.३॥
आचार्यमुपसङ्गम्य ॥१.२॥
आचार्याः पितरः पुत्राः ॥१.३४॥
आचार्यान्मातुलान्भ्रातॄन् ॥१.२६॥
आचार्योपासनं शौचम् ॥१३.७॥
आढ्योऽभिजनवानस्मि ॥१६.१५॥
आतिष्ठोत्तिष्ठ भारत ॥४.४२॥
आत्मतृप्तश्च मानवः ॥३.१७॥
आत्मन्येव च सन्तुष्टः ॥३.१७॥
आत्मन्येव वशं नयेत् ॥६.२६॥
आत्मन्येवात्मना तुष्टः ॥२.५५॥
आत्मन्येवावतिष्ठते ॥६.१८॥
आत्मबुद्धिप्रसादजम् ॥१८.३७॥
आत्मवन्तं न कर्माणि ॥४.४१॥
आत्मवश्यैर्विधेयात्मा ॥२.६४॥
आत्मसंयमयोगाग्नौ ॥४.२७॥
आत्मसंस्थं मनः कृत्वा ॥६.२५॥
आत्मसम्भाविताः स्तब्धाः ॥१६.१७॥
आत्मानं केवलं तु यः ॥१८.१६॥

आत्मानं परमेश्वर ॥११.३॥
आत्मानं मत्परायणः ॥९.३४॥
आत्मानं रहसि स्थितः ॥६.१०॥
आत्मानमवसादयेत् ॥६.५॥
आत्मैव रिपुरात्मनः ॥६.५॥
आत्मैव ह्यात्मनो बन्धुः ॥६.५॥
आत्मौपम्येन सर्वत्र ॥६.३२॥
आदित्यवर्णं तमसः परस्तात् ॥८.९॥
आदित्यानामहं विष्णुः ॥१०.२१॥
आदिदेवमजं विभुम् ॥१०.१२॥
आद्यन्तवन्तः कौन्तेय ॥५.२२॥
आपूर्यमाणमचलप्रतिष्ठम् ॥२.७०॥
आब्रह्मभुवनाल्लोकाः ॥८.१६॥
आयुःसत्त्वबलारोग्य- ॥१७.८॥
आयुधानामहं वज्रम् ॥१०.२८॥
आरुरुक्षोर्मुनेर्योगम् ॥६.३॥
आर्तो जिज्ञासुरर्थार्थी ॥७.१६॥
आवृतं ज्ञानमेतेन ॥३.३९॥
आवृत्तिं चैव योगिनः ॥८.२३॥
आशापाशशतैर्बद्धाः ॥१६.१२॥
आश्चर्यवच्चैनमन्यः शृणोति ॥२.२९॥
आश्चर्यवत्पश्यति कश्चिदेनम् ॥२.२९॥
आश्चर्यवद्वदति तथैव चान्यः ॥२.२९॥
आश्वासयामास च भीतमेनम् ॥११.५०॥
आसुरं पार्थ मे शृणु ॥१६.६॥
आसुरं भावमाश्रिताः ॥७.१५॥
आसुरीं योनिमापन्नाः ॥१६.२०॥
आसुरीष्वेव योनिषु ॥१६.१९॥
आस्थितः स हि युक्तात्मा ॥७.१८॥
आस्थिता जनकादयः ॥३.२०॥
आस्थितो योगधारणाम् ॥८.१२॥
आहारस्त्वपि सर्वस्य ॥१७.७॥
आहारा राजसस्येष्टाः ॥१७.९॥
आहाराः सात्त्विकप्रियाः ॥१७.८॥
आहुस्त्वामृषयः सर्वे ॥१०.१३॥
इच्छा द्वेषः सुखं दुःखम् ॥१३.६॥
इच्छाद्वेषसमुत्थेन ॥७.२६॥
इच्छामि त्वां द्रष्टुमहं तथैव ॥११.४६॥
इज्यते भरतश्रेष्ठ ॥१७.१२॥
इति क्षेत्रं तथा ज्ञानम् ॥१३.१८॥
इति गुह्यतमं शास्त्रम् ॥१५.२०॥
इति ते ज्ञानमाख्यातम् ॥१८.६३॥
इति मत्वा न सज्जते ॥३.२८॥
इति मत्वा भजन्ते माम् ॥१०.८॥
इति मां योऽभिजानाति ॥४.१४॥
इत्यज्ञानविमोहिताः ॥१६.१५॥
इत्यर्जुनं वासुदेवस्तथोक्त्वा ॥११.५०॥
इत्यहं वासुदेवस्य ॥१८.७४॥
इदं ज्ञानमुपाश्रित्य ॥१४.२॥
इदं तु ते गुह्यतम् ॥९.१॥
इदं ते नातपस्काय ॥१८.६७॥
इदं वक्ष्याम्यशेषतः ॥७.२॥
इदं शरीरं कौन्तेय ॥१३.१॥
इदमद्य मया लब्धम् ॥१६.१३॥
इदमस्तीदमपि मे ॥१६.१३॥
इदमाह महीपते ॥१.२१॥
इदमुक्तं मयानघ ॥१५.२०॥
इदानीमस्मि संवृत्तः ॥११.५१॥
इन्द्रियस्येन्द्रियस्यार्थे ॥३.३४॥
इन्द्रियाग्निषु जुह्वति ॥४.२६॥
इन्द्रियाणां मनश्चास्मि ॥१०.२२॥
इन्द्रियाणां हि चरताम् ॥२.६७॥
इन्द्रियाणि दशैकं च ॥१३.५॥
इन्द्रियाणि पराण्याहुः ॥३.४२॥
इन्द्रियाणि प्रमाथीनि ॥२.६०॥
इन्द्रियाणि मनो बुद्धिः ॥३.४०॥
इन्द्रियाणीन्द्रियार्थेभ्यः ॥२.५८॥
इन्द्रियाणीन्द्रियार्थेभ्यः ॥२.६८॥
इन्द्रियाणीन्द्रियार्थेषु ॥५.९॥
इन्द्रियार्थान् विमूढात्मा ॥३.६॥
इन्द्रियार्थेषु वैराग्यम् ॥१३.८॥
इन्द्रियेभ्यः परं मनः ॥३.४२॥
इमं प्राप्य भजस्व माम् ॥९.३३॥
इमं प्राप्स्ये मनोरथम् ॥१६.१३॥
इमं राजर्षयो विदुः ॥४.२॥
इमं विवस्वते योगम् ॥४.१॥
इमांस्त्वं व्याप्य तिष्ठसि ॥१०.१६॥
इषुभिः प्रतियोत्स्यामि ॥२.४॥
इष्टः स्यामिति मे मतिः ॥१८.७०॥
इष्टानिष्टोपपत्तिषु ॥१३.९॥
इष्टान्भोगान् हि वो देवाः ॥३.१२॥
इष्टोऽसि मे दृढमिति ॥१८.६४॥
इहैकस्थं जगत्कृत्स्नम् ॥११.७॥
इहैव तैर्जितः सर्गः ॥५.१९॥
ईक्षते योगयुक्तात्मा ॥६.२९ ॥
ईश्वरः सर्वभूतानाम् ॥१८.६१॥
ईश्वरोऽहमहं भोगी ॥१६.१४॥
ईहन्ते कामभोगार्थम् ॥१६.१२॥
उक्त्वा तूष्णीं बभूव ह ॥२.९॥
उच्चैःश्रवसमश्वानाम् ॥१०.२७॥
उच्छिष्टमपि चामेध्यम् ॥१७.१०॥
उत्क्रामन्तं स्थितं वापि ॥१५.१०॥
उत्तमः पुरुषस्त्वन्यः ॥१५.१७॥
उत्तमौजाश्च वीर्यवान् ॥१.६॥
उत्सन्नकुलधर्माणाम् ॥१.४४॥
उत्साद्यन्ते जातिधर्माः ॥१.४३॥
उत्सीदेयुरिमे लोकाः ॥३.२४॥
उदाराः सर्व एवैते ॥७.१८॥
उदासीनवदासीन ॥९.९॥
उदासीनवदासीनः ॥१४.२३॥
उदासीनो गतव्यथः ॥१२.१६॥
उद्धरेदात्मनात्मानम् ॥६.५॥
उद्भवश्च भविष्यताम् ॥१०.३४॥
उन्मिषन्निमिषन्नपि ॥५.९॥
उपदेक्ष्यन्ति ते ज्ञानम् ॥४.३४॥
उपद्रष्टानुमन्ता च ॥१३.२२॥
उपविश्यासने युञ्ज्यात् ॥६.१२॥
उपहन्यामिमाः प्रजाः ॥३.२४॥
उपैति शान्तरजसम् ॥६.२७॥
उभयोरपि दृष्टोऽन्तः ॥२.१६॥
उभयोर्विन्दते फलम् ॥५.४॥
उभे सुकृतदुष्कृते ॥२.५०॥
उभौ तौ न विजानीतः ॥२.१९॥
उवाच पार्थ पश्यैतान् ॥१.२५॥
उवाच मधुसूदनः ॥२.१॥
उषित्वा शाश्वतीः समाः ॥६.४१॥
ऊर्ध्वं गच्छन्ति सत्त्वस्थाः ॥१४.१८॥
ऊर्ध्वमूलमधः शाखम् ॥१५.१॥
ऋक्साम यजुरेव च ॥९.१७॥
ऋतूनां कुसुमाकरः ॥१०.३५॥
ऋतेऽपि त्वां न भविष्यन्ति सर्वे ॥११.३२॥
ऋषयः क्षीणकल्मषाः ॥५.२५॥
ऋषिभिर्बहुधा गीतम् ॥१३.४॥
ऋषींश्च सर्वानुरगांश्च दिव्यान् ॥११.१५॥
एकं साङ्ख्यं च योगं च ॥५.५॥
एकत्वेन पृथक्त्वेन ॥९.१५॥
एकभक्तिर्विशिष्यते ॥७.१७॥
एकमप्यास्थितः सम्यक् ॥५.४॥
एकया यात्यनावृत्तिम् ॥८.२६॥

एकस्थमनुपश्यति ॥१३.३०॥
एकांशेन स्थितो जगत् ॥१०.४२॥
एकाकी यतचित्तात्मा ॥६.१०॥
एकेह कुरुनन्दन ॥२.४१॥
एकोऽथवाप्यच्युत तत्समक्षम् ॥११.४२॥
एतच्छ्रुत्वा वचनं केशवस्य ॥११.३५॥
एतज्ज्ञानमिति प्रोक्तम् ॥१३.११॥
एतत्क्षेत्रं समासेन ॥१३.६॥
एतद् गुह्यमहं परम् ॥१८.७५॥
एतद्धि दुर्लभतरम् ॥६.४२ ॥
एतद्-बुद्ध्वा बुद्धिमान्स्यात् ॥१५.२०॥
एतद्यो वेत्ति तं प्राहुः ॥१३.१॥
एतद्योनीनि भूतानि ॥७.६॥
एतन्मे संशयं कृष्ण ॥६.३९॥
एतस्याहं न पश्यामि ॥६.३३॥
एतां दृष्टिमवष्टभ्य ॥१६.९॥
एतां विभूतिं योगं च ॥१०.७॥
एतान्न हन्तुमिच्छामि ॥१.३५॥
एतान्यपि तु कर्माणि ॥१८.६॥
एतावदिति निश्चिताः ॥१६.११॥
एतैर्विमुक्तः कौन्तेय ॥१६.२२॥
एतैर्विमोहयत्येषः ॥३.४०॥
एभिः सर्वमिदं जगत् ॥७.१३॥
एवं ज्ञात्वा कृतं कर्म ॥४.१५॥
एवं ज्ञात्वा विमोक्ष्यसे ॥४.३२॥
एवं त्रयीधर्ममनुप्रपन्नाः ॥९.२१॥
एवं परम्पराप्राप्तम् ॥४.२॥
एवं प्रवर्तितं चक्रम् ॥३.१६॥
एवं बहुविधा यज्ञाः ॥४.३२॥
एवं बुद्धेः परं बुद्ध्वा ॥३.४३॥
एवं यास्यसि पाण्डव ॥४.३५॥
एवं यो वेत्ति तत्त्वतः ॥४.९॥
एवं सततयुक्ता ये ॥१२.१॥
एवंरूपः शक्य अहं नृलोके ॥११.४८॥
एवमुक्तो हृषीकेशः ॥१.२४॥
एवमुक्त्वा ततो राजन् ॥११.९॥
एवमुक्त्वा हृषीकेशम् ॥२.९॥
एवमुक्त्वार्जुनः सङ्ख्ये ॥१.४७॥
एवमेतद्यथात्थ त्वम् ॥११.३॥
एष तूद्देशतः प्रोक्तः ॥१०.४०॥
एष वोऽस्त्विष्टकामधुक् ॥३.१०॥
एषा तेऽभिहिता साङ्ख्ये ॥२.३९॥
एषा ब्राह्मी स्थितिः पार्थ ॥२.७२॥
ऐरावतं गजेन्द्राणाम् ॥१०.२७॥
ऐश्वरं पुरुषोत्तम ॥११.३॥
ओमित्येकाक्षरं ब्रह्म ॥८.१३॥
कं घातयति हन्ति कम् ॥२.२१॥
कच्चिदज्ञानसम्मोहः ॥१८.७२॥
कच्चिदेतच्छ्रुतं पार्थ ॥१८.७२॥
कच्चिन्नोभयविभ्रष्टः ॥६.३८॥
कट्वम्ललवणात्युष्ण- ॥१७.९॥
कथं न ज्ञेयमस्माभिः ॥१.३९॥
कथं भीष्ममहं सङ्ख्ये ॥२.४॥
कथं विद्यामहं योगिन् ॥१०.१७॥
कथं स पुरुषः पार्थ ॥२.२१॥
कथमेतद्विजानीयाम् ॥४.४॥
कथयन्तश्च मां नित्यम् ॥१०.९॥
कथयिष्यन्ति तेऽव्ययाम् ॥२.३४॥
करणं कर्म कर्तेति ॥१८.१८॥
करणं च पृथग्विधम् ॥१८.१४॥
करिष्यस्यवशोऽपि तत् ॥१८.६०॥
करिष्ये वचनं तव ॥१८.७३॥
कर्णं तथान्यानपि योधवीरान् ॥११.३४॥
कर्तव्यानीति मे पार्थ ॥१८.६॥
कर्ता तामस उच्यते ॥१८.२८॥
कर्ता सात्त्विक उच्यते ॥१८.२६॥
कर्ताहमिति मन्यते ॥३.२७॥
कर्तुं नेच्छसि यन्मोहात् ॥१८.६०॥
कर्तुं मद्योगमाश्रितः ॥१२.११॥
कर्तुं व्यवसिता वयम् ॥१.४५॥
कर्म कर्तुमिहार्हसि ॥१६.२४॥
कर्म कारणमुच्यते ॥६.३॥
कर्म चैव तदर्थीयम् ॥१७.२७॥
कर्म ज्यायो ह्यकर्मणः ॥३.८॥
कर्म प्रारभते नरः ॥१८.१५॥
कर्म प्राहुर्मनीषिणः ॥१८.३॥
कर्म ब्रह्मोद्भवं विद्धि ॥३.१५॥
कर्मजं बुद्धियुक्ता हि ॥२.५१॥
कर्मजान्विद्धि तान्सर्वान् ॥४.३२॥
कर्मणः सुकृतस्याहुः ॥१४.१६॥
कर्मणामशमः स्पृहा ॥१४.१२॥
कर्मणैव हि संसिद्धिम् ॥३.२०॥
कर्मणो नोपपद्यते ॥१८.७॥
कर्मणो ह्यपि बोद्धव्यम् ॥४.१७॥
कर्मण्यकर्म यः पश्येत् ॥४.१८॥
कर्मण्यभिप्रवृत्तोऽपि ॥४.२०॥
कर्मण्येवाधिकारस्ते ॥२.४७॥
कर्मबन्धं प्रहास्यसि ॥२.३९॥
कर्मभिर्न स बध्यते ॥४.१४॥
कर्मयोगेन चापरे ॥१३.२४॥
कर्मयोगेन योगिनाम् ॥३.३॥
कर्मयोगो विशिष्यते ॥५.२॥
कर्मसङ्गिषु जायते ॥१४.१५॥
कर्मसङ्गेन देहिनम् ॥१४.७॥
कर्माणि प्रविभक्तानि ॥१८.४१॥
कर्मानुबन्धीनि मनुष्यलोके ॥१५.२॥
कर्मिभ्यश्चाधिको योगी ॥६.४६॥
कर्मेन्द्रियाणि संयम्य ॥३.६॥
कर्मेन्द्रियैः कर्मयोगम् ॥३.७॥
कर्शयन्तः शरीरस्थम् ॥१७.६॥
कल्पक्षये पुनस्तानि ॥९.७॥
कल्पादौ विसृजाम्यहम् ॥९.७॥
कवयोऽप्यत्र मोहिताः ॥४.१६॥
कविं पुराणमनुशासितारम् ॥८.९॥
कवीनामुशना कविः ॥१०.३७॥
कश्चिदर्थव्यपाश्रयः ॥३.१८॥
कश्चिद्यतति सिद्धये ॥७.३॥
कश्चिन्मां वेत्ति तत्त्वतः ॥७.३॥
कश्चिन्मे प्रियकृत्तमः ॥१८.६९॥
कस्माच्च ते न नमेरन्महात्मन् ॥११.३७॥
का प्रीतिः स्याज्जनार्दन ॥१.३६॥
कां गतिं कृष्ण गच्छति ॥६.३७॥
काङ्क्षन्तः कर्मणां सिद्धिम् ॥४.१२॥
काम एष क्रोध एषः ॥३.३७॥
कामं क्रोधं च संश्रिताः ॥१६.१८॥
कामं क्रोधं परिग्रहम् ॥१८.५३॥
कामः क्रोधस्तथा लोभः ॥१६.२१॥
कामक्रोधपरायणाः ॥१६.१२॥
कामक्रोधवियुक्तानाम् ॥५.२६॥
कामक्रोधोद्भवं वेगम् ॥५.२३॥
काममाश्रित्य दुष्पूरम् ॥१६.१०॥
कामरागबलान्विताः ॥१७.५॥
कामरागविवर्जितम् ॥७.११॥
कामरूपं दुरासदम् ॥३.४३॥
कामरूपेण कौन्तेय ॥३.३९॥
कामसङ्कल्पवर्जिताः ॥४.१९॥
कामात् क्रोधोऽभिजायते ॥२.६२॥
कामात्मानः स्वर्गपरा ॥२.४३॥
कामैस्तैस्तैर्हृतज्ञानाः ॥७.२०॥

कामोऽस्मि भरतर्षभ ॥७.११॥
कामोपभोगपरमाः ॥१६.११॥
काम्यानां कर्मणां न्यासम् ॥१८.२॥
कायक्लेशभयात्यजेत् ॥१८.८॥
कायेन मनसा बुद्ध्या ॥५.११ ॥
कारणं गुणसङ्गोऽस्य ॥१३.२१॥
कारणानि निबोध मे ॥१८.१३॥
कार्पण्यदोषोपहतस्वभावः ॥२.७॥
कार्यं कर्म करोति यः ॥६.१॥
कार्यं कर्म समाचर ॥३.१९॥
कार्यं चाकार्यमेव च ॥१८.३१॥
कार्यकारणकर्तृत्वे ॥१३.२०॥
कार्यते ह्यवशः कर्म ॥३.५॥
कार्यमित्येव यत्कर्म ॥१८.९॥
कार्याकार्यव्यवस्थितौ ॥१६.२४॥
कार्याकार्ये भयाभये ॥१८.३०॥
कार्ये सक्तमहैतुकम् ॥१८.२२॥
कालः कलयतामहम् ॥१०.३०॥
कालेनात्मनि विन्दति ॥४.३८॥
कालोऽस्मि लोकक्षयकृत्प्रवृद्धः ॥११.३२॥
काशिराजश्च वीर्यवान् ॥१.५॥
काश्यश्च परमेष्वासः ॥१.१७॥
किं कर्म किमकर्मेति ॥४.१६॥
किं कर्म पुरुषोत्तम ॥८.१॥
किं ज्ञातेन तवार्जुन ॥१०.४२॥
किं तद्ब्रह्म किमध्यात्मम् ॥८.१॥
किं नो राज्येन गोविन्द ! ॥१.३२॥
किं पुनर्ब्राह्मणाः पुण्याः ॥९.३३॥
किं भोगैर्जीवितेन वा ॥१.३२॥
किञ्चिदस्ति धनञ्जय ॥७.७॥
किमकुर्वत सञ्जय ॥१.१॥
किमन्यत्कामहैतुकम् ॥१६.८॥
किमाचारः कथं चैतान् ॥१४.२१॥
किमासीत व्रजेत किम् ॥२.५४॥
किरीटिनं गदिनं चक्रहस्तम् ॥११.४६॥
किरीटिनं गदिनं चक्रिणं च ॥११.१७॥
कीर्तिः श्रीर्वाक्च नारीणाम् ॥१०.३४॥
कुतस्त्वा कश्मलमिदम् ॥२.२॥
कुतोऽन्यः कुरुसत्तम ॥४.३१॥
कुन्तीपुत्रो युधिष्ठिरः ॥१.१६॥
कुरु कर्मैव तस्मात्त्वम् ॥४.१५॥
कुरुवृद्धः पितामहः ॥१.१२॥
कुर्याद्विद्वांस्तथासक्तः ॥३.२५॥
कुर्वन्नपि न लिप्यते ॥५.७॥
कुर्वन्नाप्नोति किल्बिषम् ॥१८.४७॥
कुर्वन्नाप्नोति किल्बिषम् ॥४.२१॥
कुर्वन्सिद्धिमवाप्स्यसि ॥१२.१०॥
कुर्वाणो मद्व्यपाश्रयः ॥१८.५६॥
कुलक्षयकृतं दोषम् ॥१.३८॥
कुलक्षयकृतं दोषम् ॥१.३९॥
कुलक्षये प्रणश्यन्ति ॥१.४०॥
कुलघ्नानां कुलस्य च ॥१.४२॥
कुलधर्माः सनातनाः ॥१.४०॥
कुलधर्माश्च शाश्वताः ॥१.४३॥
कुले भवति धीमताम् ॥६.४२ ॥
कुशले नानुषज्जते ॥१८.१०॥
कूटस्थमचलं ध्रुवम् ॥१२.३॥
कूटस्थो विजितेन्द्रियः ॥६.८॥
कूटस्थोऽक्षर उच्यते ॥१५.१६॥
कूर्मोऽङ्गानीव सर्वशः ॥२.५८॥
कृतकृत्यश्च भारत ॥१५.२०॥
कृताञ्जलिरभाषत ॥११.१४॥
कृताञ्जलिर्वेपमानः किरीटी ॥११.३५॥
कृत्वापि न निबध्यते ॥४.२२॥
कृत्स्नं लोकमिमं रविः ॥१३.३३॥
कृत्स्नविन्न विचालयेत् ॥३.२९॥
कृपणाः फलहेतवः ॥२.४९॥
कृपया परयाविष्टः ॥१.२८॥
कृपश्च समितिञ्जयः ॥१.८॥
कृषिगौरक्ष्यवाणिज्यम् ॥१८.४४॥
केचिदात्मानमात्मना ॥१३.२४॥
केचिद्भीताः प्राञ्जलयो गृणन्ति ॥११.२१॥
केचिद्विलग्ना दशनान्तरेषु ॥११.२७॥
केवलैरिन्द्रियैरपि ॥५.११ ॥
केशवार्जुनयोः पुण्यम् ॥१८.७६॥
केषु केषु च भावेषु ॥१०.१७॥
कैर्मया सह योद्धव्यम् ॥१.२२॥
कैर्लिङ्गैस्त्रीन्गुणानेतान् ॥१४.२१॥
कोऽन्योऽस्ति सदृशो मया ॥१६.१५॥
कौन्तेय प्रतिजानीहि ॥९.३१॥
कौमारं यौवनं जरा ॥२.१३॥
क्रियते तदिह प्रोक्तम् ॥१७.१८॥
क्रियते बहुलायासम् ॥१८.२४॥
क्रियन्ते मोक्षकाङ्क्षिभिः ॥१७.२५॥
क्रियमाणानि सर्वशः ॥१३.२९॥
क्रियाविशेषबहुलाम् ॥२.४३॥
क्रोधः पारुष्यमेव च ॥१६.४॥
क्रोधाद्भवति सम्मोहः ॥२.६३॥
क्लेशोऽधिकतरस्तेषाम् ॥१२.५॥
क्लैब्यं मा स्म गमः पार्थ ॥२.३॥
क्षत्रियस्य न विद्यते ॥२.३१॥
क्षमा सत्यं दमः शमः ॥१०.४॥
क्षयाय जगतोऽहिताः ॥१६.९॥
क्षरः सर्वाणि भूतानि ॥१५.१६॥
क्षरश्चाक्षर एव च ॥१५.१६॥
क्षात्रं कर्म स्वभावजम् ॥१८.४३॥
क्षान्तिरार्जवमेव च ॥१८.४२॥
क्षिपाम्यजस्रमशुभान् ॥१६.१९॥
क्षिप्रं भवति धर्मात्मा ॥९.३१॥
क्षिप्रं हि मानुषे लोके ॥४.१२॥
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ॥९.२१॥
क्षुद्रं हृदयदौर्बल्यम् ॥२.३॥
क्षेत्रं क्षेत्री तथा कृत्स्नम् ॥१३.३३॥
क्षेत्रक्षेत्रज्ञयोरेवम् ॥१३.३४॥
क्षेत्रक्षेत्रज्ञयोर्ज्ञानम् ॥१३.२॥
क्षेत्रक्षेत्रज्ञसंयोगात् ॥१३.२६॥
क्षेत्रज्ञ इति तद्विदः ॥१३.१॥
क्षेत्रज्ञं चापि मां विद्धि ॥१३.२॥
क्षेत्रमित्यभिधीयते ॥१३.१॥
खं मनो बुद्धिरेव च ॥७.४॥
गच्छन्त्यपुनरावृत्तिम् ॥५.१७॥
गच्छन्त्यमूढाः पदमव्ययं तत् ॥१५.५॥
गतसङ्गस्य मुक्तस्य ॥४.२३॥
गतागतं कामकामा लभन्ते ॥९.२१॥
गतासूनगतासूंश्च ॥२.११॥
गतिर्भर्ता प्रभुः साक्षी ॥९.१८॥
गन्धर्वयक्षासुरसिद्धसङ्घाः ॥११.२२॥
गन्धर्वाणां चित्ररथः ॥१०.२६॥
गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ॥११.३७॥
गहना कर्मणो गतिः ॥४.१७॥
गाण्डीवं स्रंसते हस्तात् ॥१.३०॥
गामाविश्य च भूतानि ॥१५.१३॥
गायत्री छन्दसामहम् ॥१०.३५॥
गिरामस्म्येकमक्षरम् ॥१०.२५॥
गुडाकेशः परन्तप ॥२.९॥
गुडाकेशेन भारत ॥१.२४॥
गुणकर्मविभागयोः ॥३.२८॥
गुणकर्मविभागशः ॥४.१३॥
गुणतस्त्रिविधं शृणु ॥१८.२९॥

गुणप्रवृद्धा विषयप्रवालाः ॥१५.२॥
गुणा गुणेषु वर्तन्ते ॥३.२८॥
गुणा वर्तन्त इत्येव ॥१४.२३॥
गुणाः प्रकृतिसम्भवाः ॥१४.५॥
गुणातीतः स उच्यते ॥१४.२५॥
गुणानेतानतीत्य त्रीन् ॥१४.२०॥
गुणेभ्यश्च परं वेत्ति ॥१४.१९॥
गुणैः कर्माणि सर्वशः ॥३.२७॥
गुणैर्यो न विचाल्यते ॥१४.२३॥
गुरुणापि विचाल्यते ॥६.२२ ॥
गुरूनहत्वा हि महानुभावान् ॥२.५॥
गुह्यमध्यात्मसंज्ञितम् ॥११.१॥
गुह्याद् गुह्यतरं मया ॥१८.६३॥
गृहीत्वैतानि संयाति ॥१५.८॥
ग्रसिष्णु प्रभविष्णु च ॥१३.१६॥
ग्लानिर्भवति भारत ॥४.७॥
घ्नतोऽपि मधुसूदन ॥१.३५॥
चक्षुश्चैवान्तरे भ्रुवोः ॥५.२७॥
चञ्चलं हि मनः कृष्ण ॥६.३४॥
चञ्चलत्वात्स्थितिं स्थिराम् ॥६.३३॥
चतुर्विधा भजन्ते माम् ॥७.१६॥
चत्वारो मनवस्तथा ॥१०.६॥
चातुर्वर्ण्यं मया सृष्टम् ॥४.१३॥
चिकीर्षुर्लोकसङ्ग्रहम् ॥३.२५॥
चिन्तामपरिमेयां च ॥१६.११॥
चिन्त्योऽसि भगवन्मया ॥१०.१७॥
चेतसा नान्यगामिना ॥८.८॥
चेतसा सर्वकर्माणि ॥१८.५७॥
चैलाजिनकुशोत्तरम् ॥६.११॥
छन्दांसि यस्य पर्णानि ॥१५.१॥
छन्दोभिर्विविधैः पृथक् ॥१३.४॥
छित्त्वैनं संशयं योगम् ॥४.४२॥
छिन्नद्वैधा यतात्मानः ॥५.२५॥
छिन्नाभ्रमिव नश्यति ॥६.३८॥
छेत्ता न ह्युपपद्यते ॥६.३९॥
छेत्तुमर्हस्यशेषतः ॥६.३९॥
जगतः शाश्वते मते ॥८.२६॥
जगत्प्रहृष्यत्यनुरज्यते च ॥११.३६॥
जगदव्यक्तमूर्तिना ॥९.४॥
जगदाहुरनीश्वरम् ॥१६.८॥
जगद्भासयतेऽखिलम् ॥१५.१२॥
जगद्विपरिवर्तते ॥९.१०॥
जघन्यगुणवृत्तिस्थाः ॥१४.१८॥
जना न विदुरासुराः ॥१६.७॥
जनाः सुकृतिनोऽर्जुन ॥७.१६॥
जनानां पुण्यकर्मणाम् ॥७.२८॥
जन्म कर्म च मे दिव्यम् ॥४.९॥
जन्मकर्मफलप्रदाम् ॥२.४३॥
जन्मबन्धविनिर्मुक्ताः ॥२.५१॥
जन्ममृत्युजरादुःखैः ॥१४.२०॥
जन्ममृत्युजराव्याधि- ॥१३.८॥
जन्मानि तव चार्जुन ॥४.५॥
जयोऽस्मि व्यवसायोऽस्मि ॥१०.३६॥
जरामरणमोक्षाय ॥७.२९॥
जहि शत्रुं महाबाहो ॥३.४३॥
जाग्रतो नैव चार्जुन ॥६.१६॥
जातस्य हि ध्रुवो मृत्युः ॥२.२७॥
जातु कर्मण्यतन्द्रितः ॥३.२३॥
जातु तिष्ठत्यकर्मकृत् ॥३.५॥
जानाति पुरुषोत्तमम् ॥१५.१९॥
जायते वर्णसङ्करः ॥१.४१॥
जिज्ञासुरपि योगस्य ॥६.४४॥
जितात्मनः प्रशान्तस्य ॥६.७॥
जितात्मा विगतस्पृहः ॥१८.४९॥
जित्वा वा भोक्ष्यसे महीम् ॥२.३७॥
जित्वा शत्रून्भुङ्क्ष्व राज्यं समृद्धम् ॥११.३३॥
जीवनं सर्वभूतेषु ॥७.९॥
जीवभूतः सनातनः ॥१५.७॥
जीवभूतां महाबाहो ॥७.५॥
जुह्वति ज्ञानदीपिते ॥४.२७॥
जोषयेत्सर्वकर्माणि ॥३.२६॥
ज्ञानात् ध्यानं विशिष्यते ॥१२.१२॥
ज्ञातव्यमवशिष्यते ॥७.२॥
ज्ञातुं द्रष्टुं च तत्त्वेन ॥११.५४॥
ज्ञात्वा भूतादिमव्ययम् ॥९.१३॥
ज्ञात्वा मां शान्तिमृच्छति ॥५.२९॥
ज्ञात्वा शास्त्रविधानोक्तम् ॥१६.२४॥
ज्ञानं कर्म च कर्ता च ॥१८.१९॥
ज्ञानं ज्ञानवतामहम् ॥१०.३८॥
ज्ञानं ज्ञेयं ज्ञानगम्यम् ॥१३.१७॥
ज्ञानं ज्ञेयं परिज्ञाता ॥१८.१८॥
ज्ञानं तेऽहं सविज्ञानम् ॥७.२॥
ज्ञानं यदा तदा विद्यात् ॥१४.११॥
ज्ञानं लब्ध्वा परां शान्तिम् ॥४.३९॥
ज्ञानं विज्ञानमास्तिक्यम् ॥१८.४२॥
ज्ञानं विज्ञानसहितम् ॥९.१॥
ज्ञानदीपेन भास्वता ॥१०.११॥
ज्ञाननिर्धूतकल्मषाः ॥५.१७॥
ज्ञानमावृत्य तु तमः ॥१४.९॥
ज्ञानमावृत्य देहिनम् ॥३.४०॥
ज्ञानयज्ञः परन्तप ॥४.३३॥
ज्ञानयज्ञेन चाप्यन्ये ॥९.१५॥
ज्ञानयज्ञेन तेनाहम् ॥१८.७०॥
ज्ञानयोगव्यवस्थितिः ॥१६.१॥
ज्ञानयोगेन साङ्ख्यानाम् ॥३.३॥
ज्ञानवान्मां प्रपद्यते ॥७.१९॥
ज्ञानविज्ञानतृप्तात्मा ॥६.८॥
ज्ञानविज्ञाननाशनम् ॥३.४१॥
ज्ञानसङ्गेन चानघ ॥१४.६॥
ज्ञानसञ्छिन्नसंशयम् ॥४.४१॥
ज्ञानाग्निः सर्वकर्माणि ॥४.३७॥
ज्ञानाग्निदग्धकर्माणम् ॥४.१९॥
ज्ञानानां ज्ञानमुत्तमम् ॥१४.१॥
ज्ञानावस्थितचेतसः ॥४.२३॥
ज्ञानिनस्तत्त्वदर्शिनः ॥४.३४॥
ज्ञानिनो नित्यवैरिणा ॥३.३९॥
ज्ञानिभ्योऽपि मतोऽधिकः ॥६.४६॥
ज्ञानी च भरतर्षभ ॥७.१६॥
ज्ञानी त्वात्मैव मे मतम् ॥७.१८॥
ज्ञाने परिसमाप्यते ॥४.३३॥
ज्ञानेन तु तदज्ञानम् ॥५.१६॥
ज्ञेयं चोक्तं समासतः ॥१३.१८॥
ज्ञेयं यत्तत्प्रवक्ष्यामि ॥१३.१२॥
ज्ञेयः स नित्यसंन्यासी ॥५.३॥
ज्ञेयोऽसि नियतात्मभिः ॥८.२॥
ज्यायसी चेत्कर्मणस्ते ॥३.१॥
ज्योतिषामपि तज्ज्योतिः ॥१३.१७॥
झषाणां मकरश्चास्मि ॥१०.३१॥
त इमेऽवस्थिता युद्धे प्राणान् ॥१.३३॥
तं तं नियममास्थाय ॥७.२०॥
तं तथा कृपयाविष्टम् ॥२.१॥
तं तमेवैति कौन्तेय ॥८.६॥
तं यज्ञं विद्धि राजसम् ॥१७.१२॥
तं विद्याद्दुःखसंयोग- ॥६.२३॥
तच्च संस्मृत्य संस्मृत्य ॥१८.७७॥
तज्ज्ञानं विद्धि राजसम् ॥१८.२१॥
तज्ज्ञानं विद्धि सात्त्विकम् ॥१८.२०॥
तत एव च विस्तारम् ॥१३.३०॥
ततः कुरु यतात्मवान् ॥१२.११॥

ततः पदं तत्परिमार्गितव्यम् ॥१५.४॥
ततः शङ्खाश्च भेर्यश्च ॥१.१३॥
ततः श्वेतैर्हयैर्युक्ते ॥१.१४॥
ततः सः विस्मयाविष्टः ॥११.१४॥
ततः स्वधर्मं कीर्तिं च ॥२.३३॥
ततस्ततो नियम्यैतद् ॥६.२६॥
ततो दुःखतरं नु किम् ॥२.३६॥
ततो भवति भारत ॥१४.३॥
ततो मां तत्त्वतो ज्ञात्वा ॥१८.५५॥
ततो याति परां गतिम् ॥१३.२८॥
ततो याति परां गतिम् ॥१६.२२॥
ततो याति परां गतिम् ॥६.४५॥
ततो यान्त्यधमां गतिम् ॥१६.२०॥
ततो युद्धाय युज्यस्व ॥२.३८॥
ततो वक्ष्यामि ते हितम् ॥१८.६४॥
तत्किं कर्मणि घोरे माम् ॥३.१॥
तत्कुरुष्व मदर्पणम् ॥९.२७॥
तत्क्षामये त्वामहमप्रमेयम् ॥११.४२॥
तत्क्षेत्रं यच्च यादृक्च ॥१३.३॥
तत्तत्प्राप्य शुभाशुभम् ॥२.५७॥
तत्तदेवावगच्छ त्वम् ॥१०.४१॥
तत्तदेवेतरो जनः ॥३.२१॥
तत्तामसमुदाहृतम् ॥१७.१९॥
तत्तामसमुदाहृतम् ॥१७.२२॥
तत्तामसमुदाहृतम् ॥१८.२२॥
तत्तामसमुदाहृतम् ॥१८.३९॥
तत्ते कर्म प्रवक्ष्यामि ॥४.१६॥
तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये ॥८.११॥
तत्तेजो विद्धि मामकम् ॥१५.१२॥
तत्त्वज्ञानार्थदर्शनम् ॥१३.११॥
तत्त्वमिच्छामि वेदितुम् ॥१८.१॥
तत्त्ववित्तु महाबाहो ॥३.२८॥
तत्त्वेनातश्च्यवन्ति ते ॥९.२४॥
तत्परः संयतेन्द्रियः ॥४.३९॥
तत्प्रसादात्परां शान्तिम् ॥१८.६२॥
तत्र का परिदेवना ॥२.२८॥
तत्र चान्द्रमसं ज्योतिः ॥८.२५॥
तत्र तं बुद्धिसंयोगम् ॥६.४३॥
तत्र प्रयाता गच्छन्ति ॥८.२४॥
तत्र श्रीर्विजयो भूतिः ॥१८.७८॥
तत्र सत्त्वं निर्मलत्वात् ॥१४.६॥
तत्रापश्यत् स्थितान् पार्थः ॥१.२६॥
तत्रैकस्थं जगत्कृत्स्नम् ॥११.१३॥
तत्रैकाग्रं मनः कृत्वा ॥६.१२॥
तत्रैवं सति कर्तारम् ॥१८.१६॥
तत्रैवाव्यक्तसंज्ञके ॥८.१८॥
तत्समासेन मे शृणु ॥१३.३॥
तत्सुखं राजसं स्मृतम् ॥१८.३८॥
तत्सुखं सात्त्विकं प्रोक्तम् ॥१८.३७॥
तत्स्वयं योगसंसिद्धः ॥४.३८॥
तथा तवामी नरलोकवीराः ॥११.२८॥
तथा तेनेदमावृतम् ॥३.३८॥
तथा देहान्तरप्राप्तिः ॥२.१३॥
तथा प्रलीनस्तमसि ॥१४.१५॥
तथा मानापमानयोः ॥१२.१८॥
तथा मानापमानयोः ॥६.७॥
तथा शरीराणि विहाय जीर्णानि ॥२.२२॥
तथा सर्वाणि भूतानि ॥९.६॥
तथात्मा नोपलिप्यते ॥१३.३२॥
तथान्तर्ज्योतिरेव यः ॥५.२४॥
तथापि त्वं महाबाहो ॥२.२६॥
तथाप्नोति निबोध मे ॥१८.५०॥
तथैव च पितामहाः ॥१.३४॥
तथैव नाशाय विशन्ति लोकाः ॥११.२९॥
तदर्थं कर्म कौन्तेय ॥३.९॥
तदस्य हरति प्रज्ञाम् ॥२.६७॥
तदहं भक्त्युपहृतम् ॥९.२६॥
तदा गन्तासि निर्वेदम् ॥२.५२॥
तदा योगमवाप्स्यसि ॥२.५३॥
तदात्मानं सृजाम्यहम् ॥४.७॥
तदित्यनभिसन्धाय ॥१७.२५॥
तदेकं वद निश्चित्य ॥३.२॥
तदेव मे दर्शय देव रूपम् ॥११.४५॥
तदेव मे रूपमिदं प्रपश्य ॥११.४९॥
तदोत्तमविदां लोकान् ॥१४.१४॥
तद्दानं राजसं स्मृतम् ॥१७.२१॥
तद्दानं सात्त्विकं स्मृतम् ॥१७.२०॥
तद्धाम परमं मम ॥१५.६॥
तद्धाम परमं मम ॥८.२१॥
तद्बुद्धयस्तदात्मानः ॥५.१७॥
तद्भवत्यल्पमेधसाम् ॥७.२३॥
तद्योगैरपि गम्यते ॥५.५॥
तद्राजसमुदाहृतम् ॥१८.२४॥
तद्वत् कामा यं प्रविशन्ति सर्वे ॥२.७०॥
तद्विद्धि प्रणिपातेन ॥४.३४॥
तद्विद्धि भरतर्षभ ॥१३.२६॥
तन्निबध्नाति कौन्तेय ॥१४.७॥
तन्निबध्नाति भारत ॥१४.८॥
तन्निष्ठास्तत्परायणाः ॥५.१७॥
तन्मे क्षेमतरं भवेत् ॥१.४६॥
तन्मे ब्रूहि सुनिश्चितम् ॥५.१॥
तपश्चास्मि तपस्विषु ॥७.९॥
तपस्तत्त्रिविधं नरैः ॥१७.१७॥
तपस्तप्तं कृतं च यत् ॥१७.२८॥
तपस्विभ्योऽधिको योगी ॥६.४६॥
तपाम्यहमहं वर्षम् ॥९.१९॥
तपो दम्भेन चैव यत् ॥१७.१८॥
तपो दानं यशोऽयशः ॥१०.५॥
तपो मानसमुच्यते ॥१७.१६॥
तप्यन्ते ये तपो जनाः ॥१७.५॥
तमः सत्त्वं रजस्तथा ॥१४.१०॥
तमसः परमुच्यते ॥१३.१७॥
तमस्त्वज्ञानजं विद्धि ॥१४.८॥
तमस्येतानि जायन्ते ॥१४.१३॥
तमाहुः पण्डितं बुधाः ॥४.१९॥
तमाहुः परमां गतिम् ॥८.२१॥
तमुवाच हृषीकेशः ॥२.१०॥
तमेव चाद्यं पुरुषं प्रपद्ये ॥१५.४॥
तमेव शरणं गच्छ ॥१८.६२॥
तमोद्वारैस्त्रिभिर्नरः ॥१६.२२॥
तयापहृतचेतसाम् ॥२.४४॥
तयोर्न वशमागच्छेत् ॥३.३४॥
तयोस्तु कर्मसंन्यासात् ॥५.२॥
तव शिष्येण धीमता ॥१.३॥
तव सौम्यं जनार्दन ॥११.५१॥
तवापि वक्त्राणि समृद्धवेगाः ॥११.२९॥
तस्माच्छास्त्रं प्रमाणं ते ॥१६.२४॥
तस्मात् प्रणम्य प्रणिधाय कायम् ॥११.४४॥
तस्मात् सर्वगतं ब्रह्म ॥३.१५॥
तस्मात्त्वमिन्द्रियाण्यादौ ॥३.४१॥
तस्मात्त्वमुत्तिष्ठ यशो लभस्व ॥११.३३॥
तस्मात्सर्वाणि भूतानि ॥२.३०॥
तस्मात्सर्वेषु कालेषु ॥८.२७॥
तस्मात्सर्वेषु कालेषु ॥८.७॥
तस्मादज्ञानसम्भूतम् ॥४.४२॥
तस्मादपरिहार्येऽर्थे ॥२.२७॥
तस्मादसक्तः सततम् ॥३.१९॥
तस्मादुत्तिष्ठ कौन्तेय ॥२.३७॥
तस्मादेतत्त्रयं त्यजेत् ॥१६.२१॥

तस्मादेवं विदित्वैनम् ॥२.२५॥
तस्मादोमित्युदाहृत्य ॥१७.२४॥
तस्माद् ब्रह्मणि ते स्थिताः ॥५.१९॥
तस्माद्यस्य महाबाहो ॥२.६८॥
तस्माद्युध्यस्व भारत ॥२.१८॥
तस्माद्योगाय युज्यस्व ॥२.५०॥
तस्माद्योगी भवार्जुन ॥६.४६॥
तस्मान्नार्हा वयं हन्तुम् ॥१.३७॥
तस्मिन्गर्भं दधाम्यहम् ॥१४.३॥
तस्य कर्तारमपि माम् ॥४.१३॥
तस्य कार्यं न विद्यते ॥३.१७॥
तस्य तस्याचलां श्रद्धाम् ॥७.२१॥
तस्य प्रज्ञा प्रतिष्ठिता ॥२.५७॥
तस्य प्रज्ञा प्रतिष्ठिता ॥२.५८॥
तस्य प्रज्ञा प्रतिष्ठिता ॥२.६१॥
तस्य प्रज्ञा प्रतिष्ठिता ॥२.६८॥
तस्य सञ्जनयन् हर्षम् ॥१.१२॥
तस्या राधनमीहते ॥७.२२॥
तस्यां जागर्ति संयमी ॥२.६९॥
तस्याहं न प्रणश्यामि ॥६.३०॥
तस्याहं निग्रहं मन्ये ॥६.३४॥
तस्याहं सुलभः पार्थ ॥८.१४॥
तांस्तथैव भजाम्यहम् ॥४.११॥
तांस्तितिक्षस्व भारत ॥२.१४॥
तानकृत्स्नविदो मन्दान् ॥३.२९॥
तानहं द्विषतः क्रूरान् ॥१६.१९॥
तानि सर्वाणि संयम्य ॥२.६१॥
तान्निबोध द्विजोत्तम ॥१.७॥
तान्यहं वेद सर्वाणि ॥४.५॥
तान्विद्ध्यासुरनिश्चयान् ॥१७.६॥
तान्समीक्ष्य स कौन्तेयः ॥१.२७॥
तामसं परिचक्षते ॥१७.१३॥
तामसः परिकीर्तितः ॥१८.७॥
तामसी चेति तां शृणु ॥१७.२॥
तामेव विदधाम्यहम् ॥७.२१॥
तावान्सर्वेषु वेदेषु ॥२.४६॥
तासां ब्रह्म महद्योनिः ॥१४.४॥
तिष्ठन्तं परमेश्वरम् ॥१३.२७॥
तीक्ष्णरूक्षविदाहिनः ॥१७.९॥
तुमुलो व्यनुनादयन् ॥१.१९॥
तुल्यनिन्दात्मसंस्तुतिः ॥१४.२४॥
तुल्यनिन्दास्तुतिर्मौनी ॥१२.१९॥
तुल्यप्रियाप्रियो धीरः ॥१४.२४॥
तुल्यो मित्रारिपक्षयोः ॥१४.२५॥
तुष्यन्ति च रमन्ति च ॥१०.९॥
तृष्णासङ्गसमुद्भवम् ॥१४.७॥
ते तं भुक्त्वा स्वर्गलोकं विशालम् ॥९.२१॥
ते देवा भावयन्तु वः ॥३.११॥
ते द्वन्द्वमोहनिर्मुक्ताः ॥७.२८॥
ते पुण्यमासाद्य सुरेन्द्रलोकम् ॥९.२०॥
ते प्राप्नुवन्ति मामेव ॥१२.४॥
ते ब्रह्म तद्विदुः कृत्स्नम् ॥७.२९॥
ते मे युक्ततमा मताः ॥१२.२॥
ते विदुर्युक्तचेतसः ॥७.३०॥
तेऽपि चातितरन्त्येव ॥१३.२५॥
तेऽपि मामेव कौन्तेय ॥९.२३॥
तेऽपि यान्ति परां गतिम् ॥९.३२॥
तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥२.६॥
तेऽहोरात्रविदो जनाः ॥८.१७॥
तेजः क्षमा धृतिः शौचम् ॥१६.३॥
तेजश्चास्मि विभावसौ ॥७.९॥
तेजस्तेजस्विनामहम् ॥१०.३६॥
तेजस्तेजस्विनामहम् ॥७.१०॥
तेजोभिरापूर्य जगत्समग्रम् ॥११.३०॥
तेजोमयं विश्वमनन्तमाद्यम् ॥११.४७॥
तेजोराशिं सर्वतो दीप्तिमन्तम् ॥११.१७॥
तेन मुह्यन्ति जन्तवः ॥५.१५॥
तेनैव रूपेण चतुर्भुजेन ॥११.४६॥
तेषां के योगवित्तमाः ॥१२.१॥
तेषां ज्ञानी नित्ययुक्तः ॥७.१७॥
तेषां नित्याभियुक्तानाम् ॥९.२२॥
तेषां निष्ठा तु का कृष्ण ॥१७.१॥
तेषां भेदमिमं शृणु ॥१७.७॥
तेषां सततयुक्तानाम् ॥१०.१०॥
तेषामहं समुद्धर्ता ॥१२.७॥
तेषामादित्यवज्ज्ञानम् ॥५.१६॥
तेषामेवानुकम्पार्थम् ॥१०.११॥
तैर्दत्तानप्रदायैभ्यः ॥३.१२॥
तौ ह्यस्य परिपन्थिनौ ॥३.३४॥
त्यक्तसर्वपरिग्रहः ॥४.२१॥
त्यक्तुं कर्माण्यशेषतः ॥१८.११॥
त्यक्त्वा कर्मफलासङ्गम् ॥४.२०॥
त्यक्त्वा देहं पुनर्जन्म ॥४.९॥
त्यक्त्वा धनानि च ॥१.३३॥
त्यक्त्वा सर्वानशेषतः ॥६.२४॥
त्यक्त्वोत्तिष्ठ परन्तप ॥२.३॥
त्यजत्यन्ते कलेवरम् ॥८.६॥
त्यागः शान्तिरपैशुनम् ॥१६.२॥
त्यागस्य च हृषीकेश ॥१८.१॥
त्यागाच्छान्तिरनन्तरम् ॥१२.१२॥
त्यागी सत्त्वसमाविष्टः ॥१८.१०॥
त्यागे भरतसत्तम ॥१८.४॥
त्यागो हि पुरुषव्याघ्र ॥१८.४॥
त्याज्यं दोषवदित्येके ॥१८.३॥
त्रायते महतो भयात् ॥२.४०॥
त्रिधैव गुणभेदतः ॥१८.१९॥
त्रिभिर्गुणमयैर्भावैः ॥७.१३॥
त्रिविधं कर्मणः फलम् ॥१८.१२॥
त्रिविधं नरकस्येदम् ॥१६.२१॥
त्रिविधः कर्मसङ्ग्रहः ॥१८.१८॥
त्रिविधः सम्प्रकीर्तितः ॥१८.४॥
त्रिविधा कर्मचोदना ॥१८.१८॥
त्रिविधा भवति श्रद्धा ॥१७.२॥
त्रिविधो भवति प्रियः ॥१७.७॥
त्रिषु लोकेषु किञ्चन ॥३.२२॥
त्रीन्गुणानतिवर्तते ॥१४.२१॥
त्रैगुण्यविषया वेदाः ॥२.४५॥
त्रैविद्या मां सोमपाः पूतपापाः ॥९.२०॥
त्वक्चैव परिदह्यते ॥१.३०॥
त्वत्तः कमलपत्राक्ष ॥११.२॥
त्वत्प्रसादात् मयाच्युत ॥१८.७३॥
त्वदन्यः संशयस्यास्य ॥६.३९॥
त्वनयोस्तत्त्वदर्शिभिः ॥२.१६॥
त्वमक्षरं परमं वेदितव्यम् ॥११.१८॥
त्वमक्षरं सदसत्तत्परं यत् ॥११.३७॥
त्वमव्ययः शाश्वतधर्मगोप्ता ॥११.१८॥
त्वमस्य पूज्यश्च गुरुर्गरीयान् ॥११.४३॥
त्वमस्य विश्वस्य परं निधानम् ॥११.१८॥
त्वमस्य विश्वस्य परं निधानम् ॥११.३८॥
त्वमादिदेवः पुरुषः पुराणः ॥११.३८॥
त्वमादौ प्रोक्तवानिति ॥४.४॥
त्वया ततं विश्वमनन्तरूप ॥११.३८॥
त्वयैकाग्रेण चेतसा ॥१८.७२॥
त्वां सदा परिचिन्तयन् ॥१०.१७॥
दंष्ट्राकरालानि च ते मुखानि ॥११.२५॥
दंष्ट्राकरालानि भयानकानि ॥११.२७॥
दण्डो दमयतामस्मि ॥१०.३८॥
ददामि बुद्धियोगं तम् ॥१०.१०॥
दम्भमानमदान्विताः ॥१६.१०॥

दम्भार्थमपि चैव यत् ॥१७.१२॥
दम्भाहङ्कारसंयुक्ताः ॥१७.५॥
दम्भेनाविधिपूर्वकम् ॥१६.१७॥
दम्भो दर्पोऽभिमानश्च ॥१६.४॥
दया भूतेष्वलोलुप्त्वम् ॥१६.२॥
दर्शयात्मानमव्ययम् ॥११.४॥
दर्शयामास पार्थाय ॥११.९॥
दातव्यमिति यद्दानम् ॥१७.२०॥
दानं दमश्च यज्ञश्च ॥१६.१॥
दानक्रियाश्च विविधाः ॥१७.२५॥
दानमीश्वरभावश्च ॥१८.४३॥
दानेषु यत्पुण्यफलं प्रदिष्टम् ॥८.२८॥
दास्यन्ते यज्ञभाविताः ॥३.१२॥
दिवि देवेषु वा पुनः ॥१८.४०॥
दिवि सूर्यसहस्रस्य ॥११.१२॥
दिव्यं ददामि ते चक्षुः ॥११.८॥
दिव्यगन्धानुलेपनम् ॥११.११॥
दिव्यमाल्याम्बरधरम् ॥११.११॥
दिव्या ह्यात्मविभूतयः ॥१०.१६॥
दिव्या ह्यात्मविभूतयः ॥१०.१९॥
दिव्यानेकोद्यतायुधम् ॥११.१०॥
दिव्यौ शङ्खौ प्रदध्मतुः ॥१.१४॥
दिशो न जाने न लभे च शर्म ॥११.२५॥
दीप्तानलार्कद्युतिमप्रमेयम् ॥११.१७॥
दीयते च परिक्लिष्टम् ॥१७.२१॥
दीयतेऽनुपकारिणे ॥१७.२०॥
दुःखदोषानुदर्शनम् ॥१३.८॥
दुःखमाप्तुमयोगतः ॥५.६॥
दुःखमित्येव यत्कर्म ॥१८.८॥
दुःखयोनय एव ते ॥५.२२॥
दुःखशोकामयप्रदाः ॥१७.९॥
दुःखान्तं च निगच्छति ॥१८.३६॥
दुःखालयमशाश्वतम् ॥८.१५॥
दुःखेष्वनुद्विग्नमनाः ॥२.५६॥
दुर्गतिं तात गच्छति ॥६.४०॥
दुष्पूरेणानलेन च ॥३.३९॥
दुष्प्राप इति मे मतिः ॥६.३६॥
दूरस्थं चान्तिके च तत् ॥१३.१५॥
दूरेण ह्यवरं कर्म ॥२.४९॥
दृष्टवानसि मां यथा ॥११.५३॥
दृष्टवानसि यन्मम ॥११.५२॥
दृष्ट्वा तु पाण्डवानीकम् ॥१.२॥
दृष्ट्वा रूपं घोरमीदृङ्ममेदम् ॥११.४९॥
दृष्ट्वा लोकाः प्रव्यथितास्तथाहम् ॥११.२३॥
दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा ॥११.२४॥
दृष्ट्वाद्भुतं रूपमुग्रं तवेदम् ॥११.२०॥
दृष्ट्वेदं मानुषं रूपम् ॥११.५१॥
दृष्ट्वेमं स्वजनं कृष्ण ॥१.२८॥
दृष्ट्वैव कालानलसन्निभानि ॥११.२५॥
देवदत्तं धनञ्जयः ॥१.१५॥
देवदेव जगत्पते ॥१०.१५॥
देवद्विजगुरुप्राज्ञ- ॥१७.१४॥
देवर्षिर्नारदस्तथा ॥१०.१३॥
देवर्षीणां च नारदः ॥१०.२६॥
देवा अप्यस्य रूपस्य ॥११.५२॥
देवानामस्मि वासवः ॥१०.२२॥
देवान्देवयजो यान्ति ॥७.२३॥
देवान्भावयतानेन ॥३.११॥
देशे काले च पात्रे च ॥१७.२०॥
देहवद्भिरवाप्यते ॥१२.५॥
देहिनां सा स्वभावजा ॥१७.२॥
देहिनोऽस्मिन्यथा देहे ॥२.१३॥
देही देहसमुद्भवान् ॥१४.२०॥
देही नित्यमवध्योऽयम् ॥२.३०॥
देहे देहभृतां वर ॥८.४॥
देहे देहिनमव्ययम् ॥१४.५॥
देहे सर्वस्य भारत ॥२.३०॥
देहेऽस्मिन्पुरुषः परः ॥१३.२२॥
देहेऽस्मिन्मधुसूदन ॥८.२॥
दैव आसुर एव च ॥१६.६॥
दैवं चैवात्र पञ्चमम् ॥१८.१४॥
दैवमेवापरे यज्ञम् ॥४.२५॥
दैवी सम्पद्विमोक्षाय ॥१६.५॥
दैवी ह्येषा गुणमयी ॥७.१४॥
दैवीं प्रकृतिमाश्रिताः ॥९.१३॥
दैवो विस्तरशः प्रोक्तः ॥१६.६॥
दोषैरेतैः कुलघ्नानाम् ॥१.४३॥
द्यावापृथिव्योरिदमन्तरं हि ॥११.२०॥
द्यूतं छलयतामस्मि ॥१०.३६॥
द्रक्ष्यस्यात्मन्यथो मयि ॥४.३५॥
द्रव्ययज्ञास्तपोयज्ञाः ॥४.२८॥
द्रष्टुं त्वदन्येन कुरुप्रवीर ॥११.४८॥
द्रष्टुमिच्छामि ते रूपम् ॥११.३॥
द्रुपदश्च महारथः ॥१.४॥
द्रुपदो द्रौपदेयाश्च ॥१.१८॥
द्रोणं च भीष्मं च जयद्रथं च ॥११.३४॥
द्रोणं च मधुसूदन ॥२.४॥
द्वन्द्वः सामासिकस्य च ॥१०.३३॥
द्वन्द्वमोहेन भारत ॥७.२७॥
द्वन्द्वातीतो विमत्सरः ॥४.२२॥
द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञैः ॥१५.५॥
द्वारं नाशनमात्मनः ॥१६.२१॥
द्वाविमौ पुरुषौ लोके ॥१५.१६॥
द्वौ भूतसर्गौ लोकेऽस्मिन् ॥१६.६॥
धनमानमदान्विताः ॥१६.१७॥
धनुरुद्यम्य पाण्डवः ॥१.२०॥
धर्मक्षेत्रे कुरुक्षेत्रे ॥१.१॥
धर्मसंस्थापनार्थाय ॥४.८॥
धर्मस्यास्य परन्तप ॥९.३॥
धर्माविरुद्धो भूतेषु ॥७.११॥
धर्मे नष्टे कुलं कृत्स्नम् ॥१.४०॥
धर्म्यं संवादमावयोः ॥१८.७०॥
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् ॥२.३१॥
धाताहं विश्वतोमुखः ॥१०.३३॥
धारयन्नचलं स्थिरः ॥६.१३॥
धारयाम्यहमोजसा ॥१५.१३॥
धार्तराष्ट्रस्य दुर्बुद्धेः ॥१.२३॥
धार्तराष्ट्रा रणे हन्युः ॥१.४६॥
धार्तराष्ट्रान् कपिध्वजः ॥१.२०॥
धार्तराष्ट्रान् स्वबान्धवान् ॥१.३७॥
धीरस्तत्र न मुह्यति ॥२.१३॥
धूमेनाग्निरिवावृताः ॥१८.४८॥
धूमेनाव्रियते वह्निः ॥३.३८॥
धूमो रात्रिस्तथा कृष्णः ॥८.२५॥
धृतिं न विन्दामि शमं च विष्णो ॥११.२४॥
धृतिः सा पार्थ तामसी ॥१८.३५॥
धृतिः सा पार्थ राजसी ॥१८.३४॥
धृतिः सा पार्थ सात्त्विकी ॥१८.३३॥
धृत्या धारयतेऽर्जुन ॥१८.३४॥
धृत्या यया धारयते ॥१८.३३॥
धृत्यात्मानं नियम्य च ॥१८.५१॥
धृत्युत्साहसमन्वितः ॥१८.२६॥
धृष्टकेतुश्चेकितानः ॥१.५॥
धृष्टद्युम्नो विराटश्च ॥१.१७॥
धेनूनामस्मि कामधुक् ॥१०.२८॥
ध्यानयोगपरो नित्यम् ॥१८.५२॥
ध्यानात्कर्मफलत्यागः ॥१२.१२॥
ध्यानेनात्मनि पश्यन्ति ॥१३.२४॥
ध्यायतो विषयान्पुंसः ॥२.६२॥

ध्रुवं जन्म मृतस्य च ॥२.२७॥
ध्रुवा नीतिर्मतिर्मम ॥१८.७८॥
न करोति न लिप्यते ॥१३.३१॥
न कर्तृत्वं न कर्माणि ॥५.१४॥
न कर्मणामनारम्भात् ॥३.४॥
न कर्मफलसंयोगम् ॥५.१४॥
न कर्मस्वनुषज्जते ॥६.४॥
न कश्चित्कर्तुमर्हति ॥२.१७॥
न काङ्क्षे विजयं कृष्ण ! ॥१.३२॥
न किञ्चिदपि चिन्तयेत् ॥६.२५॥
न कुर्यां कर्म चेदहम् ॥३.२४॥
न च क्रियाभिर्न तपोभिरुग्रैः ॥११.४८॥
न च तत्प्रेत्य नो इह ॥१७.२८॥
न च तस्मान्मनुष्येषु ॥१८.६९॥
न च मत्स्थानि भूतानि ॥९.५॥
न च मां तानि कर्माणि ॥९.९॥
न च मां योऽभ्यसूयति ॥१८.६७॥
न च राज्यं सुखानि च ॥१.३२॥
न च शक्नोम्यवस्थातुम् ॥१.३०॥
न च श्रेयोऽनुपश्यामि ॥१.३१॥
न च संन्यसनादेव ॥३.४॥
न चातिस्वप्नशीलस्य ॥६.१६॥
न चाभावयतः शान्तिः ॥२.६६॥
न चायुक्तस्य भावना ॥२.६६॥
न चाशुश्रूषवे वाच्यम् ॥१८.६७॥
न चास्य सर्वभूतेषु ॥३.१८॥
न चाहं तेष्ववस्थितः ॥९.४॥
न चैकान्तमनश्नतः ॥६.१६॥
न चैतद्विद्मः कतरन्नो गरीयः ॥२.६॥
न चैनं क्लेदयन्त्यापः ॥२.२३॥
न चैव न भविष्यामः ॥२.१२॥
न चैव सुकृतं विभुः ॥५.१५॥
न जायते म्रियते वा कदाचित् ॥२.२०॥
न तदस्ति पृथिव्यां वा ॥१८.४०॥
न तदस्ति विना यत्स्यात् ॥१०.३९॥
न तद्भासयते सूर्यः ॥१५.६॥
न तु मां शक्यसे द्रष्टुम् ॥११.८॥
न तु मामभिजानन्ति ॥९.२४॥
न तु संन्यासिनां क्वचित् ॥१८.१२॥
न तेषु रमते बुधः ॥५.२२॥
न त्याज्यं कार्यमेव तत् ॥१८.५॥
न त्याज्यमिति चापरे ॥१८.३॥
न त्वं नेमे जनाधिपाः ॥२.१२॥
न त्वं वेत्थ परन्तप ॥४.५॥
न त्वं शोचितुमर्हसि ॥२.२७॥
न त्वं शोचितुम् अर्हसि ॥२.३०॥
न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः ॥११.४३॥
न त्वहं तेषु ते मयि ॥७.१२॥
न त्वेवाहं जातु नासम् ॥२.१२॥
न दानेन न चेज्यया ॥११.५३॥
न द्वेष्टि संप्रवृत्तानि ॥१४.२२॥
न द्वेष्ट्यकुशलं कर्म ॥१८.१०॥
न निवृत्तानि काङ्क्षति ॥१४.२२॥
न निरग्निर्न चाक्रियः ॥६.१॥
न प्रसिद्ध्येदकर्मणः ॥३.८॥
न प्रहृष्येत्प्रियं प्राप्य ॥५.२०॥
न बुद्धिभेदं जनयेत् ॥३.२६॥
न मां कर्माणि लिम्पन्ति ॥४.१४॥
न मां दुष्कृतिनो मूढाः ॥७.१५॥
न मे कर्मफले स्पृहा ॥४.१४॥
न मे द्वेष्योऽस्ति न प्रियः ॥९.२९॥
न मे पार्थास्ति कर्तव्यम् ॥३.२२॥
न मे भक्तः प्रणश्यति ॥९.३१॥
न मे विदुः सुरगणाः ॥१०.२॥
न योत्स्य इति गोविन्दम् ॥२.९॥
न योत्स्य इति मन्यसे ॥१८.५९॥
न रूपमस्येह तथोपलभ्यते ॥१५.३॥
न विकम्पितुमर्हसि ॥२.३१॥
न विमुञ्चति दुर्मेधाः ॥१८.३५॥
न वेदयज्ञाध्ययनैर्न दानैः ॥११.४८॥
न शक्नोषि मयि स्थिरम् ॥१२.९॥
न शशाङ्को न पावकः ॥१५.६॥
न शोचति न काङ्क्षति ॥१२.१७॥
न शोचति न काङ्क्षति ॥१८.५४॥
न शोषयति मारुतः ॥२.२३॥
न शौचं नापि चाचारः ॥१६.७॥
न श्रोष्यसि विनङ्क्ष्यसि ॥१८.५८॥
न स पश्यति दुर्मतिः ॥१८.१६॥
न स भूयोऽभिजायते ॥१३.२३॥
न स सिद्धिमवाप्नोति ॥१६.२३ ॥
न सत्तन्नासदुच्यते ॥१३.१२॥
न सत्यं तेषु विद्यते ॥१६.७॥
न सुखं न परां गतिम् ॥१६.२३ ॥
न सुखं संशयात्मनः ॥४.४०॥
न हन्ति न निबध्यते ॥१८.१७॥
न हन्यते हन्यमाने शरीरे ॥२.२०॥
न हि कल्याणकृत्कश्चित् ॥६.४०॥
न हि कश्चित्क्षणमपि ॥३.५॥
न हि ज्ञानेन सदृशम् ॥४.३८॥
न हि ते भगवन्व्यक्तिम् ॥१०.१४॥
न हि देहभृता शक्यम् ॥१८.११॥
न हि प्रजानामि तव प्रवृत्तिम् ॥११.३१॥
न हि प्रपश्यामि ममापनुद्याद् ॥२.८॥
न हिनस्त्यात्मनात्मानम् ॥१३.२८॥
न ह्यसंन्यस्तसङ्कल्पः ॥६.२॥
नकुलः सहदेवश्च ॥१.१६॥
नक्षत्राणामहं शशी ॥१०.२१॥
नचिरेणाधिगच्छति ॥५.६॥
नभःस्पृशं दीप्तमनेकवर्णम् ॥११.२४॥
नभश्च पृथिवीं चैव ॥१.१९॥
नमः पुरस्तादथ पृष्ठतस्ते ॥११.४०॥
नमस्कृत्वा भूय एवाह कृष्णम् ॥११.३५॥
नमस्यन्तश्च मां भक्त्या ॥९.१४॥
नमो नमस्तेऽस्तु सहस्रकृत्वः ॥११.३९॥
नमोऽस्तु ते देववर प्रसीद ॥११.३१॥
नमोऽस्तु ते सर्वत एव सर्व ॥११.४०॥
नरकेऽनियतं वासः ॥१.४४॥
नराणां च नराधिपम् ॥१०.२७॥
नवद्वारे पुरे देही ॥५.१३॥
नवानि गृह्णाति नरोऽपराणि ॥२.२२॥
नश्यत्सु न विनश्यति ॥८.२०॥
नष्टात्मानोऽल्पबुद्धयः ॥१६.९॥
नष्टो मोहः स्मृतिर्लब्धा ॥१८.७३॥
नाकृतेनेह कश्चन ॥३.१८॥
नात्यश्नतस्तु योगोऽस्ति ॥६.१६॥
नात्युच्छ्रितं नातिनीचम् ॥६.११॥
नादत्ते कस्यचित्पापम् ॥५.१५॥
नानवाप्तमवाप्तव्यम् ॥३.२२॥
नानाभावान्पृथग्विधान् ॥१८.२१॥
नानावर्णाकृतीनि च ॥११.५॥
नानाविधानि दिव्यानि ॥११.५॥
नानाशस्त्रप्रहरणाः ॥१.९॥
नानुतिष्ठन्ति मे मतम् ॥३.३२॥
नानुवर्तयतीह यः ॥३.१६॥
नानुशोचन्ति पण्डिताः ॥२.११॥
नानुशोचितुमर्हसि ॥२.२५॥
नान्तं न मध्यं न पुनस्तवादिम् ॥११.१६॥
नान्तो न चादिर्न च सम्प्रतिष्ठा ॥१५.३॥
नान्तोऽस्ति मम दिव्यानाम् ॥१०.४०॥

नान्यं गुणेभ्यः कर्तारम् ॥१४.१९॥
नान्यदस्तीति वादिनः ॥२.४२॥
नाप्नुवन्ति महात्मानः ॥८.१५॥
नाभक्ताय कदाचन ॥१८.६७॥
नाभावो विद्यते सतः ॥२.१६॥
नाभिनन्दति न द्वेष्टि ॥२.५७॥
नायं लोकोऽस्ति न परः ॥४.४०॥
नायं लोकोऽस्त्ययज्ञस्य ॥४.३१॥
नायं हन्ति न हन्यते ॥२.१९॥
नायका मम सैन्यस्य ॥१.७॥
नायम्भूत्वा भविता वा न भूयः ॥२.२०॥
नाशयाम्यात्मभावस्थः ॥१०.११॥
नासतो विद्यते भावः ॥२.१६॥
नासाभ्यन्तरचारिणौ ॥५.२७॥
नास्ति बुद्धिरयुक्तस्य ॥२.६६॥
नास्त्यन्तो विस्तरस्य मे ॥१०.१९॥
नाहं प्रकाशः सर्वस्य ॥७.२५॥
नाहं वेदैर्न तपसा ॥११.५३॥
निःश्रेयसकरावुभौ ॥५.२॥
निःस्पृहः सर्वकामेभ्यः ॥६.१८॥
निगृहीतानि सर्वशः ॥२.६८॥
निगृह्णाम्युत्सृजामि च ॥९.१९॥
निग्रहः किं करिष्यति ॥३.३३॥
नित्यं च समचित्तत्वम् ॥१३.९॥
नित्यं दर्शनकाङ्क्षिणः ॥११.५२॥
नित्यं यज्ञे प्रतिष्ठितम् ॥३.१५॥
नित्यं वा मन्यसे मृतम् ॥२.२६॥
नित्यः सर्वगतः स्थाणुः ॥२.२४॥
नित्यतृप्तो निराश्रयः ॥४.२०॥
नित्ययुक्तस्य योगिनः ॥८.१४॥
नित्ययुक्ता उपासते ॥१२.२॥
नित्ययुक्ता उपासते ॥९.१४॥
नित्यस्योक्ताः शरीरिणः ॥२.१८॥
निद्रालस्यप्रमादोत्थम् ॥१८.३९॥
निधानं बीजमव्ययम् ॥९.१८॥
निन्दन्तस्तव सामर्थ्यम् ॥२.३६॥
निबद्धः स्वेन कर्मणा ॥१८.६०॥
निबध्नन्ति धनञ्जय ॥४.४१॥
निबध्नन्ति धनञ्जय ॥९.९॥
निबध्नन्ति महाबाहो ॥१४.५॥
निबन्धायासुरी मता ॥१६.५॥
निमित्तमात्रं भव सव्यसाचिन् ॥११.३३॥
निमित्तानि च पश्यामि ॥१.३१॥
नियतं कुरु कर्म त्वम् ॥३.८॥
नियतं क्रियतेऽर्जुन ॥१८.९॥
नियतं सङ्गरहितम् ॥१८.२३॥
नियतस्य तु संन्यासः ॥१८.७॥
नियम्य भरतर्षभ । ॥३.४१॥
नियम्यारभतेऽर्जुन ॥३.७॥
नियोजयसि केशव ॥३.१॥
निराशीरपरिग्रहः ॥६.१०॥
निराशीर्निर्ममो भूत्वा ॥३.३०॥
निराशीर्यतचित्तात्मा ॥४.२१॥
निराहारस्य देहिनः ॥२.५९॥
निरुद्धं योगसेवया ॥६.२०॥
निर्गुणं गुणभोक्तृ च ॥१३.१४॥
निर्दोषं हि समं ब्रह्म ॥५.१९॥
निर्द्वन्द्वो नित्यसत्त्वस्थः ॥२.४५॥
निर्द्वन्द्वो हि महाबाहो ॥५.३॥
निर्ममो निरहङ्कारः ॥१२.१३॥
निर्ममो निरहङ्कारः ॥२.७१॥
निर्मानमोहा जितसङ्गदोषाः ॥१५.५॥
निर्योगक्षेम आत्मवान् ॥२.४५॥
निर्वैरः सर्वभूतेषु ॥११.५५॥
निवसिष्यसि मय्येव ॥१२.८॥
निवासः शरणं सुहृत् ॥९.१८॥
निश्चयं शृणु मे तत्र ॥१८.४॥
निश्चितं मतमुत्तमम् ॥१८.६॥
निष्ठा ज्ञानस्य या परा ॥१८.५०॥
निस्त्रैगुण्यो भवार्जुन ॥२.४५॥
निहत्य धार्तराष्ट्रान्नः ॥१.३६॥
नीतिरस्मि जिगीषताम् ॥१०.३८॥
नेङ्गते सोपमा स्मृता ॥६.१९ ॥
नेहाभिक्रमनाशोऽस्ति ॥२.४०॥
नैतत्त्वय्युपपद्यते ॥२.३॥
नैति मामेति सोऽर्जुन ॥४.९॥
नैते सृती पार्थ जानन् ॥८.२७॥
नैनं छिन्दन्ति शस्त्राणि ॥२.२३॥
नैनं दहति पावकः ॥२.२३॥
नैनं पश्यन्त्यचेतसः ॥१५.११॥
नैनां प्राप्य विमुह्यति ॥२.७२॥
नैव किञ्चित्करोति सः ॥४.२०॥
नैव किञ्चित्करोमीति ॥५.८॥
नैव कुर्वन्न कारयन् ॥५.१३॥
नैव तस्य कृतेनार्थः ॥३.१८॥
नैव त्यागफलं लभेत् ॥१८.८॥
नैवं पापमवाप्स्यसि ॥२.३८॥
नैवं शोचितुमर्हसि ॥२.२६॥
नैष्कर्म्यं पुरुषोऽश्नुते ॥३.४॥
नैष्कर्म्यसिद्धिं परमाम् ॥१८.४९॥
नोद्विजेत्प्राप्य चाप्रियम् ॥५.२०॥
न्याय्यं वा विपरीतं वा ॥१८.१५॥
पचाम्यन्नं चतुर्विधम् ॥१५.१४॥
पञ्च चेन्द्रियगोचराः ॥१३.५॥
पञ्चैतानि महाबाहो ॥१८.१३॥
पञ्चैते तस्य हेतवः ॥१८.१५॥
पणवानकगोमुखाः ॥१.१३॥
पण्डिताः समदर्शिनः ॥५.१८॥
पतन्ति नरकेऽशुचौ ॥१६.१६॥
पतन्ति पितरो ह्येषाम् ॥१.४२॥
पत्रं पुष्पं फलं तोयम् ॥९.२६॥
पदं गच्छन्त्यनामयम् ॥२.५१॥
पद्मपत्रमिवाम्भसा ॥५.१०॥
परं जन्म विवस्वतः ॥४.४॥
परं दृष्ट्वा निवर्तते ॥२.५९॥
परं ब्रह्म परं धाम ॥१०.१२॥
परं भावमजानन्तः ॥७.२४॥
परं भावमजानन्तः ॥९.११॥
परं भूयः प्रवक्ष्यामि ॥१४.१॥
परधर्मात्स्वनुष्ठितात् ॥३.३५॥
परधर्मात्स्वनुष्ठितात् ॥१८.४७॥
परधर्मो भयावहः ॥३.३५॥
परमं पुरुषं दिव्यम् ॥८.८॥
परमं रूपमैश्वरम् ॥११.९॥
परमात्मा समाहितः ॥६.७॥
परमात्मायमव्ययः ॥१३.३१॥
परमात्मेति चाप्युक्तः ॥१३.२२॥
परमात्मेत्युदाहृतः ॥१५.१७॥
परमाप्नोति पूरुषः ॥३.१९॥
परस्तस्मात्तु भावोऽन्यः ॥८.२०॥
परस्परं भावयन्तः ॥३.११॥
परस्योत्सादनार्थं वा ॥१७.१९॥
परां सिद्धिमितो गताः ॥१४.१॥
परिचर्यात्मकं कर्म ॥१८.४४॥
परिणामे विषमिव ॥१८.३८॥
परिणामेऽमृतोपमम् ॥१८.३७॥
परित्राणाय साधूनाम् ॥४.८॥
परिप्रश्नेन सेवया ॥४.३४॥
पर्जन्यादन्नसम्भवः ॥३.१४॥

पर्याप्तं त्विदमेतेषाम् ॥१.१०॥
पवनः पवतामस्मि ॥१०.३१॥
पवित्रं परमं भवान् ॥१०.१२॥
पवित्रमिदमुत्तमम् ॥९.२॥
पवित्रमिह विद्यते ॥४.३८॥
पश्य मे पार्थ रूपाणि ॥११.५॥
पश्य मे योगमैश्वरम् ॥११.८॥
पश्य मे योगमैश्वरम् ॥९.५॥
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन् ॥५.८॥
पश्यत्यकृतबुद्धित्वात् ॥१८.१६॥
पश्यन्ति ज्ञानचक्षुषः ॥१५.१०॥
पश्यन्त्यात्मन्यवस्थितम् ॥१५.११॥
पश्यन्नात्मनि तुष्यति ॥६.२०॥
पश्यादित्यान्वसून् रुद्रान् ॥११.६॥
पश्याद्य सचराचरम् ॥११.७॥
पश्यामि त्वां दीप्तहुताशवक्त्रम् ॥११.१९॥
पश्यामि त्वां दुर्निरीक्ष्यं समन्तात् ॥११.१७॥
पश्यामि त्वां सर्वतोऽनन्तरूपम् ॥११.१६॥
पश्यामि देवांस्तव देव देहे ॥११.१५॥
पश्यामि विश्वेश्वर विश्वरूप ॥११.१६॥
पश्याश्चर्याणि भारत ॥११.६॥
पश्यैतां पाण्डुपुत्राणाम् ॥१.३॥
पाञ्चजन्यं हृषीकेशः ॥१.१५॥
पाण्डवानां धनञ्जयः ॥१०.३७॥
पापं चरति पूरुषः ॥३.३६॥
पापमेवाश्रयेदस्मान् ॥१.३६॥
पापादस्मान्निवर्तितुम् ॥१.३९॥
पाप्मानं प्रजहि ह्येनम् ॥३.४१॥
पार्थ नैवेह नामुत्र ॥६.४०॥
पार्थ सम्पदमासुरीम् ॥१६.४॥
पार्थस्य च महात्मनः ॥१८.७४॥
पावनानि मनीषिणाम् ॥१८.५॥
पितासि लोकस्य चराचरस्य ॥११.४३॥
पिताहमस्य जगतः ॥९.१७॥
पितॄणामर्यमा चास्मि ॥१०.२९॥
पितॄनथ पितामहान् ॥१.२६॥
पितॄन्यान्ति पितृव्रताः ॥९.२५॥
पितेव पुत्रस्य सखेव सख्युः ॥११.४४॥
पीडया क्रियते तपः ॥१७.१९॥
पुण्यो गन्धः पृथिव्यां च ॥७.९॥
पुत्रदारगृहादिषु ॥१३.९॥
पुत्रान्पौत्रान्सखींस्तथा ॥१.२६॥
पुनरावर्तिनोऽर्जुन ॥८.१६॥
पुनर्जन्म न विद्यते ॥८.१६॥
पुनर्योगं च शंससि ॥५.१॥
पुनश्च भूयोऽपि नमो नमस्ते ॥११.३९॥
पुमांश्चरति निःस्पृहः ॥२.७१॥
पुरा प्रोक्ता मयानघ ॥३.३॥
पुरुजित्कुन्तिभोजश्च ॥१.५॥
पुरुषं पुरुषर्षभ ॥२.१५॥
पुरुषं शाश्वतं दिव्यम् ॥१०.१२॥
पुरुषः प्रकृतिस्थो हि ॥१३.२१॥
पुरुषः स परः पार्थ ॥८.२२॥
पुरुषः सुखदुःखानाम् ॥१३.२०॥
पुरुषश्चाधिदैवतम् ॥८.४॥
पुरुषस्य विपश्चितः ॥२.६०॥
पुरोधसां च मुख्यं माम् ॥१०.२४॥
पुरोवाच प्रजापतिः ॥३.१०॥
पुष्णामि चौषधीः सर्वाः ॥१५.१३॥
पूजनं शौचमार्जवम् ॥१७.१४॥
पूजार्हावरिसूदन ॥२.४॥
पूता मद्भावमागताः ॥४.१०॥
पूति पर्युषितं च यत् ॥१७.१०॥
पूर्वाभ्यासेन तेनैव ॥६.४४॥
पूर्वैः पूर्वतरं कृतम् ॥४.१५॥
पूर्वैरपि मुमुक्षुभिः ॥४.१५॥
पृच्छामि त्वां धर्मसम्मूढचेताः ॥२.७॥
पृथक्केशिनिषूदन ॥१८.१॥
पृथक्त्वेन तु यज्ज्ञानम् ॥१८.२१॥
पृथक्त्वेन धनञ्जय ॥१८.२९॥
पौण्ड्रं दध्मौ महाशङ्खम् ॥१.१५॥
प्रकाश उपजायते ॥१४.११॥
प्रकाशं च प्रवृत्तिं च ॥१४.२२॥
प्रकाशकमनामयम् ॥१४.६॥
प्रकाशयति तत्परम् ॥५.१६॥
प्रकाशयति भारत ॥१३.३३॥
प्रकृतिं च गुणैः सह ॥१३.२३॥
प्रकृतिं पुरुषं चैव ॥१३.१९॥
प्रकृतिं मोहिनीं श्रिताः ॥९.१२॥
प्रकृतिं यान्ति भूतानि ॥३.३३॥
प्रकृतिं यान्ति मामिकाम् ॥९.७॥
प्रकृतिं विद्धि मे पराम् ॥७.५॥
प्रकृतिं स्वामधिष्ठाय ॥४.६॥
प्रकृतिं स्वामवष्टभ्य ॥९.८॥
प्रकृतिस्त्वां नियोक्ष्यति ॥१८.५९॥
प्रकृतिस्थानि कर्षति ॥१५.७॥
प्रकृतेः क्रियमाणानि ॥३.२७॥
प्रकृतेर्गुणसम्मूढाः ॥३.२९॥
प्रकृतेर्ज्ञानवानपि ॥३.३३॥
प्रकृत्या नियताः स्वया ॥७.२०॥
प्रकृत्यैव च कर्माणि ॥१३.२९॥
प्रजनश्चास्मि कन्दर्पः ॥१०.२८॥
प्रजहाति यदा कामान् ॥२.५५॥
प्रजापतिस्त्वं प्रपितामहश्च ॥११.३९॥
प्रज्ञावादांश्च भाषसे ॥२.११॥
प्रणम्य शिरसा देवम् ॥११.१४॥
प्रणवः सर्ववेदेषु ॥७.८॥
प्रणष्टस्ते धनञ्जय ॥१८.७२॥
प्रतिजाने प्रियोऽसि मे ॥१८.६५॥
प्रत्यक्षावगमं धर्म्यम् ॥९.२॥
प्रत्यवायो न विद्यते ॥२.४०॥
प्रथितः पुरुषोत्तमः ॥१५.१८॥
प्रदुष्यन्ति कुलस्त्रियः ॥१.४१॥
प्रद्विषन्तोऽभ्यसूयकाः ॥१६.१८॥
प्रपद्यन्ते नराधमाः ॥७.१५॥
प्रपद्यन्तेऽन्यदेवताः ॥७.२०॥
प्रपश्यद्भिर्जनार्दन ॥१.३९॥
प्रभवं न महर्षयः ॥१०.२॥
प्रभवः प्रलयः स्थानम् ॥९.१८॥
प्रभवः प्रलयस्तथा ॥७.६॥
प्रभवत्यहरागमे ॥८.१९॥
प्रभवन्त्यहरागमे ॥८.१८॥
प्रभवन्त्युग्रकर्माणः ॥१६.९॥
प्रभास्मि शशिसूर्ययोः ॥७.८॥
प्रमाथि बलवद्दृढम् ॥६.३४॥
प्रमादमोहौ तमसः ॥१४.१७॥
प्रमादालस्यनिद्राभिः ॥१४.८॥
प्रमादे सञ्जयत्युत ॥१४.९॥
प्रमादो मोह एव च ॥१४.१३॥
प्रयत्नाद्यतमानस्तु ॥६.४५॥
प्रयाणकाले च कथम् ॥८.२॥
प्रयाणकाले मनसाचलेन ॥८.१०॥
प्रयाणकालेऽपि च माम् ॥७.३०॥
प्रयाता यान्ति तं कालम् ॥८.२३॥
प्रलपन्विसृजन्गृह्णन् ॥५.९॥
प्रलयं याति देहभृत् ॥१४.१४॥
प्रलयान्तामुपाश्रिताः ॥१६.११॥
प्रलये न व्यथन्ति च ॥१४.२॥
प्रवक्ष्याम्यनसूयवे ॥९.१॥

प्रवदन्ति न पण्डिताः ॥५.४॥
प्रवदन्त्यविपश्चितः ॥२.४२॥
प्रवर्तन्ते विधानोक्ताः ॥१७.२४॥
प्रवर्तन्तेऽशुचिव्रताः ॥१६.१०॥
प्रविभक्तम् अनेकधा ॥११.१३॥
प्रवृत्तिं च निवृत्तिं च ॥१६.७॥
प्रवृत्तिं च निवृत्तिं च ॥१८.३०॥
प्रवृत्ते शस्त्रसम्पाते ॥१.२०॥
प्रवेष्टुं च परन्तप ॥११.५४॥
प्रशस्ते कर्मणि तथा ॥१७.२६॥
प्रशान्तमनसं ह्येनम् ॥६.२७॥
प्रशान्तात्मा विगतभीः ॥६.१४॥
प्रसक्ताः कामभोगेषु ॥१६.१६॥
प्रसङ्गेन फलाकाङ्क्षी ॥१८.३४॥
प्रसन्नचेतसो ह्याशु ॥२.६५॥
प्रसादमधिगच्छति ॥२.६४॥
प्रसादये त्वामहमीशमीड्यम् ॥११.४४॥
प्रसादे सर्वदुःखानाम् ॥२.६५॥
प्रसीद देवेश जगन्निवास ॥११.२५॥
प्रसीद देवेश जगन्निवास ॥११.४५॥
प्रहसन्निव भारत ॥२.१०॥
प्रह्लादश्चास्मि दैत्यानाम् ॥१०.३०॥
प्राक्शरीरविमोक्षणात् ॥५.२३॥
प्राणकर्माणि चापरे ॥४.२७॥
प्राणान्प्राणेषु जुह्वति ॥४.३०॥
प्राणापानगती रुद्ध्वा ॥४.२९॥
प्राणापानसमायुक्तः ॥१५.१४॥
प्राणापानौ समौ कृत्वा ॥५.२७॥
प्राणायामपरायणाः ॥४.२९॥
प्राणिनां देहमाश्रितः ॥१५.१४॥
प्राणेऽपानं तथापरे ॥४.२९॥
प्राधान्यतः कुरुश्रेष्ठ ॥१०.१९॥
प्राप्नुयात्पुण्यकर्मणाम् ॥१८.७१॥
प्राप्य पुण्यकृताँल्लोकान् ॥६.४१॥
प्राहुस्त्यागं विचक्षणाः ॥१८.२॥
प्रियः प्रियायार्हसि देव सोढुम् ॥११.४४॥
प्रियो हि ज्ञानिनोऽत्यर्थम् ॥७.१७॥
प्रेतान्भूतगणांश्चान्ये ॥१७.४॥
प्रोक्तवानहमव्ययम् ॥४.१॥
प्रोच्यते गुणसङ्ख्याने ॥१८.१९॥
प्रोच्यमानमशेषेण ॥१८.२९॥
फलं त्यक्त्वा मनीषिणः ॥२.५१॥
फलं यज्ञतपःक्रियाः ॥१७.२५॥
फलमुद्दिश्य वा पुनः ॥१७.२१॥
फले सक्तो निबध्यते ॥५.१२॥
बन्धं मोक्षं च या वेत्ति ॥१८.३०॥
बन्धुरात्मात्मनस्तस्य ॥६.६ ॥
बलं बलवतां चाहम् ॥७.११॥
बलं भीमाभिरक्षितम् ॥१.१०॥
बलं भीष्माभिरक्षितम् ॥१.१०॥
बलादिव नियोजितः ॥३.३६॥
बहवो ज्ञानतपसा ॥४.१०॥
बहिरन्तश्च भूतानाम् ॥१३.१५॥
बहुधा विश्वतोमुखम् ॥९.१५॥
बहुशाखा ह्यनन्ताश्च ॥२.४१॥
बहूदरं बहुदंष्ट्राकरालम् ॥११.२३॥
बहूनां जन्मनामन्ते ॥७.१९॥
बहूनि मे व्यतीतानि ॥४.५॥
बहून्यदृष्टपूर्वाणि ॥११.६॥
बाह्यस्पर्शेष्वसक्तात्मा ॥५.२१॥
बिभर्त्यव्यय ईश्वरः ॥१५.१७॥
बीजं तदहमर्जुन ॥१०.३९॥
बीजं मां सर्वभूतानाम् ॥७.१०॥
बुद्धयोऽव्यवसायिनाम् ॥२.४१॥
बुद्धिं मोहयसीव मे ॥३.२॥
बुद्धिः पर्यवतिष्ठते ॥२.६५॥
बुद्धिः सा पार्थ तामसी ॥१८.३२॥
बुद्धिः सा पार्थ राजसी ॥१८.३१॥
बुद्धिः सा पार्थ सात्त्विकी ॥१८.३०॥
बुद्धिग्राह्यमतीन्द्रियम् ॥६.२१॥
बुद्धिनाशात्प्रणश्यति ॥२.६३॥
बुद्धियुक्तो जहातीह ॥२.५०॥
बुद्धियोगमुपाश्रित्य ॥१८.५७॥
बुद्धियोगाद्धनञ्जय ॥२.४९॥
बुद्धिरव्यक्तमेव च ॥१३.५॥
बुद्धिर्ज्ञानमसम्मोहः ॥१०.४॥
बुद्धिर्बुद्धिमतामस्मि ॥७.१०॥
बुद्धिर्यस्य न लिप्यते ॥१८.१७॥
बुद्धिर्योगे त्विमां शृणु ॥२.३९॥
बुद्धिर्व्यतितरिष्यति ॥२.५२॥
बुद्धेर्भेदं धृतेश्चैव ॥१८.२९॥
बुद्धौ शरणमन्विच्छ ॥२.४९॥
बुद्ध्या धृतिगृहीतया ॥६.२५॥
बुद्ध्या युक्तो यया पार्थ ॥२.३९॥
बुद्ध्या विशुद्धया युक्तः ॥१८.५१॥
बुधा भावसमन्विताः ॥१०.८॥
बृहत्साम तथा साम्नाम् ॥१०.३५॥
बोद्धव्यं च विकर्मणः ॥४.१७॥
बोधयन्तः परस्परम् ॥१०.९॥
ब्रह्म ब्रह्मविदो जनाः ॥८.२४॥
ब्रह्म सम्पद्यते तदा ॥१३.३०॥
ब्रह्मकर्म स्वभावजम् ॥१८.४२॥
ब्रह्मकर्मसमाधिना ॥४.२४॥
ब्रह्मचर्यमहिंसा च ॥१७.१४॥
ब्रह्मचारिव्रते स्थितः ॥६.१४॥
ब्रह्मणस्त्रिविधः स्मृतः ॥१७.२३॥
ब्रह्मणो हि प्रतिष्ठाहम् ॥१४.२७॥
ब्रह्मण्याधाय कर्माणि ॥५.१०॥
ब्रह्मनिर्वाणमृच्छति ॥२.७२॥
ब्रह्मभूतः प्रसन्नात्मा ॥१८.५४॥
ब्रह्मभूतमकल्मषम् ॥६.२७॥
ब्रह्मभूतोऽधिगच्छति ॥५.२४॥
ब्रह्मभूयाय कल्पते ॥१४.२६॥
ब्रह्मभूयाय कल्पते ॥१८.५३॥
ब्रह्मविद् ब्रह्मणि स्थितः ॥५.२०॥
ब्रह्मसूत्रपदैश्चैव ॥१३.४॥
ब्रह्माक्षरसमुद्भवम् ॥३.१५॥
ब्रह्माग्नावपरे यज्ञम् ॥४.२५॥
ब्रह्माग्नौ ब्रह्मणा हुतम् ॥४.२४॥
ब्रह्माणमीशं कमलासनस्थम् ॥११.१५॥
ब्रह्मार्पणं ब्रह्म हविः ॥४.२४॥
ब्रह्मैव तेन गन्तव्यम् ॥४.२४॥
ब्राह्मणक्षत्रियविशाम् ॥१८.४१॥
ब्राह्मणस्य विजानतः ॥२.४६॥
ब्राह्मणास्तेन वेदाश्च ॥१७.२३॥
ब्राह्मणे गवि हस्तिनि ॥५.१९॥
भक्ता राजर्षयस्तथा ॥९.३३॥
भक्तास्तेऽतीव मे प्रियाः ॥१२.२०॥
भक्तास्त्वां पर्युपासते ॥१२.१॥
भक्तिं मयि परां कृत्वा ॥१८.६८॥
भक्तिमान्मे प्रियो नरः ॥१२.१९॥
भक्तिमान्यः स मे प्रियः ॥१२.१७॥
भक्तियोगेन सेवते ॥१४.२६॥
भक्तिरव्यभिचारिणी ॥१३.१०॥
भक्तोऽसि मे सखा चेति ॥४.३॥
भक्त्या त्वनन्यया शक्यः ॥११.५४॥
भक्त्या मामभिजानाति ॥१८.५५॥
भक्त्या युक्तो योगबलेन चैव ॥८.१०॥
भक्त्या लभ्यस्त्वनन्यया ॥८.२२॥

भजतां प्रीतिपूर्वकम् ॥१०.१०॥
भजते मामनन्यभाक् ॥९.३०॥
भजत्येकत्वमास्थितः ॥६.३१॥
भजन्ते मां दृढव्रताः ॥७.२८॥
भजन्त्यनन्यमनसः ॥९.१३॥
भयं चाभयमेव च ॥१०.४॥
भयाद्रणादुपरतम् ॥२.३५॥
भयेन च प्रव्यथितं मनो मे ॥११.४५॥
भर्ता भोक्ता महेश्वरः ॥१३.२२॥
भवतीत्यनुशुश्रुम ॥१.४४॥
भवतोऽज्ञानमेव च ॥१४.१७॥
भवत्यत्यागिनां प्रेत्य ॥१८.१२॥
भवन्तः सर्व एव हि ॥१.११॥
भवन्ति भावा भूतानाम् ॥१०.५॥
भवन्ति सम्पदं दैवीम् ॥१६.३॥
भवान्भीष्मश्च कर्णश्च ॥१.८॥
भवाप्ययौ हि भूतानाम् ॥११.२॥
भवामि नचिरात्पार्थ ॥१२.७॥
भविता न च मे तस्मात् ॥१८.६९॥
भविष्यति पुनर्धनम् ॥१६.१३॥
भविष्याणि च भूतानि ॥७.२६॥
भवेद्युगपदुत्थिता ॥११.१२॥
भस्मसात्कुरुते तथा ॥४.३७॥
भस्मसात्कुरुतेऽर्जुन ॥४.३७॥
भावमव्ययमीक्षते ॥१८.२०॥
भावसंशुद्धिरित्येतत् ॥१७.१६॥
भासस्तवोग्राः प्रतपन्ति विष्णो ॥११.३०॥
भासस्तस्य महात्मनः ॥११.१२॥
भिन्ना प्रकृतिरष्टधा ॥७.४॥
भीमकर्मा वृकोदरः ॥१.१५॥
भीमार्जुनसमा युधि ॥१.४॥
भीष्मद्रोणप्रमुखतः ॥१.२५॥
भीष्ममेवाभिरक्षन्तु ॥१.११॥
भीष्मो द्रोणः सूतपुत्रस्तथासौ ॥११.२६॥
भुङ्क्ते प्रकृतिजान्गुणान् ॥१३.२१॥
भुञ्जते ते त्वघं पापाः ॥३.१३॥
भुञ्जानं वा गुणान्वितम् ॥१५.१०॥
भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥२.५॥
भूतग्रामः स एवायम् ॥८.१९॥
भूतग्राममचेतसः ॥१७.६॥
भूतग्राममिमं कृत्स्नम् ॥९.८॥
भूतप्रकृतिमोक्षं च ॥१३.३४॥
भूतभर्तृ च तज्ज्ञेयम् ॥१३.१६॥
भूतभावन भूतेश ॥१०.१५॥
भूतभावोद्भवकरः ॥८.३॥
भूतभृन्न च भूतस्थः ॥९.५॥
भूतानामन्त एव च ॥१०.२०॥
भूतानामस्मि चेतना ॥१०.२२॥
भूतानामीश्वरोऽपि सन् ॥४.६॥
भूतानि यान्ति भूतेज्या ॥९.२५॥
भूत्वा पुनः सौम्यवपुर्महात्मा ॥११.५०॥
भूत्वा भूत्वा प्रलीयते ॥८.१९॥
भूत्वा यास्यसि लाघवम् ॥२.३५॥
भूमिरापोऽनलो वायुः ॥७.४॥
भूय एव महाबाहो ॥१०.१॥
भूयः कथय तृप्तिर्हि ॥१०.१८॥
भोक्ता च प्रभुरेव च ॥९.२४॥
भोक्तारं यज्ञतपसाम् ॥५.२९॥
भोक्तृत्वे हेतुरुच्यते ॥१३.२०॥
भोगैश्वर्यगतिं प्रति ॥२.४३॥
भोगैश्वर्यप्रसक्तानाम् ॥२.४४॥
भोजनं तामसप्रियम् ॥१७.१०॥
भ्रमतीव च मे मनः ॥१.३०॥
भ्रामयन्सर्वभूतानि ॥१८.६१॥
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् ॥८.१०॥
मंस्यन्ते त्वां महारथाः ॥२.३५॥
मच्चित्तः सततं भव ॥१८.५७॥
मच्चित्तः सर्वदुर्गाणि ॥१८.५८॥
मच्चित्ता मद्गतप्राणाः ॥१०.९॥
मता बुद्धिर्जनार्दन ॥३.१॥
मत्कर्मकृन्मत्परमः ॥११.५५॥
मत्कर्मपरमो भव ॥१२.१०॥
मत्त एव पृथग्विधाः ॥१०.५॥
मत्त एवेति तान्विद्धि ॥७.१२॥
मत्तः परतरं नान्यत् ॥७.७॥
मत्तः सर्वं प्रवर्तते । ॥१०.८॥
मत्तः स्मृतिर्ज्ञानमपोहनं च ॥१५.१५॥
मत्प्रसादात्तरिष्यसि ॥१८.५८॥
मत्प्रसादादवाप्नोति ॥१८.५६॥
मत्संस्थामधिगच्छति ॥६.१५॥
मत्स्थानि सर्वभूतानि ॥९.४॥
मत्स्थानीत्युपधारय ॥९.६॥
मदनुग्रहाय परमम् ॥११.१॥
मदर्थमपि कर्माणि ॥१२.१०॥
मदर्थे त्यक्तजीविताः ॥१.९॥
मद्गतेनान्तरात्मना ॥६.४७॥
मद्भक्त एतद्विज्ञाय ॥१३.१८॥
मद्भक्तः सङ्गवर्जितः ॥११.५५॥
मद्भक्ता यान्ति मामपि ॥७.२३॥
मद्भक्तिं लभते पराम् ॥१८.५४॥
मद्भक्तेष्वभिधास्यति ॥१८.६८॥
मद्भावं सोऽधिगच्छति ॥१४.१९॥
मद्भावा मानसा जाताः ॥१०.६॥
मद्भावायोपपद्यते ॥१३.१८॥
मद्याजी मां नमस्कुरु ॥१८.६५॥
मद्याजी मां नमस्कुरु ॥९.३४॥
मध्यं चैवाहमर्जुन ॥१०.३२॥
मध्यस्थद्वेष्यबन्धुषु ॥६.९॥
मध्ये तिष्ठन्ति राजसाः ॥१४.१८॥
मनः संयम्य मच्चित्तः ॥६.१४॥
मनःप्रसादः सौम्यत्वम् ॥१७.१६॥
मनःप्राणेन्द्रियक्रियाः ॥१८.३३॥
मनःषष्ठानीन्द्रियाणि ॥१५.७॥
मनश्चञ्चलमस्थिरम् ॥६.२६॥
मनसस्तु परा बुद्धिः ॥३.४२॥
मनसैवेन्द्रियग्रामम् ॥६.२४॥
मनुरिक्ष्वाकवेऽब्रवीत् ॥४.१॥
मनुष्याः पार्थ सर्वशः ॥३.२३॥
मनुष्याः पार्थ सर्वशः ॥४.११॥
मनुष्याणां जनार्दन ॥१.४४॥
मनुष्याणां सहस्रेषु ॥७.३॥
मनो दुर्निग्रहं चलम् ॥६.३५॥
मनो हृदि निरुध्य च ॥८.१२॥
मन्त्रहीनमदक्षिणम् ॥१७.१३॥
मन्त्रोऽहमहमेवाज्यम् ॥९.१६॥
मन्मना भव मद्भक्तः ॥१८.६५॥
मन्मना भव मद्भक्तः ॥९.३४॥
मन्मया मामुपाश्रिताः ॥४.१०॥
मन्यते तमसावृता ॥१८.३२॥
मन्यते नाधिकं ततः ॥६.२२ ॥
मन्यन्ते मामबुद्धयः ॥७.२४॥
मन्यसे यदि तच्छक्यम् ॥११.४॥
मम तेजोंऽशसम्भवम् ॥१०.४१॥
मम देहे गुडाकेश ॥११.७॥
मम भूतमहेश्वरम् ॥९.११॥
मम माया दुरत्यया ॥७.१४॥
मम यो वेत्ति तत्त्वतः ॥१०.७॥
मम योनिर्महद्ब्रह्म ॥१४.३॥
मम वर्त्मानुवर्तन्ते ॥३.२३॥

मम वर्त्मानुवर्तन्ते ॥४.११॥
मम साधर्म्यमागताः ॥१४.२॥
ममात्मा भूतभावनः ॥९.५॥
ममाव्ययमनुत्तमम् ॥७.२४॥
ममैवांशो जीवलोके ॥१५.७॥
मया ततमिदं सर्वम् ॥९.४॥
मया द्रष्टुमिति प्रभो ॥११.४॥
मया प्रमादात्प्रणयेन वापि ॥११.४१॥
मया प्रसन्नेन तवार्जुनेदम् ॥११.४७॥
मया भूतं चराचरम् ॥१०.३९॥
मया हतांस्त्वं जहि मा व्यथिष्ठा ॥११.३४॥
मयाध्यक्षेण प्रकृतिः ॥९.१०॥
मयि चानन्ययोगेन ॥१३.१०॥
मयि ते तेषु चाप्यहम् ॥९.२९॥
मयि बुद्धिं निवेशय ॥१२.८॥
मयि संन्यस्य मत्परः ॥१८.५७॥
मयि संन्यस्य मत्पराः ॥१२.६॥
मयि सर्वमिदं प्रोतम् ॥७.७॥
मयि सर्वाणि कर्माणि ॥३.३०॥
मयैव विहितान्हि तान् ॥७.२२॥
मयैवैते निहताः पूर्वमेव ॥११.३३॥
मय्यर्पितमनोबुद्धिः ॥१२.१४॥
मय्यर्पितमनोबुद्धिः ॥८.७॥
मय्यावेशितचेतसाम् ॥१२.७॥
मय्यावेश्य मनो ये माम् ॥१२.२॥
मय्यासक्तमनाः पार्थ ॥७.१॥
मय्येव मन आधत्स्व ॥१२.८॥
मरणादतिरिच्यते ॥२.३४॥
मरीचिर्मरुतामस्मि ॥१०.२१॥
महति स्यन्दने स्थितौ ॥१.१४॥
महर्षयः सप्त पूर्वे ॥१०.६॥
महर्षीणां च सर्वशः ॥१०.२॥
महर्षीणां भृगुरहम् ॥१०.२५॥
महात्मानस्तु मां पार्थ ॥९.१३॥
महाबाहो बहुबाहूरुपादम् ॥११.२३॥
महाभूतान्यहङ्कारः ॥१३.५॥
महायोगेश्वरो हरिः ॥११.९॥
महाशनो महापाप्मा ॥३.३७॥
मा कर्मफलहेतुर्भूः ॥२.४७॥
मा ते व्यथा मा च विमूढभावः ॥११.४९॥
मा ते सङ्गोऽस्त्वकर्मणि ॥२.४७॥
मा फलेषु कदाचन ॥२.४७॥
मा शुचः सम्पदं दैवीम् ॥१६.५॥
मां च योऽव्यभिचारेण ॥१४.२६॥
मां चैवान्तःशरीरस्थम् ॥१७.६॥
मां तु वेद न कश्चन ॥७.२६॥
मां ध्यायन्त उपासते ॥१२.६॥
मां हि पार्थ व्यपाश्रित्य ॥९.३२॥
माता धाता पितामहः ॥९.१७॥
मातुलाः श्वशुराः पौत्राः ॥१.३४॥
मात्रास्पर्शास्तु कौन्तेय ॥२.१४॥
माधवः पाण्डवश्चैव ॥१.१४॥
मानापमानयोस्तुल्यः ॥१४.२५॥
मानुषीं तनुमाश्रितम् ॥९.११॥
मामकाः पाण्डवाश्चैव ॥१.१॥
मामनुस्मर युद्ध्य च ॥८.७॥
मामप्राप्यैव कौन्तेय ॥१६.२०॥
मामात्मपरदेहेषु ॥१६.१८॥
मामाश्रित्य यतन्ति ये ॥७.२९॥
मामिच्छाप्तुं धनञ्जय ॥१२.९॥
मामुपेत्य तु कौन्तेय ॥८.१६॥
मामुपेत्य पुनर्जन्म ॥८.१५॥
मामेकं शरणं व्रज ॥१८.६६॥
मामेभ्यः परमव्ययम् ॥७.१३॥
मामेव ये प्रपद्यन्ते ॥७.१४॥
मामेवानुत्तमां गतिम् ॥७.१८॥
मामेवैष्यत्यसंशयः ॥१८.६८॥
मामेवैष्यसि युक्त्वैवम् ॥९.३४॥
मामेवैष्यसि सत्यं ते ॥१८.६५॥
मामेवैष्यस्यसंशयम् ॥८.७॥
माययापहृतज्ञानाः ॥७.१५॥
मायामेतां तरन्ति ते ॥७.१४॥
मार्दवं ह्रीरचापलम् ॥१६.२॥
मासानां मार्गशीर्षोऽहम् ॥१०.३५॥
माहात्म्यमपि चाव्ययम् ॥११.२॥
मित्रद्रोहे च पातकम् ॥१.३८॥
मिथ्याचारः स उच्यते ॥३.६॥
मिथ्यैष व्यवसायस्ते ॥१८.५९॥
मुक्तसङ्गः समाचर ॥३.९॥
मुक्तसङ्गोऽनहंवादी ॥१८.२६॥
मुक्तो यः स च मे प्रियः ॥१२.१५॥
मुखं च परिशुष्यति ॥१.२९॥
मुच्यन्ते तेऽपि कर्मभिः ॥३.३१॥
मुच्यन्ते सर्वकिल्बिषैः ॥३.१३॥
मुनिर्मोक्षपरायणः ॥५.२८॥
मुनीनामप्यहं व्यासः ॥१०.३७॥
मूढग्राहेणात्मनो यत् ॥१७.१९॥
मूढयोनिषु जायते ॥१४.१५॥
मूढा जन्मनि जन्मनि ॥१६.२०॥
मूढोऽयं नाभिजानाति ॥७.२५॥
मूर्तयः सम्भवन्ति याः ॥१४.४॥
मूर्ध्न्याधायात्मनः प्राणम् ॥८.१२॥
मृगाणां च मृगेन्द्रोऽहम् ॥१०.३०॥
मृत्युं श्रुतिपरायणाः ॥१३.२५॥
मृत्युः सर्वहरश्चाहम् ॥१०.३४॥
मृत्युसंसारवर्त्मनि ॥९.३॥
मृत्युसंसारसागरात् ॥१२.७॥
मेधावी छिन्नसंशयः ॥१८.१०॥
मेरुः शिखरिणामहम् ॥१०.२३॥
मैत्रः करुण एव च ॥१२.१३॥
मोक्षयिष्यामि मा शुचः ॥१८.६६॥
मोक्ष्यसे कर्मबन्धनैः ॥९.२८॥
मोघं पार्थ स जीवति ॥३.१६॥
मोघज्ञाना विचेतसः ॥९.१२॥
मोघाशा मोघकर्माणः ॥९.१२॥
मोहजालसमावृताः ॥१६.१६॥
मोहनं सर्वदेहिनाम् ॥१४.८॥
मोहमेव च पाण्डव ॥१४.२२॥
मोहात्तस्य परित्यागः ॥१८.७॥
मोहादारभ्यते कर्म ॥१८.२५॥
मोहाद् गृहीत्वाऽसद्ग्राहान् ॥१६.१०॥
मोहितं नाभिजानाति ॥७.१३॥
मोहोऽयं विगतो मम ॥११.१॥
मौनं चैवास्मि गुह्यानाम् ॥१०.३८॥
मौनमात्मविनिग्रहः ॥१७.१६॥
य आस्ते मनसा स्मरन् ॥३.६॥
य इमं परमं गुह्यम् ॥१८.६८॥
य एतेऽत्र समागताः ॥१.२३॥
य एनं वेत्ति हन्तारम् ॥२.१९॥
य एनमजमव्ययम् ॥२.२१॥
य एवं वेत्ति पुरुषम् ॥१३.२३॥
यं प्राप्य न निवर्तन्ते ॥८.२१॥
यं यं वापि स्मरन्भावम् ॥८.६॥
यं लब्ध्वा चापरं लाभम् ॥६.२२ ॥
यं संन्यासमिति प्राहुः ॥६.२॥
यं हि न व्यथयन्त्येते ॥२.१५॥
यः पश्यति तथात्मानम् ॥१३.२९॥
यः पश्यति स पश्यति ॥१३.२७॥
यः पश्यति स पश्यति ॥५.५॥

यः प्रयाति त्यजन्देहम् ॥८.१३॥
यः प्रयाति स मद्भावम् ॥८.५॥
यः शास्त्रविधिमुत्सृज्य ॥१६.२३ ॥
यः स मामेति पाण्डव ॥११.५५॥
यः स सर्वेषु भूतेषु ॥८.२०॥
यः सदा मुक्त एव सः ॥५.२८॥
यः सर्वत्रानभिस्नेहः ॥२.५७॥
यक्षरक्षांसि राजसाः ॥१७.४॥
यक्ष्ये दास्यामि मोदिष्ये ॥१६.१५॥
यच्चन्द्रमसि यच्चाग्नौ ॥१५.१२॥
यच्चान्यद्द्रष्टुमिच्छसि ॥११.७॥
यच्चापि सर्वभूतानाम् ॥१०.३९॥
यच्चाप्युत्क्रामतीश्वरः ॥१५.८॥
यच्चावहासार्थमसत्कृतोऽसि ॥११.४२॥
यच्छोकमुच्छोषणमिन्द्रियाणाम् ॥२.८॥
यच्छ्रेय एतयोरेकम् ॥५.१॥
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे ॥२.७॥
यजन्त इह देवताः ॥४.१२॥
यजन्ते तामसा जनाः ॥१७.४॥
यजन्ते नामयज्ञैस्ते ॥१६.१७॥
यजन्ते श्रद्धयान्विताः ॥१७.१॥
यजन्ते श्रद्धयान्विताः ॥९.२३॥
यजन्ते सात्त्विका देवान् ॥१७.४॥
यजन्तो मामुपासते ॥९.१५॥
यजन्त्यविधिपूर्वकम् ॥९.२३॥
यज्जुहोषि ददासि यत् ॥९.२७॥
यज्ज्ञात्वा न पुनर्मोहम् ॥४.३५॥
यज्ज्ञात्वा नेह भूयोऽन्यत् ॥७.२॥
यज्ज्ञात्वा मुनयः सर्वे ॥१४.१॥
यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥४.१६॥
यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥९.१॥
यज्ज्ञात्वामृतमश्नुते ॥१३.१२॥
यज्ञः कर्मसमुद्भवः ॥३.१४॥
यज्ञक्षपितकल्मषाः ॥४.३०॥
यज्ञदानतपःकर्म ॥१८.३॥
यज्ञदानतपःकर्म ॥१८.५॥
यज्ञदानतपःक्रियाः ॥१७.२४॥
यज्ञशिष्टामृतभुजः ॥४.३१॥
यज्ञशिष्टाशिनः सन्तः ॥३.१३॥
यज्ञस्तपस्तथा दानम् ॥१७.७॥
यज्ञाद्भवति पर्जन्यः ॥३.१४॥
यज्ञानां जपयज्ञोऽस्मि ॥१०.२५॥
यज्ञायाचरतः कर्म ॥४.२३॥
यज्ञार्थात्कर्मणोऽन्यत्र ॥३.९॥
यज्ञाश्च विहिताः पुरा ॥१७.२३॥
यज्ञे तपसि दाने च ॥१७.२७॥
यज्ञेनैवोपजुह्वति ॥४.२५॥
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ॥९.२०॥
यज्ञो दानं तपश्चैव ॥१८.५॥
यतः प्रवृत्तिः प्रसृता पुराणी ॥१५.४॥
यतः प्रवृत्तिर्भूतानाम् ॥१८.४६॥
यतचित्तेन्द्रियक्रियः ॥६.१२॥
यततामपि सिद्धानाम् ॥७.३॥
यतते च ततो भूयः ॥६.४३॥
यततो ह्यपि कौन्तेय ॥२.६०॥
यतन्तश्च दृढव्रताः ॥९.१४॥
यतन्तो योगिनश्चैनम् ॥१५.११॥
यतन्तोऽप्यकृतात्मानः ॥१५.११॥
यतयः संशितव्रताः ॥४.२८॥
यतवाक्कायमानसः ॥१८.५२॥
यतात्मा दृढनिश्चयः ॥१२.१४॥
यतीनां यतचेतसाम् ॥५.२६॥
यतेन्द्रियमनोबुद्धिः ॥५.२८॥
यतो यतो निश्चरति ॥६.२६॥
यत्करोषि यदश्नासि ॥९.२७॥
यत्तज्ज्ञानं मतं मम ॥१३.२॥
यत्तत्तामसमुच्यते ॥१८.२५॥
यत्तत्सात्त्विकमुच्यते ॥१८.२३॥
यत्तदग्रे विषमिव ॥१८.३७॥
यत्तदग्रेऽमृतोपमम् ॥१८.३८॥
यत्तपस्यसि कौन्तेय ॥९.२७॥
यत्तु कामेप्सुना कर्म ॥१८.२४॥
यत्तु कृत्स्नवदेकस्मिन् ॥१८.२२॥
यत्तु प्रत्युपकारार्थम् ॥१७.२१॥
यत्तेऽहं प्रीयमाणाय ॥१०.१॥
यत्त्वयोक्तं वचस्तेन ॥११.१॥
यत्र काले त्वनावृत्तिम् ॥८.२३॥
यत्र चैवात्मनात्मानम् ॥६.२०॥
यत्र पार्थो धनुर्धरः ॥१८.७८॥
यत्र योगेश्वरः कृष्णः ॥१८.७८॥
यत्रोपरमते चित्तम् ॥६.२०॥
यत्साङ्ख्यैः प्राप्यते स्थानम् ॥५.५॥
यथा कुर्वन्ति भारत ॥३.२५॥
यथा ज्ञास्यसि तच्छृणु ॥७.१॥
यथा दीपो निवातस्थः ॥६.१९ ॥
यथा नदीनां बहवोऽम्बुवेगाः ॥११.२८॥
यथा प्रकाशयत्येकः ॥१३.३३॥
यथा प्रदीप्तं ज्वलनं पतङ्गाः ॥११.२९॥
यथा विन्दति तच्छृणु ॥१८.४५॥
यथा सर्वगतं सौक्ष्म्यात् ॥१३.३२॥
यथाकाशस्थितो नित्यम् ॥९.६॥
यथादर्शो मलेन च ॥३.३८॥
यथाभागमवस्थिताः ॥१.११॥
यथावच्छृणु तान्यपि ॥१८.१९॥
यथेच्छसि तथा कुरु ॥१८.६३॥
यथैधांसि समिद्धोऽग्निः ॥४.३७॥
यथोक्तं पर्युपासते ॥१२.२०॥
यथोल्बेनावृतो गर्भः ॥३.३८॥
यदक्षरं वेदविदो वदन्ति ॥८.११॥
यदग्रे चानुबन्धे च ॥१८.३९॥
यदा ते मोहकलिलम् ॥२.५२॥
यदा द्रष्टानुपश्यति ॥१४.१९॥
यदा भूतपृथग्भावम् ॥१३.३०॥
यदा यदा हि धर्मस्य ॥४.७॥
यदा विनियतं चित्तम् ॥६.१८॥
यदा संहरते चायम् ॥२.५८॥
यदा सत्त्वे प्रवृद्धे तु ॥१४.१४॥
यदा स्थास्यति निश्चला ॥२.५३॥
यदा हि नेन्द्रियार्थेषु ॥६.४॥
यदादित्यगतं तेजः ॥१५.१२॥
यदि भाः सदृशी सा स्यात् ॥११.१२॥
यदि मामप्रतीकारम् ॥१.४६॥
यदि ह्यहं न वर्तेयम् ॥३.२३॥
यदिच्छन्तो ब्रह्मचर्यं चरन्ति ॥८.११॥
यदृच्छया चोपपन्नम् ॥२.३२॥
यदृच्छालाभसन्तुष्टः ॥४.२२॥
यदेभिः स्यात् त्रिभिर्गुणैः ॥१८.४०॥
यद्गत्वा न निवर्तन्ते ॥१५.६॥
यद्यदाचरति श्रेष्ठः ॥३.२१॥
यद्यद्विभूतिमत्सत्त्वम् ॥१०.४१॥
यद्यप्येते न पश्यन्ति ॥१.३८॥
यद्यहङ्कारमाश्रित्य ॥१८.५९॥
यद्राज्यसुखलोभेन ॥१.४५॥
यद्वा जयेम यदि वा नो जयेयुः ॥२.६॥
यद्विकारि यतश्च यत् ॥१३.३॥
यन्त्रारूढानि मायया ॥१८.६१॥
यन्मनोऽनुविधीयते ॥२.६७॥
यन्मां वदसि केशव ॥१०.१४॥
यन्मे त्वदन्येन न दृष्टपूर्वम् ॥११.४७॥

यमः संयमतामहम् ॥१०.२९॥
यया तु धर्मकामार्थान् ॥१८.३४॥
यया धर्ममधर्मं च ॥१८.३१॥
यया स्वप्नं भयं शोकम् ॥१८.३५॥
ययेदं धार्यते जगत् ॥७.५॥
यश्चैनं मन्यते हतम् ॥२.१९॥
यष्टव्यमेवेति मनः ॥१७.११॥
यस्तं वेद स वेदवित् ॥१५.१॥
यस्तु कर्मफलत्यागी ॥१८.११॥
यस्त्वात्मरतिरेव स्यात् ॥३.१७॥
यस्त्विन्द्रियाणि मनसा ॥३.७॥
यस्मात्क्षरमतीतोऽहम् ॥१५.१८॥
यस्मान्नोद्विजते लोकः ॥१२.१५॥
यस्मिन्गता न निवर्तन्ति भूयः ॥१५.४॥
यस्मिन्स्थितो न दुःखेन ॥६.२२ ॥
यस्य नाहङ्कृतो भावः ॥१८.१७॥
यस्य सर्वे समारम्भाः ॥४.१९॥
यस्यां जाग्रति भूतानि ॥२.६९॥
यस्यान्तःस्थानि भूतानि ॥८.२२॥
या निशा सर्वभूतानाम् ॥२.६९॥
यातयामं गतरसम् ॥१७.१०॥
याति नास्त्यत्र संशयः ॥८.५॥
याति पार्थानुचिन्तयन् ॥८.८॥
यानेव हत्वा न जिजीविषामः ॥२.६॥
यान्ति देवव्रता देवान् ॥९.२५॥
यान्ति ब्रह्म सनातनम् ॥४.३१॥
यान्ति मद्याजिनोऽपि माम् ॥९.२५॥
याभिर्विभूतिभिर्लोकान् ॥१०.१६॥
यामिमां पुष्पितां वाचम् ॥२.४२॥
यावत्सञ्जायते किञ्चित् ॥१३.२६॥
यावदेतान्निरीक्षेऽहम् ॥१.२२॥
यावानर्थ उदपाने ॥२.४६॥
यावान्यश्चास्मि तत्त्वतः ॥१८.५५॥
युक्त असीत मत्परः ॥६.१४॥
युक्त आसीत मत्परः ॥२.६१॥
युक्त इत्युच्यते तदा ॥६.१८॥
युक्त इत्युच्यते योगी ॥६.८॥
युक्तः कर्मफलं त्यक्त्वा ॥५.१२॥
युक्तचेष्टस्य कर्मसु ॥६.१७॥
युक्तस्वप्नावबोधस्य ॥६.१७॥
युक्ताहारविहारस्य ॥६.१७॥
युक्तो मन्येत तत्त्ववित् ॥५.८॥
युज्यते नात्र संशयः ॥१०.७॥
युञ्जतो योगमात्मनः ॥६.१९ ॥
युञ्जन्नेवं सदात्मानम् ॥६.१५॥
युञ्जन्नेवं सदात्मानम् ॥६.२८॥
युद्धाय कृतनिश्चयः ॥२.३७॥
युद्धे चाप्यपलायनम् ॥१८.४३॥
युद्धे प्रियचिकीर्षवः ॥१.२३॥
युधामन्युश्च विक्रान्तः ॥१.६॥
युध्यस्व जेतासि रणे सपत्नान् ॥११.३४॥
युध्यस्व विगतज्वरः ॥३.३०॥
युयुत्सुं समुपस्थितम् ॥१.२८॥
युयुधानो विराटश्च ॥१.४॥
ये चाप्यक्षरमव्यक्तम् ॥१२.१॥
ये चैव सात्त्विका भावा ॥७.१२॥
ये जनाः पर्युपासते ॥९.२२॥
ये तु धर्म्यामृतमिदम् ॥१२.२०॥
ये तु सर्वाणि कर्माणि ॥१२.६॥
ये त्वक्षरमनिर्देश्यम् ॥१२.३॥
ये त्वेतदभ्यसूयन्तः ॥३.३२॥
ये पचन्त्यात्मकारणात् ॥३.१३॥
ये भजन्ति तु मां भक्त्या ॥९.२९॥
ये मे मतमिदं नित्यम् ॥३.३१॥
ये यथा मां प्रपद्यन्ते ॥४.११॥
ये विदुर्यान्ति ते परम् ॥१३.३४॥
ये शास्त्रविधिमुत्सृज्य ॥१७.१॥
ये हि संस्पर्शजा भोगाः ॥५.२२॥
येऽपि स्युः पापयोनयः ॥९.३२॥
येऽप्यन्यदेवता भक्ताः ॥९.२३॥
येऽवस्थिताः प्रत्यनीकेषु योधाः ॥११.३२॥
येन भूतान्यशेषेण ॥४.३५॥
येन मामुपयान्ति ते ॥१०.१०॥
येन श्रेयोऽहमाप्नुयाम् ॥३.२॥
येन सर्वमिदं ततम् ॥१८.४६॥
येन सर्वमिदं ततम् ॥२.१७॥
येन सर्वमिदं ततम् ॥८.२२॥
येनात्मैवात्मना जितः ॥६.६ ॥
येषां च त्वं बहुमतः ॥२.३५॥
येषां त्वन्तगतं पापम् ॥७.२८॥
येषां नाशितमात्मनः ॥५.१६॥
येषां लोक इमाः प्रजाः ॥१०.६॥
येषां साम्ये स्थितं मनः ॥५.१९॥
येषामर्थे काङ्क्षितं नः ॥१.३३॥
यो न द्वेष्टि न काङ्क्षति ॥५.३॥
यो न हृष्यति न द्वेष्टि ॥१२.१७॥
यो बुद्धेः परतस्तु सः ॥३.४२॥
यो भुङ्क्ते स्तेन एव सः ॥३.१२॥
यो मद्भक्तः स मे प्रियः ॥१२.१४॥
यो मद्भक्तः स मे प्रियः ॥१२.१६॥
यो मां पश्यति सर्वत्र ॥६.३०॥
यो मां स्मरति नित्यशः ॥८.१४॥
यो मामजमनादिं च ॥१०.३॥
यो मामेवमसम्मूढः ॥१५.१९॥
यो मे भक्त्या प्रयच्छति ॥९.२६॥
यो यच्छ्रद्धः स एव सः ॥१७.३॥
यो यो यां यां तनुं भक्तः ॥७.२१॥
यो लोकत्रयमाविश्य ॥१५.१७॥
योऽन्तःसुखोऽन्तरारामः ॥५.२४॥
योऽयं योगस्त्वया प्रोक्तः ॥६.३३॥
योऽवतिष्ठति नेङ्गते ॥१४.२३॥
योगं तं विद्धि पाण्डव ॥६.२॥
योगं युञ्जन्मदाश्रयः ॥७.१॥
योगं योगेश्वरात्कृष्णात् ॥१८.७५॥
योगः कर्मसु कौशलम् ॥२.५०॥
योगः प्रोक्तः पुरातनः ॥४.३॥
योगक्षेमं वहाम्यहम् ॥९.२२॥
योगभ्रष्टोऽभिजायते ॥६.४१॥
योगमात्मविशुद्धये ॥६.१२॥
योगमायासमावृतः ॥७.२५॥
योगयज्ञास्तथापरे ॥४.२८॥
योगयुक्तो भवार्जुन ॥८.२७॥
योगयुक्तो मुनिर्ब्रह्म ॥५.६॥
योगयुक्तो विशुद्धात्मा ॥५.७॥
योगसंन्यस्तकर्माणम् ॥४.४१॥
योगस्थः कुरु कर्माणि ॥२.४८॥
योगाच्चलितमानसः ॥६.३७॥
योगारूढस्तदोच्यते ॥६.४॥
योगारूढस्य तस्यैव ॥६.३॥
योगिनं सुखमुत्तमम् ॥६.२७॥
योगिनः कर्म कुर्वन्ति ॥५.११ ॥
योगिनः पर्युपासते ॥४.२५॥
योगिनामपि सर्वेषाम् ॥६.४७॥
योगिनो यतचित्तस्य ॥६.१९ ॥
योगी नियतमानसः ॥६.१५॥
योगी परं स्थानमुपैति चाद्यम् ॥८.२८॥
योगी प्राप्य निवर्तते ॥८.२५॥
योगी भवति कश्चन ॥६.२॥
योगी मुह्यति कश्चन ॥८.२७॥

योगी युञ्जीत सततम् ॥६.१०॥
योगी विगतकल्मषः ॥६.२८॥
योगी संशुद्धकिल्बिषः ॥६.४५॥
योगेनाव्यभिचारिण्या ॥१८.३३॥
योगेश्वर ततो मे त्वम् ॥११.४॥
योगो नष्टः परन्तप ॥४.२॥
योगो भवति दुःखहा ॥६.१७॥
योगोऽनिर्विण्णचेतसा ॥६.२३॥
योत्स्यमानानवेक्षेऽहम् ॥१.२३॥
योद्धुकामानवस्थितान् ॥१.२२॥
रक्षांसि भीतानि दिशो द्रवन्ति ॥११.३६॥
रजः कर्मणि भारत ॥१४.९॥
रजः सत्त्वं तमश्चैव ॥१४.१०॥
रजसस्तु फलं दुःखम् ॥१४.१६॥
रजसि प्रलयं गत्वा ॥१४.१५॥
रजसो लोभ एव च ॥१४.१७॥
रजस्तमश्चाभिभूय ॥१४.१०॥
रजस्येतानि जायन्ते ॥१४.१२॥
रजो रागात्मकं विद्धि ॥१४.७॥
रजोगुणसमुद्भवः ॥३.३७॥
रथं स्थापय मेऽच्युत ॥१.२१॥
रथोपस्थ उपाविशत् ॥१.४७॥
रसनं घ्राणमेव च ॥१५.९॥
रसवर्जं रसोऽप्यस्य ॥२.५९॥
रसोऽहमप्सु कौन्तेय ॥७.८॥
रस्याः स्निग्धाः स्थिरा हृद्याः ॥१७.८॥
रहस्यं ह्येतदुत्तमम् ॥४.३॥
राक्षसीमासुरीं चैव ॥९.१२॥
रागद्वेषवियुक्तैस्तु ॥२.६४॥
रागद्वेषौ व्यवस्थितौ ॥३.३४॥
रागद्वेषौ व्युदस्य च ॥१८.५१॥
रागी कर्मफलप्रेप्सुः ॥१८.२७॥
राजन्संस्मृत्य संस्मृत्य ॥१८.७६॥
राजविद्या राजगुह्यम् ॥९.२॥
राजसं चलमध्रुवम् ॥१७.१८॥
राजसः परिकीर्तितः ॥१८.२७॥
राजसास्तामसाश्च ये ॥७.१२॥
राजावचनमब्रवीत् ॥१.२॥
राज्यं भोगाः सुखानि च ॥१.३३॥
राज्यं सुराणामपि चाधिपत्यम् ॥२.८॥
रात्रिं युगसहस्रान्ताम् ॥८.१७॥
रात्र्यागमे प्रलीयन्ते ॥८.१८॥
रात्र्यागमेऽवशः पार्थ ॥८.१९॥
रामः शस्त्रभृतामहम् ॥१०.३१॥
रुद्राणां शङ्करश्चास्मि ॥१०.२३॥
रुद्रादित्या वसवो ये च साध्याः ॥११.२२॥
रूपं परं दर्शितमात्मयोगात् ॥११.४७॥
रूपं महत्ते बहुवक्त्रनेत्रम् ॥११.२३॥
रूपमत्यद्भुतं हरेः ॥१८.७७॥
रोमहर्षश्च जायते ॥१.२९॥
ज्योतिषां रविरंशुमान् ॥१०.२१॥
लभते च ततः कामान् ॥७.२२॥
लभते पौर्वदेहिकम् ॥६.४३॥
लभन्ते ब्रह्मनिर्वाणम् ॥५.२५॥
लभन्ते युद्धमीदृशम् ॥२.३२॥
लाभालाभौ जयाजयौ ॥२.३८॥
लिप्यते न स पापेन ॥५.१०॥
लुप्तपिण्डोदकक्रियाः ॥१.४२॥
लुब्धो हिंसात्मकोऽशुचिः ॥१८.२७॥
लेलिह्यसे ग्रसमानः समन्तात् ॥११.३०॥
लोकत्रयं प्रव्यथितं महात्मन् ॥११.२०॥
लोकत्रयेऽप्यप्रतिमप्रभाव ॥११.४३॥
लोकसङ्ग्रहमेवापि ॥३.२०॥
लोकस्तदनुवर्तते ॥३.२१॥
लोकस्य सृजति प्रभुः ॥५.१४॥
लोकान् समाहर्तुमिह प्रवृत्तः ॥११.३२॥
लोकान्नोद्विजते च यः ॥१२.१५॥
लोकान्समग्रान्वदनैर्ज्वलद्भिः ॥११.३०॥
लोके जन्म यदीदृशम् ॥६.४२ ॥
लोकेऽस्मिन् द्विविधा निष्ठा ॥३.३॥
लोको मामजमव्ययम् ॥७.२५॥
लोकोऽयं कर्मबन्धनः ॥३.९॥
लोभः प्रवृत्तिरारम्भः ॥१४.१२॥
लोभोपहतचेतसः ॥१.३८॥
वक्तुमर्हस्यशेषेण ॥१०.१६॥
वक्त्राणि ते त्वरमाणा विशन्ति ॥११.२७॥
वक्ष्यामि भरतर्षभ ॥८.२३॥
वक्ष्यामि हितकाम्यया ॥१०.१॥
वदिष्यन्ति तवाहिताः ॥२.३६॥
वरुणो यादसामहम् ॥१०.२९॥
वर्णसङ्करकारकैः ॥१.४३॥
वर्त एव च कर्मणि ॥३.२२॥
वर्तते कामकारतः ॥१६.२३ ॥
वर्तते विदितात्मनाम् ॥५.२६॥
वर्तन्त इति धारयन् ॥५.९॥
वर्तमानानि चार्जुन ॥७.२६॥
वर्ततात्मैव शत्रुवत् ॥६.६ ॥
वशे हि यस्येन्द्रियाणि ॥२.६१॥
वश्यात्मना तु यतता ॥६.३६॥
वसूनां पावकश्चास्मि ॥१०.२३॥
वाङ्मयं तप उच्यते ॥१७.१५॥
वादः प्रवदतामहम् ॥१०.३२॥
वायुः सर्वत्रगो महान् ॥९.६॥
वायुर्गन्धानिवाशयात् ॥१५.८॥
वायुर्नावमिवाम्भसि ॥२.६७॥
वायुर्यमोऽग्निर्वरुणः शशाङ्कः ॥११.३९॥
वायोरिव सुदुष्करम् ॥६.३४॥
वासांसि जीर्णानि यथा विहाय ॥२.२२॥
वासुदेवः सर्वमिति ॥७.१९॥
विकारांश्च गुणांश्चैव ॥१३.१९॥
विगतेच्छाभयक्रोधः ॥५.२८॥
विजितात्मा जितेन्द्रियः ॥५.७॥
विज्ञातुमिच्छामि भवन्तमाद्यम् ॥११.३१॥
वितता ब्रह्मणो मुखे ॥४.३२॥
वित्तेशो यक्षरक्षसाम् ॥१०.२३॥
विदुर्देवा न दानवाः ॥१०.१४॥
विद्धि नष्टानचेतसः ॥३.३२॥
विद्धि पार्थ बृहस्पतिम् ॥१०.२४॥
विद्धि पार्थ सनातनम् ॥७.१०॥
विद्धि प्रकृतिसम्भवान् ॥१३.१९॥
विद्धि माममृतोद्भवम् ॥१०.२७॥
विद्ध्यकर्तारमव्ययम् ॥४.१३॥
विद्ध्यनादी उभावपि ॥१३.१९॥
विद्ध्येनमिह वैरिणम् ॥३.३७॥
विद्याविनयसम्पन्ने ॥५.१९॥
विद्वान्युक्तः समाचरन् ॥३.२६॥
विधिदृष्टो य इज्यते ॥१७.११॥
विधिहीनमसृष्टान्नम् ॥१७.१३॥
विनश्यत्स्वविनश्यन्तम् ॥१३.२७॥
विनाशमव्ययस्यास्य ॥२.१७॥
विनाशस्तस्य विद्यते ॥६.४०॥
विनाशाय च दुष्कृताम् ॥४.८॥
विनियम्य समन्ततः ॥६.२४॥
विन्दत्यात्मनि यत्सुखम् ॥५.२१॥
विपरीतानि केशव ! ॥१.३१॥
विभक्तमिव च स्थितम् ॥१३.१६॥
विभूतिं च जनार्दन ॥१०.१८॥
विभूतीनां परन्तप ॥१०.४०॥
विभूतेर्विस्तरो मया ॥१०.४०॥

विमुक्तो मामुपैष्यसि ॥९.२८॥
विमुक्तोऽमृतमश्नुते ॥१४.२०॥
विमुच्य निर्ममः शान्तः ॥१८.५३॥
विमूढा नानुपश्यन्ति ॥१५.१०॥
विमूढो ब्रह्मणः पथि ॥६.३८॥
विमृश्यैतदशेषेण ॥१८.६३॥
वियोगं योगसंज्ञितम् ॥६.२३॥
विवस्वान्मनवे प्राह ॥४.१॥
विविक्तदेशसेवित्वम् ॥१३.१०॥
विविक्तसेवी लघ्वाशी ॥१८.५२॥
विविधाश्च पृथक्चेष्टाः ॥१८.१४॥
विवृद्धं सत्त्वमित्युत ॥१४.११॥
विवृद्धे कुरुनन्दन ॥१४.१३॥
विवृद्धे भरतर्षभ ॥१४.१२॥
विशते तदनन्तरम् ॥१८.५५॥
विशन्ति नाशाय समृद्धवेगाः ॥११.२९॥
विशन्ति यद्यतयो वीतरागाः ॥८.११॥
विशन्ति वक्त्राण्यभिविज्वलन्ति ॥११.२८॥
विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ॥११.२२॥
विषमे समुपस्थितम् ॥२.२॥
विषया विनिवर्तन्ते ॥२.५९॥
विषयानिन्द्रियैश्चरन् ॥२.६४॥
विषयानुपसेवते ॥१५.९॥
विषयेन्द्रियसंयोगात् ॥१८.३८॥
विषादं मदमेव च ॥१८.३५॥
विषादी दीर्घसूत्री च ॥१८.२८॥
विषीदन्तमिदं वचः ॥२.१०॥
विषीदन्तमिदं वाक्यम् ॥२.१॥
विषीदन्निदमब्रवीत् ॥१.२८॥
विष्टभ्याहमिदं कृत्स्नम् ॥१०.४२॥
विसर्गः कर्मसंज्ञितः ॥८.३॥
विसृजामि पुनः पुनः ॥९.८॥
विसृज्य सशरं चापम् ॥१.४७॥
विस्तरेणात्मनो योगम् ॥१०.१८॥
विस्मयो मे महान् राजन् ॥१८.७७॥
विहाय कामान्यः सर्वान् ॥२.७१॥
विहारशय्यासनभोजनेषु ॥११.४२॥
वीक्षन्ते त्वां विस्मिताश्चैव सर्वे ॥११.२२॥
वीतरागभयक्रोधः ॥२.५६॥
वीतरागभयक्रोधाः ॥४.१०॥
वृजिनं सन्तरिष्यसि ॥४.३६॥
वृष्णीनां वासुदेवोऽस्मि ॥१०.३७॥
वेत्तासि वेद्यं च परं च धाम ॥११.३८॥
वेत्ति यत्र न चैवायम् ॥६.२१॥
वेत्ति लोकमहेश्वरम् ॥१०.३॥
वेत्ति सर्वेषु भूतेषु ॥१८.२१॥
वेत्थ त्वं पुरुषोत्तम ॥१०.१५॥
वेदवादरताः पार्थ ॥२.४२॥
वेदानां सामवेदोऽस्मि ॥१०.२२॥
वेदान्तकृद्वेदविदेव चाहम् ॥१५.१५॥
वेदाविनाशिनं नित्यम् ॥२.२१॥
वेदाहं समतीतानि ॥७.२६॥
वेदेषु यज्ञेषु तपस्सु चैव ॥८.२८॥
वेदैश्च सर्वैरहमेव वेद्यः ॥१५.१५॥
वेद्यं पवित्रमोङ्कारः ॥९.१७॥
वेपथुश्च शरीरे मे ॥१.२९॥
वैनतेयश्च पक्षिणाम् ॥१०.३०॥
वैराग्यं समुपाश्रितः ॥१८.५२॥
वैराग्येण च गृह्यते ॥६.३५॥
वैश्यकर्म स्वभावजम् ॥१८.४४॥
व्यक्तमध्यानि भारत ॥२.२८॥
व्यपेतभीः प्रीतमनाः पुनस्त्वम् ॥११.४९॥
व्यवसायात्मिका बुद्धिः ॥२.४१॥
व्यवसायात्मिका बुद्धिः ॥२.४४॥
व्यात्ताननं दीप्तविशालनेत्रम् ॥११.२४॥
व्याप्तं त्वयैकेन दिशश्च सर्वाः ॥११.२०॥
व्यामिश्रेणेव वाक्येन ॥३.२॥
व्यासप्रसादाच्छ्रुतवान् ॥१८.७५॥
व्याहरन्मामनुस्मरन् ॥८.१३॥
व्यूढं दुर्योधनस्तदा ॥१.२॥
व्यूढां द्रुपदपुत्रेण ॥१.३॥
शक्नोतीहैव यः सोढुम् ॥५.२३॥
शक्य एवंविधो द्रष्टुम् ॥११.५३॥
शक्योऽवाप्तुमुपायतः ॥६.३६॥
शङ्खं दध्मौ प्रतापवान् ॥१.१२॥
शङ्खान्दध्मुः पृथक्पृथक् ॥१.१८॥
शठो नैष्कृतिकोऽलसः ॥१८.२८॥
शतशोऽथ सहस्रशः ॥११.५॥
शनैः शनैरुपरमेद् ॥६.२५॥
शब्दः खे पौरुषं नृषु ॥७.८॥
शब्दब्रह्मातिवर्तते ॥६.४४॥
शब्दादीन्विषयांस्त्यक्त्वा ॥१८.५१॥
शब्दादीन्विषयानन्ये ॥४.२६॥
शमः कारणमुच्यते ॥६.३॥
शमो दमस्तपः शौचम् ॥१८.४२॥
शरीरं यदवाप्नोति ॥१५.८॥
शरीरयात्रापि च ते ॥३.८॥
शरीरवाङ्मनोभिर्यत् ॥१८.१५॥
शरीरस्थोऽपि कौन्तेय ॥१३.३१॥
शरीरे पाण्डवस्तदा ॥११.१३॥
शश्वच्छान्तिं निगच्छति ॥९.३१॥
शान्तिं निर्वाणपरमाम् ॥६.१५॥
शान्तिमाप्नोति नैष्ठिकीम् ॥५.१२॥
शारीरं केवलं कर्म ॥४.२१॥
शारीरं तप उच्यते ॥१७.१४॥
शाश्वतं पदमव्ययम् ॥१८.५६॥
शाश्वतस्य च धर्मस्य ॥१४.२७॥
शिखण्डी च महारथः ॥१.१७॥
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥२.७॥
शीतोष्णसुखदुःखदाः ॥२.१४॥
शीतोष्णसुखदुःखेषु ॥१२.१८॥
शीतोष्णसुखदुःखेषु ॥६.७॥
शुक्लकृष्णे गती ह्येते ॥८.२६॥
शुचीनां श्रीमतां गेहे ॥६.४१॥
शुचौ देशे प्रतिष्ठाप्य ॥६.११॥
शुनि चैव श्वपाके च ॥५.१९॥
शुभाशुभपरित्यागी ॥१२.१७॥
शुभाशुभफलैरेवम् ॥९.२८॥
शूद्रस्यापि स्वभावजम् ॥१८.४४॥
शूद्राणां च परन्तप ॥१८.४१॥
शृणु मे परमं वचः ॥१०.१॥
शृणु मे परमं वचः ॥१८.६४॥
शृणु मे भरतर्षभ ॥१८.३६॥
शृणुयादपि यो नरः ॥१८.७१॥
शृण्वतो नास्ति मेऽमृतम् ॥१०.१८॥
शैब्यश्च नरपुङ्गवः ॥१.५॥
शोकसंविग्नमानसः ॥१.४७॥
शौर्यं तेजो धृतिर्दाक्ष्यम् ॥१८.४३॥
श्यालाः सम्बन्धिनस्तथा ॥१.३४॥
श्रद्दधाना मत्परमाः ॥१२.२०॥
श्रद्धया परया तप्तम् ॥१७.१७॥
श्रद्धया परयोपेताः ॥१२.२॥
श्रद्धयार्चितुमिच्छति ॥७.२१॥
श्रद्धा भवति भारत ॥१७.३॥
श्रद्धामयोऽयं पुरुषः ॥१७.३॥
श्रद्धावन्तोऽनसूयन्तः ॥३.३१॥
श्रद्धावाँल्लभते ज्ञानम् ॥४.३९॥
श्रद्धावाननसूयश्च ॥१८.७१॥
श्रद्धावान्भजते यो माम् ॥६.४७॥

श्रद्धाविरहितं यज्ञम् ॥१७.१३॥
श्रीमदूर्जितमेव वा ॥१०.४१॥
श्रुतिविप्रतिपन्ना ते ॥२.५३॥
श्रुतौ विस्तरशो मया ॥११.२॥
श्रुत्वान्येभ्य उपासते ॥१३.२५॥
श्रुत्वाप्येनं वेद न चैव कश्चित् ॥२.२९॥
श्रेयः परमवाप्स्यथ ॥३.११॥
श्रेयान् द्रव्यमयाद्यज्ञात् ॥४.३३॥
श्रेयान्स्वधर्मो विगुणः ॥३.३५॥
श्रेयान्स्वधर्मो विगुणः ॥१८.४७॥
श्रेयो भोक्तुं भैक्ष्यमपीह लोके ॥२.५॥
श्रेयो हि ज्ञानमभ्यासात् ॥१२.१२॥
श्रोतव्यस्य श्रुतस्य च ॥२.५२॥
श्रोत्रं चक्षुः स्पर्शनं च ॥१५.९॥
श्रोत्रादीनीन्द्रियाण्यन्ये ॥४.२६॥
श्वशुरान् सुहृदश्चैव ॥१.२७॥
षण्मासा उत्तरायणम् ॥८.२४॥
षण्मासा दक्षिणायनम् ॥८.२५॥
स एवायं मया तेऽद्य ॥४.३॥
स कालेनेह महता ॥४.२॥
स कृत्वा राजसं त्यागम् ॥१८.८॥
स गुणान्समतीत्यैतान् ॥१४.२६॥
स घोषो धार्तराष्ट्राणाम् ॥१.१९॥
स च मे न प्रणश्यति ॥६.३०॥
स च यो यत्प्रभावश्च ॥१३.३॥
स तं परं पुरुषमुपैति दिव्यम् ॥८.१०॥
स तया श्रद्धया युक्तः ॥७.२२॥
स त्यागः सात्त्विको मतः ॥१८.९॥
स त्यागीत्यभिधीयते ॥१८.११॥
स निश्चयेन योक्तव्यः ॥६.२३॥
स बुद्धिमान्मनुष्येषु ॥४.१८॥
स ब्रह्मयोगयुक्तात्मा ॥५.२१॥
स महात्मा सुदुर्लभः ॥७.१९॥
स मे युक्ततमो मतः ॥६.४७॥
स यत्प्रमाणं कुरुते ॥३.२१॥
स याति परमां गतिम् ॥८.१३॥
स युक्तः कृत्स्नकर्मकृत् ॥४.१८॥
स युक्तः स सुखी नरः ॥५.२३॥
स योगी परमो मतः ॥६.३२॥
स योगी ब्रह्मनिर्वाणम् ॥५.२४॥
स योगी मयि वर्तते ॥६.३१॥
स शब्दस्तुमुलोऽभवत् ॥१.१३॥
स शान्तिमधिगच्छति ॥२.७१॥
स शान्तिमाप्नोति न कामकामी ॥२.७०॥
स संन्यासी च योगी ॥६.१॥
स सर्वविद्भजति माम् ॥१५.१९॥
संग्रामं न करिष्यसि ॥२.३३॥
संज्ञार्थं तान्ब्रवीमि ते ॥१.७॥
संन्यस्याध्यात्मचेतसा ॥३.३०॥
संन्यस्यास्ते सुखं वशी ॥५.१३॥
संन्यासं कर्मणां कृष्ण ॥५.१॥
संन्यासं कवयो विदुः ॥१८.२॥
संन्यासः कर्मयोगश्च ॥५.२॥
संन्यासयोगयुक्तात्मा ॥९.२८॥
संन्यासस्तु महाबाहो ॥५.६॥
संन्यासस्य महाबाहो ॥१८.१॥
संन्यासेनाधिगच्छति ॥१८.४९॥
संयमाग्निषु जुह्वति ॥४.२६॥
संवादमिममद्भुतम् ॥१८.७६॥
संवादमिममश्रौषम् ॥१८.७४॥
संशयात्मा विनश्यति ॥४.४०॥
संसारेषु नराधमान् ॥१६.१९॥
संसिद्धिं परमां गताः ॥८.१५॥
संसिद्धिं लभते नरः ॥१८.४५॥
संसिद्धौ कुरुनन्दन ॥६.४३॥
संस्तभ्यात्मानमात्मना ॥३.४३॥
सक्ताः कर्मण्यविद्वांसः ॥३.२५॥
सखेति मत्वा प्रसभं यदुक्तम् ॥११.४१॥
सगद्गदं भीतभीतः प्रणम्य ॥११.३५॥
सङ्करस्य च कर्ता स्याम् ॥३.२४॥
सङ्करो नरकायैव ॥१.४२॥
सङ्कल्पप्रभवान्कामान् ॥६.२४॥
सङ्गं त्यक्त्वा करोति यः ॥५.१०॥
सङ्गं त्यक्त्वा धनञ्जय ॥२.४८॥
सङ्गं त्यक्त्वा फलं चैव ॥१८.९॥
सङ्गं त्यक्त्वा फलानि च ॥१८.६॥
सङ्गं त्यक्त्वात्मशुद्धये ॥५.११ ॥
सङ्गस्तेषूपजायते ॥२.६२॥
सङ्गात्सञ्जायते कामः ॥२.६२॥
सङ्घातश्चेतना धृतिः ॥१३.६॥
सचेताः प्रकृतिं गतः ॥११.५१॥
सच्छब्दः पार्थ युज्यते ॥१७.२६॥
सज्जन्ते गुणकर्मसु ॥३.२९॥
सततं कीर्तयन्तो माम् ॥९.१४॥
सततं ब्रह्मवादिनाम् ॥१७.२४॥
सत्कारमानपूजार्थम् ॥१७.१८॥
सत्त्वं प्रकृतिजैर्मुक्तम् ॥१८.४०॥
सत्त्वं रजस्तम इति ॥१४.५॥
सत्त्वं सत्त्ववतामहम् ॥१०.३६॥
सत्त्वं सुखे सञ्जयति ॥१४.९॥
सत्त्वं स्थावरजङ्गमम् ॥१३.२६॥
सत्त्वमाहो रजस्तमः ॥१७.१॥
सत्त्वात्सञ्जायते ज्ञानम् ॥१४.१७॥
सत्त्वानुरूपा सर्वस्य ॥१७.३॥
सत्यं प्रियहितं च यत् ॥१७.१५॥
सत्त्वं भवति भारत ॥१४.१०॥
सदसच्चाहमर्जुन ॥९.१९॥
सदसद्योनिजन्मसु ॥१३.२१॥
सदा तद्भावभावितः ॥८.६॥
सदित्येतत्प्रयुज्यते ॥१७.२६॥
सदित्येवाभिधीयते ॥१७.२७॥
सदृशं चेष्टते स्वस्याः ॥३.३३॥
सदोषमपि न त्यजेत् ॥१८.४८॥
सद्भावे साधुभावे च ॥१७.२६॥
सनातनस्त्वं पुरुषो मतो मे ॥११.१८॥
सन्तुष्टः सततं योगी ॥१२.१४॥
सन्तुष्टो येन केनचित् ॥१२.१९॥
सन्दृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥११.२७॥
सन्नियम्येन्द्रियग्रामम् ॥१२.४॥
समं कायशिरोग्रीवम् ॥६.१३॥
समं पश्यति योऽर्जुन ॥६.३२॥
समं पश्यन्हि सर्वत्र ॥१३.२८॥
समं सर्वेषु भूतेषु ॥१३.२७॥
समः शत्रौ च मित्रे च ॥१२.१८॥
समः सङ्गविवर्जितः ॥१२.१८॥
समः सर्वेषु भूतेषु ॥१८.५४॥
समः सिद्धावसिद्धौ च ॥४.२२॥
समग्रं प्रविलीयते ॥४.२३॥
समत्वं योग उच्यते ॥२.४८॥
समदुःखसुखं धीरम् ॥२.१५॥
समदुःखसुखः क्षमी ॥१२.१३॥
समदुःखसुखः स्वस्थः ॥१४.२४॥
समबुद्धिर्विशिष्यते ॥६.९॥
समलोष्टाश्मकाञ्चनः ॥१४.२४॥
समलोष्टाश्मकाञ्चनः ॥६.८॥
समवस्थितमीश्वरम् ॥१३.२८॥
समवेता युयुत्सवः ॥१.१॥
समवेतान् कुरूनिति ॥१.२५॥
समाधाय स सात्त्विकः ॥१७.११॥

समाधावचला बुद्धिः ॥२.५३॥
समाधिस्थस्य केशव ॥२.५४॥
समाधौ न विधीयते ॥२.४४॥
समासेनैव कौन्तेय ॥१८.५०॥
समुद्रमापः प्रविशन्ति यद्वत् ॥२.७०॥
समुद्रमेवाभिमुखा द्रवन्ति ॥११.२८॥
समोऽहं सर्वभूतेषु ॥९.२९॥
सम्पश्यन्कर्तुमर्हसि ॥३.२०॥
सम्प्रेक्ष्य नासिकाग्रम् ॥६.१३॥
सम्भवः सर्वभूतानाम् ॥१४.३॥
सम्भवामि युगे युगे ॥४.८॥
सम्भवाम्यात्ममायया ॥४.६॥
सम्भावितस्य चाकीर्तिः ॥२.३४॥
सम्मोहात्स्मृतिविभ्रमः ॥२.६३॥
सम्यग्व्यवसितो हि सः ॥९.३०॥
सरसामस्मि सागरः ॥१०.२४॥
सर्गाणामादिरन्तश्च ॥१०.३२॥
सर्गे यान्ति परन्तप ॥७.२७॥
सर्गेऽपि नोपजायन्ते ॥१४.२॥
सर्पाणामस्मि वासुकिः ॥१०.२८॥
सर्व एव महारथाः ॥१.६॥
सर्वं कर्माखिलं पार्थ ॥४.३३॥
सर्वं च मयि पश्यति ॥६.३०॥
सर्वं ज्ञानप्लवेनैव ॥४.३६॥
सर्वं समाप्नोषि ततोऽसि सर्वः ॥११.४०॥
सर्वः प्रकृतिजैर्गुणैः ॥३.५॥
सर्वकर्मफलत्यागम् ॥१२.११॥
सर्वकर्मफलत्यागम् ॥१८.२॥
सर्वकर्माणि मनसा ॥५.१३॥
सर्वकर्माण्यपि सदा ॥१८.५६॥
सर्वक्षेत्रेषु भारत ॥१३.२॥
सर्वगुह्यतमं भूयः ॥१८.६४॥
सर्वज्ञानविमूढांस्तान् ॥३.३२॥
सर्वतः पाणिपादं तत् ॥१३.१३॥
सर्वतः श्रुतिमल्लोके ॥१३.१३॥
सर्वतः सम्प्लुतोदके ॥२.४६॥
सर्वतोऽक्षिशिरोमुखम् ॥१३.१३॥
सर्वत्र समदर्शनः ॥६.२९ ॥
सर्वत्र समबुद्धयः ॥१२.४॥
सर्वत्रगमचिन्त्यं च ॥१२.३॥
सर्वत्रावस्थितो देहे ॥१३.३२॥
सर्वथा वर्तमानोऽपि ॥१३.२३॥
सर्वथा वर्तमानोऽपि ॥६.३१॥
सर्वद्वाराणि संयम्य ॥८.१२॥
सर्वद्वारेषु देहेऽस्मिन् ॥१४.११॥
सर्वधर्मान्परित्यज्य ॥१८.६६॥
सर्वपापैः प्रमुच्यते ॥१०.३॥
सर्वभावेन भारत ॥१५.१९॥
सर्वभावेन भारत ॥१८.६२॥
सर्वभूतस्थमात्मानम् ॥६.२९ ॥
सर्वभूतस्थितं यो माम् ॥६.३१॥
सर्वभूतहिते रताः ॥१२.४॥
सर्वभूतहिते रताः ॥५.२५॥
सर्वभूतात्मभूतात्मा ॥५.७॥
सर्वभूतानि कौन्तेय ॥९.७॥
सर्वभूतानि चात्मनि ॥६.२९ ॥
सर्वभूतानि सम्मोहम् ॥७.२७॥
सर्वभूताशयस्थितः ॥१०.२०॥
सर्वभूतेषु येनैकम् ॥१८.२०॥
सर्वमावृत्य तिष्ठति ॥१३.१३॥
सर्वमेतदृतं मन्ये ॥१०.१४॥
सर्वयोनिषु कौन्तेय ॥१४.४॥
सर्वलोकमहेश्वरम् ॥५.२९॥
सर्वशः पृथिवीपते ॥१.१८॥
सर्वसङ्कल्पसंन्यासी ॥६.४॥
सर्वस्य चाहं हृदि सन्निविष्टः ॥१५.१५॥
सर्वस्य धातारमचिन्त्यरूपम् ॥८.९॥
सर्वांस्तथा भूतविशेषसङ्घान् ॥११.१५॥
सर्वाणीत्युपधारय ॥७.६॥
सर्वाणीन्द्रियकर्माणि ॥४.२७॥
सर्वान्पार्थ मनोगतान् ॥२.५५॥
सर्वान्बन्धूनवस्थितान् ॥१.२७॥
सर्वारम्भपरित्यागी ॥१२.१६॥
सर्वारम्भपरित्यागी ॥१४.२५॥
सर्वारम्भा हि दोषेण ॥१८.४८॥
सर्वार्थान्विपरीतांश्च ॥१८.३२॥
सर्वाश्चर्यमयं देवम् ॥११.११॥
सर्वे नमस्यन्ति च सिद्धसङ्घाः ॥११.३६॥
सर्वे युद्धविशारदाः ॥१.९॥
सर्वे वयमतः परम् ॥२.१२॥
सर्वे सहैवावनिपालसङ्घैः ॥११.२६॥
सर्वेऽप्येते यज्ञविदः ॥४.३०॥
सर्वेन्द्रियगुणाभासम् ॥१३.१४॥
सर्वेन्द्रियविवर्जितम् ॥१३.१४॥
सर्वेभ्यः पापकृत्तमः ॥४.३६॥
सर्वेषां च महीक्षिताम् ॥१.२५॥
सविकारमुदाहृतम् ॥१३.६॥
सहजं कर्म कौन्तेय ॥१८.४८॥
सहयज्ञाः प्रजाः सृष्ट्वा ॥३.१०॥
सहसैवाभ्यहन्यन्त ॥१.१३॥
सहस्रबाहो भव विश्वमूर्ते ॥११.४६॥
सहस्रयुगपर्यन्तम् ॥८.१७॥
सहास्मदीयैरपि योधमुख्यैः ॥११.२६॥
सा निशा पश्यतो मुनेः ॥२.६९॥
साक्षात्कथयतः स्वयम् ॥१८.७५॥
साङ्ख्ययोगौ पृथग्बालाः ॥५.४॥
साङ्ख्ये कृतान्ते प्रोक्तानि ॥१८.१३॥
सात्त्विकं निर्मलं फलम् ॥१४.१६॥
सात्त्विकं परिचक्षते ॥१७.१७॥
सात्त्विकी राजसी चैव ॥१७.२॥
सात्यकिश्चापराजितः ॥१.१७॥
साधिभूताधिदैवं माम् ॥७.३०॥
साधियज्ञं च ये विदुः ॥७.३०॥
साधुरेव स मन्तव्यः ॥९.३०॥
साधुष्वपि च पापेषु ॥६.९॥
साम्येन मधुसूदन ॥६.३३॥
साहङ्कारेण वा पुनः ॥१८.२४॥
सिंहनादं विनद्योच्चैः ॥१.१२॥
सिद्धये सर्वकर्मणाम् ॥१८.१३॥
सिद्धानां कपिलो मुनिः ॥१०.२६॥
सिद्धिं प्राप्तो यथा ब्रह्म ॥१८.५०॥
सिद्धिं विन्दति मानवः ॥१८.४६॥
सिद्धिं समधिगच्छति ॥३.४॥
सिद्धिर्भवति कर्मजा ॥४.१२॥
सिद्धोऽहं बलवान्सुखी ॥१६.१४॥
सिद्ध्यसिद्ध्योः समो भूत्वा ॥२.४८॥
सिद्ध्यसिद्ध्योर्निर्विकारः ॥१८.२६॥
सीदन्ति मम गात्राणि ॥१.२९॥
सुखं त्विदानीं त्रिविधम् ॥१८.३६॥
सुखं दुःखं भवोऽभावः ॥१०.४॥
सुखं बन्धात् प्रमुच्यते ॥५.३॥
सुखं मोहनमात्मनः ॥१८.३९॥
सुखं वा यदि वा दुःखम् ॥६.३२॥
सुखदुःखे समे कृत्वा ॥२.३८॥
सुखप्रीतिविवर्धनाः ॥१७.८॥
सुखमक्षयमश्नुते ॥५.२१॥
सुखमात्यन्तिकं यत्तद् ॥६.२१॥
सुखसङ्गेन बध्नाति ॥१४.६॥
सुखस्यैकान्तिकस्य च ॥१४.२७॥

सुखिनः क्षत्रियाः पार्थ ॥२.३२॥
सुखिनः स्याम माधव ॥१.३७॥
सुखेन ब्रह्मसंस्पर्शम् ॥६.२८॥
सुखेषु विगतस्पृहः ॥२.५६॥
सुघोषमणिपुष्पकौ ॥१.१६॥
सुदुर्दर्शमिदं रूपम् ॥११.५२॥
सुसुखं कर्तुमव्ययम् ॥९.२॥
सुहृदं सर्वभूतानाम् ॥५.२९॥
सुहृन्मित्रार्युदासीन- ॥६.९॥
सूक्ष्मत्वात्तदविज्ञेयम् ॥१३.१५॥
सूत्रे मणिगणा इव ॥७.७॥
सूयते सचराचरम् ॥९.१०॥
सेनयोरुभयोरपि ॥१.२७॥
सेनयोरुभयोर्मध्ये ॥१.२१॥
सेनयोरुभयोर्मध्ये ॥१.२४॥
सेनयोरुभयोर्मध्ये ॥२.१०॥
सेनानीनामहं स्कन्दः ॥१०.२४॥
सोऽपि मुक्तः शुभाँल्लोकान् ॥१८.७१॥
सोऽमृतत्वाय कल्पते ॥२.१५॥
सोऽविकम्पेन योगेन ॥१०.७॥
सोमो भूत्वा रसात्मकः ॥१५.१३॥
सौभद्रश्च महाबाहुः ॥१.१८॥
सौभद्रो द्रौपदेयाश्च ॥१.६॥
सौमदत्तिस्तथैव च ॥१.८॥
स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः ॥११.२१॥
स्त्रियो वैश्यास्तथा शूद्राः ॥९.३२॥
स्त्रीषु दुष्टासु वार्ष्णेय ॥१.४१॥
स्थानं प्राप्स्यसि शाश्वतम् ॥१८.६२॥
स्थाने हृषीकेश तव प्रकीर्त्या ॥११.३६॥
स्थापयित्वा रथोत्तमम् ॥१.२४॥
स्थावराणां हिमालयः ॥१०.२५॥
स्थितधीः किं प्रभाषेत ॥२.५४॥
स्थितधीर्मुनिरुच्यते ॥२.५६॥
स्थितप्रज्ञस्तदोच्यते ॥२.५५॥
स्थितप्रज्ञस्य का भाषा ॥२.५४॥
स्थितश्चलति तत्त्वतः ॥६.२१॥
स्थितिः सदिति चोच्यते ॥१७.२७॥
स्थितोऽस्मि गतसन्देहः ॥१८.७३॥
स्थित्वास्यामन्तकालेऽपि ॥२.७२॥
स्थिरबुद्धिरसम्मूढः ॥५.२०॥
स्थिरमासनमात्मनः ॥६.११॥
स्थैर्यमात्मविनिग्रहः ॥१३.७॥
स्पर्शान्कृत्वा बहिर्बाह्यान् ॥५.२७॥
स्मरन्मुक्त्वा कलेवरम् ॥८.५॥
स्मृतिभ्रंशाद्बुद्धिनाशः ॥२.६३॥
स्मृतिर्मेधा धृतिः क्षमा ॥१०.३४॥
स्रोतसामस्मि जाह्नवी ॥१०.३१॥
स्वं दिशश्चानवलोकयन् ॥६.१३॥
स्वकं रूपं दर्शयामास भूयः ॥११.५०॥
स्वकर्मणा तमभ्यर्च्य ॥१८.४६॥
स्वकर्मनिरतः सिद्धिम् ॥१८.४५॥
स्वजनं हि कथं हत्वा ॥१.३७॥
स्वतेजसा विश्वमिदं तपन्तम् ॥११.१९॥
स्वधर्ममपि चावेक्ष्य ॥२.३१॥
स्वधर्मे निधनं श्रेयः ॥३.३५॥
स्वधाहमहमौषधम् ॥९.१६॥
स्वभावजेन कौन्तेय ॥१८.६०॥
स्वभावनियतं कर्म ॥१८.४७॥
स्वभावप्रभवैर्गुणैः ॥१८.४१॥
स्वभावस्तु प्रवर्तते ॥५.१४॥
स्वभावोऽध्यात्ममुच्यते ॥८.३॥
स्वयं चैव ब्रवीषि मे ॥१०.१३॥
स्वयमेवात्मनात्मानम् ॥१०.१५॥
स्वर्गद्वारमपावृतम् ॥२.३२॥
स्वल्पमप्यस्य धर्मस्य ॥२.४०॥
स्वस्तीत्युक्त्वा महर्षिसिद्धसङ्घाः ॥११.२१॥
स्वाध्यायज्ञानयज्ञाश्च ॥४.२८॥
स्वाध्यायस्तप आर्जवम् ॥१६.१॥
स्वाध्यायाभ्यसनं चैव ॥१७.१५॥
स्वे स्वे कर्मण्यभिरतः ॥१८.४५॥
हतो वा प्राप्स्यसि स्वर्गम् ॥२.३७॥
हत्वा स्वजनमाहवे ॥१.३१॥
हत्वापि स इमान् लोकान् ॥१८.१७॥
हत्वार्थकामांस्तु गुरूनिहैव ॥२.५॥
हत्वैतानाततायिनः ॥१.३६॥
हनिष्ये चापरानपि ॥१६.१४॥
हन्त ते कथयिष्यामि ॥१०.१९॥
हन्तुं स्वजनमुद्यताः ॥१.४५॥
हरन्ति प्रसभं मनः ॥२.६०॥
हर्षशोकान्वितः कर्ता ॥१८.२७॥
हर्षामर्षभयोद्वेगैः ॥१२.१५॥
हानिरस्योपजायते ॥२.६५॥
हित्वा पापमवाप्स्यसि ॥२.३३॥
हृत्स्थं ज्ञानासिनात्मनः ॥४.४२॥
हृदयानि व्यदारयत् ॥१.१९॥
हृदि सर्वस्य विष्ठितम् ॥१३.१७॥
हृद्देशेऽर्जुन तिष्ठति ॥१८.६१॥
हृषीकेशं तदा वाक्यम् ॥१.२१॥
हृष्टरोमा धनञ्जयः ॥११.१४॥
हृष्यामि च पुनः पुनः ॥१८.७७॥
हृष्यामि च मुहुर्मुहुः ॥१८.७६॥
हे कृष्ण हे यादव हे सखेति ॥११.४१॥
हेतुः प्रकृतिरुच्यते ॥१३.२०॥
हेतुनानेन कौन्तेय ॥९.१०॥
हेतुमद्भिर्विनिश्चितैः ॥१३.४॥
हेतोः किं नु महीकृते ॥१.३५॥
ह्रियते ह्यवशोऽपि सः ॥६.४४॥